461

ब्रह्मसूत्र भाष्य

	:	: Brahma Sutra Bhashya.	: Title
	:	: Rama Kinkara (?)	: Author
	:	:	: Editor
	:	:	: Year, Vols.
	:	:	: Publisher
461	:	:	: Remarks

सू॰
१

॥ श्रीदुर्गादेव्यै नमः ॥ श्रीरामचरणद्वंद्वमद्वयानंदसाधनं ॥ नमामि यद्रजो योगात्पा
षाणोपि सुखं गतः ॥ संगतिः संशयः पूर्वपरपक्षौ तयोः फलं ॥ भाष्यस्य श्रुतयः सर्वाः
ः सूत्राण्येन वृशेषतः ॥ व्याख्यायांते स्फुटं न्यायैर्मतभेदोपि कुत्रचित् ॥ उच्यते सुखबो
धार्थं श्रीरामो वीक्षतामिदं ॥ इह खलु नित्याध्ययनविधिनाधीतस्वाध्यायमापातज्ञानवा
तं पुरुषार्थकामं रोहिकामुष्मिकफलेषु विरक्तमुपपन्नं मानः परकारुणिको मुनिः सूत्र
यामास ॥ अथातो ब्रह्मजिज्ञासेति ॥ १ ॥ अत्राथशब्देन साधनचतुष्टयसंपत्त्यानंतर्य
मुच्यते तद्यथेह कर्मचितो लोकः ॥ क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयत इत्या
दिकर्मफलानामनित्यत्वं परीक्ष्य लोकान्कर्मचितान् ॥ ब्राह्मणो निर्वेदमायान्नास्त्य
कृतः ॥ कृतेनेति वैराग्यं कर्मफलेषु दर्शितं ॥ शांतो दांत इत्यादिना शांत्यादि ॥ न च पु १

नरावर्त्तत इत्यादिना मोक्षस्य नित्यत्वेन तदिच्छा ॥ एतदानंतर्यमेव साधनचतुष्टयसंपत्त्यानंत
तर्यमथार्थान्मोक्षकामोधिकारी सूच्यते ॥ अतःशब्देन साधनचतुष्टयस्य संभावना ब्रह्मजि
ज्ञासेत्यनेनाऽज्ञातत्वेन विषयत्वं ज्ञातत्वेन प्रयोजनत्वं ब्रह्मण उक्तं भवति एवं चतुर्विधं तमेवज्ञा
वत्स्वरूपत्वं गतत्वाधिकार्यादिसमर्पकत्वेन समन्वयाध्यायविचारोपोद्घातत्वादादावस्य
सूत्रस्य संगतिः ॥ अथवा विधिविषयवेदांतवाक्यैः स्वार्थनिर्णयाभावस्यापेक्षणाच्छ्रुतिसं
गतिः एवं सर्वेषां सूत्राणां श्रुतिसंगतिः विशेषतो ब्रह्मपरवाक्यतात्पर्यनिर्णायकत्वाद्यस्त्व
कत्वाद्ब्रह्मविचारात्मकशास्त्रसंगतिः ॥ एवमग्रेपि शास्त्रसंगतिरूह्या अतो यावद्ब्रह्मजिज्ञा
सेत्यादिभिः सूत्रैः सर्वे वेदांता ब्रह्मपरा इति समन्वयप्रतिपादनात्तेषामध्यायं तत्समन्वयाध्या
यसंगतिः ॥ प्रथमपादे स्पष्टब्रह्मलिंगानां वाक्यानां विचार्यतादपादं पादसंगतिः ॥ न्यायमपाद ।

स्य सूत्रस्याधिकरणसंगतिर्नापेक्षिता ॥ एतदानन्तर्यं त्वितरेषामपेक्षितं तच्च तत्तदधिकरणाद्यु
स्तावेव वक्ष्यामः । तत्र तावदात्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इति वाक्यं द्रष्टव्य
इत्यात्मसाक्षात्कारफलकमवबुद्ध्य तत्साधनत्वेन श्रवणं विदधाति । श्रवणं नाम सर्वेषामुपनिष
द्वाक्यानामद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूलन्यायविचारः श्रवणम् । तादृशविचा
रात्मकं वेदान्तशास्त्रं समारम्भणीयं नवेति संदेहः सर्वत्र हि पूर्वोत्तरपक्षयुक्तिद्वयं संशयबी
जं द्रष्टव्यं । तत्र पूर्वः पक्षः शास्त्रं नारम्भणीयं विषयप्रयोजनशून्यत्वात् । तथाहि संदिग्धं वि
षयः ब्रह्म तु जीवात्मना ब्रह्मात्मना वा न संदिग्धं अहंप्रत्ययेन सत्यं ज्ञानमनन्तं ब्रह्मेति वाक्ये
न निश्चितत्वात् । नन्वतत्त्वमस्यादिवाक्यैरैक्यं प्रतिभासते नाहंप्रत्ययेन भेदावभासनात्सं
शयः । अबाधिताहंप्रत्ययविरोधेनैक्यश्रुतेरुपचरितार्थत्वात्तच्चाध्यस्तात्मविषयत्वमहंप्र

त्ययस्य स्वयंप्रकाशेऽप्यात्मन्यध्यासायोगात् । नापि प्रयोजनं उक्तरूपं ब्रह्मज्ञानेऽपि मुक्ते
रदर्शनात् । तस्माच्छास्त्रं नारम्भणीयमिति प्राप्ते राद्धान्तः । शास्त्रमारम्भणीयं विषयप्रयोजन
योः संभवात् । अहंप्रत्ययविरोधेन जीवाभिन्नब्रह्मणः संदिग्धत्वेन विषयत्वात् । न च श्रु
तेरुपचरितार्थत्वं उपक्रमादितात्पर्यलिंगसहकृतानेकवाक्यानामुपचरितार्थत्वायो
गात् मनुष्योऽहमित्यादौ परैरपि भ्रमत्वेन स्वीकारात् कर्तृत्वाद्यंशेऽपि श्रुतिबलाद्भ्रमत्वमास्थे
यमिति नाध्यासानुपपत्तिः । न केवलं संदिग्धत्वेनापि तु विपर्यस्तत्वेनापि विषयत्वं ननु स्व
यंप्रकाशस्यात्मनि कथं संदेहादिरिति चेत् । न स्वप्रकाशेऽप्यविद्यावरणात्तादृशेऽप्यात्मन्यध्यास
स्यानुभवसिद्धत्वात् स्वरूपज्ञानस्य तदविरोधित्वान्नापि फलाभावः यथावस्तुरूपसाक्षात्का
रस्येदानीं संभवेऽर्थसंभवे नादिशंकाकलंकितत्वेन निवर्तकत्वाभावेऽपि श्रवणमननिदि

सू०त्र० ३

ध्यासनैः शंकायां निरस्तायां ब्रह्मसाक्षात्कारेणाविद्यानिवृत्तौ प्रतिबंधकाभावात् तया च मु
क्तिः। तरति शोकमात्मविदित्येतद्यो वेद निहितं गुहायां सोऽविद्याग्रंथिं विकिरतीह सोम्येति।
तस्माद्विषयफलसंभवाच्छास्त्रमारंभणीयं चतुर्लक्षणं शास्त्रं प्रतिपाद्यं ब्रह्म चाध्यायेषु प्र
तिपाद्यानि समन्वयाविरोधसाधनफलानीत्युक्तं शास्त्रं ब्रह्मविचाराख्यमध्यायास्तु च
तुर्विधाः। समन्वयाविरोधौ साधनं च फलं तथेति। तत्र विवरणमतानुसारिणः सूत्रे क
र्तव्येति पदमध्याहृत्य व्युत्पत्तिं वदंति। तथाहि द्रष्टव्य इति परमपुरुषार्थसाधनं ज्ञानमनू
द्य तत्संकृत्वा तत्र श्रुतुपसर्त्यादिना ब्रह्मवेद ब्रह्मैव भवतीत्यादिना च मिलितविचारयोः सा
धनत्वेन प्राप्तौ श्रोतव्य इत्यनेन प्रकृतिन्नत्वणापोऽभिन्नात्मविचार एव साक्षात्कार
साधनमिति नियम्यते। एवं च नावेदविन्मनुते तं बृहंतं तमौपनिषदं पुरुषमित्यादिना ब्र।

ध्यातु विचारेण २

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलं। अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णये॥१॥

श्रवणं प्रमाणांतराभावान्मनननिदिध्यासनं सहकृतं विचारितं वेदांतवाक्यमेव हेतुरिति संप्र
दाये। तथा च विचारविध्यपेक्षिताधिकार्यादीनामागमिकत्वेपि न्यायेन निर्णयाय मिदं सूत्रं
तस्यानुवादकत्वेनार्थवत्कुं स्यादिति कर्तव्यपदाध्याहारः शास्त्रे पुरुषप्रवृत्तिसिद्धये श्रुति
सत्रस्यार्थः सारूप्याय वा। एवं संति जिज्ञासेत्यत्र प्रकृत्या साध्यतानभिजहद्लक्षणया प्रत्ययेनेच्छासा
ध्यविचारो जहत्लक्षणया बोधात इति नवीनमतं विवरणादिग्रंथेषु प्रकृतेः सिद्धताभिधानमात्रवा
चकत्वमंगीकृत्य साध्यताभिधानं लक्षणेत्युक्तं। तथा चायं सूत्रस्याक्षरार्थः। साधनच
तुष्टयसंपन्नस्य ब्रह्मज्ञानाय विचारः कर्तव्य इति ज्ञानस्य मोक्षहेतुत्वं। वेदांतानां विचार्यत्वं चा
र्थाल्लभ्यते तथा चोक्ताधिकारिणो मोक्षसाधनब्रह्मज्ञानाय वेदांतवाक्यविचारः कर्तव्य इत्या
र्थिकार्थ इति। मिश्रमतानुसारिणस्तु श्रुतिसूत्रयोरैकरूप्यनियमाभावं विषयप्रयोजन।

सू॰वृ॰ ज्ञानादेव पुरुषप्रवृत्तिसिद्धिं श्रवणविध्यसंभवं च मत्वा नो कर्तव्येति पदं नाध्याहर्तव्यमिति व ए॰
४ दंति तेषां मते साधनचतुष्टयसंपत्त्यनंतरं ब्रह्मज्ञानेच्छा भवति कर्मफलस्यानित्यत्वाद्ब्रह्म। १
ज्ञानात्परमपुरुषार्थश्रवणाच्चेति श्लोकार्थः ॥ ज्ञानस्य विचारसाध्यत्वाद्विचारकर्तव्यताज्ञि
ज्ञांति नस्तु प्युतइति विचारकर्तव्यतार्थिकोवेति ॥ अत्र विचारारंभवादिन उपायांतरसा
ध्यामुक्तिरिति फलं ॥ सिद्धांतिनस्तु विचारसंभवाद्ब्रह्मज्ञानसाध्यैव मुक्तिरिति फलं फलिभावः
एवं प्रथमसूत्रे ब्रह्ममीमांसायाः प्रतिपादितत्वात्तस्याश्च लक्षणप्रमाणसमन्वयाविरोध
साधघेस्यपत ॥ २ ॥ इति नफलविषयतयानेकविधे तेपि प्रथमं ब्रह्मणः शाखान्यायेन तल्ल
क्षणार्थमिदं सूत्रं जन्माद्यस्य यतः ॥ २ ॥ इत्यस्य पूर्वाधिकरणेन संदिग्धत्वाद्ब्रह्म विचार्यमि
त्युक्तं ॥ जन्मादेरन्यनिष्ठत्वेन ब्रह्मणो लक्षणाभावेन स्वरूपस्यैवाभावादित्येवं रूपाक्षेपसं ४

गतिः एवं पूर्वाधिकरणसिद्धांतयुक्तिरुत्तराधिकरणपूर्वपक्षयुक्तिश्चावेत्य यथासंभवमाक्षे
पसंगतिस्तत्र तत्रोह्या ॥ दृष्टांतप्रत्युदाहरणसंगती च सर्वत्र भवतः ॥ प्रकृते तु यथा संदिग्धत्वे
न हेतुना ब्रह्मविचार्यं एवं जन्मादेरन्यनिष्ठत्वेन हेतुना ब्रह्मणो लक्षणं नास्तीति दृष्टांतसंगतिः
यथा विचार्यत्वे हेतुर्न तथा लक्षणसद्भावे हेतुरस्तीति प्रत्युदाहरणसंगतिः ॥ पूर्वसूत्रस्य ब्र
ह्मलक्षणपरीक्षणात् तदेवानुफलं ॥ अस्येदं विषयवाक्यं ॥ यतो वा इमानि भूतानि जायंते येन
जातानि जीवंति यत्प्रयंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेति प्रयंतीति म्रियमाणानीत्यर्थः
अत्र तटस्थलक्षणं जन्मादिकं ब्रह्मलक्षणं भवति न वेति संदेहः ॥ जन्मादेः प्रपंचनिष्ठत्वेन ब्रह्मसंबंधा
भावान्न लक्षणत्वमिति प्राप्ते न च सत्यं ज्ञानमित्यादिवाक्यस्य सत्यत्वादिकं लक्षणं भवति
वाच्यं अप्रसिद्धत्वादिति प्राप्ते अभिधीयते जगज्जन्मादिकारणत्वं ब्रह्मणो लक्षणं तटस्थं सत्या

सू०वृ० दिकं स्वरूपलक्षणं ॥ न च लोकसिद्धमिवार्थतात्सत्यादीनामेकं ब्रह्मलक्षणत्वमप्रसिद्धमि- वृ० १
५ तिवाच्यं सत्यादिपदानामखंडार्थत्वेनैकब्रह्मपर्यवसायित्वेन लक्षणत्वसंभवादिति सूत्रा-
र्थस्तु ॥ जन्माद्यस्य यत इति ॥ जन्मादिर्यस्येति तद्गुणसंविज्ञानबहुव्रीहिः ॥ जन्मस्थितिभंगं समासार्थः ॥ सर्वं
सूत्रेस्य ब्रह्मपदानुषंगस्तत्पदाध्याहारस्तेनास्य प्रत्यक्षाद्युपस्थितस्य प्रपंचस्य जन्म-
स्थितिभंगं यतो भवति तद्ब्रह्मेत्यर्थः ॥ यद्यप्यर्थ्यभिचाराज्जन्मादिकारणत्वं प्रत्येकं लक्ष-
कं लक्षणं संभवति ॥ तथाप्युत्पादकत्वमात्रं निमित्तेपीत्युपादानत्वसिद्धयर्थं त्रयग्रहणं ना-
त्रयग्रहणे नैव तत्सिद्धेरौपचैत्यमिति वाच्यं न ह्युपादानत्वसंकल्पधर्मतयोच्यते ॥ किंतु
प्रकृतिविकारन्यायेनाद्वितीयब्रह्मसिद्ध्यर्थं एवं च नैवं तब्रह्मोपादानं कुलालवदधिको- श्री
तान्यएवास्तु राज्यस्थितौ राजवज्ज्ञान्यएव स्थितो कर्तास्त्वित्याशंकामाभूदिति त्रितयग्रह- ५

णं कृतमित्याह ॥ एवं जगत्कारणत्वेन ब्रह्मणः सर्वज्ञत्वमर्थादुक्तं तदाधिक्यं सर्वज्ञत्वं हेत्वंत-
रेण समर्थयितुमाह ॥ शास्त्रयोनित्वात् ॥ ३ ॥ शास्त्रं वेदस्तद्योनित्वं तत्कर्तृत्वं सर्वज्ञफल-
वेदकर्तृत्वादपि ब्रह्म सर्वज्ञमित्यर्थः ॥ अत्र सर्वज्ञत्वानिर्धारणं सर्वपक्षफलं ॥ तन्निर्धार-
णं सिद्धांतफलं ॥ अथवा वेदनित्यत्वाद्ब्रह्मणो विश्वयोनित्वानेति शंकामपाकर्तुं शास्त्र-
योनित्वमुच्यते ॥ अस्मिन्पक्षे शास्त्रे न प्रवृत्ति तयैव संगति ॥ सर्वस्त्वेवोक्तजगत्कारणत्वस्यैव
समर्थत्वात् ॥ अस्य महतो भूतस्य निश्वसितमेवैतद्यदृग्वेदो यजुर्वेदः सामवेदमित्यादि-
वाक्यमस्य सूत्रस्य विषयः ॥ अस्य नित्यसिद्धस्य ब्रह्मणो निश्वासवदनायासेनैव वेदः सि-
द्ध इत्यर्थः ॥ अत्र ब्रह्म वेदं करोति न करोतीति वेति संदेहे न करोतीति वाचा विरूप नित्ययेति नि-
त्यत्वश्रवणात् ॥ अस्ति न मन्ते विरूपेति देवतां संबोध्य नित्यया वाचा स्तुतिं प्रेयेति वाऽपि वि-

सू०३०
६

रूपते ॥ अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ॥ आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः ॥
इति स्मृतेः ॥ अतो न वेदकर्तृत्वं ब्रह्मणः किंतु जगद्योनित्वमिति प्राप्ते ॥ निःश्वसितन्यायेन वे
दोत्पत्तिश्रवणात् ॥ तस्माद्यज्ञात्सर्वहुत ऋचः समानि जज्ञिरे इति सर्वैर्यजुर्हयमानाद्य
ज्ञशरीरवाच्याद्ब्रह्मणो जज्ञिर इति वेदकर्तृकत्वे पौरुषेयत्वमुपपन्नमुचितो नेर्विघ्नपोनित्वं
एतद्गुरोर्धेनवाचेत्यादिश्रुतिस्मृत्योरर्थवादत्वं न तु वेदस्य सकर्तृकत्वे पौरुषेयत्वमुपप
न्यविरचितत्वानंगीकारादिति ॥ अस्य सूत्रस्य द्वितीयवर्णकं पूर्वसूत्रे जन्मादिकारणत्वक
थनेनोक्तसार्वज्ञं सकर्तृकं कार्यतावच्छेदकत्वानुमानमपि ब्रह्मणि प्रमाणमित्याशंकास्यात्
तस्मान्नदितीदमुच्यते ॥ ब्रह्मनमानांतरवेद्यं कुतः शास्त्रयोनित्वात् ॥ शास्त्रं वेदो योनिः प्रमाणं
यस्य तत्त्वादित्यर्थः ॥ तं त्वौपनिषदं पुरुषं पृच्छामीत्युपनिषद्वेद्यत्वश्रुतेः ॥ नावेदविन्मनुते

पृ० १
६

तं बृहंतमिति श्रुत्या स्पष्टं मानांतरनिषेधाच्च अनुमानं तु अनुकूलतर्कतया वोपयुज्यते ॥ नसु
तं चोगेत्यभिप्रायः ॥ ननु यतो वाचो निवर्तंत इति श्रुतेर्वेदवेद्यत्वं कथमिति चेन्न लक्षणावृत्तिवि
षयत्वेन शास्त्रप्रमाणितं चेतन्याविषयत्वेनाप्रमेयत्वमित्यविरोधात् ॥ पूर्वसूत्रे द्वितीयवर्णके ब्र
ह्मणः शास्त्रप्रमाणकत्वमुक्तं न तद्युक्तिप्रसमाधीयते तयाचाल्लोपसंतिः ॥ फलं तु पूर्वे पक्षे उप
निषत्सु मुमुक्षुप्रवृत्त्यनुपपत्तिः सिद्धांते प्रवृत्तिसिद्धिरिति वेदांताः कर्मशेषभूतकर्त्रादिपराः
उत नित्यशुद्धबुद्धमुक्तब्रह्मपरा वेति संशये न ब्रह्मपराः अहेयानुपादेयसिद्धब्रह्मपरत्वे
निःप्रयोजनत्वस्यापत्तेस्तयोः प्रसंगात् ॥ तदुत्पत्तिवारणाय कर्तृदेवतादिप्रतिपादनद्वारा क
र्मपरत्वमिति प्राप्ते राद्धांतः ॥ तत्तु समन्वयात् ॥ तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः ॥ तद्ब्रह्म वेदांतेषु तात्प
र्येण प्रतिपाद्यते कुतः समन्वयात् ॥ सम्यगन्वयः समन्वयस्तस्मात् ॥ अन्वयस्य सम्यक्त्वं ता

सू॰त्र॰ त्यर्थवत्तं वेदांतानां कर्त्रादिप्रतिपादकाः भिन्नप्रकरणस्थत्वात् ॥ नच प्रकरणभेदादुपासनादि प॰
७ विधिपराद्भुतिवाक्यं तत्त्वमस्यादीनां विधिरहितानां बहूनामुपलब्धेः ॥ स्वरूपज्ञानादपि नायं सर्पः
इत्यादिवदनर्थनिवृत्तेः ॥ प्रयोजनस्य सद्भावादपि विधिशेषत्वकल्पनायोगात् ॥ नच सापेक्ष
त्वं रूपादिविहीनस्य ब्रह्मणः प्रमाणांतरागम्यत्वेन तत्प्रतिपादकवेदांतानां सापेक्षत्वाभा
वात् तस्मादुपक्रमादिलिंगैर्वेदांतानां ब्रह्मपरत्वमेवेति उपक्रमादिकं चेह दृश्यते सदेव सो
म्येदमग्र आसीदेकमेवाद्वितीयं आत्मा वा इदमेक एवाग्र आसीत् ॥ तदेतद्ब्रह्मापूर्वमनपर
मनंतरमबाह्यमयमात्मा ब्रह्म सर्वानुभूः ब्रह्मैवेदममृतं पुरस्तादित्यादिश्रुतीनामयमर्थः ॥
सदित्यस्तितामात्रं बोध्यते एवेत्यवधारणे किं तदवधीयते तदाह इदमिति यदिदं व्याकृतं जग
त् ॥ तत्त्वग्रे उत्पत्तेः प्राक् सदेवासीत् अव्याकृतं सत्कारणात्मकं सदेवासीदित्यर्थः ॥ हे सोम्य ७

प्रियदर्शनेति पित्रा पुत्रः संबोध्यते शुद्धियाहात्स्य तत्त्वं प्रयिव्यादि प्रागुत्पत्तेर्मा भूत् अन्यत्तु महदा
दिसद्रूपमासीदेवेति नेत्याह ॥ एकमिति सतोन्यत्कार्यं नासीदेवेत्यर्थः ॥ तथा मृदो घटाकारप
रिणामयितृकुलालवज्जगन्निमित्तं सतोन्यदासीदित्याशंक्याह अद्वितीयमिति सतोपि निमित्तं विना
प्रधानवन्न हेतुतेत्याशंकास्तु त्यंतरमुदाहृतं ॥ आत्मा वा इदमित्यादि श्रुतीत्यात्मा मूलकारणं वेद
हेन प्रागवस्थास्मयति ॥ अवशिष्टमुक्तार्थं तस्य निर्विशेषतार्थं श्रुत्यंतरं ॥ तदेतदिति तद्ब्रह्मेनद्र
नेमायाभिरिति प्रकृतात्मोक्तः ॥ विधेयं ब्रह्मापेक्ष्य नपुंसकं एतद्ब्रह्मेत्यर्थः ॥ तत्किंलक्षणा
कं तदाह अपूर्वं कारणं यस्य नास्ति तदपूर्वं अकार्यमित्यर्थः ॥ अपरं कार्यं वास्तवं नास्तीत्यन
परं अकारणमित्यर्थः ॥ अंतरं जात्यंतरालेनास्तीत्यनंतरं एकरसमित्यर्थः ॥ तथाविधमन्यदपि
तस्य मस्ति किं नेत्याह अबाह्यमिति बाह्यमनात्मभूतं एवंविधमस्य नासीत्यबाह्यं अद्वितीयमि

सू.त्र०
१

त्यर्थः॥ तस्यास्परोक्षतामाहात्मयमिति तत्सर्वमित्यध्यर्थं चिन्मस्वरूपत्वमाह सर्वेति ब्रह्मात्मनासर्व
मनुभवतीति स्वनुभूः॥ स्वतु नाप्यस्यैश्वर्यकात्ताद्वैतमित्याशंक्याभ्युत्यंतरं ब्रह्मेतिमृत्पुरस्ता।
त्पूर्वस्यां दिश्यं ऽ ब्रह्मैवाविदुषां भाति तत्सर्वमिदममृतं ब्रह्मैव वस्तुत इत्यर्थः॥ एवं लौकिकवा।
क्यानां सिद्धेर्थे प्रामाण्यमभ्युपगच्छतां वेदांतेषु विधिपरत्वं विना न पेक्षितफलवत्वं च न जन्य
न इति वदतां वेदांतेभ्यो ब्रह्मसिद्धिमनंगीकुर्वतां मतं ब्रह्मणो मानांतरागम्यत्वात् सिद्धवस्तु।
ज्ञानात्फलाभावस्याप्युक्तं संप्रति सिद्धे व्युत्पत्तिमनिच्छतां उपास्तिविधिद्वारा वेदांतेभ्यो ब्रह्मसिद्धि
मिच्छतां मतनिरासाय वर्णकांतरमारभ्यते तत्र वेदांता विधेयोपासनाविषयतेन ब्रह्म समर्प।
यंति उत साक्षादिति सिद्धे व्युत्पत्त्यभावभावाभ्यां संशये पूर्वपक्षः॥ प्रवृत्त्यादिलिंगाभावान्नास्ति।
द्धे व्युत्पत्तिः संभवति न सिद्धं ब्रह्म परा वेदांताः किंतु प्रवृत्तिपरस्यैव शास्त्रत्वेन सिद्धब्रह्मपरत्वे शास्त्र

सू०
१

१

त्वं च न संभवति॥ नापि प्रयोजनवत्वं॥ अहं ब्रह्मास्मीति ज्ञानेसत्यपि प्रयोजनस्य संभवाद्दर्शनात्
यद्येवं तत्ज्ञानात्प्रयोजनवत्वे सिद्धे तर्हि मननादिविधानं न स्यात् तस्मादात्मेत्येवोपासीत ब्रह्मैव
भवति ब्रह्मैव भवति ब्रह्मभवनकामो ब्रह्मवेदनं कुर्यादित्येवमादिविधिषु कोसावात्मेत्याकां
क्षायां तत्समर्पकत्वेन सर्वे वेदांता उपयुज्यंते॥ उपासनासाध्यश्च मोक्ष इत्युच्यते तत्तु समन्व।
यात्॥ तद्ब्रह्म साक्षाद्वेदांतप्रतिपाद्यं कुतः समन्वयादित्यर्थः॥ न तावदुपासनासाध्यो मोक्षः
उपासनायास्तारतम्येन तत्साध्यमोक्षस्यापि तारतम्यमनित्यत्वं च स्याद्विधेयकर्मफल
भोगस्थानशरीरस्यावश्यकत्वेन मोक्षेपि शरीरं स्यात्॥ किंचाशरीरं वाव संतं प्रियाप्रिये
स्पृशत इति मुक्तस्यापि प्रियाप्रियस्पर्शनिषेधो न स्यात्॥ मोक्षस्य धर्मफलत्वे न तस्यैव प्रियस्य वि
द्यमानत्वात्॥ श्रुत्यर्थस्तु वस्तुतोऽशरीरं संतमात्मानं वैषयिके सुखदुःखे नैव स्पृशतः वावे

त्यवधारणादिति ।। ननु धर्मजन्याशरीरत्वाख्यमोक्षातिरिक्तसुखादिनिषेधपरमिदं वाक्यमिति
चेन्न अशरीरं शरीरेष्वनवस्थेष्ववस्थितं महांतं विभुमात्मानं मत्वा धीरो न शोचति ।। अप्राणो ह्य-
मनाः शुभ्रः ।। असंगो ह्ययं पुरुष इत्यादिश्रुतिभ्योऽशरीरत्वस्य स्वाभाविकत्वावगमात् ।। श्रुती-
नामयमर्थः ।। वस्तुतोऽस्थूलं शरीरं तत्र हेतुः ।। शरीरेष्विति । अनवस्थेष्वनित्येषु अवस्थितं नि-
त्यं ।। तत एव हेत्वंतरं महांतमिति निरतिशयमहत्त्वं दर्शयति ।। विभुमिति मनन्तं व्यापिनं पृ-
त्याह ।। आत्मानमिति ईदृशमात्मानं मत्वा धीरो भवति ।। न हि तन्मतिं विना शरीरमंतव्यमनेन पृथ्य-
धीरत्वं न च शोकोपलक्षितं संसारमनुभवतीत्यर्थः ।। सत्त्वमशरीराभावेऽपि कृतिरप्राणादि तिक्रि-
याशक्तिमान्प्राणोऽस्य वस्तुतो नास्तीति ।। तन्निषेधात्तत्स्वभावानि सार्थानि कर्मेंद्रियाणि नि-
षिद्धानि ।। तदभिप्रायेणाह शास्त्र ।। ज्ञानशक्तिमन्मनोऽस्य वस्तुतो नास्तीति तन्निषेधात्तत्स्वभा-

नानि ज्ञानेंद्रियाणि सार्थानि निषिद्धानि ।। अनंतरावशुभ्रः शुद्ध इत्यर्थः ।। सयत्तत्र किंचित्पश्य-
त्यनन्वागतस्तेन भवतीति स यत्त्राद्रिक्त न कर्मस्वकर्तृत्वमिति उक्तेऽर्थे हेतुरुच्यते असंग इति श्रुत्या स्व-
र्गतरेणाप्युच्यमानं स्पंदते ।। आत्मानुरूपत्वान्मूर्तेन स्पृश्यन्ते तस्मच्छरीरादिना केनचिद्युज्य-
ते अतो न कर्तेत्यर्थः ।। एवं स्वाभाविकाशरीरतापरपर्यायमोक्षाख्यब्रह्मणि सुखादिसंस्पर्श-
भावे श्रुतं तरमपि अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात् ।। अन्यत्र भूताच्च भव्याच्च
यत्तत्पश्यसि तद्वदेति धर्मात्तत्फलाच्च सुखादेरधर्मात्तत्फलाद्दुःखात् ।। कृताकृतात्कार्यात्कृ-
तात्कारणात् ।। भूतात्तात भव्याद्भाविनः ।। चशब्देन विद्यमानाद्वर्तमानादित्यर्थः ।। एतत्समवसि-
स्यप्रश्निति यावत् ।। एवंरूपं यत्पश्यसि तद्वदेति मृत्युं प्रति नचिकेतसो वचनं ।। अपि च मोक्षस्य
कर्मफलत्वे स्वर्गादिवदनुष्ठानुपादेयत्वं न स्यात् ।। विद्याकेवले भवति तीयं ते चास्य कर्मा-

स्त्र०
१०

णि तस्मिन्दृष्टे परावरे च आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति अभयं वै जनक प्राप्तोसि ।
तदात्मानमेवावेदहं ब्रह्मास्मीति । तस्मात्तत्सर्वमभवत् । तत्र को मोहः कः शोक एकत्वमनु
पश्यतः । तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेतीत्येवमादीनां ब्रह्मविद्या
कार्यं जगदेवमोहं दर्शयंतीनां बाधः स्यात् । कर्मफलानां कालांतरभवित्वनियमात् । श्रुतीना
मर्थस्तु यो ब्रह्म प्रत्यक्षो न वेद साक्षात्करोति स तदेव वैद्यं ब्रह्म भवति स्वप्नवदिति तस्मिन्पर
मात्मनि परं कारणं च परं कार्यं तद्रूपे तदधिष्ठाने प्रत्यक्षेण साक्षात्कृते सत्यस्य पिंड्षः स्वभु
क्तफलानि कर्माणि क्षीणानि भवंति ब्रह्मणो रूपमानंदं विद्वान्न पहेत भावान्निर्भयो भव
ति । इति ब्राह्मः श्लोकः । इदं सगुणार्थः हे जनक त्वमभयं ब्रह्म प्राप्तोसि वत्स साक्षात्कारवतात्तत्पद
स्मिन्देहे जनस्तर्यवत्प्रविष्टं ब्रह्म जीवाख्यं तदाचार्येणावोधितमात्मानमेव सर्वकल्प

सू०

१०

नातीतं भवेत् । विदितवत्कथं स्वहं ब्रह्माद्वितीयमस्मीति । तस्मात्तज्ज्ञानात्स्वज्ञानकृतात्स
र्वं त्वादितिद्वस्यात्तद्ब्रह्मपूर्णात्मनावस्थितमासीत् । यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजा
नत इति यः सर्वात्मभावो विद्याव्यंग्यत्वेनोक्तस्तत्रात्मनि तद्वीक्षणेन तदात्मैकामुपदेशेन पा
ज्ञानः । शोकाद्युपलक्षितः संसारो नेति तत्र तद्लक्ष्यं ब्रह्मण तदात्मत्वेनावस्थितमहमा
स्मीति पश्यन्नस्मादेव दर्शनादृषिर्वामदेवाख्यः परं ब्रह्माविद्याध्वंसद्वारा प्रतिपेदे ह प्रतिपन्न
वान् । किलेति ह शब्दोच्यवक्षाने न संबध्यते स चास्मिन्दर्शने स्थितः । सर्वात्मभावप्रकाशका
नहं मनुरभवत्स्यामिदीन् मंत्रान्स्वदर्शदित स्म ब्रह्मधर्मविधेयात्तत्फलं च न नवैधमिति गम्य
ते तयां हित्वं हि नः पिता यो स्माकमविद्यायाः परं तारयसि । श्रुतं ह्येव मे भगवद्दृशेभ्यः तरति
शोकमात्मविदिति । सोहं भगवः शोचामि तं मा भगवान् शोकस्य पारं तारयतु तस्मै मृदि

तकषायायतमसः पारं दर्शयति ॥ भगवान् सनत्कुमार इत्याद्याः श्रुतयो ब्रह्मविद्याया विद्या
निवृत्तिद्वारा मोक्षहेतुत्वं दर्शयंति अविद्यानिवृत्तत्वं च प्रमाणवस्तुपरतंत्रज्ञानस्यैवेति न
विधेया ब्रह्मविद्या तत्फलं च न विधेयसाध्यमिति शूपपन्नमतः पादयोः प्रणम्योचिरे त्वं हि
नः ॥ पितेति त्वं पिष्पलादाहारस्य गुरुं विद्यानिष्क्रयार्थमन्यदननुरूपं पश्यंतः पादयोः प्रणा
म्योदिरे त्वं हि नः ॥ पितेति त्वं खल्वस्माकं पिता ब्रह्मदेहस्याजरामरणस्य विद्यया जनयितृत्वा
त् ॥ पितरौ तु देहमात्रमेव जनयतः ॥ जनयितृत्वमपि सिद्धस्यैवाविद्यानिरासादित्याह ॥
यस्त्वमस्मानऽविद्यामहोदधेः परं पुनरावृत्तिरूपं पारं तारयसि ॥ प्रापयसि विद्याप्लवेने ॥
ति श्रुतं हीत्यादिता रयत्वित्यंतमुपक्रमस्यं शेषमुपसंहारस्य [illegible] ॥ द्यामिति भेदः ॥ मेममन
वहशेभ्यः ॥ भगवत्तुल्येभ्यः श्रुतमेवं यदात्मविच्छोकं मनस्तापमकृतार्थबुद्धिं तरतीति सोऽहं ॥

मनात्मविच्छोचामि अतस्तं मां शोचंतं शोकसागरस्य पारमंतं तारयतु भगवानात्मज्ञा
नोडुपेनेति नारदेन प्रेरितः सनत्कुमारस्तस्मै नारदाय मृदितकषायाय वैराग्यादिनाह्नाभिम
गादिसमस्तदोषयोग्याय तमसः ॥ अविद्यायाः पारं परमात्मतत्त्वं दर्शितवानिति न तु ब्रह्मैवा
धेयमस्तु मुक्तेः फलस्य सत्वात् ॥ न च ब्रह्मणोऽकारकत्वाद्विधेयत्वाद्विवेदो वेदेत्यादिना कर्म
त्वप्रतीतेरिति चेन्न फलासंभवस्योक्तत्वात् ॥ ब्रह्मणः कृतित्वात्साध्यत्वेन विधेयतानुपपत्तेश्च ॥
नापि कर्मत्वं किं विदिक्रियाकर्मत्वमुतोपासनाकर्मत्वं नाद्यः अन्यदेव तद्विदितादथो अविदिता
दधि येनेदं सर्वं विजानाति तं केन विजानीयादित्यादिना विदिक्रियाकर्मत्वप्रतिषेधात् न द्वि
तीयः तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासत इत्युपासनाकर्मत्वप्रतिषेधात् तत्कृत्पर्यस्तुप्पन्न
त ब्रह्म विदिताज्ञायादन्यदेव अथो अपि अविदिताकारणाद् अप्यन्यदेव अधि उपरिष्टादप्य

स्तृ॰ १२

न्यदेवेति येन प्रमाणेनेदं सर्वं वस्तु लोको जानाति तं केन करणेन जानीयात् करणस्य तेयवि- पृ॰ १
षयत्वात्तत्तात्पर्यप्रवृत्तेः ॥ तस्मान्नज्ञातातेयः किंसाक्षीति ॥ पद्य ॥ चानभ्युदितं येन वागभ्युद्य-
तइति स्वविषयत्वमुक्तान्तदेवेतिप्रमाणादेः कल्पनामपोह्यात्मरूपं तं ब्रह्म महत्तममिति त्वं
विद्धि यदुपाधिविशिष्टं देवतादिकमिदमित्युपासते जनाः ॥ नेदं तं ब्रह्म विद्धीत्यर्थः ॥ इति स्वब्र-
ह्मणोऽकर्मत्वं गम्यते ॥ यस्यामतं यस्य मतं यस्य न वेद सः ॥ अविज्ञातं विजानतां विज्ञानतांवि-
ज्ञातमविजानतां ॥ न दृष्टेर्द्रष्टारं पश्येः न विज्ञातेर्विज्ञातारं विजानीया इत्यादिष्वनयः स्वविषयत्वं
बोधयंति यस्य ब्रह्मामतं अविषय इति निश्चयस्तस्य तन्मतं सम्यक् ज्ञातं यस्य मतं विषयत-
या ज्ञातं शक्यं ब्रह्मेति धीः ॥ नासौ तद्वेद भेदधीमत्वात् ॥ एवमेवेति नियमार्थमुक्तार्थमनुवदत्य-
विज्ञातमिति श्रुतिः ॥ विषयतयाऽज्ञातमेव ब्रह्म सम्यक् ज्ञातं विशेषज्ञानवतां ज्ञातमेवाविषयत- १२

याययावदजानतामिति बुद्धिमान् विषयतया न जानाति मूर्खस्तु विषयतया जानातीति तात्प-
र्यार्थः ॥ दृष्टेश्चक्षुर्जन्यायाः अकर्मत्वतायाः द्रष्टारं स्वभावभूतनित्यदृष्ट्याख्यात्रारं दृश्यया स्वनया
दृष्ट्या न पश्येः विज्ञातेर्बुद्धिधर्मस्य निश्चयस्य विज्ञातारं साक्षिणं तथैव वेद्यया विज्ञात्या न विजा-
नीया इति मैत्रेयीं प्रति याज्ञवल्क्यवचनं ॥ नन्वविषयाते कं यज्ञास्त्वप्रमाणकत्वमिति चेन्न शा-
स्त्रस्याविद्याभावोतिष्टं स्वरूपातिशयवत्तेन तद्विषयत्वं संभवादिति ॥ किंच ॥ न तावद्विधेयक्रिय-
योत्पाद्यत्वं मोक्षस्य स्वरूपत्वेनानादित्वात् विकार्यत्वं स्वविकार्येपि मुच्यत इति श्रुतेः । नाप्या-
प्यत्वं नित्याप्तत्वात् ॥ नापि संस्कार्यत्वं निर्गुणत्वेन गुणाधानलक्षणसंस्काराभावात् नापि दो-
षापनयः ॥ संस्कारः संभवति ब्रह्मणि क्रियायाः स्वभावेन स्वनिष्ठक्रियया दोषापगमायोगात्
स्वन्यनिष्ठक्रियया अन्यस्य संस्कारायोगात् ॥ ननु देहनिष्ठक्रियया आत्मनि संस्कारो दृष्ट इति चेन्न दे-

हादिसंहतनिष्क्रियपातस्यैव संस्कार्यत्वं तत्फलभोक्तृत्वं चेत्यवगमात् ॥ न चायं श्रुतिः ॥ आ
त्मेंद्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिण इति ॥ आत्मीयशरीरमात्मेत्युच्यते ॥ तथा च शरीरश
रीरादिसंयुक्तमात्मानं भोक्तेति मनीषिण आहुरित्यर्थः ॥ यद्वा ॥ आत्मा भोक्तेत्याहुरिति
संबंधः ॥ इंद्रियेत्यादि क्रियाविशेषणं ॥ आत्मनि दोषाभावाच्च न दोषनिवृत्तिः संस्कारः सं
भवति निर्गुणत्वे निर्दोषत्वे श्रुतिरेव मानं ॥ यथाहि एको देवः सर्वभूतेषु गूढः सर्वव्यापी स
र्वभूतांतरात्मा ॥ कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्चेत् स पर्यगाच्छु
क्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धं अनयोर्मंत्रयोरयमर्थः ॥ श्रुतिचयस्य ब्रह्मरू
पाद्यापं त्मनमिदं प्रत्याह ॥ एक इति जाड्यं प्रत्याह देव इति ज्ञानघन इत्यर्थः ॥ आदित्यादिवै
षम्यमाह ॥ सर्वेति तर्हि किमिति न प्रतीयते तत्राह ॥ गूढ इति अनादिमायया पाछन्न इत्यर्थः त

तद्भूतावच्छिन्नत्वेन परिच्छिन्नत्वे नेत्याह ॥ सर्वव्यापीति नभोवन्नारस्यांवारयति सर्वभूतांतरात्मे
ति सर्वेषु भूतेष्वंतः स्थितस्य तत्तत्क्रियाकर्तृत्वं नास्तीत्याह कर्माध्यक्ष इति ॥ सर्वकर्मसाक्षीत्यर्थः
सर्वभूतेष्वित्यादिना भूतानां पृथग्युक्तेः सद्वितीयत्वमाशंक्याह ॥ सर्वेषां भूतानामधिवासोऽधिष्ठा
नं न च कश्चित्तमधिष्ठानाद्यंतरमित्यर्थः ॥ न केवलं कर्मणामेवाध्यक्षः ॥ अपितु तत्कर्तृणा
मपीत्याह ॥ साक्षीति साक्षित्वे हेतुमाह चेतेति ॥ चित्स्वभाव इत्यर्थः ॥ केवलो द्वयविवर्जितः अ
द्वितीयः निर्गुणो ज्ञानादिगुणरहितः ॥ चकारो दोषाऽभावसमुच्चयार्थः ॥ गुणदोषाभावे मंत्रां
तरं स पर्यगादिति सः ॥ यस्तु सर्वाणि भूतानीति प्रकृत आपरितः समंतात् अगात् सर्वतो
गत इत्यर्थः ॥ शुक्रमित्यादिशब्दाः पुल्लिंगत्वेन नेयाः स इत्युपक्रमात् ॥ शुक्रो दीप्तिमान् अ
कायो लिंगशरीररहितः अव्रणः अक्षतः अस्नाविरः अनाडीकः अम्यां स्थूलदेहाभाव उक्तः

॥

सू०त्र०
१४

शुद्धो रागद्वेषादिगुणरहितः अपापविद्धो धर्माधर्मविधुरः। तस्मान्न संस्कार्यो मोक्षस्तस्मान्न कर्तव्य प०
विधिशेषतया ब्रह्मोपदेशासंभवः॥ यत्तु सिद्धे प्रवृत्त्यादिलिंगाभावान्न शक्तिग्रह इति॥ तन्न प्रवृ १
त्तिनिवृत्ती एव लिंगमिति न नियमः पुत्रस्ते जात इत्यादौ हर्षादिलिंगेपि शक्तिग्रहसंभवात्॥ यत्तु
प्रवृत्त्यादिपरस्यैव शास्त्रत्वमिति तदपि न हि तथा सनकादीनां शास्त्रत्वोपपत्तेः नापि फलाभा
वः ब्रह्मात्मसाक्षात्कारस्य मोक्षफलकत्वात्॥ तादृशसाक्षात्कारार्थं मननादिसार्थकं चेति नक
थंचिदपि विधिप्रवेशः ब्रह्मात्मावगतेः प्रवृत्त्यादिनिरपेक्षायामोक्षहेतुत्वं श्रुतिरपि दर्शयति॥
आत्मानं चेद्विजानीयादयमस्मीति पूरुषः किमिच्छन् कस्य कामाय शरीरमनु संज्वरेदिति
अयं परमात्माहमस्मीत्यपरोक्षतया यदि कश्चित्पुरुषो विजानीयात्॥ स्वात्मसाक्षात्कारस्तोऽन्
न्यद्योतीनेछह्ह॥ मत्सातिरिक्तमात्मनः किंफलमिच्छन् कस्य वा पुत्रादेः कामाय फलायतद्वा १४

मेन शरीरं तप्यमानमनु तदुपाधिः सन् संज्वरेत् न येनेति न तु शारीरत्वाख्यमोक्षस्य स्वाभाविकत्वंसि
द्धवत् तत्र धर्मजन्यत्वमित्युक्तं तदयुक्तं शारीरत्वाख्यमोक्षस्य स्वाभाविकत्वं सिद्धस्याभावेन॥
धर्मजन्यत्वसंभवादिति चेन्न सशरीरत्वस्य मिथ्यात्वेनाशरीरत्वस्य स्वाभाविकत्वात्॥
तथा च ब्रह्मविद्विषया श्रुतिः॥ तद्यथाहिर्निर्ल्वयनी वल्मीके मृता प्रत्यस्ता शयीतैवमेवेदंश
रीरं शेते अथायमशरीरो मृतो प्राणोऽप्राण इवेति च ब्रह्मैव तेज एवेति सचक्षुरचक्षुरिवस
कर्णोऽकर्ण इव सवागवागिव समना अमना इव सप्राणोऽप्राण इवेति च अनया श्रुत्याहं ब्रह्मा
स्मीति ज्ञाने सत्यपि मुक्तिर्न दृश्यते॥ किंतु॥ यथापूर्वं संसारित्वमेवेति शंकापि परिहृता भवति श्रु
त्योरर्थस्तु अत्र ब्रह्म समश्नुत इति श्रुतिवाक्ये जीवन्मुक्तिरुक्ता तज्जीवन्मुक्तो देहस्तोऽपि पूर्ववन्न संस
रतीत्यत्र दृष्टांतमाह॥ तद्यथेति तत्र जीवन्मुक्तदेहे इह शरीरे हे इह शान्तोपययेति॥ यथा लोके अहि

सू.वृ.
१५

निर्ल्वयनी सर्पविमुक्ता त्वक् वल्मीके प्रत्यस्ता पतिता सा यथा सर्वमिव सर्पेणात्मत्वेनाऽगृहीता वर्त्त
ते एवमेवेदं विदुषो देहं शयितं प्राणिवाऽत्मत्वेनागृहीतं तिष्ठतीत्यर्थः॥ तस्मात्साम्यं शरीरस्योक्तस
र्पसाम्यं शरीरं विदुषो दर्शयति॥ अथेति तथा यत्कोयमशरीरः पूर्वापरप्रस्तावात्वच महिरहमितिना
भिमन्यते तथा यं जीवन्मुक्तो देहेऽपि न तथाहंधिया पश्यतीत्यशरीरः॥ अशरीरत्वादेवा
मृतः देहाभिमानवतो हि मृतिः निरुपाधिकः सन् प्राणितिजीवतीति प्राणः साक्षी स च ब्रह्मै
व तेज एव तेजो विज्ञानज्योतिः॥ अनयास्मृत्यन्देहस्य मिथ्यात्वं दर्शयित्वा सचक्षुरचक्षुरिवेति श्रुत्या
लिंगशरीरस्य मिथ्यात्वं दर्शयति वस्तुतोऽचक्षुरपि बाधितचक्षुरनुवृत्त्या सचक्षुरिवेत्या
दि योजना तस्माद्वेदांताः साक्षात्स्वब्रह्मणि समन्वयं गतान विधिशेषा इति सिद्धं ब्रह्म स्वतंत्रमेवा
शास्त्रप्रमाणकमिति॥ एवं चतुर्भिः सूत्रैः सर्वज्ञं सर्वशक्तिजगत्कारणं वेदांतप्रतिपाद्यं ब्रह्मेत्यु

सू°
१

१५

क्तं वस्तु तत्सत्त्वे तन्न मच्चेतनं चेतिसंशयः॥ तत्र सांख्याः कूटस्थब्रह्मणो ज्ञातृत्वाऽभावान्नजगत्
कारणं प्रधानस्य तु तत्त्वात्कजगत्कारणं सत्वं गुणमादाय ज्ञानशक्तिमत्त्वं त्रिगुणत्वात्क्रियाश
क्तिमत्त्वं ब्रह्मणोऽकर्तृत्वान्न क्रियाशक्तिः तस्मात्सर्वज्ञं सर्वशक्ति प्रधानमेव तदनुवादका वेदांता
इति वदंति तन्मतनिरासार्थमिदं सूत्रमारभ्यते॥ ईक्षतेर्नाशब्दं॥ ५॥ सांख्यपरिकल्पितं प्रधा
नं जगत्कारणं न भवति तत्र हेतुरशब्दमिति हेतुगर्भविशेषणमेतत्॥ अशब्दत्वादवेदप्रमाणकत्वा
दित्यर्थः॥ वेदाऽप्रमाणकत्वे हेतुरीक्षतेरिति क्षधातुवाचकेक्षतिशब्देन लक्षणया धात्वर्थेक्षणपतः
ईक्षितृत्वश्रवणादित्यर्थः॥ अस्यानारंभे प्रसंगतिः फलं च प्रधानैक्यं सत्पदप्राप्तिः पूर्वपक्षे।
सिद्धांते तु ब्रह्मैक्यप्रमितिरिति विवेकः एवं हि श्रूयते॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वि
तीयं इत्युपक्रम्य तदैक्षत बहु स्यां प्रजायेयेति तत्र प्रधानस्यैवोपक्रमेऽद्वितीयत्वस्य वर्णनं विरुध्ये

सूत्र० तइतित्रगुणस्याचेतनधर्मत्वात्॥नचब्रह्मणोज्ञानक्रियाशक्त्युऽभावः॥स्वविद्यामहिम्नासर्व सू०
१६ स्याप्युपपत्तेः॥नतप्रधानपरमाणुवैरेकईश्वरःसद्वितीयईक्षितेतिपातंजलादिमतनिराक १
रणार्थंश्रुतावेकपदस्मुपादानस्यचेतनत्वार्थंतदैक्षतेतिउपादानत्वार्थंबहुस्यामिति॥एव
मैतरेयश्रुतिः॥आत्मावाइदमेकएवाग्रआसीन्नान्यत्किंचनमिषत्॥सईक्षतलोकान्नु
सृजाइतिसइमाल्लोकानसृजतेतिर्हित्रगुणसर्वकामेवसृष्टिमाचष्टेमिषत्चलत्सत्ताकं
तमितियावत्एवंसर्वत्रेक्षणपूर्वकसृष्टिश्रवणाद्ब्रह्मैवजगत्कारणमितिनत्रिगुणमाचे।
णनब्रह्मजगत्कारणमितिनिश्चयः॥तत्तेजऐक्षततताआपऐक्षंतेत्यचेतनयोरप्तेजसोरीक्ष।
णश्रवणात्तत्समभिव्याहारात्प्रधानेपिईक्षतिर्गौणइतिचेन्नेत्युच्यते॥गौणश्चेन्नात्म।
शब्दात्॥६॥अप्तेजसोरिवप्रधानेईक्षतिर्गौणीइतिचेत्तन्नकुतः॥आत्मशब्दात्॥आत्म १६

श्रवणादित्यर्थः॥सदेवसौम्येदमग्रआसीदित्युपक्रम्यतत्तेजोसृजतेतितेजोबन्नानां।
सृष्टिमुक्त्वातदेवप्रकृतंसदीक्षिततानिचतेजोबन्नानिदेवताशब्देनपरामृश्याहसेयंदेवतैक्ष
तहंताहमिमास्तिस्रोदेवताअनेनजीवेनात्मनानुप्रविश्यनामरूपेव्याकरवाणीतिश्रुतिः
तत्रयद्यचेतनंप्रधानमेवेक्षितृतयासेयंदेवतेतितस्यैवपरामर्शात्॥तदात्मत्वेनजीवकी।
३ र्तनमनुपपन्नंस्यात्॥आत्माहिस्वरूपंनचचेतनोजीवोऽचेतनस्यात्माब्रह्मणितुजीवविष
यआत्मशब्दउपपद्यतेयएषोणिमैतदात्म्यमिदं॰सर्वंतत्सत्यंसआत्मातत्त्वमसिश्वे।
तकेतोइतिश्वेतकेतोजीवस्यात्मत्वात्मोपदेशात्नहिचेतनस्याचेतनात्मेदशःशक्यः
नचाप्तेजसोर्गौणेक्षणश्रवणान्नात्रापिवितत्तेनतदैक्षतेत्याद्यौगौणेक्षणमेवेतिवाच्यंसंज्ञा
यस्यजगदवस्थायपावस्थनिश्चायकत्वेप्रकृतेनुगौणमुख्यप्रयोगेणिस्यजघन्यत्वेनसंज्ञायामा

सू०त०
१७

वात्॥ अत एव भगवान् जैमिनिः विरोधेप्यपदर्शनादिति संशयस्य लेशोऽप्यपदर्शनीयस्य निरस्य निगमयन्क पृ०
त्वमाह॥ अस्य न्नेजसोस्तु नैवं मुच्यते किंचित्कारणमुक्ती तिगोणामीश्वराणां कूलं पिपतिषतीतिवत्
श्रुत्यर्थस्तु अस्याकाशो वायुश्च सृष्टानस्तु देवेषु प्रकाते सच्छब्दवाच्यं ब्रह्म तेजः॥ सृष्टवदिति प्रकृ
तसदात्मा परामृश्यते सेयमिति सन्निहिते स्थितपरामर्शाद्देवते त्यस्तु ऽन्यो किमुकं कमी त्याग
मभिनयतीहंतेति सृष्टिवाक्ये नोक्तानि वै जीवत्वानि परामृशति इमास्तिस्रः स्मृतास्तिस्रो
देवतामपास्यद्य इत्यर्थः॥ स्त्रत्वेन परोक्षत्वा देवताशब्दप्रयोगः तासां व्यवहारांगतं कथं
मित्यत आहानेनेति पूर्वसृष्टानुभूतेन प्राणधारणनिमित्तेन जीवेनात्मना नामरूपे गोक्तदेवतास
गतिं तरं नामरूपं चेति विस्पष्टमासमंताकरवाणीति पराधिदेवते स्थितवतीत्यर्थः॥ यःस
दाख्यः सएषोऽणिमा अणुरित्यर्थः दुर्विज्ञेय इति यावत् एतदात्म्यमेतदात्मकं भावमादि १७

त्योरभेदात् परमसूक्ष्मं सर्वात्मकं सदेव सत्यं पारमार्थिकं तत्त्वं स एव सर्वस्यात्मा निरूपचरि
तस्वरूपं हे श्वेतकेतो त्वं च संसारी नासि किंतु तदेव ब्रह्मेत्युक्त स्तोजनानतात्मशब्दोपि प्रधानेगो
णोस्तु नानार्थकतया मुख्यो वेस्य तत्राह॥ तन्निष्ठस्य मोक्षोपदेशात्॥ ७॥ न प्रधानमात्मशब्दवा
च्यं तत्सत्यं स आत्मेति प्रकृतं सर्वाणिमानमादाय तत्त्वमसि श्वेतकेतो इति श्वेतकेतोश्चेतन
स्य मोक्षयितव्यस्य तन्निष्ठतामुपदिश्य आचार्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमो
क्ष्येऽथ संपत्स्य इति मोक्षोपदेशात् यदि ह्यचेतनं प्रधानं सच्छब्दवाच्यं तं मुमुक्षुं श्वेतकेतुं चेत
नं तत्त्वमसीति ग्राहयेत् हे श्वेतकेतो चेतनस्त्वं चेतनोस्मीति तदा शास्त्रं प्रमाणं स्याद् चेत
नोस्मीति ग्राहयमाणो मोक्षाच्छाद्यते ताऽनर्थं चेपात यात्र शास्त्रं तु मन्मतप्रलापो भवेत्॥ न तत्
निष्ठं तस्मादात्मशब्देऽचेतनप्रधानप्रतिरेकादापरोक्षप्रतिबंधकनिवृत्तिमाह॥ श्रुतिराचार्यवान्पुरुष

इतिउक्तप्रमित्या सर्वबंधनिवृत्त्या देहादिहश्रिरपि निवृत्तिं प्राप्ता प्रारब्धकर्मणागतहस्यतुवृत्तिमा
हतः॥ स्येति कथं तर्हि प्रारब्धकर्मनिवृत्तिरित्याशंक्याभोगादित्याह भोवदेति प्रारब्धभुक्त्वा वा
पि कथं देहादिध्रुंम इत्याशंक्याह प्रतिवंधादित्याह॥ अथेति कृतन्नमनूरूपस्तुमपत्रत्रयमपु
रूपेणांदसतादिदितु तुस्थूलारुंधतीन्यायेन प्रधानोपदेशद्वाराच्चात्मोपदेशोपमस्तुतन्नाह
हि यत्तावच्चनास्त्व॥ न॥ प्रधानात्मैव प्रधानं सदुद्दवाच्यं सच्छब्दवाच्यात्तत्त्वमसि इतीहोपदिष्टं स्यात्
स तदुपदेशाश्रवणादनात्मज्ञतयातन्निष्ठामाभूदिति सुज्ञोऽसि त्वं तस्यैहैस्वमात्मानमुपदिदि
ज्ञशोसुंतस्य हेयतं याब्रूयात् यथाऽरुंधतीदिदृक्षायां प्रस्तुतसमीपस्थताराया हेयत्वं ब्रूते तद्व
दित्यर्थः॥ एकविज्ञानात्सर्वविज्ञातं विपक्षमविरोधसमुच्चयार्थं स्यशङ्कः॥ तथाहि उत तमा
देशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमिति कथं नु भगवः स आदेशो १०

भवतीति यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्यात्॥ वाचारंभणं विकारो नामधेयं मृ
त्तिकेत्येव सत्यमेवं सोम्य स आदेशो भवतीति वाक्ये एकविज्ञानात्सर्वविज्ञानोपक्रमः श्रूय
ते स विरुध्येत प्रधानज्ञानात्तद्विकारज्ञानेऽपि भोक्तृवर्गज्ञानात्सर्वविदिति श्रुत्यर्थः स्तु हेश्वेतके
तो येन श्रुतेन ज्ञातत्वेनान्यदश्रुतमपि श्रुतं भवति येन मतेन तर्कितेनान्यदमतमपि मतं येन
विज्ञातेनान्यदपि विज्ञातं भवति तमादेशमाचार्यादुपतिष्ठत्यादेशः शास्त्राचार्योपदेशगम्य वस्तु भा
स्यः प्रष्टवानसि तमाचार्यमिति पितुर्वाक्यार्थः॥ स्वान्यज्ञानादन्यन्नूतेयमिति पुत्रो ब्रूते कथं नु
भगवइति कार्यस्य कारणान्नान्यत्वमित्याह॥ यथेति ज्ञातेऽपि मृत्पिंडे कथं तद्विकारधीरित्यात
श्याह वाचेति यो विकारः स वागालंबनमुच्यते॥ परं वस्तुतो नास्तीत्यर्थः॥ तत्र हेतुर्नामधेया
मिति नाममात्रमेव नार्थोऽस्तीत्यर्थः॥ न हि मृद्घटयोरभेदे घटनाशे मृदोऽपि नाशः स्यादतत्त्वा

ह। मृत्तिकेतिवदोमृण्मित्रत्वेननिर्वक्तुंनशक्यतइतिसततोऽन्निरवमतुवदाशिद्यतइतिना।
दोषइतिसदेवसौम्येतिसच्छब्दवाच्यंप्रधानमितोपिनभवतीत्याह। स्वाप्ययात्। ९। तदेवस
च्छब्दवाच्यंकारणंवस्तुत्यमुपतेत्रत्रैतत्पुरुषःस्वपितिनामसतासौम्यतदासंपन्नोभवतिस्वं
मपीतोभवतितस्मादेनंस्वपितीत्याचक्षतेस्वंह्यपीतोभवतीत्येषाश्रुतिःपुरुषस्यलोकप्रसि
द्धंस्वपितिनामनिर्वक्तिस्वशब्देनसच्छब्दवाच्यात्मापरामृश्यतेस्वमपीतिःस्वपीतोभवतीतिजी।
वोभवतिस्वपितिरूपिस्वस्यपितेन्यायार्थत्वात्। सुषुप्त्यवस्थायामुपाधिकृतविशेषाभावात्स्वात्म
निस्वरूपेप्रलीनइवेतिस्वंह्यपीतोभवतीत्युच्यतेतथाचस्वशब्दार्थः। तस्मिन्प्रकृतस
च्छब्दवाच्यात्मनिस्वाप्ययात्लयस्यश्रवणादिति। तत्रयदिप्रधानमेवसच्छब्देनोच्यततदा।
चेतनोऽचेतनमप्येतीतिविरुद्धंस्यात्। श्रुत्यंतरंचतद्यथाप्रिययास्त्रियासंपरिष्वक्तोन

बाह्यं। किंच। नवेदनांतरमेवमेवायंपुरुषःप्राज्ञेनात्मनासंपरिष्वक्तोनबाह्यं। किंच। नवेदनां
तरमितिसुषुप्त्यवस्थायांचेतनेऽप्ययंदर्शयतिश्रुतोयस्मिन्नप्ययःसर्वेषांचेतनानांतच्चेतनं
सच्छब्दवाच्यंजगत्कारणं। किंच। गतिसामान्यात्। १०। गतिःसर्वेषुवेदांतेषुचेतनकारणावगतेः
समतास्त्यर्थः। नहिकचिदपिविरुद्धमुपलभ्यतेक्वचिदचेतनंकारणंक्वचिच्चे
तनमिति। किंतु। सर्वत्रचेतनमेवकारणमुपलभ्यतेयथायेऽग्नितःसर्वादिशोविस्फुलिं
गाविप्रतिष्ठेरन्नेवमेवैतस्मादात्मनःसर्वेप्राणायथायतनंविप्रतिष्ठंते। प्राणेभ्योदेवादेवे
भ्योलोकाइतितस्माद्वाएतस्मादात्मनआकाशःसंभूतइतिआत्मनएवेदंसर्वमितियआत्म
नःप्राणाज्जायतइत्याद्याःश्रुतयश्चात्मनएवकारणत्वंदर्शयंतिआत्मशब्दश्चेतना
परइत्युक्तं। किंच। श्रुतत्वाच्च। ११। सच्छब्देनैवसर्वज्ञेश्वरोजगतःकारणमिति। श्रूयतेश्वे

श्वे० २०

ताश्चुतराभ्यांमंत्रोपनिषद्भिः कालकालोगुणीसर्वविद्य इतिसर्वज्ञंईश्वरंप्रकृत्यसंका

रणंकरणाधिपाधिपोनचास्यकश्चिज्जनितानचाधिपइतियथायेषेत्यादेरयमर्थः ॥ स्फु

लिंगप्रसंगार्थंज्वालनइतिविप्रतिष्ठेरनुनानागतित्वेनदिशोविप्रसरताःस्युः प्राणाद्युत्तराह

पः यथायतनंयथागोलकंविप्रतिष्ठंतेविविधमुच्छंतीतियावत् ॥ प्राणेभ्योनंतरमादित्या

दयोदेवास्तत्स्वग्राहकास्तेभ्योनंतरंलोकाइतितल्लोकाविषयाभवंतीत्यर्थः ॥ प्राणोहिरण्य

गर्भःज्ञःसर्वज्ञःसकारणमितिकारणत्वोक्तेःसर्वज्ञताविशेषतः ॥ सर्वविद्युःसमस्तवज्ञःका

रणंतस्यसर्वैश्वर्यत्वमाह ॥ करणेतिकरणानींद्रियाणितेषामधिपाःस्वामिनोजीवास्तेषा

मधिपःपरमेश्वरस्तस्यसर्वहेतुत्वमाहनचेतिसर्वजीवान्तर्तीश्वरत्वंहिरण्यगर्भस्याप्य

स्तीतिनतोविशेषमाहनचाधिपइतितस्यनियंतास्वयंनस्वस्यनियंतास्तीत्यर्थः ॥ तस्मा

उ० २०

त्सर्वज्ञंब्रह्मजगतःकारणंनचानेनंप्रधानमन्यद्वेतिसिद्धंइतिईक्षत्यधिकरणंप्रस्मिन्नधि

करणेसूत्राणिषट् ॥ नन्वेवयथानइत्यारभ्यारभ्यश्रुतत्वाच्चेत्येतदंतैःसूत्रैःसर्वेषांवेदांतानां

सर्वज्ञसर्वशक्तिब्रह्मपरत्वंसमर्थितंकिमपरमवशिष्टंयदर्थमुत्तरस्सत्रसंदर्भइतिउच्यतेकिं

विशेषब्रह्मणःस्वरूपेणोपदेशायोगात्किंचिद्रूपाद्युपहितत्वेनोपदेशइतिवक्तव्यंतत्रकस्मि

न्वाक्येउपाधिर्विवक्षितःकस्मिन्वावाक्येनविवक्षितइत्याकांक्षायांतद्विवेचनार्थमुत्तरसूत्रता

संदर्भोर्थवानइति ॥ तत्रैवसविशेषंनिर्विशेषंचब्रह्मश्रूयते ॥ यत्रहिद्वैतमिवभवतितदित

रइतरंपश्यतिश्रृणोतियत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातितदल्पंयोवैभूमातदमृतम

र्थयदल्पंतन्मर्त्यंसर्वाणिरूपाणिविचित्यधीरः ॥ नामानिकृत्वाभिवदन्यदास्तेइत्यादिसवि

शेषवाक्यानि ॥ यत्रत्वस्यसर्वमात्मैवाभूत्तत्केनकंपश्येत् यत्रनान्यत्पश्यतिनान्यच्छृणोति

स्वे॰उ॰
२१

नान्यद्विजानाति स भूमा निष्कलं निष्क्रियं॥ शांतं निरवद्यं निरंजनं अमृतस्य परं सेतुं दग्धेंधनमि पृ॰ १
वानलं॥ स एषो नेति नेत्यात्मा॥ अस्थूलमनण्वित्यादिनिर्विशेषवाक्यनिबद्धसगोचिद्रूप।
तां दर्शयितुं तत्तत्कानि चित्तकल्मषक्षयान्युपासनानि किंचिन्निचिद्दृत्युदयाद्यानीति बोध्यमु।
त्यर्थस्तु यत्र यस्यां खल्वऽविद्यावस्थायां तु ब्रह्मपि द्वैते सदिव नातितच्चेतरः॥ संसारी सन्निहि
तं पश्यति दृष्ट्यादिगोचरमुपाधिमद्वस्तु भवतीत्यर्थः॥ यस्मिन्नात्मनि दृष्ट्यादिचतुरादि
नाऽनुसंधत्ते तदस्य परिच्छिन्नमुपहितमिति यावत् तत्रैवोप्यस्य न विशेषान्तरमाह॥ यो वाऽशनि
द्योति नेविशेषो नेनप्रकरित॥ सर्वज्ञ ईश्वरो नामरूपादिकं विभज्य निर्माय तत्र प्रविश्य जी
वरूपेणाभिवदनादि कुर्वन् सर्वज्ञोपचितिष्ठते अंतर्यामीतं विद्यानिर्हेतामतो भवतीत्यर्थः॥ यत्र
यस्यां विद्यावस्थायां अस्य विदुषः सर्वं कर्त्रादिच्छात्मातिरेकेण सदेवासीत्तत्केन कं पश्ये
२१

नंधमीरिरहि

नकं विषयं को वा कर्त्रपि द्रष्टेत्यादिज्ञेयादिव्यवहार्यद्वैतोपाधिकं ततमित्यर्थः॥ यत्र भूमिस्थिते
विज्ञानेऽन्यद्द्रष्टव्यं चक्षुषा न पश्यति अन्यत् श्रोतव्यं श्रोत्रेण न शृणोति न चान्यन्मंतव्यं
तव्यं ज्ञातव्यं वा मनसा बुध्या वा मनुते जानाति स भूमा इत्यादिगोचरो निरतिशयमहत्वसंपन्नः
परमात्मेत्यर्थः॥ निष्कलं निरंशं अवयवनिष्क्रेयत्वादेव शांतं परिणामरहितं निरवद्यं रागादि
रहितं निरंजनमित्यर्थः॥ यथा मृन्मयः सेतुः नद्यादि परकूलप्राप्तेरुपायस्तथा सं
सारसागरस्य परं ब्रह्म तत्प्राप्तस्यामृतस्य वा कैवल्याद्युपायोऽभिव्यक्तसत्साधनं सेतुवद्व
स्थितं वा कैवल्यतानस्यकथं नाशस्तत्राह दग्धेंधनमिवेति यथा दग्धेंधनो वह्निः शाम्य।
ति तथा ज्ञानमप्यत्यर्थः॥ इति रिदमर्थे इदं न इदं नेति निषेधावधिभूतं आत्मेत्यर्थः॥
तथा सविशेषनिर्विशेषनिर्विषयं वाक्यांतरमपि न्यूनमन्यत्तस्यानेसंस्पर्शमन्यदिति॥

वल्लीव्याख्याकारमतोद्धारो नियमोत्सर्गः॥

सू०३० अस्यार्थः॥ निश्चयं चाद्रूपस्य गुणानां स्थाने न्यूनं परिच्छिन्नं॥ ततोन्यन्निष्प्रपंचं मुक्तोपसृप्यं पृ०
२२ निष्प्रपंचं परिच्छेदशून्यं सच्चिदानंदात्मकमिति॥ एवं च यत्र सगुणवाक्ये गुणविवक्षा तत्रोपासना १
नाम भवति॥ यत्र तु श्रूयमाणोपि गुणो न विवक्ष्यते तत्र वाक्यं ज्ञेयब्रह्मपरमेवेति निर्णयार्थ
मुत्तरस्त्वनसंदर्भ इति फलितं॥ आनंदमयोभ्यासात्॥ सर्वेषामुत्सर्वेषां वेदांतानां निर्गुणब्रह्म
परत्वं सूत्रसंगतिः॥ किं तत्सगुणवाक्यदर्शनेनापोद्यसगुणवाक्यविचारः प्राप्तस्तमपो
द्येदमधिकरणं निर्गुणविचारात्मकमारभ्यते॥ यद्यप्युऽपपादकाऽपपाद्यकत्वादस्य
सगुणविचारानंतर्यमुचितं॥ तथापि सर्वाधिकरणसंगत्याभावान्न्यायमार्गेण निश्चाय पा
कइत्युक्तेऽन्यो नरात्मा आनंदमय इत्यन्नमयदेहाविकारे ज्ञातुर्येच्छमुख्यत्वात्संज्ञायेति
कारप्रायपाठेन्निश्चायकोक्तिति सर्वाधिकरणसिद्धांतयुक्तभावेन प्रवृत्तत्वात्॥ नत्सुद २२

हरणोत्तरणां संगतिरस्मातिसगुणविचारात्प्रागिदमारभ्यते॥ पूर्वपक्षेजीवस्य आनंदमयत्वेना
पाधिफलं सिद्धांते निर्गुणब्रह्मप्रमितिरिति सिद्धं॥ तगत्याएकुरेति मते तु भयत्वोपास्तिरिति॥
विवेकः॥ तैत्तरीयके अन्नमयप्राणमयमनोमयविज्ञानमयकोशचतुष्टयानंतरं तस्माद्वा एत
स्माद्विज्ञानमयात् अन्योंतर आत्मानंदमय इति श्रूयते तत्र संशयः॥ किमानंदमयशब्दे न सत्य
ज्ञानमिति प्रकृतं परं ब्रह्मोच्यते उपानंदमयादिविकारवत्॥ ब्रह्मणोयांतरं जीव इति तेनान्ना
मयादिविकारप्राय पाठात्तस्य प्रियमेव शिरः मोदो दक्षिणः पक्ष इत्यादिना॥ प्रियाद्यवयवा
योगात्तस्यैष एव शारीर आत्मेति श्रुत्या शरीरत्व श्रवणाच्च जीव इति प्राप्ते तन्न स्युरवोक्तिस्य विज्ञा
नमयस्येष आनंदमयस्यैव शारीर आत्मेति श्रुत्यर्थः॥ एवं प्राप्ते उच्यते॥ आनंदमयोभ्या
सात्॥ आनंदमयः परमात्मा भवितुमर्हतीति सूत्रतः अभ्यासात्॥ आनंदमयवाक्ये स्वब्रह्म

सू०वृ०
२३

रपेव बृहत्कृतोभ्यासादित्यर्थः ॥ तथाहि स्वानंदमयं प्रस्तुत्य रसो वै स इति तस्यैव रसत्वमुक्त्वोच्य
ते रसं ह्येवायं लब्ध्वानंदी भवति को ह्येवान्यात्कः प्राण्यात् यदेष आकाश आनंदो न स्यात् ॥ एष
ह्येवानंदयाति सैषानंदस्य मीमांसा भवति एतमानंदमयमात्मानमुपसंक्रामति स्वानंदं
ब्रह्मणो विद्वान्न बिभेति कुतश्चनेति ॥ आनंदो ब्रह्मेति व्यजानादिति बृहदभ्यासः श्रूयते न चा
नंदपदस्यैवाभ्यासो नानंदमयपदस्येति ॥ वाच्यं वसंते वसंते ज्योतिषा यजेतेत्यत्र ज्योतिःपद
स्य ज्योतिष्टोमपरत्ववदानंदपदस्यानंदमयपरत्वात् ॥ श्रुत्यर्थस्तु रसः सारः आनंद इत्य
र्थः ॥ स्वयं जीवः रसमानंदं सर्वस्मात्तीर्थ सर्वप्रेरको न स्याच्चेत्तर्हि प्राणादेरचेतनस्य चेष्टानयु
क्तेः स्यात् को हीति स्वन्यात् जीवेत् प्राणयात् यदि स्वानंदरस्यानंतरप्रेरक इति शेषः ॥ आनंदयति तु
रपि परमानंदत्वमित्याह ॥ एष हीति स्वानंदयतीत्यर्थः स्वयं धनी परं धनी परं धनिनं करोति

पं०
१
२३

लोकेन वत्स्वयमानंदः परमानंदयतीति यत्तु प्राचामानंदमयस्य विकारित्वमिति तन्न स्वला
रुंधतीन्यायेनान्नमयादिविकारा ॥ मुख्यात्मप्रदर्शनस्यात्मज्ञानार्थत्वेनानंदमयस्य सर्वां
तरत्वात् ॥ सर्वस्वात्मत्वस्यावधारणात् स्वनंतरमप्यस्मात्मनोऽनुपदेशात्सर्वांतरत्वमवगम्य
ते विज्ञानकोशावज्ञादौपाधिकप्रियाद्य पक्षयोगेन विरुध्येते ब्रह्मणोऽन्नमयादिकोशापरंपर
या शारीरत्वमप्युक्तमेव तस्मादानंदमयः परमात्मा ॥ विकारशब्दान्नेति चेन्न प्राचुर्यात्
१३ ॥ ननु मानंदमयं ब्रह्म कुतः विकारार्थकमयट्प्रत्ययात् ॥ ब्रह्मणः स्वानंदविकारत्वानु
पपत्तेरिति चेन्न कुतः प्राचुर्यात् मयटः प्रकृते स्वानंदप्राचुर्यवाचकत्वादित्यर्थः ॥ मयटः
प्राचुर्यार्थकत्वे हेत्वंतरमाह ॥ तद्धेतुव्यपदेशाच्च ॥ १४ ॥ तमानंदं प्रति ब्रह्मणो हेतुत्वव्यपदे
शादित्यर्थः ॥ एष ह्येवानंदयातीति ब्रह्मणः स्वानंदहेतुत्वं ब्रूते योऽन्यमानंदयति स स्वतु

पहिरप

सू०वृ०
२४

णानंद इति प्रसिद्धं || इतश्चानंदमयः परमात्मेत्याह || मांत्रवर्णिकमेव च गीयते || १५ || ब्रह्मविदा अ० १
प्नोति परमित्युपक्रम्य सत्यं ज्ञानमनंतं ब्रह्म यो वेद निहितं गुहायामित्यस्मिन्मंत्रे सर्वांतरं यद्ब्रह्म
विदाप्नोतिपदेनोक्तं तन्मांत्रवर्णिकं ब्रह्म चान्योंतरात्मानंदमय इति गीयते मंत्रब्राह्मणयोरैक्या
र्थ्यात् || यद्यप्यत्र व्याख्यानव्याख्येयभावाभावेन न मंत्रब्राह्मणभावस्तथापि ब्राह्मणस्य व्या
ख्यानरूपत्वेन व्याख्येयमंत्रं प्रत्युपायतानत्वसत्तेप्युपामोपयमास्तीवेति मांत्रवर्णिकमित्यु
क्तं || इतश्चानंदमयः परस्य त्मा न जीव इत्याह || नेतरोनुपपत्तेः || १६ || ईश्वरादितरो जीवो ना
नंदमयः कुतः अनुपपत्तेः सोकामयतेति सृष्टेः सर्वमीक्षणं बहुस्यां प्रजायेयेति सृष्ट्यात्म
कत्वं स तपोतप्यत स तपस्तप्त्वा इदं सर्वमसृजतेति सृष्टिस्तैतुतं च युज्यते तत्सर्वस्यानुप
पत्तेरिति सूत्रार्थः || जीवस्यानस्य शरीरसाध्यत्वादीक्षणानुपपत्तिर्बोध्यस्तु नो तपःशब्दश्च २४

ण परः || किंच | भेदव्यपदेशाच्च || १७ || नानंदमयो जीवः कुतः जीवानंदमययोर्भेदेन व्यपदिश्यमा श्री
नत्वादित्यर्थः | तथा च श्रूयते रसो वै सः रसं ह्येवायं लब्ध्वानंदी भवतीत्यानंदमयस्य लब्धव्य
त्वेन जीवस्य लब्धृत्वेन भेदव्यपदेशान्न हि लब्धैव लब्धव्यो भवति न त्वानंदमयशब्देन प्रधानमुच्य
तां न त्वाह | कामाच्च नानुमानापेक्षा || १८ || अनुमीयत इत्यनुमानमनुमानैकगम्यं प्रधानमि
त्यर्थः | आनंदमयत्वेन कारणत्वेन वा प्रधानस्यानापेक्षा न स्वीकारः कुतः कामात् आनंदम
याधिकारे सोकामयतेति || कामयितृत्वश्रवणादित्यर्थः || न ह्यचेतने प्रधाने कामः संभवति ई
क्षतेर्नाशब्दमित्यत्र निराकृतमपि प्रधानं गतिसामान्यप्रपंचनाय पुनर्निराकृतमिति बोध्य
म् || अस्मिन्नस्य च तद्योगं शास्ति || १९ || इतश्च न जीवे प्रधाने वाऽनंदमयशब्दः | यस्मादस्मिन्ना
नंदमये प्रकृतस्यात्मनि प्रबुद्धस्य जीवस्य तद्योगं तदात्मयोगं तद्योगस्तत्प्राप्तिर्मुक्तिः शा

सू०त्र०
२५

रित्यर्थः॥ तंज्ञास्तिशास्त्रं तस्मादित्यर्थः॥ यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलय-
नेऽभयं प्रतिष्ठां विंदते। अथ सोऽभयं गतो भवति यदा ह्येवैष एतस्मिन्नुदरमंतरं॥ कुरुते। अथ तस्य
भयं भवतीति शास्त्रं। अस्यार्थः॥ यस्यामेकत्वज्ञानावस्थायामेष विद्वानेतस्मिन्॥ ब्रह्मणि पंची-
कृतभूतपंचकेन तत्कार्येण समष्टिस्थूलदेहेन विराजा दृश्यत्वाद्दृश्यात्मकेन तादात्म्यशून्ये दृ-
श्यभिन्ने स्वसंबंधितयाध्यस्तेंद्रियजातेनाऽपंचीकृतभूतकार्येणात्म्येन तादात्म्यहीनेऽना-
त्म्ये निश्चष्योस्यद्यतु इति निरुक्तानि भूतसूक्ष्माणि तैर्भेदवर्जितेऽनिरुक्ते निःशेषलय-
स्थानं निलयनं॥ संकल्पकार्यसंस्कारास्ते राविद्या तदभेदशून्ये प्रकर्षेण स्थितिं पुनरावृ-
त्तिरहितां लभतेऽथ अभयं प्रयास्यादित्युक्तं यन्न किंचिद्भवेतीति तेन फलमुक्त्वाता नाभावेदो-
षमाह श्रुतिः॥ यदाहीति यथास्मिन्नानंदमये ब्रह्मणि अल्पमप्यंतरं भेदं तादात्म्यस्वरू-

सू०
२५

पं पश्यति तदा संसारभयान्न निवर्तत इत्यर्थः॥ इदं शास्त्रं प्रधानपरिग्रहे वा न घटत इति तस्मात्
स्वानंदमयः परमात्मेति सिद्धं॥ इहैकदेशिमतं॥ भगवत्या दास्तु अभ्यस्यमानानंदपदस्यानं-
दमये तत्र गणं अन्योंतरीआत्मानंदमय इत्यत्रानंदमयपदस्य प्राचुर्यार्थकत्वे ब्रह्मणो दुःख-
लवसंगः स्यादिति प्रचुरानंदेऽल्पलक्षणा ब्रह्म पुच्छं प्रतिष्ठेत्यत्र ब्रह्मपदस्यावयवविशेषेऽलक्षणे-
ति स्वरस्यवृत्तित्वे यद्यनंदिकारन्यायपावपरित्यागश्चैकदेशिमते स्यात्॥ स्वपक्षे तु ब्रह्म पुच्छमि-
त्यत्र पुच्छपदस्यावयववाचित्वं परित्यागणार्वेतिमन्वाना नानंदमय इति मयड्विकारा-
र्थकः प्राचुर्ये इति मन्वानाः सूत्राण्यन्यथा व्याचक्षुः॥ अधिकरणरचना तु ब्रह्म पुच्छं प्रतिष्ठेत्यत्र किं-
मानंदमयावयवत्वेन ब्रह्मोच्यते उत स्वप्रधानत्वेनेति ब्रह्मपुच्छशब्दाभ्यां संशयः॥ इह स्वा-
धिकरणे संज्ञायामाभावात् प्रायपावस्यनमिस्थापकत्वमिह पुच्छपदस्यावयवाधारत्वेपोऽनं-

सूत्र० २६

ङ्गसामान्यात्संशयेऽवयववत्त्वापपाठस्य निष्ठापकत्वमिति प्रत्युदाहरणसंगतिः प्रयो सू० १
जनं च सर्वत्रोक्तं तत्र पुच्छशब्दस्यावयवत्वे प्राप्ते ऽच्यते ॥ आनंदमयोऽभ्यासात् आनंदमयश्रा
देनानंदमयवाक्यस्थं ब्रह्मपुच्छं प्रतिष्ठेत्यत्र विद्यमानं ब्रह्मपदस्युपलक्ष्यते न तु ब्रह्मपदं प्रधान
परं कुतः ॥ अभ्यासात् अस्य सन्नेव स भवति असद्ब्रह्मेति वेद चेत् अस्ति ब्रह्मेति चेद्वेत्यादौ ब्रह्म
पदस्याभ्यासादिति यत्तु पुच्छशब्दस्यावयवपरत्वमिति तन्नाह ॥ विकारशब्दान्नेति चेन्न प्राचुर्यात्
विकारशब्दस्यावयवपरपुच्छशब्दान्न तत्समानाधिकरणब्रह्मपदं स्वप्रधानं ब्रह्मपरमिति चेन्न ॥
न कुतः प्राचुर्यादवयवशब्दोपपत्तेः संचुर्यं चान्नावयवप्रायप्रयोगः एवं चान्नमयादीनां पु
च्छांतानऽवयवाम्नुक्त्वाऽनंदमयस्यापीतरावयवोक्तौ पुच्छस्य तु दैवनिक्षनात्पुच्छमपि ब्र
ह्मपुच्छमित्युक्तं श्रुत्या न हि ब्रह्मणो मुख्यपुच्छत्वमानंदमयस्य परमात्मत्वपक्षेऽपि युक्तं सं। २६

प्रतिस्त्वस्य पुच्छत्वानुपपत्तेः ॥ तस्माद्ब्रह्म पुच्छवत्पुच्छं सर्वाधिष्ठानं प्रतिष्ठापरायणं लौकिकस्या
नंदजातस्याधार इत्यर्थः ॥ सर्वाधिरत्वात्प्रतिष्ठापदसमभिव्याहारादाधारलक्षणायुक्तेति इ
तस्य पुच्छशब्देनाधारो लक्ष्यते इत्याह ॥ तद्धेतुव्यपदेशाच्च ॥ २१ ॥ तत्त्वब्रह्मणो विकारजातं प्रति हे
तुत्वेन इदं सर्वमसृजतेति वाक्ये व्यपदेशादित्यर्थः ॥ नहि स्वविकारमानंदमयं प्रति ब्रह्म
णोवयवत्वं संभवति मुख्यत इति स्वप्रधानं ब्रह्मपुच्छं तेयत्नेन विवक्षित इति ॥ मांत्रवर्णिक
मेव च गीयते ॥ २२ ॥ सत्यं ज्ञानमित्यादिमंत्रवर्णिप्रकाशितं ब्रह्म तद्ब्रह्मपुच्छं प्रतिष्ठेति ब्रा
ह्मणवाक्ये स्वप्राधान्येनगीयते ॥ मंत्रब्राह्मणयोरैकार्थ्यादित्यर्थः ॥ इतश्चानंदमयो त्र न
प्रतिपाद्यः तस्यैवैषयिके प्रियाद्यवयवयोगे न स्व स्थितानुपपत्तेरित्याह ॥ नेतरोनुपपत्तेः ॥
२३ ॥ ब्रह्मपुच्छं प्रतिष्ठेत्यत्र ब्रह्मप्रधानं नेतरः कुतः ॥ अनुपपत्तेः ॥ ब्रह्मणोऽवयवत्वे ऽवयव्या॥

वृ०
२७

नंदमयोत्र प्रतिपाद्यत इति वक्तव्यं ॥ न हि तत्संभवति सावयवस्याधिमवाक्योक्तस्यहृत्ताद्युप
पत्तेरित्यर्थः ॥ अतो ब्रह्म स्वप्रधानं ॥ इतश्चात्र पुच्छवाक्ये ब्रह्म स्वप्रत्याह ॥ भेदव्यपदेशाच्च ॥ अथ
रसं ह्येवायं लब्ध्वानंदी भवति अत्र य आनंदमयो जीवो रसशब्दितं ब्रह्मानंदं प्रतिबिंबितं लब्
ध्वानंदी भवतीति लब्धृलब्धव्यरूपेण भेदव्यपदेशादित्यर्थः ॥ इतश्च ब्रह्मपुच्छकस्थानंदमयो
त्र न प्रतिपाद्य इत्याह ॥ कामाच्च नानुमानापेक्षा ॥ २५ ॥ काम्यत इति कामः आनंदस्तस्य ब्रह्म
त्वदृष्टेनानुमानेनानंदमयस्यापि ब्रह्मत्वमपेक्षितव्यं विकारार्थकमयड्विरोधादित्यर्थः ॥
आनंदमयशब्दो ब्रह्मपरः आनंदशब्दत्वादानंदो ब्रह्मेत्यत्रानंदशब्दवत् ॥ इत्यनुमानं दृष्टो
पि ब्रह्म पुच्छवाक्ये ब्रह्म प्रधानमित्याह ॥ अस्मिन्नस्य च तद्योगं शास्ति ॥ २६ ॥ अस्मिन्नपु
च्छवाक्योक्ते ब्रह्मणि प्रबुद्धस्यानंदमयस्य जीवस्य यदा ह्येवैष एतस्मिन्नित्यादि ॥ शास्त्रं

प्र०
१

२७

तद्योगं मुक्तिं शास्तीत्यर्थः ॥ तस्मादानंदमयस्यात्र प्रतिपाद्यत्वात्पुच्छं ब्रह्मैव स्वप्रधानं नैव विशेषणं
ते पृमिति सिद्धं ॥ अंतस्तद्धर्मोपदेशात् ॥ २७ ॥ एवं च ब्रह्मपदमानंदमयपदमानंदपदाभ्यासस्थेति
मुख्येत्यपातयात्मकषड्गुणवशान्निर्गुणब्रह्मनिर्णयोपयातद्वदुपपन्नादिबहुप्रमाणा
त् संसारी हिरण्मयः पुरुषोस्तीति शबलसिद्धांतयुक्त्या सर्वपक्षोत्क्षीणाहृष्टांतरूपावांतरसंग
त्याशबलसिद्धनिर्गुणब्रह्मसमत्वापवादकमिदमारभ्यते फलं च शबलं निरपक्षयोरुपास्तिरेवपा
रमार्थिपर्यंतं छांदोग्ये श्रूयते अथ य एषोंतरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हि
रण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी तस्योदिति
नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदेत्यधिदैवतम
थाध्यात्ममथ य एषोंतरक्षिणि पुरुषो दृश्यत इत्यादि ॥ उपास्तिप्रस्तावायोर्यशब्दः पर

छउ॰ २८ षञ्चास्य सिद्धस्यादित्यमंडलमध्यवर्त्तिस्यानाद्यवयवकथनं परमात्मनउपास्त्यर्थंदृश्यं।
हिरण्मयोज्योतिर्मयः॥ तत्रावहितधियामनुभवंप्रमाणयति दृश्यतइति हिरण्मयपदंज्यो प॰ १
तिःपरं सुवर्णपदमपिज्योतिर्मयः॥ तत्रावहितधियामनुभवंप्रपरंप्रणखैनखायंचक्षु
षोविशेषमाह। तस्येति कपेर्मर्कटस्यआसः पृष्ठभागोत्यंतंतेजस्वीतत्तुल्यंपुंडरीकंता।
यात्यंततेजस्विनयास्यदेवस्याक्षिणीनेत्रेध्यानार्थमेवनामकरोतितस्येतिनामनिर्वक्ति
सइतिउदितउन्नतःसकार्यसर्वपापास्पृष्टइत्यर्थः॥ ध्यानफलमाहउदेतीति स्वधिदै
वतंदेवतामधिकृत्योपास्तिवाक्यमित्यर्थः॥ स्वधिदैवध्यानोक्त्यनंतरंचात्मानंदेहमधिकृ।
त्यापितदुक्तिरित्याह। अथेति एताहृशाकथानंद्रपस्यपुरुषमधिकृत्यरूपवतस्तुत्वासर्वपापा
स्पृष्टत्वावसंशयः किमयंपुरुषोविद्याकर्मातिशयवशात्प्राप्तोत्कर्षःकश्चित्संसारीउतनित्य २८

सिद्धःपरमेश्वरइतिकिंतावत्प्राप्तंसंसारीतिकुतःहिरण्यश्मश्रुरित्यादिरूपवत्त्वश्रवणात्॥
स्वक्षिपुरुषस्यापितस्यैतस्यतदेवरूपंपरस्यरूपमितिरूपवत्त्वश्रवणात् येचामुष्मात्परा
चोलोकास्तेषांचेष्टेदेवकामानांचेत्यादित्यपुरुषस्यसएषयेचैतस्मादर्वांचोलोकास्तेषांचे।
ष्टेमनुष्यकामानांचेत्यक्षिपुरुषस्यैश्वर्यमर्यादाश्रवणाच्चनहिपरमात्मनोमर्यादावदै।
श्वर्यंयुक्तंसएषसर्वेश्वरइतिश्रुतेः॥ सच्चादित्यपुरुषोमुष्मादादित्यादूर्ध्वगास्तोकानामीशि
तादेवकामानांदेवभोगानांचेत्यर्थः॥ एतस्माच्चक्षुषोर्वागतानांलोकानामीशिताक्षिपुरुषः
मनुष्यभोगानांचेत्यर्थः॥ तस्मान्नाक्ष्यादित्ययोरंतःपुरुषःपरमेश्वरइतिप्राप्तेउच्यतेस्वंत
स्तद्धर्मोपदेशात्॥ यएषोंतरादित्येयएषोंतरक्षिणीतिचश्रूयमाणःपरमेश्वरएवनसंसा
रीकुतः॥ तद्धर्मोपदेशात्तस्यपरमेश्वरस्यधर्मास्तेषामस्मिन्वाक्येउपदेशादित्यर्थः॥

सू॰वृ॰ २७ तदुच्यात्तस्योदिति नामेत्यादिना॥ सर्वपाप्मविरहेणादित्यपुरुषस्य नामोक्त्वा तदेव नामा- २१
क्षिपुरुषस्यातिदिशति यन्नाम तन्नामेति तत्सर्वपाप्मराहित्यं ब्रह्मधर्मः॥ एवं सैवर्क्तत्सा-
म तदुक्थं तद्यजुस्तद्ब्रह्मेति ऋगाद्यात्मत्वं निर्धारयति श्रुतिः॥ तच्च सर्वात्मकब्रह्मण एवो-
पपद्यते सैवर्क्तत्सामेत्यादेरयमर्थः॥ तच्छब्देन पुरुषपरामर्शः॥ विधेयापेक्षयान्यलिंगव्य-
पदेशः॥ एवमंशस्तु विशेषः॥ तस्मादृचयाश्चामसत्तोवंवकृत्वादन्यत्र सुमस्तकृवब्रह्मनूयोवे-
णा इति॥ एवं सर्वगान॥ गीयमानत्वं श्रुतौ निर्दिष्टं तद्य इमे वीणायां गायंत्येतं ते गाय-
न्तीत्यादौ॥ हिरण्यश्मश्रुकेशादिकं मायिकं परमेश्वरस्य लोकानुग्रहार्थमुपपद्यत इ-
ति न तेन विरोधः॥ तस्मादक्ष्यादित्ययोरंतः परमात्मा॥ किंच॥ भेदव्यपदेशाच्चान्यः॥
अक्ष्यादित्यान्तर्गोऽरंतः श्रूयमाणः पुरुषोऽक्ष्यादित्यशरीराभिमानिनो जीवादन्यः कुतः भेद- २७

व्यपदेशाच्चान्यत्वादित्यशरीराभिमानिजीवादन्यस्य परमात्मनोंतर्यामितयांतर्यामित्वा-
त्मनो भेदेन व्यपदेशादित्यर्थः॥ य आदित्ये तिष्ठन्नादित्यादंतरो यमादित्यो न वेद यस्यादित्यः
शरीरं य आदित्यमंतरो यमयत्येष त आत्मांतर्याम्यमृत इत्यादिश्रुत्यंतरे तयोर्भेदव्य-
पदेशादत्रापि स्वांतरशब्दस्तुत्या तत्त्वभिन्नात्परमेश्वरणादित्यरूपस्य इति॥
सिद्धं॥ आकाशस्तल्लिंगात्॥ सर्वमव्यभिचारिब्रह्मलिंगेनापहतपाप्मत्वादिना रूप-
वत्त्वादिकमन्यथानीतं॥ इदं तु लिंगादाकाशश्रुतिरन्यथानेतुं न शक्यते लिंगापेक्षया
श्रुतेः॥ प्रबलत्वादिति प्रत्युदाहरणसंगत्येदमारभ्यते॥ छांदोग्ये श्रूयते अस्य लोकस्य
का गतिरित्याकाश इति॥ होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंते आ-
काशं प्रत्यस्तं यंतीत्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणमिति तत्रोभयत्राकाशश-

सू॰ वृ॰ ३० स्य प्रयोगदर्शनात्संशयः ॥ किंभूताकाशो वाकाशशब्देनाभिधीयते ॥ उत परं ब्रह्मेति ॥ यदेषा । सू॰ १
आकाश आनंदो न स्यादित्यादिवेदेषु ब्रह्मण्याकाशशब्दप्रयोगः भूताकाशे रूढइति विषया ।
कार्थस्तु शालावत्यनामकः कश्चन ऋषिः जैवलिं राजानं पृच्छति स्य स्येति सर्वस्य प्रपंच
स्य किमधिकरणमिति प्रश्नार्थः ॥ जैवलिरुत्तरमाह ॥ आकाश इति कथंभूत आका ।
शः ॥ सर्वं जगत्प्रतिष्ठानमाह ॥ सर्वाणीति भूताकाशव्यावृत्त्यपरेतं तरमाह ॥ आकाशो
हीति ॥ तन्नैव हेतुमुत्तरमाकाश इति अयं सिद्धांतार्थः ॥ न तु रूढ्या भूताकाश इति युक्तं न च वा
क्यशेषानुपपत्तिः ॥ आकाशस्तल्लिंगात् ॥ आकाशपुरित्यादौ तस्यापि वाय्वादिकारणत्वश्रव
णात् तस्माद्भूताकाश इति प्राप्ते ब्रूमः ॥ आकाशस्तल्लिंगात् ॥ आकाशशब्देन ब्रह्मण्येव प्र
योगयुक्तं कुतस्तल्लिंगात् तस्य ब्रह्मणो यल्लिंगं महाभूतस्य शब्दादिकं तस्यास्मिन्नाकाशे दृष्टं । ३०

तादित्यर्थः ॥ ननु इदं भूताकाशस्यापि वाय्वादिकारणत्वं दर्शितमिति चेन्न कुतः न कारणब्रह्म
णोऽपरिच्छिन्न हे आकाशादेवेत्यवधारणं सर्वाणीति च भूत विशेषणं आकाशं प्रत्यस्तं यंता ।
तिकारणत्वप्रदर्शनं चानुकूलं स्यात् ॥ ज्यायस्त्वपरायणत्वप्रदर्शनं च ब्रह्मण्येव स
मंजसं स्युत्वं तरणां च स्य श्रेष्ठं ब्रह्मण एव परायणत्वं दर्शयति विज्ञानमानंदं ब्रह्म रातेर्दातुः
परायणमिति रातेर्धनस्य दातुर्यजमानस्य रातिरिति पाठे राति बंधुरित्यर्थः ॥ किंच ॥ स एव
परो वरीयानुद्गीथः स एषोऽनंत इत्युद्गीथे आकाशरूपदेवताधर्मान् परत्वादीनुपसंहर
ति जैवलिः तद्भूताकाशे न युज्यते न हि तस्यानंत्यं संभवति श्रुतौ परत्वं गुणत उत्कृष्टत्वं व
रीयस्त्वं कालतो वस्तुतश्चापरिच्छिन्नत्वम् आनंत्यं देशतोऽपरिच्छिन्नत्वं इष्टं ॥ यत्तु लिंगा
च्छ्रुतिर्बलीयसीति तन्न त्यजेदेकं कुलस्यार्थे इति न्यायेन बहूनामनवकाशलिंगश्रुतीना

सू० ३१ मनुग्रहापेक्षस्याकाशश्रुतेर्बाधस्य युक्तत्वात् ॥ तस्मादाकाशशब्दं ब्रह्मैवाच देवतोग्री सू०
थेनोपास्येति सिद्धं ॥ अत एव प्राणः ॥२३॥ तत्र चातिदेशत्वान्न पृथक्संगत्यपेक्षा ॥ पू
र्वत्राकाशश्रुतेरव्यभिचारिब्रह्मलिंगोपष्टंहितत्वाद्बाधो युक्तः इह तु श्रूयमाणसंवेश
नादिलिंगस्य प्राणेपि संभवेनाऽव्यभिचारिब्रह्मलिंगसहचाराभावात्प्राणश्रुतिबाधो
न युक्त इति प्रत्युदाहरणं संगतिः ॥ तत्रैवाकाशवाक्यानंतरं श्रूयते ॥ उद्गीथे प्रस्तोतरुपादे
वता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति कतमा सा देवते ।
ति प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जि
हते सैषा देवता प्रस्तावमन्वायत्तेत्यादि श्रुत्यर्थः ॥ उद्गीथाधिकारे प्रासंगिकं प्रस्ता
वचनमिति वक्तुमर्थ्य इत्युक्तं कश्चिदुषस्तिश्चाक्रायणनामा धनाय राज्ञो यागं गतवानुत् ३१

वै भवं स्तस्य प्रकटयन्नुपस्तोतारमुवाच हे प्रस्तोतः या देवता प्रस्तावं साम भक्तिविशेषमन्वाय
त्ता अनुगता ॥ स प्रस्तोता भीतः सन्नुषस्तिं चाक्रायणं पप्रच्छ कतमा सेति तस्य प्रतिवचनं प्राण इति
मुख्यप्राणवायुं व्यावर्तयति ॥ सर्वाणीति संविशंति विलीनानि भवंति प्रलयकाले ॥ अभ्युज्जिहते
जन्मकाले प्राणमभिलक्ष्योत्तिष्ठंतीति तत्र प्राणबंधनं हि सोम्य मनः प्राणस्य प्राणमित्या
दौ ब्रह्मणि प्राणशब्दप्रयोगात् ॥ प्राणवायौ च प्रसिद्धतरत्वात् संशयः किमत्र प्राणशब्देन ब्रह्मा
भिधीयते उत वायुविकार इति मनःशब्दलक्षितं तत्वाक्षिचैतन्यं प्राणे परस्मिन्नेकीभूतं स्थित
मित्यर्थः ॥ प्राणस्य पंचस्विति वृत्तेः वायुविकारस्य प्राणस्तत्त्वस्फूर्तिमात्मानं ये विदुस्ते ।
ब्रह्म जानंतीत्यर्थः ॥ तत्र प्रसिद्धिबलाद्वायुविकारः प्राण इति प्राप्ते आकाशन्यायमति
दिशति भगवान्सूत्रकारः ॥ अत एव प्राण इति ॥२३॥ अत एव सर्वसूत्रोक्ततल्लिंगादिति ।

सूत्र०
३२

हेतोरेव प्राणशब्दं ब्रह्मेत्यर्थः। सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंतीत्यादिना मह
भूतसंवेशनादिरूपं ब्रह्मलिंगं प्राणवाक्ये श्रूयते न च यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्ये
ति प्राणं चक्षुः। प्राणं मनः। स प्राणो यदा प्रबुध्यते प्राणादेवाधि पुनर्जायंत इति श्रुत्यावा
प्रविकारेपि संवेशनादि श्रूयत इति वाच्यं तर्हि तत्र महाभूतसंवेशनादि श्रूयते किं त्विंद्रियसं
वेशनादिकमेव श्रुत्यर्थस्तु तर्हि तस्यां सुषुप्त्यवस्थायामित्यर्थः। वाक्पदमनुक्तकर्मेंद्रिया
नां तर्कं चक्षुः। श्रोत्रे बुद्धींद्रियाणामुपलक्षणं तस्मादनन्यथासिद्ध ब्रह्मलिंगात्प्राणशब्द
वाच्यं ब्रह्मैवोपास्यप्रस्तावदेवतेति सिद्धं॥ ज्योतिश्चरणाभिधानात्॥ २४॥ सर्वं प्राणवाक्ये
ब्रह्मलिंगसत्त्वाद्भवतु ब्रह्म परं तावदिहास्य वाक्ये तदन्यवाक्ये ब्रह्मपरत्वेतिवत्तुदाहरणसंग
त्या इदमरभ्यते छांदोग्ये श्रूयते अथ यदतः परो दिवो ज्योतिर्दीप्यते विश्वतः पृष्ठेषु सर्वतः॥

पु०
१
३२

रंउपास्यंत

पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नंतः पुरुषे ज्योतिरिति॥ अस्या
र्थः॥ गायत्र्युपाधिब्रह्मोपास्त्यनंतरोक्तायोऽयं श्रुतः॥ अथ यद्दिवो द्युलोकात्परः परस्ताद्द्यु
ज्योतिर्दीप्यते तदिदमित्यौदरज्योतिष्यध्यस्तं तेजश्चेतद्दीप्यते तत्राह॥ विश्वत इति विश्वस्मा
त्प्राणिवर्गादुपरीत्यर्थः॥ विश्वशब्दस्याकृतिपर्यायत्वं व्यावर्तयन्नि सर्वत इति सर्वस्माद्भूइदं
रादिलोकात्सर्वसंसारमंडलादुपरीत्यर्थः॥ उत्तमा न विद्यंते येभ्यस्तेनुत्तमास्तेषु इदं शब्दार्थं
स्फुटयति यदिति लोकद्वयस्थो भौतिकतेजसे ब्रह्मणि च प्रयोगात्संशयः किमिह ज्योतिःशब्दा
शब्देनादित्यादिकं तेजोभिधीयते उप ब्रह्मेति किं तावत्प्राप्तं युक्तं भौतिकमिति कुतः प्रसिद्धत्वात्॥
अतो दिवस्तादि नामर्यादाश्रवणाच्च नहि सर्वव्यापिनो ब्रह्मणो मर्यादादिकं युक्तं त
स्माद्भौतिकं ज्योतिरिति प्राप्ते ब्रूमः॥ ज्योतिश्चरणाभिधानादिति॥ अत्र ज्योतिःशब्द्याहं

छां०
३३ ब्रह्मैवोक्तं ततः चरणाभिधानात्पादाभिधानादित्यर्थः॥ तथा हि ज्योतिर्ब्राह्मणे सर्ववाक्ये चतुष्पा रा०
द्ब्रह्म निर्दिश्य तेनैतावानस्य महिमा ततो ज्यायांश्च पूरुषः॥ पादोऽस्य सर्वा भूतानि त्रिपादस्या
मृतं दिवीति एतदर्थस्तु गायत्री वा इदं सर्वमित्यत्र भूतपृथिवीशरीरहृदयवाक्
प्राणैः षड्विधा चतुष्पदा गायत्रीति यदुक्तं तद्गायत्र्युपाधिब्रह्मणो महिमा विभूतिः॥ ता
वान्वा यावानेष प्रपञ्चः॥ स यः पुरुषस्ततो ज्यायान् ततो वा ह पाद इति सर्वाणि भूतान्यस्यैकः
पाद एकदेशस्त्रिपादमृतं दिवि द्योतनवति स्वात्मनि स्थितमिति॥ एवं च यदतः॥ परइ
त्यत्र यच्छब्दस्य सर्वनामत्वेन प्रसिद्धार्थवाचकत्वात्सर्ववाक्यश्रुतं ब्रह्म धितेन प्रसिद्धं ब्रह्मा
त्रापि द्युसंबन्धपञ्चम्येन प्रत्यभिज्ञायते अतः परं इत्यादिना श्रुतं ब्रह्मणो मर्यादा हि कुसु
पासनार्थमित्युक्तं ज्योतिः शब्दो ब्रह्मण्यपि प्रसिद्धो वेदान्तेषु तस्मात्॥ रह्ज्योतिः शब्दं ब्र ३३

ह्म॥ छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगदात्तथा हि दर्शनं॥ २३॥ यदुक्तं पूर्वत्र गायत्र्या
स्य छन्दस उपाधिकब्रह्मण उक्तत्वात्तदत्र प्रत्यभिज्ञायत इति तन्न गायत्री वा इदं सर्वं भूतं यदि
दं किं चेति गायत्र्याख्यच्छन्दसः प्रकृतत्वात् सैव पादोऽस्य सर्वाणि भूतानीति भूतपादव्यपदेशा
न्न ब्रह्मण इति सर्ववाक्ये छन्द एवाभिधीयते न ब्रह्मेति चेन्न गायत्र्याख्यच्छन्दोद्वारेण तदनुगत
ब्रह्मणि सर्वात्मकत्वं प्रतिपाद्यते॥ गायत्री वा इदं सर्वमित्यादिना॥ न हि अक्षरसन्निवेशमा
त्राया गायत्र्याः सर्वात्मकत्वं समंजसं तस्माद्गायत्र्याख्यविकारे यदनुगतं ब्रह्म तदेव गायत्री
वा इदं सर्वमित्यादिना प्रतिपाद्यत इति निष्कृतार्थस्तु छन्दोऽभिधानात्॥ गायत्र्याख्यं छ
न्दस एव सर्ववाक्ये प्रकृतत्वान्न ब्रह्मणः प्रकृतत्वमिति चेन्न कुतः॥ तथा छन्दोद्वारेण तत्ते ब्रह्म
णि चेतोऽर्पणस्य चित्तसमाधानस्य निगदादभिधानात् तत्र दृष्टान्तः तथा हि दर्शनमन्यत्रा

सू॰त॰ पिविकारस्वरेण ब्रह्मणोऽप्यासनं हृदयपत इति दर्शनं हृष्टमित्यर्थः ॥ एवं ह्येव बहूचा महत्युक्थे मी प्र॰
३४ मांसंते एतमग्नावध्वर्यव एतं महाव्रते छंदोगा इति तदर्थस्तु एनमेवात्मानं ऋग्वेदिनो मह- १
त्युक्थे प्रशस्ते शस्त्रे तदनुगतमुपासते यजुर्वेदिनो योक्तौ सामवेदिनो महाव्रताख्ये क्रतौ
तदनुगतं ब्रह्मानुसंदधत इत्यैतरेये दृष्टमित्यर्थः ॥ एवं च गायत्रीशब्दो ब्रह्मलक्षक इति दृष्टे
वाक्ये ब्रह्म निर्दिष्टं यद्यागायत्रीशब्दब्रह्मणो गौणः ॥ तथा च सूत्रे भितं तमात्रस्यायमर्थः ॥
यथा गायत्री षडक्षरैः ॥ पादैस्सतुष्पदा एवं ब्रह्मापि तुं चतुष्पादिति गायत्रीशब्देनाभिधीयते
चतुष्पात्वगुणयोगात् तथा गायत्रीसाहृद्येन चेतोर्पणास्याधनानुग्रहनिगदादिष्णाना दि-
ति ॥ तथा हि दर्शनमिति ॥ छंदोभिधायिशब्दस्य साहृद्याहन्यत्र प्रयोगे दृष्टांतः ॥ तथा हि
ते वा एते पंचान्ये पंचान्ये दश संतस्तत्कृतमित्युपक्रम्याह सैषा विराडिति ॥ अस्यार्थः ॥ सं- ३४

वर्गविद्यायां वाय्वधिदैवमग्निसूर्यचंद्रमांसि वायौ लीयंते चाध्यात्मं प्राणे वाक्चक्षुःश्रोत्र-
मनांसीत्युक्तं तेवायुनासह पंचाधिदैविकाश्चाध्यात्मिकेभ्यः प्राणादिभ्योन्ये तथा प्राणादे-
यः पंचाध्यात्मिकेभ्योन्ये एवं सर्वे दशसंतः ॥ कृतमित्युच्यंते ॥ कृताऽपरपर्याये चतुराय-
नीमकस्य तगत चतुरंकश्चत्वारः पदार्थाः ॥ प्रकृते संनिच्चकापवर्ज्यः चंकापवहारएकांक-
पवदेकस्यं एवं प्रकृते दशांकेस वंति रभावादतः कृयेस कृजि पोनवति यथा कृते जिते चेता-
दिसंज्ञानिच्चकायादीनि जितानिभवंति तत्कृतनवचतुरांपकापरपर्यायचतुरंकापनाम
कद्यूतस्य कृतमिति संज्ञां सचचतुरंकायोदशात्मकः ॥ चतुरंकांके षुत्रयाणां त्रिषुद्वयो
रेकयोरेकस्य चांतर्भावात् ॥ वाद्यादयोपि दश तथा च दशात्मसंख्यासादृश्याद्वाद्यादयः ॥
कृतमित्युच्यंतोऽत एवमेव दशसंख्यारा विराडिति स्तुत्या विराण्नामकछंदसो दशात्मकः ।

ब्र॰ ३५

ताथा द्युदौ विराट्शब्दप्रयोग इति यथा तद्ब्रह्मणि चतुष्पात्त्वसाम्याद्गायत्रीशब्दप्रयोगः।
इति इष्टार्थः ॥ तस्मात्पूर्ववाक्ये ब्रह्मैव निर्दिष्टं न छंद इति सिद्धं ॥ भूतादिपादव्यपदेशोपपत्तेश्चैवं
३६ ॥ इतश्च गायत्रीवाक्ये ब्रह्मैव प्रतिपादितमित्यभ्युपगंतव्यमित्येवं शास्त्रार्थः कृतः भूता-
दिपादव्यपदेशोपपत्तेः ॥ भूतपृथिवीशरीरहृदयेष्वतुष्पदा गायत्रीति व्यपदेशस्य ब्रह्मण्ये-
वोपपत्तेरित्यर्थः ॥ नह्यक्षरसंनिवेशरूपगायत्रीछंदसि भूतादिपादव्यपदेशः संभवतीति किं-
च ते वा एते पंच ब्रह्मपुरुषा इति श्रुतिः सर्वं ब्रह्मणः प्रकृतत्वे संगच्छते तथा हि गायत्र्याख्य-
ब्रह्मणो हार्दस्योपास्यांगत्वेन द्वारपालादिगुणविध्यर्थं तस्य ह वा एतस्य हृदयस्य पंच देव-
सुषय इत्यादिवाक्यं तथैवा एते पंच ब्रह्मपुरुषा इति श्रुतं तया चोपास्तांगानां द्वारपाला-
नां हृदयच्छिद्रेषु स्थितानां प्राणादिवायूनां ब्रह्मपुरुषत्वोक्ते हृदयच्छिद्रेषु पि ब्रह्मसंबंधो वं-

पू॰ १

३५

गम्येवगम्यत इत्यतोऽस्ति पूर्ववाक्ये ब्रह्मप्रकृतेनेह गायत्रीमात्रस्यैवोपास्यत्वे तदंगानां ब्रह्मपु-
रुषत्वं युक्तं ॥ अतो हृदयच्छिद्रेषु ब्रह्मसंबंधात्तत्स्थवायूनां ब्रह्मपुरुषत्वमिति ब्रह्मपुरुषश्रु-
त्युपपत्तिरिति श्रुत्यर्थस्तु हृदयस्य पंच देवच्छिद्राणि श्वादित्यादिनामकैः प्राणादिवायुभि-
र्देवैः परिपाल्यत्वाद्देवसुषितं छिद्राण्युपचर्यते ॥ तानि हृदयच्छिद्राणि हृदयप्राङ्मुखदक्षि-
णामुखप्रत्यङ्मुखोदङ्मुखोर्ध्वमुखरूपाणि तत्स्थाः प्राणापानव्यानसमानोदानात्मका
वायवः ॥ क्रमेणादित्यचंद्राग्निपर्जन्याकाशनामकाः पंच ब्रह्मपुरुषा इति तस्माद्गाय-
त्रीवाक्ये ब्रह्मैव प्रतिपाद्यमिति ज्योतिर्वाक्येऽपि संबंधात्तदेव प्रत्यभिज्ञायत इति सिद्धं ॥
उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात ॥ ३५ ॥ ननु पूर्वस्मिन्वाक्ये त्रिपादस्यामृतं
दिवीति सप्तम्या द्यौराधारत्वेन निर्दिश्यते ॥ अथ यदतः परो दिवो ज्योतिरित्यत्र पंचम्या व-

सूत्र० ३६ क्षितेनद्यौर्निर्दिश्यतोतयाचविभक्तिभेदेनोपदेशभेदकथनमेहात्॥ज्योतिर्वाक्येप्रत्यभिज्ञा- प्र०
नंनसंभवतीतिचेन्नेत्युक्तः॥उभयस्मिन्नप्यविरोधात्तुविभक्तिभेदेनोपदेशभेदेऽपिप्रत्य-
भिज्ञायाश्चाविरोधादित्यर्थः॥प्रधानप्रातिपदिकार्थेनप्रत्यभिज्ञामाः गुणभूतविभक्त्यर्थो
नप्रतिबंधकइत्यतिभावः॥तस्मात्परंब्रह्मैवकौक्षेयकाद्यावुपास्यंज्योतिःशब्देनाऽन्यज्ज्यो-
तिकंतेजइतिसिद्धं॥प्राणस्तथानुगमात्॥२८॥पूर्वस्मिन्नधिकरणेयदतःपरइत्यत्रयच्छ-
स्पष्टप्रसिद्धार्थवाचकस्यबलवत्तात्तत्सहकृतंब्रह्मलिंगंतेजोलिंगापेक्षयाबलवदित्युक्तं
नतथेहकिंचिद्बलवत्संपादकमस्तीतिप्रत्युदाहरणसंगतिःऽस्याधिकरणस्ययद्वापूर्वं
दिविदिपइत्यत्रप्रत्ययाविरोधाद्गुणभूतप्रत्ययार्थोऽन्यथानीतोयथातद्वदिहापिस्वतंत्र-
प्राणादिपदार्थभेदप्रतीतौतत्सापेक्षब्रह्मरूपवाक्यार्थप्रतीतेर्गुणभूतायाअप्युपपत्तापोयु: ३६

क्त इतिदृष्टांतसंगतिः॥पदार्थप्रतीतेःस्वातंत्र्यंजनकत्वेनवाक्यार्थप्रतीतेर्गुणत्वंतत्कृन्यत्वे
नेतिबोध्यं॥अस्तिकौषीतकीब्राह्मणोपनिषदिइंद्रप्रतर्दनाख्यायिकाप्रतर्दनोहवैदैवो-
दासिरिंद्रस्यप्रियंधामोपजगामयुद्धेनचपौरुषेणचेत्यारभ्याम्नातातस्यांमुपनेसहोवाच
प्राणोस्मिप्रज्ञात्मातंमामायुरमृतमुपास्स्वेतितथोत्तरत्रापिअथखलुप्राणएवप्रज्ञात्मे-
दंशरीरंपरिगृह्योत्थापयतीतितथानवाचंविजिज्ञासीतवक्तारंविद्यादित्यादि॥अंतेच
सएषप्राणएवप्रज्ञात्मानंदोजरोमृतइत्यादि॥अस्यायमर्थःदिवोदासस्यापत्यंपुमान्दै-
वोदासिःप्रियंप्रेमास्पदंधामगृहंतत्रगतोहेतुः॥युद्धेनेतितत्कारणेनपुरुषकारप्रदर्शने-
नचप्रतर्दनोराजाइंद्रस्यगृहंजगामेत्यन्वयः॥तंहेंद्रउवाचप्रतर्दनवरंतेददानीतिस-
होवाचप्रतर्दन॥हेइंद्रत्वमेववरंवृणीष्वयंत्वंमनुष्यायहिततमंमन्यसइतितंइंद्रउवाच

सू०
३७

च प्राणोऽस्मीत्यादि मुख्यप्राणं व्यावर्तयति प्रज्ञात्मेति निर्विशेषचिन्मात्रं व्यावर्तयति तं मामि
ति ॥ इदं च प्राणस्यैंद्ररूपदेवतात्वे लिंगं प्राणस्य मुख्यप्राणरूपत्वे लिंगमथ खल्वित्यादि दे
हधारणं न चाणादिकृतमित्युक्त्यानंतर्यमयत्राद्यार्थः ॥ प्राणवायोर्देहधारणांगत्वमुक्त्वा प्रपंच
कार्यमिति प्रसिद्धमिति ॥ खल्वित्युक्तं प्राणस्य जीवत्वे लिंगं न वाचमिति प्राणस्य परमात्म
त्वे लिंगं स एष इत्यादि ॥ एवं च प्राणशब्दस्य इंद्रप्राणवायुजीवपरमात्मपरत्वे लिंगानां वि
द्यमानत्वात्संशयः ॥ किं परः प्राणशब्द इति तं च प्रसिद्धत्वात्प्राणवायुपर इति प्राप्ते उच्यते ॥
प्राणस्तथानुगमात् ॥ तत्र प्राणो ब्रह्मैव कुतः तथानुगमात् ॥ तथा ब्रह्मपरत्वेनानुगमाद्व
गमादित्यर्थः ॥ तथा हि प्रतर्दनः स्वस्तु हिततमं पुरुषार्थं वव्रवान् तस्य परमपुरुषार्थकाम
स्य प्राण उपास्यत्वेनोपदिश्यते प्राणोऽस्मीत्यादिना एवं च परमपुरुषार्थत्वेनोपदिश्यमानः

ब्र० १

३७

प्राणः कथं प्राणो वायुः स्यात् तथा स योऽहं मां वेद न ह वै तस्य केन च कर्मणा लोको मीयते न स्तेये
न न भ्रूणहत्ययेत्यादि ब्रह्मपरिग्रहे घटते क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावर इत्यादि
ना ब्रह्मज्ञानिनः कर्मक्षयश्रवणात् तदर्थस्तु योऽधिकारी मां ब्रह्मरूपं साक्षात्स्तु भवति तस्य
विदुषो लोको मोक्षो न मीयते ॥ न हिंस्यते महतापि पापेन ज्ञानमाहात्म्येन सर्वस्यापि पापस्य
दग्धत्वादिति भावः ॥ एवं प्रज्ञात्मत्वं च ब्रह्मण एव युक्तं एवं उपसंहारेऽप्यानंदोऽजरो इत्यपि
ब्रह्मपरत्वे घटते ॥ न साधुना कर्मणा भूयान् भवति नो एवासाधुना कनीयान् एष
ह्येव साधुकर्म कारयत्येष उ एवासाधुकर्म कारयत्येष लोकाधिपतिरेष लोकपाल
एष लोकेश इति च ब्रह्मण्येव समंजसं च न हि धर्माधर्मसंस्पृष्टत्वं तत्कारयितृत्वं तदीशित्वं
न ब्रह्मणोऽसाधारणं लिंगमस्तीति तस्मात्सर्वोपरूपमाहात्म्यस्मिन् चैनया ब्रह्मपरमेव प्रा

कौ०उ०
३०

ण पदमिति ॥ न वक्तुरात्मोपदेशादिति चेदध्यात्मसंबंधभूमा ह्यस्मिन् ॥ ननु यदुक्तं प्राणो ब्रह्मेति
तदयुक्तमिति न मन्यर्थः ॥ कुतो वक्तुरात्मोपदेशात् ॥ वक्तुरिंद्रस्यात्मत्वेनोपदेशादित्यर्थः ॥ तथा
हि वक्ताहमिंद्रो नाम कश्चिद्विग्रहवान्देवताविशेषः स्वमात्मानं प्रतर्दनाय परिदिशति मामेव
विजानीहीत्युपक्रम्य प्राणोऽस्मि प्रज्ञात्मेत्यहंकारवादेन किंच ॥ देवतायाः प्राणत्वे लिंगांत
रमस्त्यरुन्मुखान्यतीन्सालावृकेभ्यः प्रायच्छमिति दानत्वे दांतवाकांतद्येषां मुखे न वर्त्त
तेऽरुन्मुखाः सालावृकेभ्यः आरण्यश्वभ्यः न हीदं ब्रह्मणो युक्तमेवमिंद्रे परत्वे इतरद्यु
यासंभवे याजनीयमिति ॥ अत्रोच्यते ॥ अध्यात्मसंबंधभूमा ह्यस्मिन्निति हि यस्मादस्मिन्न
ध्याये अध्यात्मसंबंधस्य परमात्मसंबंधस्य भूमा बाहुल्यमुपलभ्यत इत्यर्थः ॥ तद्यथा याव
दस्मिन्शरीरे प्राणो वसति तावदायुरिति प्राणस्यैव प्रज्ञात्मनः परमात्मभूतस्यायुः प्रद

कौ०
३०

नोपसंहारयोः स्वातंत्र्यं दर्शयति ॥ न पराचीनस्येंद्रस्य ॥ एवं अस्मिन्नेव प्राणानां निःश्रेयसमि
ति श्रुति ॥ आत्मानमिंद्रियाश्रयं प्राणं दर्शयति ॥ प्राणस्यास्तित्वे स्थितौ प्राणानां निःश्रेयाणां नि
श्रेयसं स्थितिरिति श्रुत्यर्थः ॥ एवमेव न वाचं विजिज्ञासीत वक्तारं विद्यादिति परमात्मानं वक्तारमु
पक्रम्य तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता एवमेवैता भूतमात्राः प्रज्ञामात्रा
स्वर्पिताः प्रज्ञामात्राः प्राणेऽर्पिताः स एष प्राण एव प्रज्ञात्मानंदोऽजरोऽमृत इति कथं वा विषयेंद्रि
यव्यवहारनाभिभूतं प्रत्यगात्मानमेवोपसंहरति श्रुत्यर्थस्तु नूनं भूतमात्रादीनां नाना
त्वेनेत्य यैर्दृष्टांतः ॥ तथा लोके प्रसिद्धस्य रथस्यारेषु मध्यवर्त्तिशाकाजास्तु चक्रोपांते नेमिरा
र्पिता नाभ्यां चक्रपिंडिकायामराः अर्पिताः तद्वद्भूतानि पृथिव्यादीनि मात्राः शब्दादयो विष
याः मीयंत इति मात्राः प्रज्ञामात्रास्तु स्वस्वबोधकेंद्रियेषु बुद्धिद्वारा अर्पिताः कर्मेंद्रियेषु

सू०
३९

ह्मपितद्विषयाश्चर्पिताः तदधीनत्वात्तद्व्यवहारस्य ॥ नाम प्रज्ञामात्राः प्राणे परस्मिन्नर्पिताः ।
प्राणस्य ब्रह्मत्वे लिंगं सराषइति तस्मादध्यात्मसंबंधबाहुल्यात्प्राणात्मकब्रह्मोपदेश एवा-
यं न देवतात्मोपदेश इति सिद्धं ॥ कथं तर्हि वक्तुरात्मोपदेश इत्याशंक्याह ॥ शास्त्रदृष्ट्या तूप-
देशो वामदेववत् ॥ इंद्रस्य वक्तुर्मामेव विजानीहीत्युपदेशः ॥ शास्त्रदृष्ट्या तातव्यः स्वहमा-
वपरं ब्रह्मेति शास्त्रदृष्ट्या पश्यन्नेवमुक्तवानित्यर्थः ॥ तत्र दृष्टांतः वामदेववदिति ॥ यथा वा-
मदेवः शास्त्रदृष्ट्या अहं मनुरभवं सूर्यश्चेत्याह तद्वदित्यर्थः ॥ यदुक्तमिंद्रोयतीनित्यादिदे-
वतापरत्वे लिंगमिति तत्र यद्वेदांतवाक्योक्तत्वान्न प्रमावादहमेवंकृतोस्मीति हशावेदांतवाक्या-
न्यध्येयानि नो चेदरण्यमप्यस्यः प्रापच्छमित्येतदर्थकत्वेनाविरोधान्तस्मीतिहृषणात्मकब्रह्म-
परमेतद्वाक्यमिति सिद्धं ॥ इजीवमुख्यप्राणलिंगान्नेचोपासात्रैविध्यदाश्रितत्वादिहतद्यो-

सू० १

३९

गात् ॥ ननु यदुक्तमध्यात्मसंबंधबाहुल्यान्न देवतात्मा प्राण इति तत्सत्यं तथापि न ब्रह्मप-
रमेवेदं वाक्यं किंतु जीवमुख्यप्राणवायुगपरमपि कुतः जीवलिंगान्मुख्यप्राणलिंगाच्च न वाचं
विजिज्ञासीत वक्तारं विद्यादिति जीवलिंगं वागादिकरणौव्यापृतस्य वक्तुर्जीवस्य विज्ञेनत्वमुप-
लभ्यते ॥ एवं प्राणस्य प्रज्ञात्मेदं शरीरं परिगृह्योत्थापयतीति प्राणलिंगं देहधारणस्य प्रा-
णलिंगत्वात् ॥ तथा हि प्राणसंवादे अथ ते वागादयः सर्वे प्राणाः श्रत्येकश्रेष्टतामात्मनो म-
न्यमानास्तन्निर्दिधारयिषया प्रजापतिमुपजग्मुः ॥ स चैनानुवाच यस्मिन्नुत्क्रांते शरीरं
पापिष्टतरमिव भवति ॥ स युष्माकं मध्ये श्रेष्ठ इति तस्मिन्प्रजापतावेवमुक्तवति वागादि-
षूत्क्रांतेष्वपि मूकादिभावेन शरीरं स्वस्थमस्थात् ॥ मुख्यप्राणोच्चिक्रमिषायां तु वागादी-
नां व्याकुलतातान्वृत्तिप्राणाउवाच तमाहो अहमापद्यमनो अहमेवैतत्करोमि किंतत् ॥ पंच-

स्य प्राणापानादिभेदेनात्मानं विभज्यैतद्बाणं शरीरं वंचतिगच्छतीति वानं वानमेव बाणम|
स्थिरं शरीरमिति ॥ यावत्तदवष्टभ्य विधारयामीति श्रवणात् । देहधारणं प्राणलिंगमेव|
न्वर्थतोनुक्ता नाश्रुतिस्तु मा मोहमापद्यथाहमेवैतत्पंचधात्मानं प्रविभज्यैतद्बाणमव|
ष्टभ्य विधारयामीति प्राणवाय्वोः प्रज्ञात्मकत्वं कथमिति चेत्तन्नैक्रियाश्रयत्वादिति भ्रमः
तस्मादुपक्रमादिपर्यालोचनया ब्रह्मरूपैकवाक्यार्थप्रतीतावपि तस्या जीवमुख्य|
प्राणरूपपदार्थप्रतीतिजन्यत्वेगुणतान्यदार्थप्रतीतेश्च तज्जनकतयाणामुनतादेक|
वाक्यार्थप्रतीतिमऽपोद्य वाक्यभेद एव न्याय्य इति जीवमुख्यप्राणब्रह्मणां त्रयाणामुपास्या|
नां प्रत्येकं स्वातंत्र्येण वाक्यार्थत्वमिति त्रीणि वाक्यानि नैकं ब्रह्मवाक्यमिति । नेत्युपासना
त्रैविध्यात्त्रीण्युपासनानि प्रसज्येरन्नित्यर्थः ॥ उपक्रमोपसंहाराभ्यां ब्रह्मपरत्वेनैकवा|

क्यत्वे संभवति वाक्यभेदो न युक्तः । न च पदार्थप्रतीतेर्मुख्यत्वं तस्या वाक्यार्थप्रतीतिशेषत्वे सं|
~~भवति वाक्यभेदो न युक्तः नत्वे~~ न तस्या एव प्रधानत्वात् । न हि जनकत्वमात्रेण प्राधान्यं यु|
क्तं सन्निपत्योपकारकाणामपि प्राधान्यतापत्तेः । अन्यत्र ब्रह्मलिंगवशात्प्राणशब्दस्य ब्रह्म
णि प्रवृत्तेराश्रितत्वाच्च इहापि हितनमोपन्यासादिब्रह्मलिंगयोगात् ॥ ब्रह्मण एवायमुप
देश इति यत्तु जीवादिलिंगमस्तीति तस्य रत्वमिति तत्र प्राणव्यापारस्यापि परमेश्वराय
त्तत्वेन देहधारणस्यापि ब्रह्मण्युपचरितुं शक्यत्वेनाऽनन्यथासिद्धप्राणवायुलिंगाभा
वात् ॥ तथा च श्रुतिः ॥ न प्राणेन नापानेन मर्त्यो जीवति कश्चन ॥ इतरेण तु जीवंति यस्मिन्ने|
तावुपाश्रिताविति प्राणादिव्यापारस्येश्वरायत्ततमाह नापि न वाचं विजिज्ञासीतेत्यादिनी
वलिंगविरोधः जीवस्य ब्रह्मानन्यत्वेन सर्वोपाधिपरित्यागेन जीवस्य स्वरूपं ब्रह्मदर्शयि|

सू॰वृ॰ ४१

तुं न वाचं विजिज्ञासीत्यादिः प्रत्यगात्माभिमुखीकरणार्थ उपदेशो न विरुध्येते यथा चान स्तुदि
तं येन वागभ्युद्यते तदेव ब्रह्म त्वं विद्धीति स्फुटयेत्तदेवागारिव्याप्टतस्य वक्तुर्बुद्धिस्तं दर्शयति तत
स्माद्ब्रह्मपरमेवेदं वाक्यं न प्राणादि चिंतयपरं ॥ एकदेशिनस्तु नोपासनाविध्यन्तराश्रित
त्वादिदं न ब्रह्मणो गारित्यास्याध्यंतरमाचक्षते तथाहि न ब्रह्मवाक्ये जीवमुख्यप्राणलिंगयो
र्विरोधः ॥ कुतः उपासनाविध्यंतरजीवधर्मेण प्राणधर्मेण ब्रह्मधर्मेणां च सह हि तस्य वि
त्रिविधस्योपासनस्यैकस्य विवक्षितत्वादित्यर्थः ॥ अतो न वाक्यभेद इति ॥ तत्राप्युरस्तादमि
त्युपासकः प्राण इति इदं शरीरं परिगृह्योत्थापयतीति तस्मादेतदेवोक्थमुपासीतेति तिष्ठ
प्राणधर्मः ॥ अथ यथास्यै प्रज्ञायै सर्वाणि भूतान्येकं भवंतीति तद्व्याख्यास्यामः इत्युपक्रम्य वा
गेवास्या एकमंगमदूदुहं तस्यै नाम परस्तात्प्रतिविहिता भूतमात्रा प्रज्ञया वाचं समारुह्य

सू॰ १

४१

वाचा सर्वाणि नामान्याप्नोतीत्यादिर्जीवधर्मः ॥ तावा एता दशैव भूतमात्रा अधिप्रज्ञं दश प्रज्ञामा
त्रा अधिभूतं यद्धि भूतमात्रा न स्युर्न प्रज्ञामात्राः स्युर्यद्वा प्रज्ञामात्रा न स्युर्भूतमात्रा न स्यु
र्न ह्यन्यतरतो रूपं किंचन सिध्येन्नो एतन्नाना तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरा अर्पिता
एवमेवैता भूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राः प्राणे अर्पिताः स एष प्राण एव
प्रज्ञात्मेत्यादिर्ब्रह्मधर्मः ॥ एतदर्थस्तु प्राणो हि भूतानामायुरिति श्रुत्यंतरेण प्राणस्यायु
ष्ट्वसिद्धं जीवनस्य तदधीनतात्तस्मात्प्राणस्यैव देहादुत्थापकत्वाद्देहादिकमुत्थापय
तीत्युक्थं प्राणः एवमायुष्ट्वामृतत्वोक्थं तं प्राणधर्म इत्यर्थः ॥ सह वा सः सहोत्क्रांतिस्त्वेतु
क्या नंतर्यमथ प्राज्ञार्थः ॥ अस्याजीवाख्यप्रज्ञायाः संबंधिनिभूतानि सर्वाणि भूतानि दस्य
निदस्यते न कल्पितानि ॥ वास्तु नो यथैकं भावी नेतथा नवस्तु व्याख्यास्याम इत्युपक्रम्यो

स्वृ०
४२

क्तं वागेवेति ॥ बुद्धेः सामान्यायाः स्वरूपतो जातत्वेपि विषयित्वरूपस्त्वगौणशरीरमिंद्रियसाध्यंत
न्नामप्रपंचविषयित्वमर्द्धशरीरं बुद्धेरहंकारेऽज्ञगायाः तथा रूपप्रपंचविषयित्वमर्द्धश
रीरं तथा चक्षुरिंद्रियेषु मध्येवास्याः प्रज्ञाया देवहार्द्धमेकमंगमहूद्रुद्धेचितवतीश्चरयामा
सेत्यर्थः ॥ नामात्मकप्रपंचे वाग्द्वारा प्रविष्टा बुद्धिर्नामप्रपंचविषयित्वलक्षणमर्द्धंश
रीरं व्याप्नोतीति यावत् ॥ तस्याः प्रज्ञायाः पुनर्नामकिंचित्परस्तादपरभागे रूपप्रपंचविष
यित्वलक्षणेर्द्धशरीरे चक्षुरादिना प्रतिविहिता समुत्क्षिप्ता भूतमात्रा रूपादिरूपा का
रणं भवतीत्यर्थः ॥ चक्षुरादिना प्रकाशितोर्थप्रपंचो बुद्धेरितरभागं रूपप्रपंचविषयित्वल
क्षणं दूरयामासेति यावत् ॥ एवं वागिंद्रियेणार्थप्रपंचेन चनीवाख्यप्रज्ञाऽशेषं विषयित्वल
क्षणं शरीरं प्राप्य दृष्टी भवतीति सिद्धं ॥ तदुपहितचैतन्यद्वारा स्वरूपेण स्थिताध्यासमाह प्र

पृ० १

४२

ज्ञयेति तया द्वारापाचंकरेणं प्रतिचिदात्माहं वक्तेत्यध्यासमनुभूय वाचा करणेन सर्वा
णि नामानि वक्तव्यत्वेनाप्नोति चक्षुषा सर्वाणि रूपाणि पश्यतीत्येवं द्रष्टृत्वमनुभवतीत्यर्थः
सर्वभूतविषयकत्वं आत्मनि द्रष्टृत्वादिसंपादकत्वं च बुद्धेर्धर्म इति फलितं चक्षुरेवास्या इत्या
दिपर्यायांतरायोपि संगृहीतः सर्वाक्षरत्वानंदत्वादिर्ब्रह्मधर्म इत्याह ॥ भावा इति भूतानि पृ
थिव्यादीनि पंचमात्रा अस्य शरीरस्य पंच प्राणा दशभूतमात्रा अधिप्रज्ञं प्रज्ञा इंद्रियाणि तद्बु
द्धत्वानि वाऽधिकृत्य प्रवर्त्तंते ॥ दश प्रज्ञामात्राः पंचेंद्रियाणि तद्बुद्धिबुद्ध्यश्चाधिभूतं
भूतानि पृथिव्यादीनि शरीरीति चाधिकृत्य प्रवर्त्तंते एवं भूतेमात्राणां यो हि तु दशानां
या हि तेन प्रज्ञामात्रात्मकया ग्राहकापेक्षत्वमुक्तं प्रज्ञानामात्राणां दशानां ग्राहकाणां ग्राह्यानु
तमात्रापेक्षत्वं चोक्तं इदमेव मिथः सापेक्षत्वं ग्राहकयोः साधयति यद्वीति तदेव स्पष्टयति न

सू०वृ० ४३ ह्यीति ग्राह्यग्राह्यत्वं न सिध्यति किंतु ग्राहकादेव ॥ एवं ग्राह्यं विना ग्राहकं न निर्वहतीत्यन्योन्यसा- वृ० १
पेक्षत्वमित्यर्थः ॥ इदं ग्राह्यं ग्राहकरूपं वस्तुतो न भिन्नमित्याह नो इति किं त्वेकस्मिन्नात्मन्या-
रोपितमिति शेषः ॥ तद्यथेत्यादिकं तद्व्याख्यानं तस्माद्ब्रह्मण एव धर्मत्रयेणोपासनमेकं वि-
वक्षितं स्यन्यत्रापि मनोमयः ॥ प्राणशरीर इत्यादौ उपाधिधर्मेण ब्रह्मोपासनस्याश्रित-
त्वादिहापि तदुच्यते ॥ तस्माद्ब्रह्मवाक्यमिति इदमेकदेशिमतमुक्तं तथा हि किमत्रोपास-
नात्रयविशिष्टं ब्रह्म विधेयं ॥ उत ब्रह्मविशिष्टोपासनात्रयं किं वा ब्रह्मानुवादेन तदाश्रितस्यो-
पासनात्रयं नाद्यः ब्रह्मणः सिद्धत्वेन विध्ययोगात् ॥ नापि द्वितीयः ॥ वाक्यांतरेण ब्रह्मणोऽना-
तत्वात् नापि तृतीयः ब्रह्मानुवादेनोपास्तिविधौ वैकविशेष्यावशीकारादुपास्तीनां मिथोऽन्व-
संबंधात् तदुपास्तिविधानार्थत्वाद्वाक्यभेदस्य तु परकृतत्वात् ॥ तस्माद्यथाव्याख्यातमेव रम- ४३

णीयमिति शेषः परमेवेदं प्रतर्दनवाक्यमिति सिद्धं न्यायाः ॥ ११ ॥ सूत्राणि ॥ ३१ ॥ ननु त्वनेकप्रा-
णजीवब्रह्मविषयकगुणविशिष्टं ब्रह्मविषयकं ब्रह्मोपासनं विधीयते ॥ यथा ह्यारुणान्वये-
कगुणविशिष्टः ॥ क्रयो विधीयत इति न दोष इति चेत् तत्र वक्तव्यं ॥ ह्यारुण्यादीनां क्रमेण-
नयेन स्यादन्योगाविजायते तत्क्रतुत्वं तत्र भवतीति प्राणादाविति चेत् न तेषां प्रकृतेऽस-
त्वात् न त्वेवं प्राणादिगुणानां प्राणैः संबंधमुक्त्वा पश्चात् उपासनाविषये संबंध इति ब्रूम इति
चेत् तथापि वक्तव्यं प्राणादिगुणविशिष्टत्वेन साध्यत्वं प्राणादीनां तद्विशिष्टत्वेन च उपासना-
याः साध्यत्वं तत्र भावनाभेदे वाक्यभेदः ॥ प्राणादिकर्मिका उपासनाकर्मिका च एकैव भावने-
ति चेत् न द्वैरूप्यप्रसंगः ॥ एकैव भावना गुणकरणकप्राणकर्मिका सगुणविशिष-
प्राणकरणिका ब्रह्मविषयकउपासनाकर्मिका चेति वैरूप्यं ॥ ॥ इति श्रीपरमहंसपरि-

सू॰वृ॰
४४

ब्राजकाचार्यश्रीमन्मुकुंदगोविंदसरस्वतीपूज्यपादशिष्यरामकिंकरवैयासिकसूत्रवृत्तौ ब्रह्मा १॰
मृतवर्षिण्यां प्रथमाध्यायस्य स्पष्टलिंगाख्यः प्रथमः पादः ॥१॥ एवं प्रथमे पादे स्पष्टब्रा
ह्मलिंगानि वाक्यानि सर्वज्ञसर्वशक्तिजगदुत्पत्तिस्थितिलयकारणब्रह्मपरतीनीतो निका
निचिद्वाक्यान्यस्पष्टब्रह्मलिंगानि संदिह्यमानानि द्वितीयतृतीयपादाभ्यां ब्रह्मपरत
यानीयंते तत्र द्वितीयपादे प्रायश उपास्यब्रह्मपराणि विचार्यंते तृतीये ज्ञेयब्रह्मपराणीति
विभागः ॥ सर्वत्र प्रसिद्धोपदेशात् ॥ सर्वस्मिन्पादे वर्तता द्विगुणस्य ब्रह्मणः सिद्धत्वात्तदु
पजीवास्योत्तरस्योत्थाना हेतुहेतुमद्भावः संगतिः शब्देतरयोः सर्वाधिकरणस्ववांतरसंग
तिस्तु यथा सर्वजीवादिलिंगबाधया ब्रह्मपरत्वमुक्तं एवं बलवत्वाज्जीवस्य मनोमयत्वादि
ब्रिंम लिंगवत्त्वात् ॥ न तथेह ब्रह्मलिंगमस्ति किंतु ब्रह्मणः प्रकरणे तमेव तद्वाचप्रकर ४४

णापेक्षया लिंगस्य बलवत्वाज्जीवस्य मनोमयत्वादिलिंगमस्तीति तत्परमेवास्तीति प्रत्युदाहरणे हेण
संगतिः यद्यपादांतरत्वान्नावांतरसंगत्यपेक्षेति सर्वत्राधिकरणेऽस्मिन्विशेषवाक्यविचाररूपप्र
वेत्तिरपन्नयोरुपपत्तिरेव फलं यत्र तु निर्विशेषवाक्यविचारस्तत्र सर्वप्रत्ते तदुपास्तिः सिद्धां
ते प्रमितिरिति भेदः ॥ छांदोग्ये श्रूयते सर्वं खल्विदं ब्रह्म तज्जलानिति शांत उपासीताऽथख
लु क्रतुमयः पुरुषो यथाक्रतुरस्मिंल्लोके पुरुषो भवति तथेतः प्रेत्य भवति स क्रतुं कुर्वी
त मनोमयः प्राणशरीरइत्यादिश्रुत्यस्यार्थः ॥ सर्वं जगद्ब्रह्मैवेत्यत्र हेतुमाह तज्जलानिति तस्माज्जा
यत इति तज्जं तस्मिन्लीयत इति तल्लं तस्मिन्ननिति चेष्टत इति तदनं ॥ तज्जं च तल्लं च तदनं च तज्ज
लान् त्र्यवयवलोपः छांदसः इति शेषे हेतौ यस्मादेवं तस्मात्सर्वं जगद्ब्रह्मैवेत्यर्थः ॥ स क्रतुं
कुर्वीतेत्यत्र विहितमुपासनमनूद्य ज्ञानरूपगुणान् विदधाति शांत इति यतो ब्रह्मास्मि रिक्तं किं

सूत्र०
४५

नित्रांस्तिष्ठते द्वेष्यादीनामभावात् शांतः सन्नुपासीतेत्यर्थः॥ गुणां विधाय गुणिविधिस्तथापुं
प्रयत्नसाध्याया उपासनायाः फलमाह॥ अथेति पुरुषोऽधिकृत उपासकः क्रतुमयः संक
ल्पमयः॥ तत्र हेतुर्यथेति ज्ञानं कर्म वा यथास्मिन् देहे स्थितः॥ संकल्पयति तथा तदनुसा
रिणं फलं परत्र लभते सोऽधिकृतः॥ क्रतुं ध्यानं कुर्वीत किं ध्यायेदित्याकांक्षायामाह म
नोमय इति विभक्तिव्यत्ययेन मनोमयं प्राणशरीरं परमात्मानं ध्यायेदित्यर्थः॥ अत्र म
नोमयत्वादेः प्रकृतब्रह्मसापेक्षत्वनिरपेक्षत्वाभ्यां संशयः॥ किमत्र मनोमयत्वादिगुणकः
शारीर उपास्यत्वेनोपदिश्यते किं वा परमात्मेति किमत्र तु युक्तं शारीर इति कुतः॥ अप्राणो ह्यम
नाः शुभ्र इत्यादिना॥ ब्रह्मणो मनआदिसंबंधस्य निरासात् जीवस्य मनआदिसंबंधस्य स
र्वसिद्धत्वात्॥ तस्मात् मनोमयत्वादेः प्रकृतब्रह्मनिरपेक्षत्वात् गुणकः शारीर एवोपास्य

सू०
४५

इति प्राप्ते ब्रूमः॥ सर्वत्र प्रसिद्धोपदेशात्॥ अत्र परमेव ब्रह्म उपास्यत्वेनोपदिश्यते कुतः॥ सर्वत्र प्र
सिद्धोपदेशात् सर्वेषु वेदांतेषु प्रसिद्धं ब्रह्म जगत्कारणं तस्यैवात्र सर्वं खल्वित्यादिनोप
पदेशादित्यर्थः॥ यदुक्तं मनोमयत्वादि प्रकृतब्रह्मासंबंधीति तत्र॥ मनोमयतादेर्विशे
ष्याकांक्षायां यत् सर्वं खल्विदं ब्रह्मेति प्रकृतं तदेवान्वेति न प्रकृतो जीवः॥ अन्यथा प्रकृतहा
नप्रसंगात्॥ ननु तदसंभवः सर्वात्मकत्वे न सर्वस्याप्युपपत्तेरिति किंच॥ विवक्षितगुणो
पपत्तेश्च॥ विवक्षितत्वउपासनायामुपादेयत्वेनोपदिश्यमानगुणाः सत्यसंकल्पत्वादयस्तेषां ब्र
ह्मण्येवोपपत्तेरित्यर्थः॥ मनोमयः प्राणशरीरो भारूपः सत्यसंकल्पः॥ आकाशात्मा स
र्वकर्मा सर्वकाम इत्यादि॥ नोपदिष्यः यद्यपि मनोमयत्वादि जीवस्य साधारणं तथापि स
त्यसंकल्पत्वाद्यनुरोधेन सर्वात्मके ब्रह्मणि मनोमयत्वाद्युपपत्तिः॥ जीवधर्मान ब्रह्मणि र

सूत्र०
४६

ज्यायतिचश्रुतिः॥त्वंस्त्रीत्वंपुमानसित्वंकुमारउतवाकुमारीत्वंजीर्णोदंडेनवंचसित्वंजातो
भवसिविश्वतोमुखइतिजीर्णःस्थविरोभूत्वायोदंडेनवंचतिगच्छतिसोपित्वमेवेत्यर्थः॥अ
धारणइत्यादिश्रुतिस्तुनिर्गुणब्रह्मविषयेत्यविरोधः॥एवंसत्यसंकल्पत्वादीनांब्रह्म
एयुपपत्तिमुक्त्वाजीवेतेषामनुपपत्तिमाह॥अनुपपत्तेस्तुनशारीरः॥तुशब्दोवधारणा
र्थः॥अत्रमनोमयत्वादिगुणकंब्रह्मैवोपास्यंनतुशारीरःकुतः॥अनुपपत्तेःसत्यसंक
ल्पत्वादीनांजीवेत्राजस्येनानुपपत्तेरित्यर्थः॥शारीरस्यमनोमयत्वादिगुणकत्वाभावे
हेत्वंतरमाह॥कर्मकर्तृव्यपदेशाच्च॥नशारीरइत्यनुषंगः॥नशारीरोमनोमयत्वादिगुण
कइहोपास्यःकुतःकर्मकर्तृव्यपदेशात्एतमितःप्रेत्याभिसंभवितास्मीतिएतमितिप्र
कृतंमनोमयत्वादिगुणकमुपास्यंकर्मत्वेनव्यपदिशतिअभिसंभवितास्मिप्राप्तास्मीति
॥

सू० १
४६

शारीरमुपासकंकर्तृत्वेनव्यपदिशतिनचसत्यांगतौएकस्मिन्शारीरेकर्तृभावच्चांजस्ये
नोपपद्येतेतस्मान्नशारीरउपास्यः॥किंच॥शब्दविशेषात्॥मनोमयत्वादिगुणःपरमात्मै
वनशारीरःकुतःशब्दविशेषात्मनोमयत्वादिविशिष्टपरमात्माभिधायकस्यप्रथमांत
शब्दस्यसत्वादित्यर्थः॥तथाहिसमानप्रकरणेश्रुत्यंतरेव्रीहिर्वायवोवाश्यामाकतंडुलोवाएवम
यमंतरात्मन्पुरुषोहिरण्मयइत्यादौपुरुषोहिरण्मयइतिप्रथमांतशब्देनपरमात्माभि
धानंअंतरात्मन्नितिसप्तम्यंतेनशारीराभिधानंदृष्टमितिइहापिप्रथमांतेनस्तुतमनोम
यइत्यादिशब्दैःपरमात्मपरवेति॥ननुकर्मकर्तृव्यपदेशोनसंभवतिजीवब्रह्मणोरभेदा
दित्याशंक्याह॥स्मृतेश्च॥स्मृतिवशाज्जीवपरमात्मनोर्भेदइत्यर्थः॥ईश्वरःसर्वभूतानां
हृद्देशेर्जुनतिष्ठतिभ्रामयन्सर्वभूतानियंत्रारूढानिमाययेत्यादावास्मृतिःकिंचित्भेदंदर्शा

सू॰वृ॰ ४७

यतिष्यतः कार्मकर्तृव्यपदेशाउपपद्य इत्यर्थः ॥ अर्भकौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न नि-
चाय्यत्वादेवं व्योमवच्च ॥ ननु नात्र परमात्मोपास्यः कुतः ॥ अर्भकौकस्त्वात् अर्भकं अल्पं
ओकः स्थानं यस्य सोऽर्भकौका तस्य भावस्तत्त्वं तस्मादित्यर्थः ॥ एष म आत्मांतर्हृदय इति
रूपपरिच्छिन्नायतनत्वादित्यर्थः ॥ किंच ॥ तद्व्यपदेशाच्च शब्देनैवैष अणीयान्व्रीहेर्वा य-
वाद्वेत्याणीयस्त्वस्य व्यपदेशादाराग्रमात्रो जीव इहोपास्यः ॥ न सर्वगतः ॥ परमात्मेति चे-
न्न निचाय्यत्वादेवं एवमर्भकौकस्त्वाणीयस्त्वादिविशिष्टत्वेन रूपेण परमात्मन इह
निचाय्यत्वादुपास्यत्वादित्यर्थः ॥ सर्वगतस्य हृद्यप्रदेशमतत्वं कया विद्यपेक्षया संगच्छते
यथा सकललोकाधीशः परमात्मा श्रीरामचंद्रः ॥ अयोध्याधीश इति व्यपदिश्यते नैतावु-
ता सर्वगतत्वहानिः ॥ तत्र दृष्टांतः व्योमवद् इति यथा सर्वगतमपि व्योम सूचीपाशाद्यवच्छेदे

पृ॰ १

४७

नार्भकौकोपि अणीयोपि व्यपदिश्यते न तद्ब्रह्मापीत्यर्थः ॥ संभोगप्राप्तिरिति चेन्न वैशेष्यात्
ननु ईश्वरस्य व्योमवत्सर्वगतत्वे चेतनत्वाविशेषादित्यर्थः ॥ जीववत्सुखदुःखानुभवनारूपसं-
भोगप्राप्तिरिति चेन्न वैशेष्यात् जीवपरमात्मनोरत्यंतं विशेषादित्यर्थः ॥ जीवः कर्त्ता भोक्ता ध-
र्मादिमांश्चेति तस्य सुखदुःखसंबंधो युक्तः परमात्मा तु तद्विलक्षण इति न तस्य संभोगप्राप्ति-
रिति विशेषण वैशेष्यं स्वार्थे ष्यञ् विशेषातिशयद्योतनार्थो वा न च जीवपरमात्मनोरभेदा-
दोक्तत्वादिवैलक्षण्यमपि न स्यादिति वाच्यं बिंबप्रतिबिंबयोः परस्परधर्मासांकर्यस्याबाल-
सिद्धत्वादिवैलक्षण्यतस्मान्मनोमयत्वादिगुणकः परमात्मैवोपास्यो न शारीर इति सिद्धं ॥ अधिक-
रणं अत्ता चराचरग्रहणात् ॥ सर्वं ब्रह्मणो भोक्तृत्वाभावेऽक्के तर्हि तदत्तृत्वमपि जीवस्यैव न
ब्रह्मण इति इति दृष्टांतसंगत्येदमारभ्यते अत्र न सर्वपक्षेउपास्तिः फलं सिद्धांते निर्विशेषब्रह्म

स॰उ॰ ४८

प्रतिपत्तिरिति विवेकः ॥ कठवल्लीषु श्रूयते यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः मृत्युर्यस्यो
पसेचनं क इत्था वेद यत्र स इति श्रुत्यर्थः ॥ यस्य परमात्मनो ब्रह्म च क्षत्रं च उभे जात्या प्रसि
द्धे अन्नवदोदनः ॥ यस्य च मृत्युः सर्वमारकः ॥ उपसेचनमोदनमिश्रघृतं भवति तद्वत् सर्व
स्यात्ता परमात्माकारणत्वाद्वर्त्तते तं निर्विशेषमात्मानं ॥ नाविरतो दुश्चरितादिति मन्त्रो
क्तोपायवान्यथावेदेत्युक्तमन्य उपायरहितो न वेदेति काक्वर्थः ॥ अत्रौदनोपसेचनस्य
चितः कश्चिदत्ता प्रतीयते तत्र किमग्निरत्ता उत जीवः ॥ परमात्मा वेति संशयः ॥ त्रयाणामे
प्यस्मिन्ग्रन्थे प्रश्नोपन्यासः संज्ञापवर्जं किं तावत्प्राप्तं अग्निरित्युक्ततः ॥ अग्निरन्नाद इति श्रुति
प्रसिद्धेर्न्याज्जीवो वा स्यात् । तयोरन्यः पिप्पलं स्वाद्वत्तीति श्रुतेः ॥ न परमात्मेति प्राप्ते ब्रूमः
अत्ता चराचरग्रहणात् अत्ता ईश्वरो भवितुमर्हतीति कुतः ॥ चराचरग्रहणात् चराचरयोः स्था

प॰ १

४८

वरजंगमयोरद्यत्वेन ग्रहणात् ग्रहणादित्यर्थः ॥ मृत्युपसेचनः सर्वप्राणिमात्रस्याद्यत्वेन प्र
तीयमानत्वात् ब्रह्मक्षत्रे च ग्रहणमुपलक्षणार्थं नहि सर्वसंहर्तुः परमात्मनोऽन्यस्य जीवादेश्चरा
चरात्तत्वं युक्तं तस्मादत्ता ईश्वर एव ॥ प्रकरणाच्च ॥ इतश्चेश्वर एवात्ता कुतः प्रकरणात् ॥ परमात्म
नः प्रकृतत्वादित्यर्थः ॥ न जायते म्रियते वा विपश्चिदित्यादिना परमात्मनः प्रकृतत्वात् क इ
त्था वेद यत्र स इति च दुर्विज्ञेयत्वं ब्रह्मणोऽसाधारणं लिंगं दृश्यते ॥ गुहां प्रविष्टावात्मानौ हि
तद्दर्शनात् ॥ एवं ब्रह्मक्षत्रशब्दस्य तु परमात्मविषयत्वे नित्यवस्तुपरत्ववदिशापि पिबच्छब्दस्य
मग्निहितनुहां प्रवेशादिना बुद्धिचेतनपरत्वमस्तीति दृष्टान्तसंगत्या सारंभः ॥ सर्वपक्षे बुद्धि
भिन्नजीवत्तानं पक्षे तु सिद्धान्ते गुहां गुणब्रह्मज्ञानमिति ॥ विभागः ॥ अत्र वाक्यानन्तरं कठवल्लीषु श्रूय
ते ॥ ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्द्धे ॥ छायातपौ ब्रह्मविदो वदन्ति प

कृ॰व॰
४१५

चाग्नयो ये च त्रिणाचिकेता इति ॥ अस्यार्थः ॥ ऋतं अवश्यकं कर्मफलं पिबंतौ भुंजानौ जीवपर-
मात्मानौ छत्रिणो गच्छंतीतिवदेकस्यापि जीवस्य भोक्तृत्वेन ब्रह्मणोपि भोक्तृत्वव्यपदेशः ॥ सुकृत-
स्य धर्मस्य कार्ये देहरूपे लोके वर्त्तमानौ परार्द्धे परस्य ब्रह्मणः अर्द्धं स्थानमर्हतीति परार्द्धं
हृदयं ॥ तस्मिन् परमे श्रेष्ठे यो गुहा नभोलक्षणा तां प्रविश्य स्थितौ ॥ छायातपवन्मिथो वि-
रुद्धौ कर्तृत्वादितद्रहितलक्षणाभ्यां तौ ब्रह्मविदः पंचाग्नयः कर्मिणश्च वदंति त्रिर्नाचिकेतोग्नि-
श्चितो यैस्ते त्रिणाचिकेताः तेपि वदंतीत्यर्थः ॥ तत्र संशयः ॥ किमिह बुद्धिजीवौ निर्द्दिष्टौ उत जीव-
परमात्मानाविति तत्र बुद्धिजीवाविति प्राप्तं कुतः जीवस्य बुद्धिभिन्नत्वेन तत्तानार्यं प्रश्नदर्शनात्
येयं प्रेते विचिकित्सा मनुष्येस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणा-
मेष वरस्तृतीय इति मनुष्ये प्रेते मेस्ति तेस्तीत्ययं विचिकित्सा संशयः परलोकगामी भोक्ता जीवो

पृ॰ १
४१५

स्तीत्येके नास्तीति चान्ये अतस्त्वयोपदिष्टोहमेतन्निर्विचिकित्सं तत्त्वं ज्ञातुमिच्छामीति मृत्युं प्र-
ति नचिकेतसो वचनमिति वराणां नचिकेता मृत्युं वरत्रयं पृष्टवान् ॥ स पितुः सौमनस्यमग्निवि-
द्यात्मविद्याश्चेति तेषां वराणां मध्ये एष तृतीयो वर इत्यर्थः ॥ एवं च बुद्धिजीवयोः पृष्टत्वात्तावे-
वात्र निर्द्दिश्येते किंच ॥ गुहाप्रवेशस्य ब्रह्मणोऽसंभवादितरानासंभवाच्च बुद्धिजीवाविति प्राप्ते
ब्रूमः ॥ गुहां प्रविष्टात्मानौ हि तद्दर्शनात् ॥ गुहां प्रविष्टाविह जीवपरमात्मानावेव कुतः ॥ आत्मा-
नौ हि हि यस्मादात्मानौ तस्मादित्यर्थः ॥ ऋतं पिबंताविति कर्मफलभोगस्य वरणेनैकस्तावदा-
त्मे विद्धितौ यौ प्यात्मैवन्यापयस्तत्र हेतुमाह ॥ तद्दर्शनादिति संख्याश्रवणे हि संख्यावतोरेक-
रूपवतो लोके किं स्यादर्शनादित्यर्थः ॥ तद्यथा अस्य गोर्द्वितीयोन्वेष्टव्य इत्युक्ते गौरेव द्वितीयो-
ऽन्विष्यते नाश्वो न वा मनुष्यः ॥ एवमिहापि चेतनत्वसामान्यो जीवपरमात्मानावेव बुद्धिवि-

सूत्र० ५० जन्तुणाजीवपरमस्यात्यन्तदेवीतरं नैतद्वाक्यं॥ नापिगुणां प्रवेशानुपपत्तिः ब्रह्मणः॥ योवेद पृ० १
निहितंगुहायामित्यादौबहुलंगुहाप्रवेशावगमनात् नचचैतन्यपानानुपपत्तिः छत्रिन्यायस्या
दर्शितत्वादितितस्माज्जीवपरमात्मानावेवगुहांप्रविष्टौ किंच॥ विशेषणाच्च॥ जीवपरा
मात्मनोरेवास्मिन्ग्रंथेगंतृगंतव्यभावेनमंतृमंतव्यभावेनचविशेषितत्वादित्यर्थः॥ आ
त्मानंरथिनंविद्धिशरीरंरथमेवचेत्यादिनाऽनेतरेणग्रंथेनरथ्यादिकल्पनयाविज्ञानात्मा
नंरथिनंसंसारमोक्षयोर्गंतारंकल्पयतिसोध्वनःपारमाप्नोतितद्विष्णोःपरमंपदमितिपर
मात्मानंगंतव्यंकल्पयति॥ तथातंदुर्दर्शंगूढमनुप्रविष्टंगुहाहितंगह्वरेष्ठंपुराणं॥ अध्या
त्मयोगाधिगमेनदेवंमत्वाधीरोहर्षशोकौजहातीतिपूर्वस्मिन्नपिग्रंथेमंतृमंतव्यत्वेनता
वेवविशेषितौ॥ सजीवः॥ अध्वनः॥ संसारमार्गस्यपारमेवविशिनष्टितदितिव्यापनमः ५०

स्यब्रह्मणःस्वरूपंपरमंकार्यकारणातीतंपदंतदेवपारंतेयंनान्यदित्यर्थः॥ दुर्दर्शंसूक्ष्मत्वा
त॥ दुर्ज्ञानंच्छन्नतागूढमनुप्रविष्टंप्राकृतादितरूपेणविद्यमापंकुचेत्यनन्ताह॥ गुहेतिगु
हायांबुद्धावाहितंनिहितंगह्वरेष्ठंबहुविधानर्थसंकटेदेहेस्थितंपुराणंचिरंतनंतमीश्वरम॥ अध्या
त्मयोगःप्रत्यगात्मन्येवचित्तसमाधानंतस्यहृत्कृतावाक्यपादधिगमःसाक्षात्कारस्तेन
सोहमेवेतिनिश्चित्यधीरोविद्वान्हर्षशोकौपञ्जहितंसंसारंजहातीत्यर्थः॥ तथासमानेवृक्षेपुरु
षोनिमग्नोऽनीशयाशोचतिमुह्यमानः॥ जुष्टंयदापश्यत्यन्यमीशमस्यमहिमानमि
तिवीतशोकइतिमंत्रांतरेपिजीवपरमात्मानावेवविशिनष्टिमंतृमंतव्यभावेनआत्मेश्वरयोः
समानसृक्त्वोपयुक्तोदेहःपुरुषोजीवोनिमग्नःमनुष्योहमिति॥ अभिनिवेशवानऽनीशया
अविद्ययामुह्यमानस्तत्वमजानन्ऽनिशंशोचतिसंसारमनुभवतिजुष्टंध्यानासेवितंया

सू०त्र० शात्त्वकर्षदशायामन्यं बिंबभूतमीश्वरं प्रत्यक्त्वेन पश्यति तदास्य सैवात्मत्वेन दृष्टस्य महि पू०
५१ मानं स्वरूपं प्राप्नोति तत एव वीतशोको भवतीति तत्र हेतुरिति शब्देनोक्तः ॥ बंधहेतोरविद्या १
या ध्वस्तत्वादित्यर्थः ॥ न ह्यविद्याध्वंसानंतरं बंधकल्पनं युक्तं न ह वा एवंविदि किंचन स्व
प्नाध्वंसत इति श्रुतेः ॥ स्वप्नः अविद्या ॥ विदुषि किंचन ईषदपि स्वकल्पितं नाध्वंसते न संपाद
यंति स्वस्याएवाभावादित्यर्थः ॥ तस्मात्तद्वास्मिन् परस्मिन्नुपयुज्ये जीवपरयोरेव विशेषित
त्वात्तावेव गुहां प्रविष्टाविति जीवत्वादिधर्मवितिमुक्तः परमात्मा ते पइति सिद्धं ॥ अंतरउपप
त्तेः पूर्वं पिबंताविति प्राथमिकद्वित्वश्रुत्या चेतनचेतनतुल्यजीवपरदृष्ट्युसाराच्चरमश्रुता
गुहां प्रवेशाद योनीतास्तर्हि तद्वदेव दृश्यत इति प्राथमिकप्रत्यक्तत्वात्काव्यक्ति प्रतिबिंबात्मा
त्मत्वतुरीयोच्चरमश्रुता भूतत्वादवः स्तुत्यर्थत्वेन कथंचित नेया इति दृशांसे तगत्यास्यारंभः ५१

पूर्वयुक्ते प्रतिबिंबोपास्तिः फलं सिद्धांते ब्रह्मोपास्तिरिति उपकोसलविद्यायां छांदोग्ये श्रूयते ॥
य एषोक्षिणि पुरुषो दृश्यत एष आत्मेति होवाचैतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिन्सर्पि
र्वोदकं वा सिंचति वर्त्मनी एव गच्छतीत्यादि अस्यार्थः ॥ पुरुषः परमात्मा दृश्यते शास्त्रतः
एष आत्मेति उपकोसलं प्रति आचार्यवचनं प्रतिबिंबात्मकछायापव्यावृत्त्यर्थमाह ॥ एत
दिति इत्युवाचेत्यन्वयः ॥ अक्षिरूपस्थानस्य ब्रह्मसारूप्यमाह तदिति वर्त्मनी पक्ष्मस्थाने
इति द्वितीयाद्विवचनं ब्रह्मणो निर्लेपत्वाच्चक्षुषोपि निर्लेपत्वात् ॥ सारूप्यमीदृतदित्यर्थः ॥ ना
उत त्राक्षिण्यंतर उपदिश्यमानः परमात्मा किंतु प्रतिबिंबादिरिति संशये ॥ दृश्यत इति वचनात्सर्व
गतस्याक्षिस्थानतानुपपत्तेश्च न परमात्मा किंतु प्रतिबिंबादिरिति प्राप्ते ब्रूमः ॥ अंतर अंत
रः अक्षिमध्यगतः परमात्मैव कुतः उपपत्तेः ॥ आत्मत्वामृतत्वाभयत्वादीनामिहोक्तानां पर

सू॰वृ॰ ५२

मात्मन्येवोपपत्तेरित्यर्थः॥ न च दृश्यत इत्यनेन विरोधः॥ दर्शनस्य ज्ञानसाध्यत्वेनाविरोधात्॥ अ॰ १
किंच॥ परतं संयद्वाम इत्याचक्षत एतं हि सर्वाणि वामान्यभिसंयंति एष उ एव वामनी
रेष हि सर्वाणि वामानि नयति एष उ एव भामनीरेष हि सर्वेषु लोकेषु भातीत्युक्तनिर्दिष्टसं
यद्वामत्वादिगुणानां परमात्मन्येवोपपत्तेरंतऽतरः परमात्मैव तदर्थस्तु संयद्वामशब्दा
र्थमाह॥ एतं हीति॥ वामानि कर्मफलानि एतमक्षिपुरुषं हेतुमाश्रित्याभिसंयंति अत्य
द्यंते संयंति वामान्यस्मादिति संयद्वामः सर्वफलोदयहेतुरित्यर्थः॥ वामनीरप्ययमेवे
त्याह॥ एष इति॥ वामनीशब्दार्थमाह॥ एष हीति॥ वामानि शोभनानि जनं प्रापयति ज
नस्य सर्वस्य नप्रापकोऽप्ययमेवेत्यर्थः॥ भामनीपदार्थमाह॥ एष हीति॥ भामानि भाना
नि नयतीति भामनीः॥ अयमेव सर्वप्रकाशक इत्यर्थः॥ न हि प्रतिबिंबस्यान्यस्य वा ए ५२

तादृशगुणानां भवंतीति तस्मादक्ष्यंतः पुरुषः परमात्मा॥ कथं पुनः सर्वगतस्याल्पमक्षिस्थानं न्य
पद्यत इत्यत्रोत्तरं पठति॥ स्थानादिव्यपदेशाच्च॥ ईश्वरस्याल्पस्थानादिव्यपदेशो नानु
पपन्नः कुतः स्थानादिव्यपदेशात्॥ यश्चक्षुषि तिष्ठन्नित्यादावीश्वरस्य चक्षुः॥ स्थानव्यप
देशस्य दृष्टत्वादित्यर्थः॥ आदिपदेन रूपवत्त्वपरिग्रहो दृष्टांतत्वेनोक्तः हिरण्यश्मश्रुरस्यम
श्रुरित्यादेरूपवत्त्वस्योपासनार्थत्वेनोपादानादिहाप्युपासनार्थमक्षिस्थानव्यपदेशो न
विरुध्यत इति भावः॥ अपि च॥ सुखविशिष्टाभिधानादेव च अक्षिपुरुषः परमात्मैवोपप
द्यते कुतः सुखविशिष्टाभिधानात् एवकारेणान्यच संशयः कार्य इति सूच्यते सुखविशि
ष्टब्रह्मवाक्योपक्रमे श्रूयते तस्यैवेहाभिधानादित्यर्थः॥ तथा हि गुरुगृहेऽग्नीनाचाययति याचि
रकालं वर्तमानमुपकोसलं गार्हपत्यादयोऽग्नय ऊचुः॥ प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति तत्र

छा०उ० कंमर्दैवैषयिकसुखरूपः खंत्राहस्याकाशोरूबरखं तु शं हस्यद्युतिपरस्परमेदेशाप्तेस्युतिराहय। पू० १
५३ ह्यावकंतदेवखंयदेवखंतदेवकमिति॥ एवंपरस्परवैशिष्यप्रतिपादनात्सुखविशिष्टंब्र।
ह्मवाक्योपक्रमेश्रुतमितितस्यैवात्रपहरणंयुक्तमिति॥ एवंप्रस्परवैशिष्यप्रतिपादेह्म
तछायादेरित्यस्यंतःपरमात्मा॥ किंच॥ श्रुतोपनिषत्कगत्यभिधानाच्च॥ इतश्चास्यंतःपरमा
त्माकुतःश्रुतोपनिषत्कगत्यभिधानात्श्रुताऽन्यस्ताउपनिषद्ब्रह्मविद्यायेनसश्रुतोपनि।
षत्कः तस्ययागतिरर्चिरादिरूपातस्याःप्रक्रतेत्त्रभिधानादित्यर्थः॥ अथोत्तरेणतपसाब्र।
ह्मचर्येणश्रद्धयांविद्ययात्मानमंन्विष्यादित्यभिजनंतरातदैप्राणानामायतनमेतद
मृतमभयमेतत्परायणमेतस्मान्नपुनरावर्त्ततइति॥ स्मृतावपि॥ अग्निर्ज्योतिःरहःशु
क्लःषण्मासाउत्तरायणं॥ तत्रप्रयातागछंतिब्रह्मब्रह्मविदोजनाइति॥ यागतिर्ब्रह्मविदां ५३

दर्शितोसैवात्रिपुरुषविदःश्रुपतेत्त्रयपदुचैवास्मिन्नशाश्वेह्मेच्यंकुर्वंतियदुचनार्चिषमेवाभि।
संभवंतिइत्युपक्रम्यादित्याच्चंद्रमसंचंद्रमसोविद्युतंतत्पुरुषोमानवएतान्ब्रह्मगमयतीत्य
षदेवपथोब्रह्मपथएतेनप्रतिपद्यमानाइमंमानवमावर्त्तेनावर्त्ततइतितदर्थस्तु॥ अथयदेहपा
तानंतरंब्रह्मचर्यादितपसाहेतुनात्मानमनुसंधायतद्विद्ययाध्यानास्त्ययोत्तरमार्गमर्चिरादयु
पलक्षितंप्राप्यतेनादित्यादि॥ द्वाराकार्यंब्रह्मप्राप्नुवंतीत्यर्थः॥ कार्यंब्रह्मविशिनष्टिएतदिति
व्यष्टिसमस्तेंद्रियाणांसमष्ट्यभिमानीहिरण्यगर्भःस्थानमित्यर्थः॥ तस्यवास्तवंस्वरूपमाह॥
एतदमृतमिति॥ एतद्विशेषणसिद्ध्यर्थंहेतुमाह॥ एतस्मादितिस्मृतावप्यादिशब्देनातिवाहिन्या।
स्तदभिमानिन्योदेवतागृह्यंते॥ अथयेत्वक्तार्यंअस्मिंतुपासकेमृतेयदिसुत्रादयःशव्यंशचा।
संबंधेसंस्कारादिकर्मकुर्वंतियदिवानकुर्वंतिउभयथाप्यप्रतिहतोपास्तिफलाःसंतउपासका

सू३॰
५४

अर्चिरादयश्चिमामग्निर्देवतां प्राप्नुवंति ॥ अर्चिषोहर्देवतां ततः शुक्लपक्षदेवतां ॥ ततः षण्मासो-
पलक्षितोत्तरायणदेवतां ॥ ततः संवत्सरदेवतां ततस्त्वादित्यं ततश्चंद्रं ततो विद्युतं प्राप्नुवंति तत्र
तत्स्थितानुपासकान्ब्रह्मलोकादागत्याऽमानवः मनुसृष्टावनुत्पन्नः ॥ ब्रह्मलोकमवइतियाव
त्सपुरुषोगंतव्यं कार्यं ब्रह्म गमयति प्रापयतीति अर्चिरादिदेवैर्नेतृभिरुपलक्षितत्वादे-
व पथः गंतव्येन ब्रह्मणोपलक्षितत्वात् ब्रह्मपथश्च एतेन पथा कार्यब्रह्म प्रतिपद्यमानाः
पुनरिमं मानवं मनोः संबंधि जन्ममरणाद्यावृत्तियुक्तत्वादावर्त्तरूपं नावर्त्तंते न प्रविशंतीति ।
तस्माद्धिपुरुषः परमात्माऽतस्माद्धिपुरुषः परमात्मा न प्रतिबिंबात्मेवर्त्तंते न प्रविशंतीति ।
तस्मादाह ॥ अनवस्थितेरसंभवाच्च नेतरः ॥ इतरस्मात् यापुरुषादिरक्षिगत इति न युक्तं कुतः ॥ अन-
वस्थितेः उपासकस्य सर्वज्ञादिगुणच्छायासंपादकबिंबभूतपुरुषांतरस्यानवस्थानादित्यर्थः

प्र॰
१

५४

असंभवाच्च ॥ अमृतत्वादिगुणानां छायापुरुषेऽसंभवादित्यर्थः ॥ तस्मात्परमात्मैवाक्षिस्थ-
ने उपास्य इति सिद्धं ॥ अंतर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥ सर्वस्यानादिवापदेशाच्चेति
श्रुवे यः पृथिव्यां तिष्ठन्नित्याद्यंतर्यामिब्राह्मणस्यं पश्रुत्युषितिष्ठन्नित्यादिवाक्यमंतर्यामि-
णो ब्रह्मत्वं सिद्धवाक्रत्योदाहृतं तत्राद्विप्यसमाधीयत इत्याक्षेपसंगच्छेदमारभ्यते ॥ पूर्वा-
पत्तेयत्युरतया वाकं नीयते तदुपास्तिः फलं ॥ सर्वत्र सविशेषविचारे द्रष्टव्यं ॥ सिद्धांते ब्रह्मो-
पास्तिरेवेतीहापि ॥ तथा फलं द्रष्टव्यं अंतर्यामिब्राह्मणे श्रूयते य इमं च लोकं परं च लोकं सर्वा-
णि भूतानि योंतरो यमयतीत्युपक्रम्य यः पृथिव्यां तिष्ठन्पृथिव्या अंतरो यं पृथिवी न वेद यस्य
पृथिवी शरीरं यः पृथिवीमंतरो यमयत्येष त आत्मांतर्याम्यमृत इत्यादि ॥ अत्र पृथिव्यां
तिष्ठन्नंतर्यामीत्युक्तेः प्रावराधिकृतिति ॥ शंकां वा स्यति पृथिव्याः इति तदभिमानिदेवतां प्रत्या-

त्ये

सू॰ ५५ ह॥ यमिति॥ अशरीरस्य कथं नियंतृत्वमित्यत आह॥ यस्येति॥ नियम्यकार्यकारणसंघाते। पृ॰ १
नव नियंतृत्वमिति॥ फलितमाह॥ यइति॥ तस्य भिन्नत्वं मं वारयति॥ एष इति॥ ते मम चेत्य
र्थः॥ एवं यः पृथिव्यां तिष्ठन्नित्याद्यधिदैवतानंतरं यः सर्वेषु लोकेष्वित्यधिलोकं यः सर्वे
षु वेदेष्वित्यधिवेदं यः॥ सर्वेषु यज्ञेष्वित्यधियज्ञं यः सर्वेषु भूतेष्वित्यधिभूतं यः प्राणे ष्वि
त्यादिषु आत्मनीत्यंतं अध्यात्मं च कश्चिदंतरवस्थितो यमयितोऽंतर्यामी श्रूयते स किमा
धिदैवाद्यभिमानी देवतात्मा किं वा प्राप्ताणिमाद्यैश्वर्यः॥ कश्चिद्योगी किं वा परमात्मेति संश
यः॥ किं तावत्प्राप्तं देवतात्मेति कुतः पृथिव्येव यस्यायतनमग्निर्लोको मनोज्योतिरित्या
दिना कार्यकारणसंघातस्य देवतायां श्रुतत्वेन तस्यापि यंतृत्वोपपत्तेः॥ यस्य देवस्य पृथिवी
आयतनं शरीरं अग्निर्लोकिः लोक्यते अनेन रूपादिरिति लोकश्चक्षुर्ज्योति रेव मनबमन इत्यर्थः॥ ना। ५५

अस्यार्थः २

श्यशरीरस्येश्वरस्य नियंतृत्वं युक्तं॥ तस्माद्देवतात्मा योगी वेति प्राप्ते ब्रूमः॥ अधिदैवादिषु श्रूयमा
णोंऽतर्यामी परमात्मैव कुतः॥ तद्धर्मव्यपदेशात्॥ तस्य परमात्मनो धर्माणामिह व्यपदेशा
दित्यर्थः॥ सर्वांतर्यामित्वमात्मत्वममृतत्वं दृष्टत्वं चेह परमात्मनोऽसाधारणधर्मा उदाहृता
वाक्ये दृश्याः॥ न चाशरीरस्य कथं नियंतृत्वमिति वाच्य॥ नियम्यशरीरेणैव तस्य नियंतृत्वोपप
त्तेरिति॥ ननु प्रधानमंतर्याम्यस्त्वित्याशंक्याह॥ न च स्मार्त्तमतद्धर्माभिलापात्॥ स्मा
र्त्तं सांख्यस्मृतिकल्पितप्रधानं नांतर्यामिशब्दवाच्यं कुतः॥ अतद्धर्माभिलापात् तच्छब्देन
प्रधानमुच्यते न तत्॥ अतत्प्रधानभिन्नः॥ परमात्मेत्यर्थः॥ तस्यैव चेतनस्य ये धर्मा इह द्रष्टृ
त्वादयस्तेषामिहाभिलापात्॥ अभिधानादित्यर्थः॥ अदृष्टो द्रष्टाऽश्रुतः श्रोताऽमतो
मंताऽविज्ञातो विज्ञातेति वाक्यशेषेण दृष्टा॥ यद्येतेन धर्माः स्युस्तर्हि तेनाचेतनं प्रधानमं

सू०
५६

तर्यामीत्यर्थः ॥ तर्हि चेतनो जीवो योगी भवतु तं तर्यामीत्यत आह ॥ शारीरश्चोभयेऽपि हि
भेदेनैनमधीयते ॥ शारीरो नांतर्यामीति नकारस्य सर्वसूत्रादनुषंगः ॥ कस्मात् उभयेऽ
पि हि काण्वा माध्यंदिनाश्चांतर्यामिणो भेदेनैनं शारीरं पृथिव्यादिवदधिष्ठानत्वेन नियम्य
त्वेन चाधीयते यो विज्ञाने तिष्ठन्निति काण्वाः विज्ञानपदं जीवपरं यच्चात्मनि तिष्ठन्निति माध्यं
दिनाः ॥ तस्मात् तस्मात्पृथिव्यादिवन्नियम्यत्वमेव जीवस्य यच्चानियंतृत्वं भेदेनैवमधी
यत इति पाठे एवं यो विज्ञाने तिष्ठन्नित्यादिना प्रकारेण त्वयोर्बोध्यः ॥ तस्माददृष्टत्वादिषु
च्चांतर्यामी परमात्मैवेति सिद्धं ॥ अदृश्यत्वादिगुणको धर्मोक्तेः ॥ सर्वं प्रधानविरोधि इदृश्यत्वा
दिधर्मवत्प्रधानमंतर्यामीत्युक्तं ॥ तर्हि तद्विरोधिधर्माणां मंत्रवर्णात्प्रधानमेवाह
श्यत्वादिगुणकोऽस्तयोनिः स्यादिति प्रत्युदाहरणसंगत्यास्यारंभः ॥ स्यापर्वर्णवाक्यमा।

मु०
५६

न्नायते ॥ अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रोत्रं त
दपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यंति धीरा इत्यादि श्रु
त्यर्थः ॥ सर्वमपराकृग्वेदादिलक्षणा विद्योक्तानंतरं परमथशब्दार्थः ॥ यया तदक्षरम
धिगम्यते सा परात्कृष्टफलिका विद्येत्यर्थः ॥ अक्षरस्य वर्णसमुदायत्वं वारयति यदिति अ
द्रेश्यमदृश्यं ज्ञानेंद्रियाऽगम्यमग्राह्यं कर्मेंद्रियाऽविषयः ॥ अगोत्रं वंशशून्यं अवर्णं जा
तिहीनं नलमिंद्रियाऽविषयः किंतु ॥ तद्रहितं चेत्याह ॥ अचक्षुरिति न विद्येते चक्षुःश्रोत्रे यस्य त
त्तथा इदं च ज्ञानेंद्रियोपलक्षणं कर्मेंद्रियाभावमाह ॥ तदिति पाणिश्च पाणिपादं तद्यस्य ना
स्ति तत्तथा उपलक्षणमेतत्कर्मेंद्रियाणां ॥ नित्यं अनाशोपलक्षितं विभुं प्रभुं सर्वगतं सर्व
गतं सर्वकल्पनाधिष्ठानं सुसूक्ष्मं दुर्ज्ञानत्वात् । तदव्ययं नाशाभावात् यत्तद्यथोक्तमक्षरं भूत

मु॰ उ॰ ५८ योनिं यथा परिपश्यंति धीराः सा परा विद्येत्यन्वयः ॥ तत्र संशयः किमदृश्यत्वादिगुणको भूत- मु॰ १
तयोनिः प्रधानं वा शारीरो वा परमात्मा वेति ॥ अदृश्यत्वादीनां प्रधाने संभवात् प्रधानमिति
प्राप्ते ब्रूमः ॥ अदृश्यत्वादिगुणको भूतयोनिः परमात्मैव कुतः ॥ धर्मोक्तेः ॥ यः सर्वज्ञः सर्ववि-
द्यस्य ज्ञानमयं तपः तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायते ॥ इति ईश्वरधर्मस्य सर्वज्ञत्वादे-
र्भूतयोनौ निर्देशादित्यर्थः ॥ सामान्यतः सार्वज्ञ्यं विशेषतः सर्ववित्त्वं यस्य ज्ञानमेव तपस्त-
स्मादक्षरादेतत्कार्यरूपं ब्रह्मादि हिरण्यगर्भः सूत्रभूतात्मकं नाम स्थूलभूतात्मकं रूपं
च व्रीहियवादि सर्वभौतिकमन्नं च जायत इत्यर्थः ॥ न च अक्षरात्परतः पर इत्यक्षराद्भूतयोनेः
परस्येश्वरस्य सर्वज्ञत्वं श्रूयते न भूतयोनेरिति चेत् न येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां त-
त्वतो ब्रह्मविद्यामिति ॥ येन ज्ञानेनाक्षरं प्रकृतं भूतयोनिं सर्वज्ञं पुरुषं सत्यं वेद तां ब्रह्म ॥ वि- ५८

द्यामुपसन्नाय शांताय प्रोवाचाचार्यः ॥ अक्षरादिति तूपक्रम्याक्षरात्परतः पर इत्युच्यमानः पा-
रोऽन्यो भूतयोनेरतिरिच्यते ॥ किं त्वक्षरादित्यविद्यानिर्देशः ततः पर इति न विरोधः ॥ किं च ॥ विषया-
वाक्येऽक्षरात्मकभूतयोनिविद्यायाः परत्वं श्रूयमाणं भूतयोनेर्ब्रह्मत्वं गमयति नहि ब्राह्मवि-
द्यातोऽन्या विद्या परा भवितुमुक्ता मोक्षफलकत्वात्मकपरत्वस्य ब्रह्मविद्याया एव संभवात्
ब्रह्मविद्योपक्रमे श्रूयमाणामपरविद्यामृग्वेदादिलक्षणां कर्मविद्यामनित्यफलकत्वेन निंदति
च नित्यफलकब्रह्मविद्याप्रशंसायै तस्मात्परविद्याविषयभूतमक्षरं भूतयोनिंदा हि श्रूयते
त प्लवा ह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म ॥ एतच्छ्रेयो येऽभिनंदंति मूढा जरामृत्युं
ते पुनरेवापियंतीति ॥ निंदित्वा च कर्मविद्यां ततो विरक्तस्य ब्रह्मविद्याधिकारं दर्शयति ॥ परीक्ष्य
लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः ॥ कृतेन तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्

मुं०उ०
५८

समित्पाणिः॥ श्रोत्रियं ब्रह्मनिष्ठमिति श्रुत्यर्थः॥ प्लवंते गच्छंतीति प्लवाः विनाशिनः॥ अत एवा
दृढाः॥ के ते यज्ञरूपाः॥ यज्ञो रूपं उपाधिर्येषां ते तथा ऋत्विग्भिः षोडशभिः क्रतुमुपाजयंतीति॥ ऋ
त्विजः॥ षोडश यज्ञोपाधिकाः तद्पत्नी यजमानश्च यज्ञोपाधिकौ एवमष्टादश यज्ञ
रूपाः ज्ञापिकं केवलं अवरं अन्यं कर्म येषु श्रुत्या विहितं॥ एतदेव कर्म श्रेयो हेतुर्न ब्रह्मधी
रिति ये मूढा हृष्यंति ते पुनर्जरां मृत्युं मरणमेवाप्नुवंतीत्यर्थः कर्मजन्यान् लोकान् प्रत्यक्षादि
नाऽनित्यतया परीक्ष्य ज्ञात्वा निर्वेदं वैराग्यमायात् गच्छेत् नास्त्यकृतो मोक्षः कृतेन कर्मणा॥
अहं तु नित्यफलार्थी तस्मात् किं कर्मणेति विरक्तः सन् तस्य ब्रह्मणो ज्ञानार्थं गुरुपादोपसर्पणं
कुर्यात् तत्फलं मोक्षसाधनज्ञानाय श्रवणादि कुर्यादित्यर्थः॥ रिक्तहस्तस्तु नोपेयाद्राजानं
दैवतं गुरुमिति न्यायेन समित्पाणिरित्युक्तं॥ श्रोत्रियमित्यादिनाऽध्ययनरहितस्य कर्मिणो

मु०
५८

वा गुरुत्वं वा पतितकर्मानिंदया ततो विरक्तस्याधिकारो केवलविद्या ब्रह्मविदेति फलेनेतं॥ तस्मक
ह्रूपत्वादिगुणकः परमात्मापि च॥ विशेषणभेदव्यपदेशाच्च नेतरौ अहश्यत्वादिगुणकः
परमात्मैव नेतरौ प्रधानजीवौ कुतः विशेषणात् दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यंतरो ह्यजः॥ अ
प्राणो ह्यमनाः शुभ्रः इत्यादिना दिव्यत्वादिविशेषणश्रवणादित्यर्थः प्रधाननिरासे हेत्वंतरमा
ह॥ भेदव्यपदेशादिति अक्षरात्परतः पर इति प्रपंचोपादानस्याऽव्याकृतस्याक्षरशब्दितस्य
प्रकृत्यविकृतस्य जडस्य परमात्मनश्च भेदेन व्यपदिष्टत्वादित्यर्थः॥ दिव्यः स्वयंज्योतिः अमूर्तः
निरवयवः पुरुषः पूर्णः बाह्यं कार्यं अभ्यंतरं कारणं ताभ्यां कल्पिताभ्यां सहाधिष्ठानत्वेनाति
ष्ठतीति स बाह्याभ्यंतरः सर्वकल्पनाधिष्ठानमिति यावत्॥ अजः कूटस्थः नह्येतादृशविशेष
णानि अव्यक्ते जीवे वा संभवंति॥ तस्मात्परमात्मैव भूतयोनिः रूपोपन्यासाच्च किंच भूतयो

सूत्र० ५१

नि:॥ परमात्मैवानेनेतरावित्यनुषंगः॥ कुतः रूपोपन्यासात्॥ रूपं सर्वविकारात्मकं शरीरं तस्योप
न्यासादित्यर्थः॥ अक्षरात्परतः पर इत्यस्यानंतरमेतस्माज्जायते प्राणः इत्यादिना प्राणादिसृष्टि
यंतानां सृष्टिमुक्त्वा तस्यैव भूतयोनेः सर्वविकारात्मकं रूपमुपन्यस्यति अग्निर्मूर्धा चक्षुषी चंद्रसू
र्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः॥ वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवी ह्येष सर्वभूता
तरात्मेति अग्निर्द्युलोकः॥ असौ वाव लोको गौतमाग्निरिति श्रुतेः॥ विवृता वेदा वागित्यन्वयः॥
पद्भ्यामिति॥ चतुर्थ्यर्थे पंचमी पृथिवी यस्यैतादृशं शरीरं स एष सर्वभूतानामंतरात्मेत्यर्थः॥
न ह्येतादृशरूपोपन्यासो जीवाव्यक्तयोः परिग्रहे घटते परमात्मनस्तु सर्वात्मकत्वात्॥ स
युज्यते॥ अस्य सूत्रस्य वृत्तिकारमतरीत्यायमर्थः॥ प्रकृतिरितः॥ शांकरभगवत्पादास्तु अग्नि
र्मूर्धेति वाक्यस्य जायमानमध्यपातात्तज्जायमानहिरण्यगर्भरूपस्वात्मपरत्वं न परमात्म

पु०
१
५१

परत्वमिति॥ वदंति तथा हि तस्माज्जायते प्राणो मनः सर्वेंद्रियाणि च॥ खं वायुर्ज्योतिरापः॥
पृथिवी विश्वस्य धारिणीति एवं प्राणादीनां सृष्टिरुक्ता॥ तथोत्तरत्रापि॥ तस्मादग्निः समि
धो यस्य सूर्य इति॥ यस्य द्युलोकस्य सूर्यः समिध इवाग्नेरिव भासकः॥ यद्वा॥ अग्निर्द्युलोकः॥
यस्य सूर्य एव समिधः॥ तस्मादित्य एव समिदिति श्रुतेः॥ सोपि तस्मादेव जायत इत्यर्थः॥ ए
वं सर्वमुत्तरत्र च जायमानानां निर्दिष्टत्वात्॥ अग्निर्मूर्धेति वाक्यं जायमानहिरण्यगर्भपरमे
व हिरण्यगर्भस्यात्मन उत्पत्तिः॥ श्रुत्यंतरे श्रूयते हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः
पतिरेक आसीत्॥ स दाधार पृथिवीं द्यामुतेमां॥ कस्मै देवाय हविषा विधेमेति॥ समवर्तत
र्तत अजायत जातः सन्नीश्वरा जगतां पतिर्बभूव तया यामस्य कस्मै हिरण्यगर्भाय विधेम परिच
रेम सूत्रार्थस्तु भूतयोनिः परमात्मैव कुतः॥ पुरुष एवेदं विश्वं कर्मेत्यादिना॥ सार्वात्म्यात्मक

छां०
६०

रूपोपन्यासादिति सर्वं कर्म सुसाध्यं तपो ज्ञानं च पुरुष एव वेत्यर्थः ॥ तस्माद्दहररूपत्वादिगुण भा०
कोशत्वयोगिभिः ॥ परमात्मा निर्विशेषोऽतोऽप इति सिद्धं ॥ वैश्वानरः साधारणशब्दविशेषात् ॥ स्वा । १
त्ररूपोपन्यासप्रसंगाद्द्युलोकादेर्वैश्वानरः स्मृतो विचार्य इति प्रसंगतिः ॥ यद्वा ॥ पूर्वं
वाक्योपक्रमस्य दहरपरत्वादिसाधारणधर्मस्य वाक्यशेषधर्मस्य वाक्यशेषस्थं सर्वज्ञत्वा ।
द्युत्वाद्ब्रह्मविषयत्वमुक्तं न हि तद्वेदापि उपक्रमस्थसाधारणशब्दस्य वाक्यशेषस्य होमा
धारतो ज्ञाप्रसिद्ध्यनुगृहीतयान्यान्तरार्थकत्वमस्तीति दृष्टान्तसंगतिः ॥ को न आत्मा किं ब्र
ह्मेत्यात्मानमेवेमं वैश्वानरं संप्रत्यध्येषि तमेव नो ब्रूहीत्युपक्रम्याम्नायते यस्त्वेतमेवं प्रा
देशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्व
न्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्व ६०

र्त्मात्मा संदेहो बहुलो बस्तिरेव रयिः पृथिव्येव पादावुर एव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्यो ।
मनोन्वाहार्यपचन आस्यमाहवनीय इत्यादिश्रुत्यर्थः ॥ आत्मनोऽसंसारित्वार्थं ब्रह्मपदं ।
ब्रह्मणोऽपरोक्षत्वार्थमात्मपदं ॥ प्राचीनशालजसत्ययज्ञेन्द्रद्युम्नजनबुडिलाः समेत्यैवं मीमां घु
सां चक्रुः को न आत्मा किं ब्रह्मेति पंचाप्युद्दालकेन सह वैश्वानरोपमितिनिश्चयार्थं कैके ।
यराजमश्वपतिमागत्योचुः ॥ आत्मानमित्यादि संप्रत्यध्येषि सर्वदा ध्यायसि स च कैके
यराजः द्युलोकसूर्यवाय्वाकाशवारिपृथिवीनां मध्ये द्युलोकादिरेकैक एव वैश्वानर इति ।
मीमांसकानेव विवेदमानाः प्राचीनशालादयः षट् ऋषयो मत्समीपमागता इति ज्ञाता
तादृशविपरीतबुद्धिनिरासेन सम्यक् वैश्वानरबुद्धिजिघृक्षयोपयातानेवं चोपबद्धकं तमा
त्मानमुपास्त इत्यादिना ॥ एषामंतस्त्वैकैकऋषिर्द्युलोक एव वैश्वानर इत्युवाच अन्यस्तु

छा॰ उ॰
६१

त्रूपे वैश्वानर इत्येवं क्रमेण पृथिवीपर्यन्तमेकैकस्य वैश्वानरत्वं श्रुत्वा तेषां द्युसूर्यादीनां क्र-
मेण सुतेजस्त्व विश्वरूपत्व पृथग्वर्त्मात्मत्व बहुलत्व रयित्व पादत्व गुणयोगं विधाय प्रत्येकं ।
वैश्वानरत्व प्रत्यं मूर्द्धपातान्धत्वप्राणोत्क्रमणदेहशीर्णताबस्तिभेदशोषणदोषौ निर्दिश्य ते-
षामेव द्युसूर्यादीनां वैश्वानरपुरुषं प्रति मूर्धादिभावमुक्त्वा कृत्स्नं वैश्वानरोपासनमुप-
दिशति यस्त्वेतमित्यादिना ॥ आभिमुख्येन विश्वं मिमीते जानातीत्यभिविमानस्तं प्रादेशप-
रिमाणमुपादिशत्येयस्तस्य सर्वलोकाद्याश्रयं फलमित्यर्थः ॥ लोका भोगभूमयः ॥ भूतानि
तदुपाश्रमः भोक्तारः स्वपमात्मान इति भेदः ॥ तत्सर्वं विधिफलमवगाशयर्थः ॥ अस्य न फलमुक्त्वा
ध्येयमाह ॥ तस्येति सुतेजस्त्वगुणो द्यौर्वैश्वानरस्य मूर्धा विश्वरूपत्वगुणकः सूर्यश्चक्षुः
एष शुक्ल एष नील इत्यादिश्रुतेर्विश्वरूपत्वं बोध्यं पृथक् नानावर्त्मागमनमात्मा स्वभावो

पु॰ १
६१

यस्य वायोः सतया नानागतत्वगुणयुक्तो वायुः प्राणः बहुलत्वगुण आकाशोऽस्य संदेहः दे-
हमध्यमित्यर्थः ॥ रयिर्धनं तद्गुणा आपोऽस्य बस्तिर्मूत्रस्थानं वैश्वानरस्य होमाधारत्व संपाद-
नार्थमुर एवेत्यादि एवं सति वैश्वानरशब्दस्यायमग्निर्वैश्वानरो योऽयमन्तः पुरुष इत्यादौ ना-
वरो विश्वस्माच्चाग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्नित्यादावग्निसामान्ये वैश्वा-
नरस्य सुमतौ स्याम ॥ राजा हि कं भुवनानामभिश्रीरित्यादावग्निशरीरायां देवतायां प्रयो-
गदर्शनात् उपक्रमे च को न आत्मेत्युपक्रमाच्च संशयः ॥ किमत्र वैश्वानरो जाठर उताग्निसा-
मान्यमुताग्निशरीरा देवता आहोस्विच्छारीरः उत परमात्मा वेति ॥ श्रुत्यर्थस्तु पुरुषे पुरुषाकारे ।
हे विश्वस्मै भुवनाय वैश्वानरमग्निमह्नां केतुं चिकं सूर्यमकृण्वन्नक्तं वंतोरेवा स्तुतं वृंतो देवा-
स्तद्धृदये पि दिनव्यवहारादित्यर्थः ॥ वैश्वानरस्याध्यक्षिमस्थानस्य देवस्य सुमतौ तो भवबु-

सूत्र०
६२

द्यौर्वयं स्याम भवेम तस्मात्तद्विषया सुमतिर्भवतीत्यर्थः ॥ अत्र हेतुः राजाहीति इति यस्माद्भुवना
नामयं राजा कं सुखहेतुरभिमुखाश्रीरस्येत्यभिश्रीराश्रयस्तस्मात्तस्य सुमतौ स्यामेति स्तुति
वाक्यार्थः ॥ तत्र जाठरादौ वैश्वानरशब्दस्य प्रसिद्धत्वात् जाठरादिरेव वैश्वानर इति प्राप्ते ब्रूमः
वैश्वानरः परमात्मैव कुतः साधारणशब्दविशेषात् साधारणशब्दयोरपि विशेषः साधा
रणशब्दो जीवपरयोः साधारणविशेषस्तस्मादित्यर्थः ॥ जाठराग्निसामान्यतद्देवतासु साधारणो
वैश्वानरशब्दो जीवपरयोः साधारण आत्मशब्दस्तयोर्वैश्वानरात्मशब्दयोर्जाठरादौ जीवादौ
साधारणयोरपि सतोः परमात्मपरत्व एव विशेषोऽवगम्यते तस्य ह वा एतस्यात्मनो वैश्वान
रस्य मूर्धैव सुतेजा इत्यादावुक्तद्युमूर्धत्वादेः सर्वात्मकपरमात्मन्यपरिग्रहणेवोपपन्नत्वात् ॥
तस्माद्वैश्वानरः परमात्मा ॥ स्मर्यमाणमनुमानं स्यादिति ॥ किं च वैश्वानरपदस्य परमा

त्मपरत्वे स्मर्यमाणं स्मृत्युक्तरूपमनुमानं स्यात् ॥ अनुमापकं लिंगं स्यादित्यर्थः ॥ यस्याग्निरा
स्यं द्यौर्मूर्धा खं नाभिश्चरणौ क्षितिः ॥ सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै लोकात्मने नम इत्यस्याः ॥
स्मृतेः शरीरात्मकरूपप्रतिपादनपराया उपोद्धृतश्रुतिरेव मूलं मूलान्तरकल्पने मानाभा
वात् ॥ तथा च स्मृतौ परमेश्वरस्यैवोक्तत्वात् ॥ तन्मूलश्रुतौ विद्यमानवैश्वानरशब्दः परमा
त्मपर एवेति तात्पर्यं ॥ सूत्रे इति शब्दो हेतौ यस्मादेवं लिंगमस्ति तस्माद्वैश्वानरः परमात्मैवे
ति ॥ शब्दादिभ्योऽन्तःप्रतिष्ठानाच्चेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते
ननु वैश्वानरो न परमात्मा कुतः शब्दादिभ्योऽन्तः ॥ प्रतिष्ठानाच्च शब्दस्तावद्वैश्वानरशब्दो न
परमात्मपरः जाठरादौ रूढत्वात् ॥ आदिशब्दात् हृदयं गार्हपत्य इत्यादावग्नित्रेताकल्पन
तद्भक्तं प्रथममागच्छेत्तद्धोमीयमित्यादिना ॥ प्राणाहुत्याधारतासंकीर्तनं च गृह्यते ॥ ते

पृ०
१

६२

सू०वृ० ६३

भ्यो हेतुभ्यो जाठरएव वैश्वानरः ॥ किं चातः ॥ प्रतिष्ठानात् पुरुषेंतः प्रतिष्ठितं वेदेति वैश्वानरस्यांतः
प्रतिष्ठानश्रवणात् इदं च जाठरे संभवति न च द्युमूर्द्धत्वाद्युपपत्तिः ॥ अग्निसामान्योत्मा
कत्वतोग्निपरिग्रहेतस्योपपन्नेः ॥ नो द्युलोकादिसंबंधस्य तस्मिन्मंत्रे वततत्वात् ॥ यो भानु
नापृथिवीं द्यामुतेमामाततान तान रोदसी अंतरिक्षमिति मंत्रः ॥ इमां पृथिवीमुत द्यामपि द्या
वापृथिव्यावेव रोदसी यो भानुना रूपेण ततान व्याप्तवान् अंतरिक्षं तयोर्मध्यं वाततान स
देवोग्निर्द्युलोकाद्यवयवोध्येय इति मंत्रार्थः ॥ तस्मान्न वैश्वानरः परमात्मेति चेत् नायं दोषः
कुतः ॥ तथा दृष्ट्युपदेशात् तथा जाठररूपेण परमेश्वरस्य दृष्टेरुपासनायाउपदेशादित्यर्थ
ः ॥ मनोमयः प्राणशरीरो भारूप इति वत् ॥ यद्वा ॥ तथा जाठररूपेण परमात्मदृष्टेरुपदे
शात् मनो ब्रह्मेत्युपासीतेति वदित्यर्थः ॥ ननु जाठरएव वैश्वानरो मुख्योस्तु तत्राह ॥ असं

३० ६३

भवादिति मूर्द्धैव सुतेजा इत्या जाठरे असंभवादित्यर्थः ॥ न च भूताग्नौ तत्संभव इत्युक्तस्त्रैव ह्या
ते ॥ अपि च पुरुषमपि चैनं वैश्वानरं वाजसनेयिनः अधीयते स एषोग्निर्वैश्वानरो यत्पुरुषः
स यो हैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेंतः प्रतिष्ठितं वेदेति ॥ परमेश्वरस्य सर्वात्मकत्वात्
पुरुषत्वं पुरुषेंतः प्रतिष्ठितत्वं च सर्वमप्युपपद्यते पुरुषविधमपि चैनमधीयत इति सूत्रे प
ठितं ॥ अयमेवार्थः ॥ न हि जाठरस्य पुरुषविधत्वं संभवति परमात्मनस्तूपास्त्यर्थं सर्वात्म
कत्वाद्विरुद्धं यथा वैतन्न यास्यामः संपन्नेरिति श्चेनन्तु द्युमूर्द्धत्वादिकं च दर्शितमं
तर्यामिदृतायोसंभवति तच्छरीरायादेवताया वा ऐश्वर्ययोगादित्यत आह ॥ अतएव न देवता
भूतं च ॥ देवताभूतेन्द्राग्निकाधातुरूपमपि न वैश्वानरः कुतः ॥ अतएवोक्तेभ्यो हेतुभ्यः ॥ न हि
विकारस्याग्नेर्विकारांतरद्युलोकाद्यात्मकत्वं संभवति अग्निशरीरायादेवतायाश्चापि न सं

सू॰ ६४ भवति ईश्वराधीनैश्वर्यतात् ॥ तस्मात्सर्वात्मकः परमात्मैव वैश्वानरः साक्षादप्यविरोधं जैमिनिः ॥ सू॰ १
पूर्वं जाठराग्न्यंकितेनस्मादिशब्दस्यांस्तु पेत्यजाठरोपाधिकं वा जीवप्रतीकं वा ब्रह्मोपास्यमि
त्युक्तं इदानीं विनैवोपाध्यादिकल्पनां साक्षादेव परमेश्वरोपासनपरिग्रहे विरोधाभावं जैमिनि
राचार्यो मन्यते पूर्वपरपर्यालोचनया वैश्वानरस्य ब्रह्मत्वे निर्णीते वैश्वानरशब्दोऽपि शब्द
श्च केनचिद्योगेन ब्रह्मपरतया नेतव्य इति तात्पर्यं ॥ विश्वश्चासौ नरश्चेति विश्वरः सर्वात्म
कत्वात् ॥ सर्वेषां नरः कर्तेति वा सर्वकारणत्वात् ॥ विश्वे नराणि यस्यास्य स्येति वा सर्वेश्वरत्वा
त् ॥ विश्वनर एव वैश्वानरः ॥ राक्षसवायसादिवस्वार्थे तद्धितः ॥ एवमग्निः परमात्मा अग्रि
क्षतो गत्यर्थकस्य निप्रत्ययांतस्याग्नेरिति रूपं तच्चांगयति गमयति जगतोग्रं जन्मप्राप
यतीत्यग्निरग्रणीरुक्तः ॥ एवं च परमात्मनो ग्रणीयत्वात् ॥ अग्नित्वमिति ॥ तस्मात् वैश्वान ६४

रः परमात्मैवोपास्य इति सिद्धं ॥ ननु परमात्मपरिग्रहे कथं प्रादेशमात्रत्वश्रुतिरित्याशंकायां
तां व्याख्यातुमारभते ॥ अभिव्यक्तेरित्याश्मरथ्यः ॥ अनवच्छिन्नस्यापि परमात्मनः प्रा
देशमात्रत्वमुपपद्यते कथं अभिव्यक्तेः ॥ उपासकानामनुग्रहाय परमेश्वरो हृदयाद्युपास
नास्थानेषु प्रादेशपरिमाणेनाभिव्यज्यते किल इत्याश्मरथ्य आचार्यो मन्यते ॥ अनुस्मृ
तेर्बादरिः ॥ प्रादेशमात्रहृत्पुंडरीकस्थेन मनसा अनुस्मर्यते ध्यायतेतः प्रादेशमात्र इत्युच्यत इ
ति बादरिराचार्यो मन्यते यथा प्रस्थपरिमितास्तंदुलाः प्रस्था इत्युच्यंते तेन तद्वत् ॥ संपत्तेरिति
जैमिनिस्तथाहि दर्शयति ॥ मूर्धप्रभृतिचिबुकांते प्रादेशमात्रे वैश्वानरस्योपासकत्वप्रति
पादनात् ॥ परमेश्वरस्य प्रादेशमात्रत्वं संपन्नं ततः प्रादेशमात्रत्वे संपत्तेः प्रादेशमात्रत्वश्रु
तिरुपपद्यत इति जैमिनिराचार्यो मन्यते अस्मिन्नर्थे श्रुत्यंतरसंवादमाह सूत्रकारः ॥ तथा

हि दर्शयतीति वैश्वानरस्य प्रादेशमात्रत्वं संपत्तिद्वारा स्तुत्यंतरमपि दर्शयतीत्यर्थः ॥ तथा
हि समानप्रकरणे वाजसनेयिब्राह्मणे द्युप्रभृतीन्पृथिवीपर्यंतान्त्रैलोक्यात्मनो वैश्वानरस्
स्यावयवानध्यात्मं मूर्धादिषु चिबुकपर्यंतेषु प्रसिद्धपुरुषावयवेषु संपादयतीन्यरमा
त्मनो वैश्वानरस्य प्रादेशमात्रत्वप्रादेशमात्रत्वसंपत्तिं दर्शयतीति ॥ एवं च पुरुषावयवेषु वैश्वा
नरस्य संपादनात् ॥ पुरुषविधत्वं ॥ पुरुषावयवेषु संपादितस्य वैश्वानरस्य स्थितेः पुरुषेंतः ॥
प्रतिष्ठितत्वं ॥ यद्यपि कार्यकारणसंघातरूपस्य पुरुषस्य यावदवयवसमुदायात्मके पुरु
षे समुदायिनो मूर्धादिचिबुकांतस्यावयवस्य शाखाद्यावयवद्वृत्ते विद्यमानत्वात् ॥ तन्निष्ठस्य
वैश्वानरस्य पुरुषस्य तद्व्यपदिश्यते शाखास्य पत्तिणोद्धृत्त निष्ठत्वव्यपदेशावदिति रह
स्यं ॥ ब्राह्मणं पठ्यते ॥ प्रादेशमात्रमिव ह वै देवाः सुविदिता अभिसंपन्नास्तथा तु व एतान्वक्ष्या

मि यथा प्रादेशमात्रमेवाभिसंपादयिष्यामीति स होवाच मूर्धानमुपदिशन्नुवाचैष वा अति
ष्ठा वैश्वानर इति चक्षुषी उपदिशन्नुवाचैष वै सुतेजा वैश्वानर इति नासिके उपदिशन्नुवा
चैष वै पृथग्वर्त्मात्मा वैश्वानर इति मुख्यमाकाशमुपदिशन्नुवाचैष वै बहुलो वैश्वानर इति
मुख्या अप उपदिशन्नुवाचैष वै रयिर्वैश्वानर इति चिबुकमुपदिशन्नुवाचैष वै प्रतिष्ठा वैश्वा
नर इति ॥ अस्यार्थः ॥ परमेश्वरं प्रादेशमात्रमपि संपन्नं प्रादेशमात्रमिव सम्यग्विदितवं
तो देवास्तमेवेश्वरं प्रादेशमेवमभिसंपन्नास्ततो युष्मभ्यं ततो द्युप्रभृतीनवयवानस्या मि
यथा प्रादेशपरिमाणं वैश्वानरं संपादयिष्यामीति प्राचीनशालादीन्प्रत्यश्वपतिः कैके
यो राजोवाच किं कृतवानित्युक्ते स्वस्य मूर्धानमुपदिशन्करांगुल्या दर्शयन्नेष वै मूर्धा लोकादीना
तीत्य तिष्ठतीत्यतिष्ठो वैश्वानरस्यावयव इति ॥ प्रसिद्धमनुष्यमूर्धानि त्वधिदैवं यो मूर्धा द्यु

लोकस्तद्दृष्टिः कर्तव्येत्युवाच एवमेव तस्य चक्षुषि दर्शयन्नुत तेजाः ॥ सूर्यो वैश्वानरस्य चक्षुरि
ति प्रसिद्धं चक्षुषो वैश्वानरस्याधिदैवं यदादित्याख्यं चक्षुस्तद्दृष्टिः ॥ कर्तव्येत्युवाच एवमग्रे
पि स्तावयवेषु वैश्वानरावयवदृष्टिरिति द्रष्टव्यं एषप्रत्यगात्मा वायुर्वैश्वानरस्य प्राणः सुरूपा
स्वरूपत्वावच्छिन्नं यत्तु मस्तस्मिन् यस्मात्मनमसि योधिदैवं बृहन्नाकाशो वैश्वानरस्य दे
हमध्यावयव इति दृष्टिरित्युवाचेत्यर्थः ॥ सुखास्वसुखसंभवोस्तास्त्र स्तु वैश्वानरस्य वस्ति भू
तो रयिपरवाच्यापाश्चापस्तद्दृष्टिरित्युवाच ॥ एवं तच्चिबुके अधरमुखफलके प्रतिष्ठा पर
वाच्या वैश्वानरपादभूता पृथिवीरूपश्चेति ॥ आमनन्ति चैनमस्मिन् ॥ अस्मिन्नादेशपरिमाणे
मूर्ध्नि चिबुकांतरालेरानं परमेश्वरं जाबाला आमनन्ति अतोपि प्रादेशमात्रश्रुतिरुपपन्नेत्य
र्थः ॥ एवमामनन्ति परशोनंतोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति सोविमुक्तः स्मिन्कस्मिन्प्रति

ष्ठित इति वरणायां नास्यां मध्ये प्रतिष्ठितं इति का वै वरणा का वै नासेति सर्वानींद्रियकृतान्पापा
न्वारयतिना शयतिवरणानासीति क तरच्चास्य स्थानं भवतीति भ्रुवोर्घ्राणस्य च यः संधिः स ए
ष द्यौर्लोकस्य च परस्य च संधिर्भवतीति ॥ अस्यार्थः ॥ य एष प्रसिद्धः परमात्मानंतः ॥ अव्य
क्तः स्वरूपेणानभिव्यक्तो दुर्विज्ञेयं इति यावत् तं कथं विजानीयादित्यत्रि प्रश्ने याज्ञवल्क्य
स्योत्तरं स इति स हि परमात्मा जीवात्मनि अविमुक्ते व्यवहारतः संसारिणि प्रतिष्ठितः परस्यैव
प्रत्यक्त्वादित्यर्थः ॥ पुनरत्रिः पृच्छति ॥ स इति यास्तावक्तो बूते वरणाया मिति ॥ वरणादिपदा
र्थं वदन् ॥ पदे निर्वक्ति सर्वाणीति ॥ सर्वानिंद्रियकृतान्दोषान्वारयति तेन वरणाख्ये
वा इत्यर्थः ॥ नान्दोषान्नाशयतीति नासीति ॥ तथा च नियम्यजीवद्वारा नियंतुरीश्वरस्या
धिष्ठानत्वात् ॥ नासाभ्रुवोः पापघ्नाशकत्वमिति सिद्धं तच्चापि स्थान विशेष जिज्ञासया पृच्छति

सू॰वृ॰
६७

कतमश्चेति ॥ इत्वोक्तं मध्यज्ञाहायस्यष्टपति ॥ कुवोरिति ॥ तदेव स्पष्टमित्यर्थः ॥ स संधिः
र्भूर्लोकस्य स्वर्गस्य परस्य च ब्रह्मलोकस्य संधितेन ध्येय इत्याह ॥ स इति ॥ तस्मात्परमे
श्वरोपास्तिपरं वैश्वानरवाक्यमिति सिद्धं ॥ इति श्रीमद्ब्रह्मसूत्रवृत्तौ प्रथमाध्यायस्यास्प
ष्टब्रह्मलिंगाख्यो द्वितीयः पादः ॥ २ ॥ द्युभ्वाद्यायतनं स्वशब्दात् ॥ १ ॥ पूर्वं त्रैलोक्यात्मा
वैश्वानरः परमात्मेत्युक्तं तर्हि त्रैलोक्यायतनमन्यदित्याशंक्य समाधानादाक्षेपसंगतिः
यद्वोपक्रमस्य साधारण्याच्छेषस्य वाक्यशेषस्य लिंगेन द्युमूर्द्धत्वादिना ब्रह्मपरत्ववदिहा
प्युपक्रमस्य साधारणायतनत्वस्य वाक्यशेषस्य सेतुश्रुत्या परिच्छिन्नप्रधानादौ सेतुशब्द
हेतुकं वस्तु त्विति दृष्टांतसंगतिः ॥ आयतनशब्दो विशेषे ब्रह्मणि अस्मिन्पादे वाक्यानां समन्वप्र
तिपादनात्स्पष्टत्वप्रथमपादसंगतयो बोध्याः ॥ अत्र सर्वपादे प्रधानानुपपत्तिः फलं सि

पा॰
१
६७

स्वांते ब्रह्मप्रमितिरिति विवेकः ॥ आथर्वणे श्रूयते ॥ यस्मिन्द्यौः पृथिवी चांतरिक्षमोतं मनः सह प्राणै
श्च सर्वैः ॥ तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथ अमृतस्यैष सेतुरिति ॥ अस्यार्थः ॥ लो
कत्रयाधिष्ठानत्वोक्त्या पंचीकृतभूताधिष्ठानत्वमाह ॥ यस्मिन्निति कार्यब्रह्माख्यसमष्टेरंतः ॥
करणस्यात्मन्येव कल्पितत्वमाह ॥ मन इति ॥ इंद्रियसमष्टिदेवतानां तत्रैव कल्पितत्वे सह
च पतिसहेति प्राणैरिंद्रियाधिष्ठानदेवैः ॥ चकारेण भूतसूक्ष्माविद्याजीवांतर्यामिणामध्यस्त
त्वं ध्वनितं ॥ सविज्ञासां प्रकृतिं मायायां स्युत्युक्तनकीम्निनाविज्ञाप्यतमेवाधिष्ठानभूतम
द्वयमात्मानं विजानथेति मुमुक्षून्प्रत्याह ॥ मातास्मृतिसमेवेति ॥ तान्यवाचकल्पनानामैक्या
साक्षात्कारीबाधमाह ॥ अन्या इति ॥ एषमात्साक्षात्कारः सविलासाविद्यानिवृत्तिलक्षणामृतत्व
स्य सेतुर्घ्यवस्थापक इत्याह ॥ अमृतस्येति ॥ विजानथेत्यनेनोक्तः साक्षात्कारः एष इत्युच्यते

सू॰वृ॰
६०

श्री

अमृतस्यामृतत्वस्य च द्युभ्वादीनामोतत्ववर्णनात् किंचिदायतनं प्रतीयते किं प्रधानमु
त जीवस्यामृतत्वं सिद्धब्रह्मेति संशयः ॥ तत्र प्रधानादिरिति प्राप्ते ब्रूमः ॥ द्युभ्वाद्यायतनं द्यौः स्वम्
द्युद्युसुवौ द्युसुं वा वादीयस्य द्यौः पृथिवी तदिद्गमित्येवमात्मकं तत् द्युभ्वादि तदायतनं ब्र
ह्मैव कुतः ॥ स्वशब्दात् स्वस्य परब्रह्मणो वाचकोय आत्मशब्दस्तस्मादित्यर्थः ॥ तमेवैकं जानथ
आत्मानमित्यात्मशब्दश्रवणादिति मुक्तोपसृप्यव्यपदेशात् ॥ २ ॥ किंच ॥ द्युभ्वाद्यायतनं ब्र
ह्मैव कुतः ॥ मुक्तैरुपसृप्यं मुक्तोपसृप्यं भावप्रधानो निर्देशः मुक्तोपसृप्यत्वस्य व्यपदेशादि
त्यर्थः ॥ यद्वा ॥ मुक्तैरुपसृप्यं प्राप्यं यत्तस्यैवात्र निर्देशादित्यर्थः ॥ मुक्तोपसृप्यत्वस्य व्यपदे
शादिति ॥ प्रागेव कश्चित् तदुपासः ॥ भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः ॥ क्षीयंते चास्य
कर्माणि तस्मिन् दृष्टे परावरे ॥ तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यमि

शारी॰ वृ॰
१

ति ॥ इदं च मुक्तोपसृप्यत्वं ब्रह्मण एव श्रुत्यंतरे प्रसिद्धं यदा सर्वे प्रमुच्यंते कामा येस्य हृदि श्रि
ताः ॥ अथ मर्त्योमृतो भवत्यत्र ब्रह्म समश्नुत इति ॥ अपि च तमेवैकं जानथ आत्मानमन्या वा
चो विमुंचथेति वाग्विमोकश्रवणं कं विजेयत्वं ब्रह्मलिंगं श्रुत्यंतरे तथा दर्शनात् ॥ तमेव धीरो
विज्ञाय प्रज्ञां कुर्वीत ॥ ब्राह्मणः नानुध्यायाद्बहून् शब्दान् वाचो विग्लापनं हि तदिति
हृदयग्रंथिर्मिथ्याज्ञानरागद्वेषादिरूपा हितो भूत्वा छिन्नसंशयः सन् दग्धकल्मषो यस्त
स्य हृदये परमात्मा प्रकाशत इत्यर्थः ॥ दृष्ट इति निमित्तसप्तमी तद्दर्शनार्थमित्यर्थः ॥ यद्वा ॥ य
था श्रुतार्थः ॥ यथात्मचः ॥ स्वनामरूपाभ्यां विनिर्मुक्ताः ॥ समुद्रं प्राप्य तदात्मतां गच्छंति त
था विद्वानपि स्वाज्ञातकृतब्रह्मनामरूपकारणाद्विद्यातो विमुक्तः परादव्याकृताख्यादक्षरा
त्परं स्वस्वरूपभूतं पुरुषं सर्वं दिव्यमखंडं चिदात्मानमात्मत्वेनाप्नोतीति मुक्तोपसृप्यत्ववाक्यात् ॥

सूत्र०
६५

र्थः ॥ यदज्ञानावस्थायामस्य विदुषो हृदि स्थिताः कामादयस्तन्मूला विद्यायां च निवर्तन्ते ॥ पुनर्जन्म-
संपादककर्माभावावस्थानं कुं ॥ अथ यतिधीरो विवेकज्ञानी विवेकज्ञानमंत्र पदार्थज्ञानं प्रदा-
मभेदलक्षणं वाक्यार्थज्ञानं ॥ वाक्यार्थज्ञानार्थं तेन कर्मकांडवैमुख्यं मुमुक्षुणा कार्यमित्या-
ह ॥ नानुध्यायादिति ॥ अथात्मार्थशास्त्राध्ययनफलमाह ॥ वाच इति ॥ वाच इत्येतत्कं वता-
त्वादीनामष्टस्थानानामुपलक्षणं वागादिशोषणमेव बहुशाश्चिंतनफलमित्यर्थः ॥ तस्मा-
द्युभ्वाद्यायतनं परं ब्रह्म ॥ नानुमानमतच्छब्दात् ॥ ३ ॥ अनुमीयत इत्यनुमानं सांख्यपरिकल्पि-
तं प्रधानं न द्युभ्वाद्यायतनं कस्मादतच्छब्दात् तस्य प्रधानस्यानुमानस्य शब्दस्तच्छब्दः ॥
न तच्छब्दोऽतच्छब्दः तस्मात् प्रधानप्रतिपादकशब्दस्याश्रवणादित्यर्थः ॥ प्रत्युत तद्विरोधिशा-
ब्दा यः सर्वज्ञः सर्वविदित्यादयो वर्तंत इति भावः ॥ प्राणभृच्च ॥ ४ ॥ प्राणभृज्जीवोपि न द्यु-

शारी० वृ०
६५

भ्वाद्यायतनं कुतः ॥ अतच्छब्दादेव यद्यप्यात्मशब्दः साधारणस्तथापि जीवस्य सर्वज्ञत्वं द्युभ्वाद्या-
यतनत्वं चाञ्जस्येन न संभवतीत्यात्मशब्दस्यातच्छब्दत्वमेव ॥ जीवनिरासे हेत्वंतरमाह ॥ भेदव्य-
पदेशात् ॥ ५ ॥ न प्राणभृत् द्युभ्वाद्यायतनं कुतः भेदव्यपदेशात् ॥ तमेवैकं जानथेति ज्ञातृज्ञे-
यभावेन भेदव्यपदेशादित्यर्थः ॥ जीवस्य मुमुक्षुत्वेन ज्ञातृत्वात् ॥ परिशेषात्ततेयं द्युभ्वाद्या-
यतनं ब्रह्मेति न चैवं हेत्वंतरमाह ॥ प्रकरणाच्च ॥ ६ ॥ कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भ-
स्युपक्रमात् परमात्मन एवेदं प्रकरणं नहि जीवज्ञानात्सर्वज्ञानं भवति तस्मात्प्रकरणादपि न
प्राणभृदित्यर्थः ॥ अपि च ॥ स्थित्यदनाभ्यां च ॥ न प्राणभृत् द्युभ्वाद्यायतनं कुतः स्थित्यदनाभ्यां
स्थितिश्चानशनं च ताभ्यामिति पंचमी द्विवचनं द्युभ्वाद्यायतनं प्रकृत्य द्वा सुपर्णेति मंत्रे जीव
स्यादनं परमात्मनः स्थितिरिति हेतोरीदृशे तेनयो रन्यः पिप्पलं स्वाद्वत्तीत्यदनं अनश्नन्नन्यो अभि

सू०त्र० चाकृतार्थत्वोदासीत्येन स्थितिर्निर्दिश्यते इदं च द्युभ्वाद्यायतनस्य ब्रह्मत्वे घटते नान्यथेति ता- शारी० छा०
७० स्मां द्युभ्वाद्यायतनं परं ब्रह्म ज्ञेयमिति सिद्धं ॥ भूमा संप्रसादादध्युपदेशात् ॥ ८ ॥ पूर्वमात्मश- १
शब्द द्युभ्वाद्यायतनं ब्रह्मेत्युक्तं तदयुक्तं तरति शोकमात्मविदित्यत्रा ब्रह्मण्यप्यात्मशब्दप्रयो-
गादित्याक्षेपसंगत्यास्यारंभः ॥ पूर्वपक्षे प्राणोपास्तिः फलं सिद्धांते ब्रह्मप्रमितिरिति ॥ ए-
वमेव निर्विशेषवाक्यविचारे पूर्वपक्षे यस्य कस्यचिदुपास्तिः सिद्धांते ब्रह्मप्रमितिरेवेति बो-
ध्यं ॥ छांदोग्ये श्रूयते श्रुतं ह्येव मे भगवद्दृशेभ्यस्तरति शोकमात्मविदिति सोहं भगवः शोचा-
मि तं मां भगवं छोकस्य पारं तारयतु नारदेन पृष्टः सनत्कुमारो नाम ब्रह्मेत्युपदिदेश ना-
म्नः पुनर्नाम्नः ॥ अस्ति भगवो नाम्नो भूय इति पप्रच्छ तस्मै वाग्वाव नाम्नो भूयसीति तथास्ति
भगवो वाचो भूय इति प्रश्ने मनो वाव वाचो भूय इत्युत्तरमेवं प्राणपर्यंतं भूयः प्रश्नोत्तरे दृश्येते ७०

नामादि प्राणांतमतीत्यमत्यश्राश्वाच्यात्मोत्कृष्ट इति यो वदति स प्राणोऽतिवादी ॥

प्राणोपदेशानंतरं च प्रश्नं विनैवेदं श्रूयते एष तु वा अतिवदति यः सत्येनातिवदतीति भूमा त्वेव वि-
जिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजाना-
ति स भूमाथ यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्पमित्यादि ॥ अस्यार्थः ॥ नाल्पे सुख-
मस्तीति भूमैव सुखं तस्मान्निरतिशयं सुखमिच्छता भूमैव विजिज्ञासितव्यः ॥ विशेषेण ज्ञातुमेष्ट-
व्य इति सनत्कुमारेणोक्ते मुमुक्षुर्नारदस्तथेत्युपश्रुत्य भगवन्भूमानमेव विशेषेण ज्ञातुमिच्छामी-
त्याह ॥ भूमानं भगव इति ॥ भूम्नो लक्षणमाह ॥ यत्रेति व्यवहारातीतं पूर्णं वस्त्वेव भूमेत्यर्थः ॥ ल-
क्षणं व्यतिरेकमुखेन स्पष्टयितुं परिच्छिन्नलक्षणमाहार्थीति एवं स्थिते संशयः ॥ किं प्राणो भू-
मोत परमात्मेति ॥ प्राणो वा आशाया भूयानिति श्रुतं प्राणस्य संनिधानात्प्राणो भूमेति पूर्वपक्षी म-
न्यते तरति शोकमात्मविदिति प्रश्नवाक्ये आत्मोपक्रमे प्राणेन प्रकरणस्य निषेधदुर्बलत्वमिति

वाच्यं ॥ नाम ब्रह्मेत्युपास्ते इति समाधानवाक्ये नामादेरब्रह्मण एवोपदेशो न चास्यात्मशब्द-
स्यापि नामादिपरत्वेनाऽनात्मपरत्वात् आत्मप्रकरणं सिद्धं ॥ प्रश्नोत्तरयोरेकार्थत्वनियमात् ।
तस्मात्प्राणो भूमेति प्राप्ते ब्रूमः ॥ भूमा परमात्मैव कुतः संप्रसादादध्युपदेशात् ॥ सम्प्रसी-
दत्यस्मिन् जीवस्वरूपमिति संप्रसादः सुषुप्तमवस्थानं तस्यां चावस्थायां प्राणो जागर्त्तीति संप्रसाद-
शब्देन प्राण उच्यते प्राणादूर्ध्वं भूम्न उपदेशादित्यर्थः ॥ प्राणोपदेशानंतरं स एष तु वा अतिवदति
यः सत्येनातिवदति तु शब्देन प्राणवादस्यानतिवादत्वमुक्त्वा सत्यशब्दवाच्यपरमात्मवादस्या-
तिवादत्वमतिवादीश्रेष्ठ उक्त्वा तं ब्रुवन् भूमानमुपदिदेश ॥ अतो भूम्नः प्राणादूर्ध्वमुपदेश इति
गम्यते ॥ किंच ॥ तरति शोकमात्मविदित्यात्मप्रकरणात् भूमा परमात्मा ॥ न च प्रकरणासि-
द्धिः ॥ आत्मोपदेशार्थं नामाद्युपदेशो न नाम ब्रह्मेत्युपास्ते इत्यादेस्तरति शोकमात्मविदिति प्र-

श्नोत्तरत्वासिद्धेः ॥ अतो भूमा परमात्मा नामादिप्राणांतमतीत्य सत्यशब्दवाच्यात्मोक्त इति ।
यो वदति स एषोतिवादीति श्रुत्यर्थः ॥ धर्मोपपत्तेश्च ॥ किंच ॥ यत्र नान्यत्पश्यतीत्यादिना ॥ उ-
क्तानां सर्वव्यवहाराभावादिधर्माणां परमात्मन्येवोपपत्तेः परमात्मैव भूमा यत्र त्वस्य सर्वमा-
त्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुत्यंतरे सर्वव्यवहाराभावस्य परमात्मधर्मत्वेनावगतत्वा-
त् ॥ यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति भूमैव सुखमिति दुःखसहितसुखनिराकरणेन
भूम्नः ॥ सुखत्वं दर्शितं ब्रह्मधर्मः ॥ एवं यो वै भूमा तदमृतमिति श्रूयमाणममृतत्वं ब्रह्मधर्मः ॥
अतोन्यदार्त्तमिति श्रुतेः ॥ स्वातंत्र्यं स्वे महिम्न इत्यादिनेति यावत् ॥ एवं स्वे महिम्नि प्रतिष्ठितत्वं सर्वगत-
त्वं सर्वात्मकत्वं चैते धर्मा ब्रह्मण्येवोपपद्यंते ॥ तस्मात्प्राणो नोपास्यः ॥ किंतु भूमा परमात्मा ।
ते पर इति सिद्धं ॥ अक्षरमंबरांतधृतेः ॥ ८ ॥ एवं सत्यशब्दस्य ब्रह्मणि रूढत्वात् भूमा ब्रह्मेत्युक्तं

सूत्र० ७२

तद्दर्शनाय्यक्षरस्याशेषस्यवस्तुनोमूलत्वात् ॥ वस्तुनोवाद्वारमस्तीतिदृष्टांतसंगतिः ॥ ॐकारस्वरूपो
पास्तिर्ब्रह्मज्ञानमित्युभयत्रफलं ॥ इहहारण्यकेश्रूयते ॥ कस्मिन्नुखल्वाकाशओतश्चप्रो
तश्चसहोवाचैतद्वैतदक्षरंगार्गिब्राह्मणाअभिवदंत्यस्थूलमनण्वित्यादिश्रुत्यार्थः ॥ यदूर्ध्वं
दिवोयदवाक्पृथिव्याः ॥ येवाभेद्यावापृथिव्योयदंतरेदिसंयद्भूतंभवच्चभविष्यच्चतत्सर्वंकस्मि
न्नोतंप्रोतंचेतिगार्ग्याप्रश्नेकृतेयाज्ञवल्क्येनाकाशेतत्सर्वमोतंप्रोतंचेतिनिरस्तेगार्गिपुनरा
हरत्वाकाशोव्याकृताख्यः ॥ कस्मिन्नोतप्रोतत्वेनतिष्ठतीतितत्रसंशयः ॥ किमक्षरशब्देन
वर्णउच्यतेउतब्रह्मेति ॥ अक्षरसमाम्नायइत्यादावक्षरशब्दस्यवर्णेप्रसिद्धत्वाद्वर्णएवाक्ष
रशब्दवाच्यइतिप्राप्तेब्रूमः ॥ अक्षरंब्रह्मैवकुतः ॥ अंबरांतधृतेः पृथिव्यादेराकाशांतस्यविका
रजातस्यधारणादित्यर्थः ॥ विषयवाक्यार्थकथनसमयेऽंबरांतधारणंप्रतिपादितं ॥ ननु

शारी० वृ०
१

७२

अंबरांतधृतिःप्रधानेपिसंभवतीत्यतआह ॥ साचप्रशासनात् ॥ साचधृतिःपरमेश्वरस्यैवक
र्मनान्यस्याऽचेतनस्यकुतःप्रशासनात् ॥ एतस्यवाअक्षरस्यप्रशासनेगार्गिसूर्याचंद्रमसौविधृ
तौतिष्ठतइत्यादिनाप्रशासनश्रवणादित्यर्थः ॥ प्रशासनंनामआज्ञासाचचेतनस्यैवनाचेत
नस्यप्रधानस्येतितस्मादक्षरंब्रह्म ॥ ११ ॥ अन्यभावव्यावृत्तेश्च ॥ १२ ॥ इतश्चपरमात्मैवाक्ष
रशब्दवाच्यः ॥ तस्यैवोक्तस्यप्रशासनंकर्मकुतः ॥ अन्यभावव्यावृत्तेः ॥ अन्यस्यप्रधानादे
र्जीवोधर्मोऽन्यभावस्तस्याव्यावृत्तेः ॥ तद्विपरीतधर्मश्रवणादित्यर्थः ॥ तद्वाएतदक्षरंगार्ग्यदृष्टं
द्रष्टृअश्रुतंश्रोत्रमतंमंतृ ॥ अविज्ञातंविज्ञात्रितिद्रष्टृत्वादयोनाचेतनेसंभवंति ॥ तस्मा
द्द्रष्टृत्वादिसमानाधिकरणप्रशासनवान्परमात्मैवाक्षरंनान्यदतोस्तिद्रष्टृनान्यदतोस्तिश्रोतृ
नान्यदतोस्तिमंतृनान्यदतोस्तिविज्ञात्रितिद्रष्ट्रंतरनिषेधाच्च ॥ नजीवोप्यक्षरमितितस्माद

प्र॰उ॰ क्षरं ब्रह्म ज्ञेयमिति सिद्धं॥ ईक्षतिकर्मव्यपदेशात्सः॥१४॥ सर्वमोंकारस्य सर्वपरत्वेन बुद्धौ सा रामा॰उ॰
७३ न्निध्यात्तस्मिन्नोंकारे ध्यातव्यमिह निरूप्यत इति बुद्धिसान्निध्यसंगतिः॥ पराशर्वमक्षरशब्द
स्य वर्णरूढस्यापि जगदुत्पत्तिलक्षणलिंगेन ब्रह्मणि न क्षरतीति व्युत्पत्त्या वृत्तत्वादनादि
त्वाद्यापि त्वाद्धा योगवृत्तिराश्रिता तद्वदिहापि देशपरिच्छिन्नफलश्रुतिलिंगेन परशब्दस्यापेक्षि
कपरत्वविशिष्टे हिरण्यगर्भे वृत्तिराश्रियत्विति दृष्टांतसंगतिः॥ कार्यब्रह्मण उपास्तिः॥ पूर्वपक्ष
फलं सिद्धांते परब्रह्मोपास्तिरिति भेदः॥ अथार्थवरणे श्रूयते एतद्वै सत्यकाम परं चापरं च ब्रह्म
यदोंकारस्तस्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीति प्रकृत्य यः॥ पुनरेतं त्रिमात्रेणोमित्ये
तेनैवाक्षरेण परं पुरुषमभिध्यायीतेत्यादिस्यार्थः॥ पिप्पलादो नामाचार्यः॥ सत्यकामेन पृष्टो
व्याचष्टे हे सत्यकाम परं निर्विशेषमपरं च कार्यं ब्रह्म यत्तदेतदेव यो यमोंकारः स इति मे ७३

वविस्मोस्तस्य प्रतीकः॥ तस्मादेवं ब्रह्मात्मना विद्वानेतेनोंकारध्यानायतनेन प्राप्तिसाधने
न परापरयोरेकतरमन्वेति॥ यथाध्यानं एकमात्रो द्विमात्रो वा हिरण्यगर्भोपास्तिं कुर्यादिति द
र्शयित्वाब्रवीति यः पुनरोमित्येतदक्षरं त्रिमात्रमिति॥ तृतीयाद्वितीयात्वेनेया॥ ब्रह्मोंकारा
भेदोपक्रमात्तथाविधमक्षरं स्तुयंति स्य परं ध्यायीनेति स उपासकः सूर्यं प्राप्तः॥ सामभि
र्ब्रह्मलोकं नीयत इति॥ अत्र संशयः किमपरं ब्रह्म ध्यातव्यमुपदिश्यते किं वा परं ब्र
ह्मेति अपरमिति प्राप्ते ब्रूमः॥ स ध्यातव्यः परमात्मैव कुतः॥ ईक्षतिकर्मव्यपदेशात् वाक्य
शेषे ध्यातव्यस्येक्षतिकर्मत्वेन व्यपदेशादित्यर्थः॥ स एतस्माज्जीवघनात्परात्परं पुरीश
यं पुरुषमीक्षत इति स ध्याता जीवघनशब्देन ब्रह्मलोक उच्यते॥ सकलजीवाभिम
लोकं निहिरण्यगर्भक्षिरत्वात्॥ तथा च ब्रह्मलोकांतरापेक्षया परात्परः पुरुषं परमात्मानमीक्ष

तेसाक्षात्करोतीत्यर्थः॥ ईक्षतिपदार्थस्यदर्शनस्यलोकेयथार्थविषयकत्वाद्यथार्थस्तत्स्वरूपप
रमात्मैवेक्षतिकर्मेति तत्समानविषयकाध्यानस्यापि परमात्मैव विषयः॥ ध्यानेक्षणयोरे
कविषयत्वनियमात्॥ यथापादोदरस्त्वचानिर्मुच्यतेएवंहवैसपाप्मनाविनिर्मुच्यत इतिपा
पविनिर्मोकफलवचनं परमात्मानं ध्येयं सूचयति पादोदरस्सर्पः॥ तस्मात्क्रमसमुत्कर्षमों
कारेध्यातव्यः परमात्मेति सिद्धं॥ दहर उत्तरेभ्यः॥ १३॥ सर्वपरमपुरुषशब्दस्य ब्रह्मणि रूढ
त्वात्॥ ब्रह्मोपास्यमित्युक्तं भवति॥ तद्वद्दहराकाशशब्दस्य भूताकाशे रूढत्वात्तस्यैवोपा
स्यत्वमस्त्विति दृष्टान्तसंगतिः॥ पूर्वपक्षे भूताकाशाद्युपास्तिः फलं सिद्धान्ते परोपास्तिद्वाराप्रमि
तिरिति॥ छान्दोग्ये भूमविद्यानन्तरं अथ यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नं
तराकाशस्तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमित्यादिवाक्यस्यार्थः॥ विद्यान्तरारंभा

र्थोयशब्दः॥ यदिदमिति प्रसिद्धं हृदयं परामृश्यते॥ अस्मिन्निति॥ प्रत्यक्षतोक्षिः ब्रह्मपुरं शरीरं तस्मि
न्दहरं सूक्ष्मं पुण्डरीकं तदाधारत्वाद्धृदयस्य वेश्मत्वं संपादयति दहर इति दहरः सूक्ष्मस्त्वस्मिन्
हृदयेऽन्तराकाशः परमात्मा सदा तिष्ठतीत्यर्थः॥ तस्मिन्हृदये व्यवहितत्वेपि योग्यत्वात्॥ त
द्देशेन हृदयपरामर्शः परदाशरव्यबुद्धातेश्वर्यं विचार्य विजिज्ञासितव्यं ज्ञेयमिति॥ अत्र दह
रपुण्डरीके यो दहराकाशः॥ अतः स किंभूताकाशस्त्वाहोस्वित्परमात्मेति संशये॥ प्रसिद्धिब
लात्भूताकाश इति प्राप्ते॥ पक्षा॥ ब्रह्मपुरशब्देन शरीरमभिदधता ततस्वामि जीवो परिस्प्यते।
जीवो दहर इति॥ प्राप्ते ब्रूमः॥ दहराकाशः परमात्मैव कस्मात् उत्तरेभ्यः वाक्यशेषगतेभ्यो हेतु
भ्यः॥ तथा हि जिज्ञास्यत्वेनाभिहितस्य दहरस्याकाशस्यान्तःस्थं चेद्ब्रूयुरित्युपक्रम्य किं तदत्र वि
द्यते यदन्वेष्टव्यं यद्वाव विजिज्ञासितव्यमित्याक्षेपपूर्वकं समाधानवाक्यं सब्रूयाद्यावान्वाऽय

स्तृ० यमाकाशस्तावानेषांतरहृदयआकाशउभेअस्मिन्द्यावापृथिवीअंतरेवसमाहितेइत्या। शारी० वृ०
७५ दि॥ कमाकाशोपमानत्वद्यावापृथिव्यधिष्ठानत्वेदर्शयितिसुत्यर्थस्तुतमाचार्यंशिष्याब्रूयुः। १
किमितिब्रूयुः। किंतदितिहृत्पुंडरीकमेवतावदल्पंतस्मिन्विद्यमानाकाशोपिततइत्यल्प्ये।
पुंडरीकेकिमस्तियद्युतियुक्तिभ्यामन्वेष्टव्यंयद्वावसाक्षात्कर्तव्यमित्यल्पत्वादोषेणदह
रस्यततेयस्मादितिप्रांशिष्यैस्तत्रसमाधानंसद्ब्रूयादितिसआचार्यः॥ ब्रूयाकमिति॥ यावानि।
तिअस्मिन्नितिदहराकाशोक्तिः॥ अल्पत्वदोषस्यआकाशोपमानेननिराकृताः॥ तथाचद्यावा
पृथिव्याद्यधिष्ठानंआकाशोपमितिदहराकाशारव्यंब्रह्मैवएवमेकंआत्मापहतपाप्मा प
विजरोविमृत्युर्विशोकोविजिघत्सोऽपिपासःसत्यसंकल्पइतिचात्मत्वापहतपाप्मत्वादयो
गुणानव्हताकाशेजीवेवासंभवंतीजावेआत्मत्वसंभवेप्युत्तरगुणानामसंभवोबोध्यः॥ वि ७५

मृत्युःमरणरहितःविजिघत्सःविगताजिघत्साअत्तुमिच्छायस्यसविजिघत्सः॥ तथातद्यथे।
हकर्मचितोलोकःक्षीयतएवामुत्रपुण्यचितोलोकःक्षीयतइतिकर्मणामंतवत्फलत्वमु।
क्त्वाअथयइहआत्मानमनुविद्यव्रजंत्येतांश्चसत्यान्कामांस्तेषांसर्वेषुलोकेषुकामचारोभ।
वतीतिप्रकृतदहराकाशविज्ञानस्यानंतफलवत्त्वंवदन्परमात्मत्वमस्यसूचयति॥ सत्या।
न्कामांश्चेति॥ चकारेणतेषामप्युपास्यत्वमुक्तंनत्विहसत्यकामादिगुणकमात्मानमनु
विद्यानुरूपयेपरलोकंव्रजंतितेषांसर्वेषुलोकेषुकामचारःस्वेच्छयासंचरणंभवतिइतमन
तमेभ्यपंभवतीत्यर्थः॥ तस्मादेतेभ्यउत्तरेभ्योहेतुभ्योदहराकाशःपरमात्मा। गतिशब्दाभ्यां
तथाहिदृष्टंलिंगंच॥१५॥ उत्तरेभ्यइत्यस्यप्रपंचोयं किंचइमाःप्रजाअहरहर्गच्छंत्यएतंब्र
ह्मलोकंनविंदंतीतिदहरवाक्येप्रकृतंपरमेश्वरंब्रह्मलोकशब्दमभिधायप्रजाशब्दवाच्य।

सू०वृ० ७८ वाच्यानां जीवानां प्रत्यहं तद्विषया गतिरुच्यमाना गंतव्यस्य दहराकाशस्य ब्रह्मतां गमयति ॥ ग- शारी०वृ०
तिं ब्रह्मलोकशब्दं वाभिप्रेत्य गतिशब्दाभ्यामित्युक्तं सूत्रकारैः ॥ प्रत्यहं सुषुप्त्यवस्थायां जीव- १
स्य ब्रह्मगमनं ॥ तथा हि दृष्टं ॥ श्रुत्यंतरे सता सोम्य तदा संपन्नो भवतीत्यादौ तथा च दहरा-
काशगमनं ब्रह्मगमनमेवेति दृष्टीकृतं तथा दिदृष्टमित्यनेन प्रत्यहं हिरण्यगर्भब्रह्मलो-
कगमनासंभवात् ॥ ब्रह्मैव लोक इति कर्मधारयसमास एवं याह्य इत्युक्ति न्यायेऽहरहर्गम-
नमेव लिंगमिति लिंगमित्यनेनोक्तं च शब्देन निषादस्थपतिन्यायोपि कर्मधारयग्रहणे
सूचितः धृतेश्च महिम्नोस्यास्मिन्नुपलब्धेः ॥ १५ ॥ धृतेरपि हेतोः परमेश्वर एवं दहराका-
शः अनतिक्रांतप्रकरणं दहराकाशं निर्दिशति अथ य आत्मा स सेतुर्विधृतिरेषां लोकाना-
मसंभेदायेति विधृतिरिति क्तिजंतता धारक उच्यते सेतुशब्देन वर्णाश्रमाद्यसंकरहेतुत्व- ७८

मुच्यते न हि सर्वलोकत्वं ब्रह्मणोन्यस्य संभवति अस्य च विधारणानुग्रहणं महिम्नोऽस्मिन्परा-
मात्मन्यन्यत्रापि श्रुत्यंतरेषूपलब्धेः ॥ एतस्माल्लिंगतमेव एतस्य वा अक्षरस्य प्रशासने गार्गि
सूर्याचंद्रमसौ विधृतौ तिष्ठत इति तथा एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्वि-
धारण एषां लोकानामसंभेदायेति ॥ प्रसिद्धेश्च ॥ १६ ॥ दहराकाशशब्दोपि परमात्मन्येव
प्रसिद्धः ॥ न जीवे ॥ आकाशो ह वै नाम नामरूपयोर्निर्हिता सर्वा इमानि भूतान्याकाशादेव
समुत्पद्यंत इत्यादिदर्शनात् ॥ यद्यप्याकाशशब्दस्य भूताकाशेपि प्रसिद्धिरस्ति तथापि
यावान्वा अयमाकाशस्तावानेषोंतर्हृदय आकाश इति तस्योपमानग्रहणान्नोपपद्येत दहराका-
शत्वं संभवतीति दहराकाशः परमेश्वर एव ॥ इतरपरामर्शात्स इति चेन्नासंभवात् ॥ १७ ॥ ननु
य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत एष ॥

सू॰न॰
७७

आत्मेतिहोवाचेतिसंप्रसादशब्देनतस्यजीवस्याप्यस्मिन्प्रकरणेपरामर्शाज्जीवोदह। शारी॰ ३॰ १
राकाशोस्त्वितिचेन्नासंभवात्जीवेकाशशब्दोपमेयत्वापहतपाप्मत्वादीनामसंभवादित्य।
र्थः॥ कृत्स्यर्थस्तुपरेषइतिसर्वनामभ्यांविधास्यतेक्तः॥ तमेवसुत्रंसर्वकारणंपश्यनिर्मुक्तंवक्ति
संप्रसादइति॥ संप्रसादशब्देनसुषुप्त्यवस्थावाचकेनावस्थावानुच्यतेस्मादभिमानदे।
यविषयाच्छरीरात्समुत्थानंशरीरद्वयात्सुस्थापविविक्तमात्मानंज्ञात्वाविवेकज्ञानंचात्र
श्रवणमननिदिध्यासनानि॥ तत्फलमाह॥ अभिनिष्पद्यतइति अभिनिष्पत्तिःसाक्षात्का
रः॥ अस्यफलमाह॥ परमितिउपसंपद्याभिनिष्पद्यतइत्येनवसुरवंच्यादायसपितीतिवद्दृष्ट
व्यं॥ ज्योतिःशब्दस्यस्वरूपादिपरत्वन्नमंवारयतिएषइतिगुरुरितिशेषः॥ उत्तराचेदाविर्भूतस्व
रूपस्तु॥ १७॥ नव्यपहतपाप्मत्वादीनामसंभवात्नजीवोदहराकाशंपत्तसंगतं॥ श्रुतिव
७७

अस्यव्याख्यानवमत्र्यामपरान्स्वहेतिनिपातःस्वेदार्थे२ परादिभिःसेव्यमानः३

तेनजीवस्याप्यपहतपाप्मत्वादिसंभवात्॥ तथाहिदहरविद्यायाउपरिप्रजापतिविद्यायांय
एषोक्षिणिपुरुषोदृश्यतेषएषआत्मेतिहोवाचेतिजाग्रद्दवस्थापन्नंद्रष्टारंजीवमुपक्रम्यएतं
त्वेवतेभूयोव्याख्यास्यामीतिजीवपरामृश्ययएषस्वप्नेमहीयमानश्चरत्येषआत्मेति॥
तद्यत्रैतत्सुप्तःसमस्तःसंप्रसन्नःस्वप्नंनविजानातीत्येषआत्मेत्यवस्थात्रयविशेषंजीवमे
वप्रतिपाद्यतस्यैवस्यापहतपाप्मत्वादिदर्शयतिएतदमृतमभयमेतद्ब्रह्मेतिनाहंखल्वय
मेवंसंप्रत्यात्मानंजानीत्ययमहमस्मीति॥ नोएवेमानिभूतानीतिसुषुप्त्यवस्थायामपि।
गोक्तंदोषंमुपलभ्यपुनःप्रजापतिरेतंत्वेवतेभूयोनुव्याख्यास्यामिनोएवान्यत्रैतस्मादित्यु
पक्रम्यशरीरनिंदासर्वकामेषसंप्रसादोस्माच्छरीरात्समुत्थायपरंज्योतिरुपसंपद्यस्वेनरू
पेणाभिनिष्पद्यतेसउत्तमःपुरुषइति॥ जीवमेवशरीरात्समुत्थितमुत्तमंपुरुषंदर्शयतितं।

सू॰त्र॰
७८
स्यो

स्मादपहतपाप्मत्वादीनां श्रुतिवचनात्प्रावेशसंभवात् जीवो दहराकाश इत्युत्तराच्चेति सूत्राच्च यथा
यः॥ ३ तत्तराद्युराषो ज्ञिराीत्यादि॥ आख्यात श्रुत्वा यस्तु इंद्रविरोचनौ खलु सुरराजानवात्मानं
विविदिषंतौ समित्पाणी प्रजापतिं जग्मतुः॥ आगत्य द्वात्रिंशद्वर्षाणि ब्रह्मचर्यमूषतुः॥
अथैतौ प्रजापतिरुवाच किंकामाविह कौ युवामिति तौ ह ऊचतुः॥ य आत्मापहतपाप्मा त
मावां विविदिषाव इति ततः प्रजापतिरुवाच प्रथमं य एषोक्षिणीति जाग्रदवस्थायामक्षि
स्थानः सन् यो दृश्यते शास्त्रतः स आत्मापहतपाप्मेत्युवाच यदा वापहतपाप्मत्वादिगुण
एतदमृतमभयमेतद्ब्रह्मेति एतच्छ्रुत्वा तावऽप्रतीराकृत्मपतयोऽत्रिनिश्छायापुरुष
मात्मेत्येनं गृहीत्वा पुनः प्रजापतिं पप्रच्छतुः अथ यो यं भगवोऽप्सु आदर्शे खड्गादौ च दृश्यते॥
कतम एतेषु सोऽयं यद्वा सर्वेष्वेव एवेति तमेतं प्रश्नं श्रुत्वा प्रजापतिरेतौ भ्रांतावितिज्ञात्वा॥

शारी॰ ३॰
१
७८

परिवर्षं पुवां भ्रांतौ स्थ इति ब्रूमस्तदा तौ मनस्येवं तत्तेन गृहीत्वा गृह्णीयातामित्युनयोराशयमवग
म्य प्रत्युवाच उदशराव आत्मानमीक्ष्य यो तत्र प्रदृश्यते तन्मां प्रति ब्रूतमिति तौ ह उदशरावं तु दृष्ट्वा द
यौनाब्रूतामथ प्रजापतिरेतौ विपरीततया देहमात्मा भूतामित्याशयेतान्॥ पप्रच्छ किमत्र प
श्यतमिति॥ तौ होचतुर्नखलोमादिमंतं प्रतिबिंबपुरुषमुदशरावे पश्याव इति अत्यन्त
नाशवतायुध्या शरीरमात्मानमभवति॥ एवं छायापुरुषोपि नात्मेत्येवं तौ जानीयातामि
त्याशयान् प्रजापतिरुवाच साध्वलंकृतौ सुवसनौ परिष्कृतौ भूत्वा पुनरुदशरावे पश्यतम्
आत्मानमिति तौ साध्वलंकृतौ सुवसनौ छिन्ननखलोमानौ भूत्वा तथैव चक्रतुः पुनः प्रजाप
तिना दृष्टौ तमेव छायात्मानमूचतुः तदुपश्रुत्य प्रजापतिर्बलाद्धो अव्यापि भ्रमो न शांतो
नयोरिति मत्वा तत्त्वं कथयामि तौ नेन कथ्यमपत्ययेऽस्य दोक्यसंदर्भपर्यालोचयात्वं त

स्त्र० ७५ ततंप्रतिपद्येते।स्वयमेवेत्युवाचयआत्मापहतपाप्मागतस्पृहतमभयमेतद्ब्रह्मेतितयोर्म भा०टी०छा०
ध्येविरोचनोदेहानुसारित्वात्॥छायामयदेहएवात्मातत्त्वमितिमत्वासहृष्टमनानत्वतथै
वासुरानुपदिदेश॥इंद्रस्तुस्वगृहमार्गगएवछायात्मनोऽनित्यत्वादिदोषंचिंत।यित्वापु
नः॥समित्पाणिःसन्प्रजापतिसमीपमागत्यतेनपृष्टःसन्मार्गेचिंतितमुवाच॥प्रजा
पतिस्तुहेइंद्रत्वंकल्मषयुक्तःपुनर्द्वात्रिंशतंवर्षाणिब्रह्मचर्यंचरअथप्रक्षीणकल्मषाय
तेऽहमेतमात्मानंभूयोऽनुव्याख्यास्यामीत्यब्रवीच्चतमतथोचरितब्रह्मचर्यःप्रजा
पतिमुपससाद।उपसन्नायइंद्रायप्रजापतिर्व्याचिष्टेयोऽक्षिणिपुरुषोदर्शितःप्रथमपर्या
येसोयमेषस्वप्नेवासनामयैर्वनितादिभिर्विषयैर्महीयमानःसेव्यमानोऽनेकविधान्भोगा
न्भुंजानोविहरतीतियावत्।इदंश्रुत्वादेवेंद्रःशोकभयादिविविधतापानुभवान्संप्रेक्षितः ७५

इत्याहतुवाचएवमुक्तवतिमघवतिप्रजापतिःपुनर्द्वात्रिंशतंवर्षाणिब्रह्मचर्यंचराद्यापिक्ष
क्षीणकल्मषोसीतिचरितागतायेंद्रायप्रजापतिर्व्याचिष्टेयोयमाद्युक्तितीयपर्यायेयोरक्षि
णिस्वप्नेचात्मादर्शितः॥सएषसुषुप्त्यवस्थायांप्रकाशइत्याह।नह्येतेनत्सुसुप्तइतिनदेतदितिसं
बंधः।यत्रयस्यांसुषुप्त्यवस्थायामेतत्स्वपनंयथास्यात्॥तथासुप्तस्तस्यावस्थायामपु
संहतकरणग्रामःसमस्तःकरणव्यापारकृतकालुष्यहीनःसंपन्नःस्वप्नमत्तानमाअन्त
त पाविजानत्समुक्ताद्याद्यर्थःस्वप्नंप्रत्युक्तेनसत्त्वंविहायप्राप्तोभूतात्तानक्रियांविनास्वरूप
चैतन्येनात्तानसाक्षीसाद्यस्यदेहादेःसत्तास्फूर्तिदात्मेत्यर्थः॥इदंश्रुत्वापुनरिंद्रोनकिं
चिन्नचनायतइत्याह।नाहेतिअहेतिनिपातःखेदार्थेखिद्यमानोहींद्रवाचायंस्तुनः॥पुरु
षोपमस्पृहमित्येवमात्मानमस्यामवस्थायांजानातिइमानिभूतानिनोएवजानातिवि

नाशमेवाप्यतो भवति नाहमत्र भोग्यं पश्यामीत्येवं दोषं दृष्ट्वा पुनः प्रजापतिमुपससाद उ-
पसन्नं पुनरुवाच वत्साद्यापि ते कल्मषक्षीणो नाभवत् ॥ तदर्थं पुनः पंचवर्षाणि ब्रह्मचर्यं च-
रेति तदेवमेकोत्तरशतं ब्रह्मचर्यं चरेति सहस्राद्यायब्रह्मचर्यसंयमनादितकषायाय प्रजा-
पतिर्व्याचष्टे यो यमादावक्षिणी पततीय पर्यायेषु स्वप्नसुषुप्तौ चानुस्मृतोपहतपा-
प्मत्वादिगुणो दर्शितः ॥ तमेव त्वपोनुव्याख्यामि नेतस्मादन्यमितु पंचमपर्याये मघवन्
मर्त्यं वा इदं शरीरमित्यादिना ॥ शरीरं निर्दिश्य तस्मादुत्थितं जीवमेवोत्तमं पुरुषं दर्शयति प्र-
जापतिः ॥ य एष संप्रसादोस्मादित्यादिना ॥ तस्मादपहतपाप्मत्वादीनां जीवे संभवात् जीव
एव दहराकाश इति ॥ प्राप्ते ब्रूमः ॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥ तुशब्देन शंकाव्यावृत्तिः
उत्तरात् प्रजापतिवाक्यादपि न जीवाशंकायुक्तेत्यर्थः ॥ यतस्तत्राविर्भूतस्वरूपो न जीवो वि-

वक्षितः ॥ न तु जीवत्वेन रूपेण परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति ॥ उपसंहार-
दर्शनात् ॥ यदपहतपाप्मत्वादिभिः प्रतिपाद्यं परं ब्रह्म तदेव जीवस्य पारमार्थिकं स्वरूपं सं-
न तु जीवत्वं तया चाविर्भूतस्वरूपस्य जीवस्य जीवस्य ब्रह्मत्वेनापहतपाप्मत्वादिकं सुप-
पद्यते न तु जीवत्वेन रूपेणेति नासंभवदिति एवं सूत्रस्य हेतुर्नासिद्ध इति ॥ ननु दहराकाश-
स्येश्वरत्वे अथ य एष संप्रसाद इत्यादिना जीवपरामर्शोव्यर्थः ॥ स्यादित्यत उत्तरं पठति ॥
अन्यार्थश्च परामर्शः ॥ १९ ॥ अन्यार्थोयं जीवपरामर्शो न जीवप्रतिपादनाय परं ज्योति-
रुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इत्युपसंपत्तव्यपरमात्मपरत्वायं जीवपरामर्शो ना-
वोपसंपत्तव्यत्वेन हि परमात्मोपदिश्यते स चोपदेशो जीवपरामर्शं विना न संभवतीति तद-
यं जीवपरामर्शो निजीवप्रतिपादनार्थमिति अल्पश्रुतेरिति चेत्तदुक्तं ॥ ननु दहरोस्मिन्नंतरा-

काशइत्याकाशइत्याकाशस्यान्यत्रश्रवणात्परमात्मत्वंकिंवारायमात्रजीवत्वंयुक्तमिति॥
चेतत्रसमाधानमुक्तमर्भकौकस्त्वात्तद्व्यपदेशाच्चेत्यत्रोपासनार्थमौपाधिकमल्पत्वंपर
मेश्वरेप्यविरुद्धर्थः॥तस्मादहराकाशःपरमात्मैवोपास्यइतिसिद्धं॥अनुकृतेस्तस्यच॥सर्वं
परंज्योतिरुपसंपद्येतिवाक्यार्थविचारप्रसंगात्तत्तुभ्रंज्योतिषांज्योतिरितिवाक्योक्तपरं
ज्योतिष्ट्वसाधकंनतत्रेतिवाक्यंविचार्यतइतिप्रसंगतिरस्याधिकरणस्यफल॥सर्वज्ञात्मस्तुत्या
तदुरोधादाकाशशब्दस्यरूढित्यागेनेश्वरेवृत्तिरुक्तातथेहापितत्रेतिसतिसप्तम्यातत्रशब्द
वाच्यस्यतेजोंतराभिभावकत्वप्रतीतिदुरोधान्नभातीत्यस्यवर्तमानार्थत्यागेनयस्मिन्सति
सूर्यादिकंनभास्यतिसतेजोधातुरूपास्यतेनोच्यतइतिसर्वपदान्वयानाद्दृष्टांतसंगतिः॥एव
पक्षेत्वलौकिकतेजउपास्तिःफलंसिद्धांतेनिर्विशेषब्रह्मप्रमितिरितिभेदः॥मुंडकोपनिष

दिश्यपतेनतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः॥तमेवभांतमनुभातिसर्वं
स्यभासासर्वमिदंविभातीतिसिद्धांतेतत्रेविषयसप्तमीतथाचतत्रतस्मिन्ब्रह्मणिविषयेसू
र्यादयोनभासकत्वेनभासंतेयथाघटादौविषयेऽप्यालोकादिकंभासकत्वेनभासतेतद्वत्॥
अन्यतेजसोवर्केफल्गुत्वमभिप्रेत्यकैमुतिकन्यायमाह॥कुतइतीतरस्यपादेर्नब्रह्मणिभा
सकत्वमितिव्याह॥तमेवेति॥यथासूर्यादिप्रकाश्योघटादिर्नसूर्यादिप्रकाशकएवंब्रह्म
प्रकाश्यःसूर्यादिर्नब्रह्मप्रकाशकइत्यर्थः॥ननुयथागुरौगच्छतिशिष्यस्यानुगमनंस्वनि
ष्ठगमनहेतुकंतथावंसूर्यादेःस्वनिष्ठभानहेतुकमनुभानंकिंनेत्याह॥तस्येतियथाऽयःपिंडस्यदा
हक्रियावह्निनिष्ठैवतथासूर्यादिभानंब्रह्मनिष्ठमेवनपृथगनुभानमित्यर्थः॥अत्रसंशयः
सूर्यादिजगद्भासकतयाप्रतीयमानंतेजोविशेषोवाब्रह्मवेतितेजसएवप्रकाशकत्वप्रसिद्धेः

प्रबलेन तेजसा दुर्बलस्याभिभवदर्शनाच्च तेजोविशेष एवेति प्राप्ते ब्रूमः ॥ अत्र तया प्रतीयमा-
नं ब्रह्मैव कुतः ॥ अनुकृतेः ॥ अनुकृतिरनुकरणं यत्तमेव भान्तमनुभाति सर्वमित्यनुभानं ॥ त-
दनुकृतिशब्देनोच्यते नहि तेजसस्तेजोन्तरे भासमाने भासते स्वप्रकाशतया भासमानं चैतन्य-
मनु सर्वं सूर्यादि भासत इत्युक्तं सूत्रेण तस्य चेत्यनेनोदाहृतवाक्ये चतुर्थचरणोभिप्रेतः ॥
तस्य भासा सर्वमिदं विभातीति सर्वभासकत्वं तेजोन्तरस्याप्रसिद्धं विरुद्धं च भासमानस्य ते-
जसस्तेजोन्तराभिभावकत्वेन भासकत्वाभावात् ब्रह्मणस्तूपपन्नं तद्देवा ज्योतिषां ज्योतिरित्या-
दौ प्रसिद्धं च ॥ न तत्रेति तच्छब्देन च हिरण्मये परे कोशे विरजं ब्रह्म निष्कलं तच्छुभ्रं ज्योतिषां ज्यो-
तिस्तद्यदात्मविदो विदुरिति प्रकृतब्रह्मपदगामेव युक्तमिति ॥ श्रुत्यर्थस्तु हिरण्मये ज्योति-
र्मयेऽखण्डानंदमयपदस्यार्थः ॥ तस्मिन्नन्नमयाद्यपेक्षया परे कोशे ब्रह्म पुच्छं प्रतिष्ठेति पदत्रप्रतिष्ठा-

शारी० इ० १ ८२

भूतं ब्रह्म तत्र तिष्ठितं तच्च विरजं आगन्तुकमलशून्यं निष्कलं निरवयवं शुभ्रं नैसर्गिकदोषशून्यं
ज्योतिषां सूर्यादीनां ज्योतिरवभासकं तच्च विदुषामनुभवसिद्धमिति ॥ अपि च स्मर्यते ॥ अपि
च ब्रह्मणः सूर्याद्यप्रकाश्यत्वं तत्प्रकाशकत्वं च भगवद्गीतासु स्मर्यते न तद्भासयते सूर्यो न शशा-
ङ्को न पावकः ॥ यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥ यदादित्यगतं तेजो जगद्भासयतेऽखि-
लं ॥ यच्चंद्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकमिति ॥ तस्मादनन्यप्रकाशः सर्वजगद्भासकः ॥
परमात्मात्र प्रतिपाद्य इति सिद्धं ॥ शब्दादेव प्रमितः ॥ पूर्वत्रानुभानादिना लिंगेन तत्रेति विषयसप्त-
मी कृता न भातीत्यादौ णिजध्याहारेण न भासयतीत्यर्थे विशिनो भवति भासकत्वेनानुमीति
सूर्यादिपदस्याध्याहारं कथनात् तथैवाप्यंगुष्ठमात्र इति परिमाणलिंगाज्जीवमात्रायेशानो स्मीति-
स्मारयेदिति विध्यध्याहारेहारेणोपात्तिपरमंगुष्टवाक्यमस्तीति दृष्टांतसंगतिः सिद्धां तेन-

श्री

मी

सू॰
८३

मेदप्रमितिः फलं कठवल्लीषूपपद्यते ॥ अंगुष्ठमात्रः ॥ पुरुषो मध्य आत्मनि तिष्ठतीति ॥ तथा अं
गुष्ठमात्रः ॥ पुरुषो ज्योतिरिवाधूमकः ॥ ईशानो भूतभव्यस्य स एवाद्य स उ श्वः ॥ एतद्वै तदि
त्यस्यार्थः ॥ स्वाभाविकं परिच्छेदं वारयति पुरुष इति पूर्णत्वेन सर्वज्ञोपलभ्यमान इत्यर्थः
तर्हि कथमंगुष्ठमात्रत्वमित्याशंक्य अभिव्यक्तिस्थानद्वारा तदाह मध्य इति आत्मनि दे
हे मध्ये हृदयसद्मनीत्यर्थः ॥ जीवभावमापन्नस्य ब्रह्मण एवेदमंगुष्ठमात्रत्वमुपपन्नमि
ति बोध्यं ईशानो भूतभव्यस्येत्यादिना तं पदार्थं अंगुष्ठमात्रजीवानुवादेनाऽभेदबोधना
दिति तस्यैव परमात्मत्वावादिवाक्यांतरमुदाहृतं तथेति अधूमकमिति लिंगव्यत्ययः ॥
ज्योतिः परत्वात् ॥ यथाऽधूमकं ज्योतिरकलुषितमेकरूपं प्रकाशमानं दृष्टं तथा यमपि
वस्तुतः कूटस्थप्रकाशात्मेत्यर्थः ॥ बोधितत्वमर्थस्य तदर्थताम् आदिरीशान इति भूतभव्य

शारी॰ अ॰
१
८३

यहणं भवतोपि प्रदर्शनार्थं द्वितीयमाह ॥ स एवेति अद्य वर्तमानकाले स एवास्ति श्वः भ
विष्यत्काले स एव भविता अतीतकाले स एवासीत् नचिकेतसा ह्यन्यत्र धर्मादित्यादिना तदे
तदेवाद्वितीयं वस्त्विति ॥ अत्र संशयः ॥ किमिदमंगुष्ठवाक्यं जीवपरमुत ब्रह्मपरमिति तत्रांगु
ष्ठपरिमाणस्य ब्रह्मण्यसंभवात् जीवपरमिदं वाक्यमिति प्राप्ते ब्रूमः ॥ प्रत्यगतिः ॥ न परमा
त्मा वाक्यप्रतिपाद्यः प्रमितः कस्मात् शब्दादेव ईशानो भूतभव्यस्येत्यनेनेशानशब्दात् नहि
जीवे ईशानत्वं शाख्याजसः ॥ न चांगुष्ठप्रतिमाणलिंगाज्जीवः ॥ प्रतिपाद्य इति युक्तं लिंगश्रु
त्योर्विरोधे श्रुतेः ॥ प्रबलत्वात् ॥ एतन्मूचनार्थमेवकारः ॥ ननु वाक्यस्य परमात्मपरत्वे क
थमंगुष्ठमात्रत्वस्योपपत्तिरिति चेत् कारकयतातं परवाच्यांगुष्ठमात्रजीवानुवादेन ब्र
ह्माभेदपरे वाक्येऽनुपपत्त्यभावादिति ॥ ननु जीवस्य वस्तुतः सर्वगतस्य ॥ कथमंगुष्ठमा

ब्र॰ ८४ त्वमित्यत आह ॥ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥ तुशब्दः शंकानिरासार्थः ॥ नस्तुतः शारी॰ ३॰
सर्वगतस्यापि जीवभावमापन्नस्य परमात्मनोंगुष्ठपरिमाणहृदयापन्नतयांऽगुष्ठमात्रत्व १
मुपपद्यत इत्यर्थः ॥ ननु गजपुत्तिकादिशरीरेषु हृत्पुंडरीकस्यानियतपरिमाणत्वात्कथं
जीवस्यांगुष्ठमात्रत्वनियमस्तत्राह ॥ मनुष्याधिकारत्वादिति शास्त्रस्येति शेषः ॥ षष्ठे फला
र्थे कर्मणीति पगादेरपि स्वर्गकामस्याधिकारः ॥ स्वर्गकामश्रुतेरविशेषादित्याशंक्या
ऽगश्रुत्यर्थवत्त्वाय समर्थविषयतयाति पगादेः ॥ सामर्थ्याभावेन स्वर्गकामपदसं
कोच्य मनुष्याधिकारत्वे स्थिते चातुर्वर्ण्यमधिकरोति शास्त्रमिति न्यायप्रवसंते त्रैवर्णि
र्णीनामध्ययनीयमे राजन्यः ॥ शरदि वैश्य इति त्रयाणामेवाग्निसंबंधश्रवणात् ॥ तेषामे
वाधिकार इति सिद्धांतितं ॥ तथा च मनुष्याणां हृदयस्यांगुष्ठमात्रत्वात्तदपेक्षयांगुष्ठमा ८४

त्वमित्यविरोध इति तात्पर्यं ॥ एवमंगुष्ठमात्रजीवानुवादेन विरुद्धांशं परित्यज्याभेदो
बोध्यतेऽनेन वाक्येन इममर्थमुत्तरग्रंथसंदर्भेण स्फुटीकरिष्यति ॥ अंगुष्ठमात्रः पुरु
षोंतरात्मा सदा जनानां हृदये सन्निविष्टः ॥ तं स्वाच्छरीरात्प्रवृहेन्मुंजादिवेषिकां धैर्ये
ण तं विद्याच्छुक्रममृतमिति ॥ अस्यार्थः ॥ योंतरात्मा पुरुषत्वात्पूर्णोपि जनानां हृदये
सदा सन्निविष्टः ॥ अतोंगुष्ठमात्र इति तत्पदवाच्यानुवादः ॥ तस्यान्वयव्यतिरेकाभ्यां त
दनुसारिश्रुत्या च शोधनमाह ॥ तं स्वादिति ॥ शरीरं स्थूलं सूक्ष्मं च तस्मात्स्वाभिमानवि
षयात्प्रवृहेत्पृथक्कुर्यात् ॥ धैर्येण समाधिनेति यावत् ॥ तं विविक्तमात्मानं शुक्रममृतं ब्र
ह्मैव जानीयादित्याह तमिति ॥ तदेवं काठकवाक्यं प्रत्यग्ब्रह्मणि तात्पर्येण समन्वितमिति ॥
सिद्धं ॥ तदुपर्यपि बादरायणः संभवात् ॥ सर्वमनुष्याधिकारं शास्त्रमित्युक्तं तर्हि क्रममुक्त्या

सू॰३०
८५

यभिरुपासनाभिर्मनुष्याणांदेवत्वंप्राप्तानामधिकारोनस्यादित्याक्षिप्यसमाधीयतइत्यादे
पसंगत्यास्यारंभः।प्रसंगसंगत्यावाह।अत्रचाधिकारनिरूपणद्वारामंत्रार्थवादादीनांमा
नांतरप्राप्तिविरोधयोरसत्तोदेवताविग्रहादौसमन्वयोक्तेरध्यायसंगतिः।एवंमंत्रा
दीनांस्वार्थेप्रामाण्यन्यायसाम्यादुपासनाधिकार्यादिसमर्पकाणांस्वार्थेप्रामाण्यात्त
त्वमस्यादिवाक्यानांब्रह्मात्मैक्यपर्यवसानमितिस्मृतिशास्त्रपादसंगतिः।पूर्वपक्षेमंत्राद्य
ऽप्रामाण्याद्युपगमनादिवाक्यानामपिस्वार्थेतदयोगात्तत्वमस्यादेरपिनैक्यमिष्टतेति
सिद्धांतेतत्संभवादैक्यनिष्ठतेतिफलं।यद्वादेवानामनधिकारात्क्रममुक्तिसाधनेष्व
पासनेषुदेवादिभोगशरीरमोक्षकाममनुष्यप्रवृत्तिर्नास्तीतिपूर्वपक्षफलं।सिद्धांतेता
दृशप्रवृत्तिरस्तीति।बृहदारण्यकेश्रूयतेतद्योयोदेवानांप्रत्यबुध्यतसएवतदभवत्त

थर्षीणांतथामनुष्याणामिति।देवादीनांमध्येयोयोब्रह्मप्रत्यक्षेणसाक्षात्कारकरोत्सए
वब्रह्मात्मनाऽतिष्ठदित्यर्थः।अत्रकिंदेवादीनांब्रह्मविद्यायामधिकारोस्तिउतनास्ती
तिशास्त्रस्यमनुष्याधिकारत्वान्नास्तीतिप्राप्तेऽभिधीयतेतदुपर्यपिबादरायणःसंभ
वादितितेषांमनुष्याणामुपरिष्टाद्येदेवादयस्तेषामपिब्रह्मविद्यायामधिकारो
स्तीतिबादरायणआचार्योमन्यतेस्मकस्मात्संभवात्अर्थित्वसामर्थ्याद्यधिका
रकारणस्यसंभवादित्यर्थः।देवादीनांसदाभोगशालित्वेपिभोग्यवस्तुषनित्यत्व
दोषदर्शनाद्वैराग्यादिकंनिरतिशयानंदमोक्षार्थित्वंचसंभवतीतिभावः।विरोध
ःकर्मणीतिचेन्नानेकप्रतिपत्तेर्दर्शनात्।ननुदेवादीनांविग्रहवत्वेविनाब्रह्म
विद्यायामनधिकारात्तदंगीकरणीयंतथासतिकर्मण्यपिशरीरतयाऋत्विगादिवत्

सू०त्र० ८६ संनिधानेनैवोपकारकत्वं स्यात्तच्च न संभवति। एकस्य शरीरस्यानेकत्र युगपत्संनिधानासंभ- शारी०टी० १
वात्। तस्माद्विग्रहवत्तांगीकारे कर्मणि देवताया उपकारकत्वविरोधः प्रसज्येतेति चेन्नैष
दोषः। कस्मात्। अनेकप्रतिपत्तेर्दर्शनात्। एकस्य देवस्यानेकेषां शरीराणां युगपत्प्राप्तेः
श्रुतौ दर्शनादित्यर्थः। तथाहि बृहदारण्यके शाकल्यब्राह्मणे। अथ हैनं विदग्धः शाक-
ल्यः पप्रच्छ कति देवा याज्ञवल्क्येत्युपक्रम्य त्रयश्च त्री च शता त्रयश्च त्री च सहस्रेत्युक्त्वा
कतमे त इति पृष्टायां महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा इति त्रिसहस्रषडधि-
कत्रिशतदेवानां त्रयस्त्रिंशद्देवेष्वंतर्भावमुक्त्वा त्रयस्त्रिंशतोपि षट्सु षण्णां त्रिषु त्रया-
णां द्वयोर्द्वयोरेकस्मिन्वा प्राणात्मके देवेंतर्भावं ब्रुवत् एकस्य वायोरनेकरूपतां दर्शयति
अयमस्यार्थः। एनं याज्ञवल्क्यं विदग्धः शाकल्यो वैश्वदेव नाम कस्य शस्त्रस्य निविदिति श- ८६

स्यमाना देवाः कतीति पप्रच्छ तत्र याज्ञवल्क्यस्योत्तरं निवित् त्रयश्चेत्यादिः। शस्यमानदेव-
निष्ठसंख्यावाचकं मंत्रपदं निविदित्युच्यते एवं षडधिकत्रिशताधिकत्रिसहस्रसंख्यानि-
र्णयानंतरं कतमे त इति संख्येयस्वरूपप्रश्ने अष्टौ वसव एकादश रुद्रा द्वादशादित्याः
प्रजापतिरिंद्रश्चेति त्रयस्त्रिंशद्देवेषु सर्वेषामंतर्भावो दर्शितो महिमान एवैषामित्यादि-
ना एषां त्रयस्त्रिंशद्देवानां महिमानो विस्तारा एव वस्तुतस्त्रयस्त्रिंशद्देवेत्यर्थः। तेपि त्रयस्त्रिं-
शद्देवाः षण्णामग्निपृथिवीवाय्वंतरिक्षादित्यदिवां महिमानस्ते पि षड् देवास्त्रयाणां लो-
कानां महिमानस्ते त्रयो देवा द्वयोरन्नप्राणयोस्तौ चैकस्य प्राणशब्दवाच्यस्य वायोर्महिमा-
नावृद्धिरिति। पराञ्चनेकप्रतिपत्तेर्दर्शनादनेकत्र कर्मणि चैकस्य प्रतिपत्तिरंगभावस्तस्य
लोके दर्शनादित्यर्थः। यथा बहुभिर्नमस्कुर्वाणैर्युगपदेको ब्राह्मणो नमस्क्रियमाणो

दृश्यते एवमेकां विग्रहवतीं देवतामुद्दिश्य युगपत्सर्वैर्हविषि त्यज्यमाने इति न कश्चि-
त्कर्मणि देवताया उपकारकत्वे विरोधः ॥ शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमाना-
भ्यां ॥ ननु मास्तु कर्मविरोधस्तथापि शब्दे वेदवाक्ये विरोधः स्याद्देवस्यापि नित्यविग्र-
हत्वे देवताया अनित्यत्वे तापर्यन्तं गीकारे शब्दस्यापि येन नित्यसंबन्धाभावेन नित्या-
नित्यसंयोगविरोधादिति चेन्नायमप्यस्ति विरोधः ॥ कुतः ॥ अतः प्रभवात् देवादि-
निष्ठनित्याकृतिवाचकाद्वेदराशेरेव देवादिप्रपंचस्य प्रभवात् ॥ उत्पन्नत्वश्रवणा-
दित्यर्थः ॥ तथा हि स्मृतिः ॥ अनादिनिधना नित्या वागुत्सृष्टा स्वयंभुवा ॥ आदौ वेद-
मयी दिव्या यतः सर्वाः प्रवृत्तयः ॥ नामरूपं च भूतानां कर्मणां च प्रवर्तनं ॥ वेदशब्दे-
भ्य एवादौ निर्ममे स महेश्वर इति स्मृतिरपि ॥ एत इति ह वै प्रजापतिर्देवानसृज-

तासृग्रमिति मनुष्यानिंदव इति पितॄंस्तिरःपवित्रमिति ग्रहानाशव इति स्तोत्रं वि-
श्वानीति शास्त्रमभिसौभगेत्यन्याः प्रजा इति तथा स मनसा वाचं मिथुनं समभवदि-
त्यस्यार्थः ॥ एते असृग्रमिंदवस्तिरःपवित्रमाशवः विश्वान्यभिसौभगेत्येतन्मंत्रस्थ-
त् पदैर्देवादीन्स्मृत्वा ससर्ज ब्रह्मा तत्र एत इति शब्द इंद्रियाधिष्ठानदेवस्मारकः ॥ असृग्रश-
ब्दोऽसृक्शब्दवाच्यरुधिरप्रधानदेहमरणमनुष्यस्मारकः ॥ इंदुमंडलमध्यवर्ति-
पितृस्मारक इंदुशब्दः ॥ पवित्रं सोमं समध्येति तिरस्कुर्वतां धारयतां ग्रहाणां तिरःपवि-
त्रशब्दः स्मारकः ॥ ऋचोऽश्नुवतां स्तोत्राणां प्राप्नुवतां गानरूपाणां आशवशब्दः स्मा-
रकः ॥ विश्वे देवशंसनशास्त्राणां विश्वशब्दः स्मारकः ॥ अभिसौभगेति शब्दो निरतिशय-
सौभाग्यवाचकः प्रजानां स्मारक इति ॥ स प्रजापतिर्मनसा सह वाचं मिथुनभावं स-

स्तत्र० ८८

मभवत्समभावपत्। नर्यीश्रकाशितांस्तर्षिं मनसा स्वाजोषितवानिति यावत्॥ सूत्रस्य · शारी० सू० १
प्रत्यक्षानुमानशब्देन स्पष्टैर्वेदप्रभवत्वप्रतिपादकश्रुतिस्मृती गृह्येते॥ तयाच श्रुतिस्मृ
तिभ्यां वेदशब्दप्रभवत्वे स्पष्टे इत्यर्थः॥ आकृत्याधिगितविग्रहानंगीकारे कस्य सृष्टिः
स्यादिति भावः॥ तस्माद्यागवादिशब्दानां नित्याकृतिवाचकत्वे॥ एवं वैदिकशब्दा
नां नित्याकृतिवाचकत्वमिति न शब्दे विरोध इति॥ अत एव च नित्यत्वं॥ अस्मृ
तकर्तृकत्वादिना सिद्धमेव वेदस्य नित्यत्वमनित्यार्थसंयोगेनानुपपन्नमित्याशंक्य
वेदादेवाकृतिविशेषावच्छिन्नदेवादिसृष्टिरिति प्रतिपादनान्नित्याकृतेरेव शब्दा
र्थतावानुपपन्नमित्यभिप्रायेणापरिहरति। अत एव नित्याकृतेः शब्दार्थत्वादेव
वेदस्य नित्यत्वं नानुपपन्नमित्यर्थः॥ एतत्सूचयन्स्वितः प्रयोगमपवेदः। अवांतरप्रल ८८

यावस्थायीजगद्धेतुत्वादीश्वरवदिति। अवांतरप्रलयावस्थापितमेव हि नित्यत्वं नाम। अ
नुमानमिदार्थे श्रुतिरपि यज्ञेन वाचः पदवीयमायन्तामन्वविंदन्नृषिषु प्रविष्टामिति। यज्ञेन
पुण्यकर्मणानुमानमिदार्थे श्रुतिरपि यज्ञेन वाचः पदवीयमायुर्वाचो वेदस्य पदवीयं।
ग्रहणयोग्यतामायन्प्राप्नुवंतः। अतस्तामृषिषु विद्यमानां वाचं याज्ञिका अन्वविंदन्
उपलब्धिमंतो बभूवुरित्यर्थः॥ सर्वं स्थितामेव वाचं सर्वे जानवंत इति तात्पर्यं। समान
नामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च॥ ननाकृतिपदार्थकत्वे पि व्रजपे सा
र्वाकृतिकव्यक्तिनाशे। पुनस्तदाकृतिव्यक्त्युत्पत्तौ मानाभावान्नित्यानित्यसंयोगविरो
धस्तदवस्थ इतिचेन्नेत्युच्यते। महाप्रलयाद्यनावपि न शब्दे विरोधः। कस्मात्समाननाम
रूपत्वाद्वहि प्रलये जगतो निरन्वयनाशो त्ति येनोत्पद्यमानं जगत्तद्विलक्षणं स्या

सू.वृ.०
८९

त्किंतु संस्कारात्मनाऽविद्यायां तिष्ठत्येव जगत् ॥ अनुभवरूपभावनाख्यसंस्कारात्मना सारी·वृ·०
न चार्यसंस्कारे मानाभावः । मृदि मंडूकसंस्कारदर्शनान्नित्यप्रलयाख्यसुषुप्तौ सविषयें
द्रियाद्यर्थसंस्कारसद्भावाच्च । प्रबोधे सर्वसंगतोपव्यवहारात् न च प्रतिदिनं सृष्टिप्रल
ययोः सद्भावे मानाभावः । यदा सुप्तः स्वप्नं न कंचन पश्यत्यथास्मिन्प्राण एवैकधा भव
ति तदैनं वाक् सर्वैर्नामभिः सहाप्येति चक्षुः सर्वैरूपैः सहाप्येति श्रोत्रं सर्वैः शब्दैः सहा
प्येति मनः सर्वैर्ध्यानैः सहाप्येति स यदा प्रबुध्यते यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिंगा
विप्रतिष्ठेरन्नेवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं विप्रतिष्ठंते प्राणेभ्यो देवा देवे
भ्यो लोका इत्यादिश्रुतेर्मानत्वात् ॥ अस्यार्थः । अयं शब्दस्तदार्थकः । यदेत्युपक्रमात्
प्राणशब्दः परमात्मपरः । अस्मिन् प्राणे जीव एवैकधा भवति तदात्मना तिष्ठतीत्यर्थः ८९

तदा एकीभावावस्थायामेनं प्रकृतं प्राणं परमात्मानं मनो बहिरिंद्रियाणि सर्वाणि सवि
षयाण्यपियंति परमात्मनि लीनानि भवंतीत्यर्थः । प्रबोधे तस्मादेव परमात्मनो जग
तो जन्माहमसदितिश्रुतिविलंबेनोत्पन्नौ दृष्टांतः । यथेति एवं शब्दात्पूर्वं तदेत्यध्याहारः । प्रा
णा वागादयस्तेभ्योनंतरं तदनुग्राहका देवा अग्न्यादयस्तेभ्योनंतरं लोकाः शब्दादिवि
षया इति तथा च पूर्वसंस्कारबलात्पूर्वमंडूकादिसमाननामरूपतया उत्तरकार्यस्य ए
वं पूर्वकल्पितप्रपंचसमाननामरूपतात् उत्तरप्रपंचस्येति सर्वाकृतिव्यक्त्युत्पत्तेर्न
शब्दैः कश्चित् विरोधः । समाननामरूपत्वं च श्रुतौ दर्शनात् स्मृतेः । अभ्युपगंतव्यं ।
सूर्याचंद्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चांतरिक्षमथो स्वरिति ।
तथा न त्वेवेष्टो । अग्निर्वा अकामयत अन्नादो देवानां स्यामिति स एतमग्नये कृत्तिका ।

सू॰वृ॰ ९० भ्यः पुरोडाशमष्टकपालं निरवपदिति ॥ नाविहत्तिमाभिस्सयजमानोग्निरित्युच्यते एवं शारी॰वृ॰ १
कामयित्वा किं कृतवांस्तदाह सऽतिकृत्तिकाभ्यः कृत्तिकाख्यनक्षत्रदेवतायै ॥ बहुवचनेन
तत्र बाहुल्याबोध्यं ॥ अष्टाकपालं अष्टसु कपालेषु पचनीयं निरवपत् उक्तपुरोडाशह
विष्कामिष्टिं कृतवानित्यर्थः ॥ तया च योग्निर्यस्मादग्नये निरवपत्तयोः समाननामरू
पत्वं दर्शयतीति सिद्धं ॥ स्मृतिरपि ॥ यथर्तुष्वृतुलिंगानि नानारूपाणि पर्यये ॥ दृश्यंते तानि
तान्येव तथा भावा युगादिषु ॥ इत्यादिका द्रष्टव्या ॥ उक्तं देवादीनामधिकारमाक्षिपति ॥ म
ध्वादिष्वसंभवादनधिकारं जैमिनिः ॥ देवादीनां ब्रह्मविद्यायामनधिकारं जैमिनिराचार्यो
मन्यते ॥ कस्मात् मध्वादिष्वसंभवात् ॥ एवं हि मधुविद्यास्मर्यते ॥ असौ वा आदित्यो देवम ९०
धु दिवानां मोदनात् मधिव मधु ॥ तस्य मधुनो द्युलोक एव तिरश्चीन वंशः ॥ अंतरिक्षम

मधुसरोऽपूपः ॥

दित्याख्यमधुनो वस्थानात्तदेव मध्वाधारोऽपूपः ॥ रोहितं शुक्लं कृष्णं परः कृष्णं गोप्यं
चेति पंच रोहितादीन्यमृतानि ॥ प्रागाद्यूर्ध्वांत पंचदिगवस्थाभिरादित्यरश्मिनाडीभिर्मधु
छिद्रभूताभी रोहिताद्याख्याभिस्तत्तद्वेदोक्तकर्मकुसुमेभ्यस्तत्तद्वैदिकमंत्रमधुकरैरा
दित्यमंडलमानीतानि पंचममृतं गोप्याख्यं प्रणवकुसुमादुपासनाभ्रमरैरुद्धृ
गात्तत्परश्मिरूपगोप्याख्यमधुछिद्रद्वारादित्यमंडलमानीतं रोहितादिकममृतं म
करंदस्थानस्तं तं वन्हौ हुतसोमाज्यपयः पुरोडाशादिरूपं द्रष्टव्यं ॥ तानि च रोहितादीन्य
मृतानि यशस्तेजो वीर्यः सकलेंद्रियावरूपेण निष्पन्नान्यादित्यमधुसंबंधीनि प्रा
गादिदिक्त्वक्रमेण विद्यमानानां वसुरुद्रादित्यमरुत्साध्यरूपाणां देवानामुपजीव्या
नि इत्येवं चिंतयत्यं फलं वस्वाद्यान्निरुच्यते वस्वादीनां समानानां मध्य एको भूत्वा यज्ञ

सूत्र० ९८१

ग्राह्यमृतंप्रत्यक्षानुमानादिभिःकरणैरुपलभ्यतइतिनह्येवंभूतंमधुविद्या
यांसूर्यवस्वादीनांदेवानामधिकारःसंभवतिएकस्योपास्योपासकभावश्चाप्य
नोपकभावयोर्विरोधात्॥मत्रस्यादिशब्देनपासुविद्यासुमध्वादित्योब्रह्मेत्येवमा
दिरूपासुदेवानामुपास्यत्वंताविद्यागृह्यंतेतथाइमावेवगौतमभरद्वाजावयमे
वगौतमोयंभरद्वाजइमावेवविश्वामित्रजमदग्नीअयमेवविश्वामित्रोयंजमद
ग्निरिमावेववसिष्ठकश्यपावयमेववसिष्ठोयंकश्यपोवागेवात्रिरित्याद्यासुवि
द्यासुऋषुपास्यकासुतेषामेवऋषीणामधिकारःसंभवति॥श्रुत्यर्थस्तुइमौ
दक्षिणवामकर्णौक्रमेणगौतमभरद्वाजौइत्युपास्यौ॥द्वितीयेमाविस्यनेनदक्षि
णवामाक्षिद्वयोक्तिः।तृतीयेमावित्यनेनदक्षिणवामनासिकाद्वयोक्तिः।एवंसप्तसु   शारी०भा० १ ९८१

शीर्षण्येंद्रियेषुसप्तर्ष्युपास्तिरित्यर्थः।नचमध्वादिविद्यासुदेवादीनामनधिकारे
ब्रह्मविद्यायामधिकारःकिंतस्मादितिवाच्यंविद्यात्वाविशेषेणब्रह्मविद्यायामप्य
नधिकारेब्रह्मविद्यायामधिकारःकिंतस्मादितिवाच्यंविद्यात्वाविशेषेणत्।तथा
चायंप्रयोगः।ब्रह्मविद्यानदेवादीनधिकरोतिविद्यात्वान्मध्वादिविद्यावदिति।ज्यो
पिच॥ज्योतिषिभावाच्च॥मंडलवत्तयापरिदृश्यमानज्योतिर्मंडलएवसूर्यचंद्रा
दिदेवताशब्दानांलोकेप्रयोगसद्भावात्मंडलस्यमृत्पिंडादिवदचेतनत्वेनवि
ग्रहाभावादग्निवाय्वादीनामपितत्तुल्यत्वेनसामर्थ्यादिमत्वेतनधर्मस्याभावात्
देवादीनामधिकारः।नचमंत्रार्थवादेभ्योदेवानांविग्रहवत्त्वसिद्धेःसर्वंसुस्थमि
तिवाच्यंतेषामन्यपरत्वेनस्वार्थेप्रामाण्याभावात्तस्माद्देवादीनांब्रह्मविद्या

सू.त्र० ८२

यामधिकाराभावं जैमिनिर्मन्यत इति शंकासूत्रयोरभिप्रायः। सिद्धांतयति। भावं। शारी.सू. १
तु बादरायणोऽस्ति हि॥ तु शब्दः शंकानिरासार्थः॥ बादरायण आचार्यो ब्रह्मविद्यायां
देवादीनामधिकारस्य भावं मन्यते॥ यद्यपि देवतामिश्रोपासनास्वनधिकारस्त
थापि निर्गुणब्रह्मविद्यायां देवादीनामप्यधिकारोऽस्ति हि सर्वोक्तस्य विद्यात्वादि।
त्यनुमानस्य ज्योतिष्टोमादिना ब्राह्मणकर्मैतव्यं कर्मत्वाद्राजसूयवदित्याभा।
ससाम्यं द्रष्टव्यं॥ यत्तु ज्योतिषि भावाच्चेति तस्योत्तरमस्ति हीति यद्यपि देवताशब्दा
ज्योतिरादौ प्रयुज्यंते तथापि तदभिमानिदेवता परा एव संभवंतीत्यस्ति ह्यैश्व।
र्ययोगाज्ज्योतिरादिरूपेणावस्थातुं विग्रहं गृहीत्वाप्यवहर्तुं च सामर्थ्यं तथा हि ८२
स्मर्यते। मेधातिथिं मेषेति मेधातिथिं काण्वायनं मेषो भूत्वेंद्रो जहारेत्यर्थः॥

अर्थवादादिभ्य एव विग्रहसिद्धिः।३।

तथा स्मर्यते च आदित्यः पुरुषो भूत्वा कुंतीमुपजगामेति ननु अर्थवादादीनां स्वार्थे प्रा।
माण्याभावात्कथं तेभ्यो विग्रहवत्त्वसिद्धिरिति चेत् तत्राप्यस्ति हीत्येवोत्तरं। मानांतर
विरोधसंभवादयोरभावे तेभ्य एव विग्रहसिद्धिरिति। तथा हि अर्थवादादिभिः स्तु।
त्यादिकं लक्षयतां वाच्यार्थोऽङ्गीकृत एव न हि वाच्यार्थाभावे लक्षणा युक्ता किंच व्रात्यो
व्रात्यस्तोमेन यजेतेत्यादौ व्रात्यस्वरूपाकांक्षायां सावित्रीपतिता व्रात्या यस्य पितापि
तामहो वा सोमं न पिबेत् स व्रात्य इति व्रात्यस्वरूपं विधेयेप्सितं सद्विधिप्रमाणं का
मित्युच्यते। यथा वा स्वर्गरूपं विधेयेप्सितं सद्विधिप्रमाणकं। तथा निःस्वरूपदेवतोद्दे
शेन द्रव्यत्यागात्मयोगाद्विधेयेप्सितं देवतादिस्वरूपं विग्रहवत्त्वं। विधिप्रमाणकमेव एवं
मंत्रार्थवादप्रत्यक्षमूलेतिहासपुराणादिभिरपि विग्रहवत्त्वसिद्धिः। ननु प्रत्यक्षमूल

तं पुराणादीनामसिद्धमिति वाच्यं । तत्कर्तॄणां योगमाहात्म्याद्देवादिभिः सह प्रत्यक्षव्यवहारसंभवात् । तथा च श्रुतिर्योगमाहात्म्यमाह । पृथ्व्यप्तेजोनिलखे समुत्थिते पंचात्मके योगगुणे प्रवृत्ते । न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरमिति । पादतलमारभ्याजानोर्जानोरानाभेर्नाभेराग्रीवं ग्रीवायाश्चाकेशप्ररोहाद्ब्रह्मरंध्रं क्रमेण पृथिव्यादिधारणया । पृथिव्यादिपंचात्मके भूतसमुदाये समुत्थिते प्रतिपन्ने वशीकृते योगगुणे चाणिमादौ प्रवृत्ते योगाग्निव्याप्तं तेजोमयं देहं प्राप्तस्य योगिनो न रोगादिप्राप्तिरित्यर्थः । तस्मान्मूले तिहासपुराणादिभ्यो विग्रहवत्सिद्धावर्चिरादिसंभवाद्देवादीनां ब्रह्मविद्यायामधिकारोस्तीति कममुक्त्युपासः नाघुम्मनुत्तुमहवृत्तिरविकल्पेति सिद्धं । शुगस्य तदनादरश्रवणात्तदाद्रवणात्सूच्यते

हि । पूर्वं यथा तद्योयो देवानामिति देवशब्दश्रुत्या मनुष्याधिकारनियमापवादेन देवानामप्यधिकार उक्तस्तथा ब्राह्मणो जानश्रुतौ शूद्रशब्दश्रुत्या लिंगेन द्विजात्यधिकारनियममपोह्य शूद्रस्याप्यधिकारोस्तीति दृष्टांतसंगत्येदमारभ्यते । शूद्रशब्दस्य सिद्धांते च विषये समन्वयोक्तेरध्यायांतर्भावोस्य युक्तः । शूद्रशब्दस्यैव भेदातानांस्वार्थे समन्वयसिद्धेः श्रुतिसंगतिः । पूर्वपक्षे जातिशूद्रस्यापि ब्रह्मविद्यायां त्रैवर्णिकादविशेषः फलं । सिद्धांते ततो विशेष इति विवेकः । एवं किलानुछांदोग्ये चतुर्थाध्याये उपाख्यायते । जानश्रुतिः पौत्रायणः श्रिपातिथिर्वंदनादाता बहुसकुणो बभूव तस्य राज्ञो गुणगणगरिमसंतोषिताः संतो देवर्षयो हंसरूपमास्थाय निदाघसमये प्रासादोपरि शयानस्यास्य राज्ञ उपरिमालामाबध्याजग्मुः । तेषामग्रेसरं हंसं संबोध्य पृष्ठतस्त्वागच्छन्नेको हंसः साधु ।

स्त्र॰ तमभ्युवाच भो भो मल्लाक्ष मल्लाक्ष अस्य राज्ञो जानश्रुतेर्द्युलोकं व्याप्य विद्यमानं तेजो। श्री॰ह॰
९४ न पश्यसि किं तत्तेजस्त्वां धक्ष्यतीति अतस्तद्विलंघ्य न गच्छेति भल्लाक्षेत्युपहासः॥ न ह्येते
त्यर्थः॥ इदं श्रुत्वा पश्चाद्यामी गो हंसः प्रत्युवाच॥ कमु वरमेनमेतत्संतं सयुग्वानमिव रैक्व
मात्थेति॥ अयमर्थः। वरेति सोपहासं संबोधनं अवरेत्यर्थः। यद्वा वरो वराकोऽजानश्रुतिः
कमु पदमाक्षेपार्थकं कथमित्यर्थः॥ रैक्वो नाम कश्चन ब्रह्मिष्ठः योऽजयति देशांतरं।
गयति स्वारूढमिति युग्वा गंत्री शकटी तया सह वर्त्तत इति सयुग्वानमित्यर्थः। तथा च ए
नं वराकं जानश्रुतिं प्राणिमात्रं संतं महत्तेजस्विनं सयुग्वानं भगवंतमसह्यतेजसं रैक्वमिव कु
यमेतद्वचनं ब्रवीषि॥ इदं श्रुत्वा यं राजा ब्रह्मविद्यार्थं रैक्वसमीपं गत्वा कृतार्थो भविष्यती।
ति दयालूनां हंसानामभिप्रायः। अथैष राजा हंसप्रयुक्तमनादरवाक्यं श्रुत्वा स्वस्यासं ९४

तं निकर्षं युक्तकर्षकाणां रैक्वस्य तावा॥ दुःखितमनाः कथमपि निशामतिवाह्य प्रबुद्धवन्ततो नि
शावसानसूचकं वंदिवृंदसमारब्धस्तुतिसहस्रसंवलितमंगलतूर्यनिर्घोषमाकर्ण्य तल्पत
लस्थ एव राजा क्षत्तारमिति यंतारमाहूयादिदेश॥ विविक्तदेशेषु पर्वतगुहादिषु तेषु रैक्वाकथं स
युग्वानमन्विष्य यत्नतोऽस्मभ्यमाचक्ष्वेति स यंता तथैव क्वचिदिति विविक्तदेशे शकटस्या
धस्तात्संतं पामानं कंडूयमानं दृष्ट्वायमेव रैक्व इति निश्चित्यातिक्रान्तो रैक्वस्य तैस्तैरिं।
गितैर्गार्हस्थ्येच्छां धनेच्छां धनेच्छां चोवीय निवेदयामास॥ स राजा तन्निशम्य गवां षट्शता
नि रथं चाश्वयुक्तमादाय सत्वरं रैक्वमुपधनेप ससाद॥ उपसद्य चोवाच हे रैक्व इदं सर्वं ग
वादिकं गृहीत्वानुशाधि मां भगवन्निति॥ तथैव युक्तवंतं ससंभ्रमं सस्पृहं चोवाच रैक्वः॥
अहारेत्वाशूद्र तवैव सह गोभिरस्त्विति अहहेति निपातः साटोपाक्षेपमाहस्तूक्तेति हारे।

गर्वः साटोपः॥

सू.त्र. ९५

णायुक्तो रथो हारेत्वा गोभिः सहितस्तवैवास्तु किमेतावन्मात्रेण मम निर्वाहः ऽत्वुपयोगि
नेति भावः॥ इत्याशंकते एवं स्थिते चिंता किं शूद्रस्य ब्रह्मविद्यायामधिकारोस्ति न वेति॥ अ
स्तीति तावत्प्राप्तं॥ कस्मात् अर्थित्वादिसंभवात् वेदाध्ययनसाध्याहवनीयाद्यभावेना
ग्निसाध्यकर्मानधिकारेपि देवादिवत् विद्यायामधिकारसंभवात्॥ संवर्गविद्यायां शुश्रू
षोर्जानश्रुतेः शिष्ये॥ रैक्केण गुरुणा शूद्रशब्दप्रयोगाच्चेति॥ अत्र ब्रूमः॥ न शूद्रस्य ब्रह्मवि
द्यायामधिकारः॥ उपनयनाभावेन वेदाध्ययनाभावात्॥ न हि वेदवाक्यविचारसाध्यां
ब्रह्मविद्यामनधीतवेदस्याधिकारः संभवति शास्त्रीयसामर्थ्याभावात्॥ न चैवं सति दे
वानामप्यनधिकार इति सांप्रतं तेषां स्वयंप्रभातवेदत्वात्॥ न च शूद्रस्यापि लिखितपा
ठादिना वेदप्राप्तिरिति युक्तं॥ गुरूपसदनपूर्वकाध्ययनसंस्कृतवेदस्यैव ब्रह्मविद्याद्युप

इतियुक्तंन २

शारी.वृ. १

९५

कारकत्वात्॥ न च शूद्रश्रवणालिंगेन तस्याधिकारः न्यायाभावेन लिंगस्यासाधकत्वात् तर्हि
वैदिकशूद्रशब्दोऽनर्थकः स्यादित्याशंक्य॥ तं व्याख्यातुमिदं सूत्रं शुगस्येति॥ अस्य जानश्रु
तेः क्षत्रियस्य तदनादरश्रवणात् तस्य हंसस्य अनादरश्रवणाद्या शुगुत्पन्ना सा शूद्र
शब्देन सूच्यते रैक्केण॥ तस्य सर्वतत्त्वज्ञापनार्थं रैक्कः शूद्रशब्दं प्रयुक्तवानिति भावः॥
शूद्रशब्दयोगेन क्षत्रिये वर्त्तयति॥ तदाद्रवणादिति॥ तस्याः शुचो जानश्रुतिं प्राप्तत्वा
दित्यर्थः॥ यद्वा तस्य जानश्रुतिं शुचं प्राप्तत्वादिति॥ अयं वार्तं रैक्कं प्रति जानश्रुतिः शु
चा द्रुतवेति शूद्रो जानश्रुतिरुच्यते अतो न शूद्रस्याधिकारः॥ ननु मुख्य एव शूद्रो जानश्रु
तिरस्तु किं जघन्येन योगेनेत्यत आह॥ क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिंगात्॥ जान
श्रुतिर्न मुख्यशूद्रः कुतः क्षत्रियत्वगतेः क्षत्रियत्वावधृतेरित्यर्थः॥ सा च कुतः॥ उत्तर

त्रसंवर्गविद्यावाक्यशेषेचैत्ररथिशब्देनप्रसिद्धक्षत्रियेणाभिप्रतारिनामकेनसहसम
भिव्याहारात्लिंगादित्यर्थः॥ सजातीयानामेव हि प्रायेण सहचारो भवतीति भावः॥
एवं ह्यभिप्रतारी संकीर्त्यते॥ अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं प
रिविष्यमाणौ ब्रह्मचारी बिभिक्षे॥ इति संवर्गविद्यानंतरं॥ अर्थवादारंभाप्येपिव्राहः।
शुनकस्यापत्यं शौनकं॥ कपिगोत्रं कापेयं पुरोहितमभिप्रतारिणं च॥ नाम्ना राजानं॥
कक्षसेनस्यापत्यं काक्षसेनिं तौ भोक्तुमुपविष्टौ सूदेन पाचकेन परिविष्यमाणौ से
व्यमानौ भिक्षितवानित्यर्थः॥ अस्याभिप्रतारिणः॥ चैत्ररथत्वं कापेयेन चित्ररथपु
रोहितेन योगादवगंतव्यं चित्ररथपुरोहितत्वं च कापेयानां श्रुतौ प्रसिद्धं एतेन चैत्र
रथं कापेया अयाजापागेणनयन्निति एतेन द्विरात्रेण॥ समानान्वयानां हि प्रायेण समा
यागेणन॥१॥

नान्वया एव याजका भवंति॥ ननु चित्ररथपुरोहितकापेययोगादभिप्रतारिणश्चैत्ररथ्य।
तं भवतु॥ तथापि कथं क्षत्रियत्वमिति चेन्न॥ तस्माच्चैत्ररथिनामैकः क्षत्रियपतिरजायतेति
श्रुतेः॥ तस्माच्चित्ररथादित्यर्थः॥ एवमभिप्रतारिणः क्षत्रियत्वे सिद्धे॥ तत्समभिव्याहारात्
कलिंगाज्जानश्रुतेः क्षत्रियत्वमिति सिद्धं॥ संस्कारपरामर्शात्तदभावाभिलापाच्च॥ अध्य
त्वेन वेदाध्ययनांगोपनयनाभावान्न जातिशूद्रस्याधिकार इत्युक्तं॥ इदानीं तु॥ ब्रह्मविद्यां
ऽगोपनयनाभावान्न तस्याधिकार इत्युच्यत इति भेदः॥ इतश्च न जातिशूद्रस्याधिकारः
कस्मात् विद्योपदेशेषूपनयनादिसंस्कारपरामर्शात् तं होपनिन्ये॥ अधीहि भगव इति
होपससाद ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समि।
त्पाणयो भगवंतं पिप्पलादमुपसन्ना इति॥ अयमर्थः॥ तं विद्यार्थिनमाचार्यः किलोपनि

सूत्र० ८७ न्येउपनीतवान्॥अनुपनीतायविद्यादानायोगादितितात्पर्यं।सनत्कुमारंप्रतिनारदः॥ शारी० वृ० १
अधीहिभगवइतिहमंमंत्रमुच्चार्यगुरूपसदनंकृतवानित्याह॥अधीहीति॥भरद्वाजाद
यःषड्ऋषयःपरंब्रह्मपरत्वेनोपगतवंतइतिब्रह्मपरास्तद्ध्याननिष्ठाश्च।ब्रह्मनिष्ठाःपरं
परमार्थरूपंब्रह्मविचारयंतोनिर्णयार्थमेषपिप्पलादस्तज्जिज्ञासितंसर्वंवक्ष्यतीति
निश्चित्यरिक्तहस्तानांगुरूपसदनायोगात्समित्पाणयःसंतस्तमुपसन्नाः।किंचइत्या
हब्रह्मपराइति।ननुतान्हानुपनीयैवेत्यनुपनीतानामपिवैश्वानरविद्यायामधिका
रश्रुतेरनियतमुपनयनमितिचेत् ननिषेधस्यप्राप्तिपूर्वकत्वात्॥प्राप्तोपनयनानां ८७
प्राचीनशालादीनांद्विजातीनामेवाधिकारात्निषेधस्तुविद्योपदेष्टुरश्वपतेराज्ञोन्यून
वर्णताद्रष्टव्यः।तान्प्राचीनशालादीनृषीननुपनीयैवाश्वपतीराजोवाचेतिसूत्रार्थः।

ननुशूद्रस्याप्युपनयनंकल्प्यतामित्यतआह तदभावाभिलापाच्चेतिन शूद्रेपात
कंकिंचिन्नचसंस्कारमर्हति।शूद्रश्चतुर्थोवर्णएकजातिरित्यादिना।उपनयनादिसं
कथनात् ३ स्काराभावाभिलापादित्यर्थः।पातकंभक्ष्याभक्ष्यविभागाभावकृतं॥एकजातिरुपनय
नरहितइत्यस्यार्थः।छः।किंचतदभावनिर्धारणेचप्रवृत्तेः।जाबालोहिमृतपितृको
गुरूपसदनंकर्तुकामोगोत्रमजानानोमातरंपप्रच्छकिंगोत्रोहमस्मीतिसाप्यहंनजाना
मीत्युवाच॥ततःसजाबालोगौतममुपससादोपसद्यचोवाचहेभगवन्ब्रह्मचर्यंच
रितुंत्वयीच्छामि॥मामनुगृहाणानुमन्यस्वेति॥ततोगौतमेनकिंगोत्रोसीतिपृष्टः।सत्यका
मोजाबालउवाचनाहंगोत्रंवेदनापिमन्मातेतिततःसगौतमस्तदीयेनसत्यवचनेनजा
बालस्यशूद्रत्वाभावंनिश्चित्यप्रवृत्ते।नैतदब्राह्मणोविवक्तुमर्हति।समिधंसोम्याहरेत्येता

सू०वृ०
१५८

नेष्ये । न सत्यादगा इति ॥ एतत्सत्यवचनं विशिष्य निःसंदिग्धं वक्तुमब्राह्मणो नार्हति
अतस्त्वं न सत्यादगाः सत्यवचनान्नातिगतोसि । अतस्त्वामुपनेष्ये तदर्थं समिधमाह
रेत्यर्थः ॥ ततश्च सत्यकामस्यायमर्थः ॥ तस्य शूद्रत्वस्याभावनिर्धारणोसत्येव विद्योपदेशे
प्रवृत्तिदर्शनादिति । तस्मान्न शूद्रस्याधिकारः । श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च
। इतश्च न जातिशूद्रस्याधिकारः ॥ यतः स्मृतिनो वेदश्रवणस्य तदध्ययनस्य ॥ तत्व।
योज्ञनयोर्वर्थयोर्ज्ञानानुष्ठानरूपयोरर्थयोः प्रतिषेधादित्यर्थः ॥ एवं स्मरंति । अ
थास्य वेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमिति श्रवणस्य निषेधः ॥ त्रपुज
तुभ्यां सतप्ताभ्यां सीसलाक्षाभ्यामस्य शूद्रस्य द्रवाभ्यां श्रोत्रद्वयपूरणं वेदश्रवणा
त्प्रायश्चित्तमित्यर्थः ॥ पद्यु ह वा एतच्छ्मशानं यच्छूद्रस्तस्माच्छूद्रसमीपे नाध्येतव्यमि

शारी०सू०
१
१५८

त्यध्ययननिषेधः ॥ न ह्यश्रुतस्याध्ययनं संभवति पद्यु पादयुक्तं संचारसमर्थमिति
यावत् ॥ न शूद्राय मतिं दद्यादिति तदर्थज्ञाननिषेधः ॥ द्विजातीनामध्ययनमिज्या दानमि
ति तदर्थानुष्ठाने निषेधः स्मरणात् दानं शूद्रेणात्र नित्यदानमुच्यते नैमित्तिकदाने
शूद्रस्याप्यधिकार इति द्रष्टव्यं ॥ विदुरधर्मव्याधप्रभृतीनां तु पूर्वजन्मकृतश्रवणा
दिना ज्ञानस्य वामदेववत् ज्ञानोत्पत्तिर्मंतव्या ॥ तस्मान्न कथमपि ब्रह्मविद्यायां शूद्र
स्य वेदसर्वकोधिकार इति सिद्धं ॥ कंपनात् ॥ समाप्तः प्रासंगिकोधिकारविचारः ॥
इदानीं प्रकृतं वाक्यार्थविचारं प्रवर्तयिष्यामः ॥ शब्दादेव प्रमित इत्यत्र ब्रह्म वा।
कोजीवा तु वा यो ब्रह्मैकज्ञानायेत्युक्तं ॥ ननु येह यदिदमित्यादिवाक्ये प्राणश्रुतेर्वायो
र्युक्तः प्राणस्य स्वरूपेणापि कंपयितृत्वस्य ब्रह्मैक्यायोगादिति प्रत्युदाहरणसंगत्या।

सू०त्रं० स्यारंभः ॥ प्रासंगिकत्वान्नाव्यवहितेन संगत्यपेक्षा ॥ सर्वपक्षे प्राणोपास्तिः फलं सिद्धांते नि शारी० वृ०
१९९ र्विशेषब्रह्मज्ञानमिति भेदः ॥ कंपनात् ॥ यदिदं किंच जगत्सर्वं प्राण एजति नि २
सृतं ॥ महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवंतीति श्रुत्यस्यार्थः ॥ यत्किंचेदमविशि
ष्टं जगत्सर्वं प्राणे निमित्ते सत्येजति चेष्टते ॥ एजृ कंपन इति धातोः कंपनार्थकत्वा
त्कंपनं चेष्टैवेति चेष्टत इत्युक्तं ॥ तच्च जगत्तस्मादेव निःसृतं उत्पन्नं ॥ तच्च प्राणाख्य
जगत्कारणं महत् अनवच्छिन्नं बिभेत्यस्मात्सर्वं पाप्यादीनि भयं भीषास्माद्वातः प
वते इत्यादिश्रुत्यंतरात् ॥ तदेव भयहेतुत्वं निरूपयति वज्रमिति उद्यतं ॥ वज्रमिवेत्यर्थ
ः प्राणाख्यब्रह्मज्ञानात्तस्य मोक्षहेतुत्वमाह ॥ य इति ॥ अत्र संशयः ॥ किं प्राणश १९९
ब्देन मुख्यप्राणवायुर्गृहीता ॥ वज्रशब्देनाशनिहेतुं वायुं जनयितो भयविषयक

मेकमुपासनं विधेयमुत निर्विशेषं ब्रह्मज्ञानेन वाक्येन प्रतिपाद्यमिति ॥ तत्र तावदुपास्ति
परमिति युक्तं प्राणशब्दस्य तत्र प्रसिद्धेः ॥ वायोर्हि पर्जन्यभावेन विवर्त्तमाने विद्युन्मेघवृ
ष्ट्यशनयो जायंत इत्यशनिहेतुवायुजनकत्वं वज्रशब्दस्यापि युक्तं ॥ न च मोक्षफलश्रव
णाद्विरोधः ॥ तस्माद्वायुरेव व्यष्टिर्वायुः समष्टिरप पुनर्मृत्युं जयतीत्येवं वेदेति ॥ वायुवेद
नस्यापि मोक्षहेतुत्वश्रवणादित्येवं प्राप्ते ब्रूमः ॥ शब्दादेव प्रमित इति व्यवहितमपि मंडू
कप्लुत्यात्र वर्त्तते ॥ अस्मिन्वाक्ये प्राणादिशब्दाः परमात्मैव प्रमितः कुतः कंपनात्
सर्वशब्दवाच्यस्य सवायुकस्य जगतः कंपनात् जीवनादिचेष्टाहेतुत्वादित्यर्थः ॥ ब्रह्मा
ण्यपि प्राणशब्दप्रयोगो बहुलं वेदे दृष्टः ॥ प्राणस्य प्राणमित्यादौ वज्रशब्दोपि भयहेतु
त्वसाम्यादुपपद्यत इत्युक्तं वा कार्यकथनसमये ॥ कंपनहेतुत्वं ब्रह्मणः श्रुत्यंतरे प्रसि

सूत्र॰ दं । न प्राणेन नापानेन मर्त्यो जीवति कश्चन ॥ इतरेण तु जीवंति यस्मिन्नेतावुपाश्रिताविति शारी॰ सू॰ १
१०० इतरेणात्मना ॥ एतौ प्राणापानौ । किंच कंपनवाक्यात्पूर्वमुत्तरत्र च ब्रह्मोक्तेरिहापि ब्रह्म
ग्रहणं न्याय्यं ॥ तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यते ॥ यस्मिंल्लोकाः श्रिताः सर्वे तदु नात्ये
ति कश्चनेति पूर्ववाक्ये ब्रह्मोक्तं शुक्रं ज्योतिष्मत्त्वममृतत्वं कृत्स्नस्योक्तसर्वाधिष्ठानत्वं व्यतिरेकमुखे
नाह । तदु नात्येति किंचन जडं तद्ब्रह्म नात्येति ॥ अतिक्रमेण न वर्त्तत इत्यर्थः ॥ भयोत्तरवाक्ये ॥
भयादस्याग्निस्तपति भयात्तपति सूर्यः ॥ भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचम इति ॥
अस्येश्वरस्य भयादग्न्यादयः । स्वव्यापारे नियमेनानुवर्त्तंते राजाज्ञया भृत्यादिवदिति
वक्ताग्न्याद्यपेक्षया मृत्योः पंचमत्वं यदुक्तं वायुवेदनस्य मोक्षहेतुत्वं श्रुतमिति तन्न ॥ वि १००
शेषसामान्यात्मकस्य व्यष्टिसमष्टिवायोर्ज्ञानादपमृत्युनिवृत्तिमात्रश्रवणात् । तस्मा

दनेन वाक्येन निर्विशेषं ब्रह्मैतेयमिति सिद्धं ॥ ज्योतिर्दर्शनात् ॥ पूर्वं सर्वशब्दश्रुतिसंको
अपुक्तः २ चानुपपत्त्या प्रकरणात्प्राणशब्दं ब्रह्मेत्युक्तं न तथेह संप्रसादवाक्ये प्रकरणानुग्राहकं ।
किंचिदस्तीत्ययेन प्रकरणात् ज्योतिःशब्दं ब्रह्मस्यादित्यत्र तु दाहरणसंगत्यास्यारंभः ॥ पूर्व
पक्षे त्वादित्योपास्त्या क्रममुक्तिः सिद्धांते ब्रह्मज्ञानान्मुक्तिरिति फलभेदः ॥ छांदोग्ये प्र
जापतिविद्यायां श्रूयते ॥ एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वे
न रूपेणाभिनिष्पद्यते स उत्तमः पुरुष इति ॥ एतद्वाक्यं दहराधिकरणेनुसंधेयः ॥ तत्र सं
शयः किं ज्योतिःशब्देन प्रसिद्धसूर्यादितेजोऽभिधीयते उत ब्रह्मेति तत्र सूर्यादीति पूर्वं
प्रसिद्धत्वात् अथ या एता हृदयस्य नाड्य इत्यादिनाडीखंडे अथ यत्रैतस्माच्छरीरादुत्क्रा
मत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते ॥ इति मुमुक्षोरादित्यप्राप्त्यभिधानाद्वापि ज्योति

 रूपसंपद्यते इति श्रवणाच्च ॥ अयमर्थः ॥ विशेषैर्ज्ञानेनोपरमानंतर्यमयज्ञाद्यर्थः ॥ यत्रप्रार
ब्धकर्मावसानकालेन तदुत्क्रमणं यथा भवति तथेति किंमा विशेषणं अस्मदभिमानवि
षयाद्देहादुत्क्रमणं परा करोत्यथ तदा एतैरेवादित्यस्य रश्मिभिरालंबनेनारूढः ॥ सनाक्र
मते ॥ उ परिगच्छति तत्तस्मादित्यं गच्छतीति एवं प्राप्तेऽभिधीयते ॥ ज्योतिरत्र ब्रह्मैव कुतः दर्शनात्
य आत्मा पहतपाप्मेत्युपक्रमपर्यालोचनया ॥ ब्रह्मण एव प्रतिपाद्यत्वात्तदुपरि निर्दर्शनादि
त्यर्थः ॥ यदुक्तं मुमुक्षोरादित्यप्राप्तिरभिहितेति ॥ तत्रास्य निर्गुणब्रह्मप्रकरणत्वात्
नहि निर्गुणब्रह्मविदो गत्युत्क्रांती स्तः ॥ अत्र ब्रह्म समश्नुत इति श्रुतेः ॥ तस्मात्परं ज्योति
र्ब्रह्मैवोपसंपन्नत्वतेन निर्दिश्यत इति सिद्धं ॥ आकाशोर्थांतरत्वादिव्यपदेशात् ॥ सर्व
सुपक्रमवशादर्थांतरे प्रसिद्धोपि ज्योतिः शब्दः स्वार्थस्य त्याग इति तत्तथाकाशोपक्र

मवशाद्ब्रह्मादिशब्दोपिस्वार्थत्यागं याप्यतामिति दृष्टांतसंगत्येदमारभ्यते ॥ सर्वप्रपंचेभूता
काशाभिन्नसर्वाधिष्ठानभूताकाशात्मकब्रह्मण उपास्याक्रममुक्तिः सिद्धेति सर्वाधिष्ठा
नब्रह्मधियासाक्षान्मुक्तिरितिफलभेदः ॥ छांदोग्ये अंते श्रूयते आकाशो ह वै नाम नामरू
पयोर्निर्वहिता ते यदंतरा तद्ब्रह्म तदमृतं स आत्मेति तेनामरूपे यस्माद्ब्रह्मणोऽभिन्ने त
दित्यर्थः ॥ एवं ते नामरूपे यस्य ब्रह्मणोऽन्तरा मध्ये वर्तेते तदित्यर्थः ॥ तत्र किमाकाशशब्द
वाच्यः उत ॥ अर्थांतरत्वादिव्यपदेशात् नेपदं तरोत्याकाशस्य नामरूपाभ्यामर्थांतर
त्वेन व्यपदेशान्न हि नामाद्यंतः पातिन आकाशस्य भूतस्य स्वस्मादर्थांतरत्वमुक्तं आदिश
ब्देन तद्ब्रह्मेत्यादिना ब्रह्मत्वादिव्यपदेशो दृष्टव्यः ॥ तस्मादाकाशः परमात्मा ज्ञेय इति सि
द्धं ॥ सुषुप्त्युत्क्रांत्योर्भेदेन ॥ व्यपदेशादित्यनुवर्तते ॥ सर्वं नामरूपाभ्यां भेदेन व्यपदेशादा

सू३० काशोब्रह्मेत्युक्तं तद्युक्तं । प्राज्ञेनात्मनासंपरिष्वक्त इत्यत्राभिन्नेजीवेभेदोपचारादित्या शारी.सू.
१०२ शंक्य प्राज्ञशब्दस्य ब्रह्मपरतया न भेदस्यौपचारिक इति समाधानात्संगतिः । सर्वपक्षेजी १
वानुवादेन कर्मशेषत्वेन भूतः कर्तुः स्तुतिः फलं सिद्धांते जीवानुवादेन तत्त्वब्रह्मैक्यधी
रिति विवेकः ॥ बृहदारण्यके षष्ठे प्रपाठके कतम आत्मेति योयं विज्ञानमयः प्राणेषु हृ
द्यंतर्ज्योतिः पुरुष इत्युपक्रम्य ॥ सुषुप्त्याद्यवस्थामध्ये उपन्यस्य स वा एष महानज आत्मा
योयं विज्ञानमयः प्राणेषु य एषोंतर्हृदय आकाशस्तस्मिंशेते सर्वस्य वशी सर्वस्येशान
: सर्वस्याधिपतिरित्युपसंहारो दृश्यते तस्यायमर्थः । देहादीनामन्यतमो वा तद्व्यति
रिक्तो वात्मेति जनकस्य प्रश्ने याज्ञवल्क्यस्योत्तरं योयमिति ॥ विज्ञानं बुद्धिस्तन्मयस्त १०२
त्प्रायः ॥ प्राणेषु हृदीति व्यतिरेकार्थे सप्तम्यौ प्राणाद्बुद्धिव्यतिरिक्त इत्यर्थः । बुद्धिर्हृत्ते

र्विविनक्तिरंतरिति ॥ अज्ञानाद्भिनत्ति ज्योतिरिति । पुरुषः पूर्णः योयमेवंभूतः स आत्मे
त्यर्थः । स्वाधीनं सर्वं नियंतुं शक्तिरस्तीति वक्तुं सर्वस्येशान इत्युक्तं । स्वाधीनं स्वनियम्यं च
सर्वमधिष्ठाय पालयतीति वक्तुं सर्वस्याधिपतिरित्युक्तमिति । अत्र संशयः । किमयं वा
समह४ क्यसंदर्भो जीवानुवादक उत तदनुवादेनासंसारिस्वरूपप्रतिपादनपर इति । तत्रावस्था
द्युपन्यासात्संसार्यात्मवाचकशब्दाभावाज्जीवानुवादक इति प्राप्ते ब्रूमः ॥ विज्ञानमय
सुषुप्त्याद्यवस्थापन्नजीवानुवादेन ब्रह्माभेदप्रतिपादनपरोयं वाक्यसंदर्भः । नजी
वस्यावात्६ वानुवादकः । कस्मात् सुषुप्त्युत्क्रांत्योरवस्थयोः शारीराद्भेदेनेश्वरस्य प्राज्ञशब्देन व्यप
देशात् । तथाहि सुषुप्तौ तावद्व्यपदेशो दृश्यते तद्यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं
किंचन वेद नांतरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमि

सू.वृ.०
१०३

तिउक्तो नावपिश्चायं शारीरश्चात्मा प्राज्ञेनात्मनान्वारूढ उत्सर्जन्यातीति शारीराद्भेदेन परमा
त्मानं प्राज्ञशब्देन व्यपदिशति ॥ अन्वारूढोधिष्ठितः । उत्सर्जन्नेदनातः शब्दं कुर्वन्निति याव
त् । ननु भेदव्यपदेशमात्रेणाभेदप्रतिपादनपरोयं संदर्भ इति कथं गम्यत इति चेत् उ
च्यते ॥ ध्यायतीव लेलायतीवेत्यादियं यप्रवृत्तिदर्शनान्नबुद्धौ ध्यायंत्यां स्वयमात्मा ध्याय
तीव ॥ चलंत्यां चलतीव ॥ वस्तुतो न ध्यायति न चलतीत्यर्थः । एवमतऊर्ध्वं विमोक्षायै
व ब्रूहीति पदे प्रश्नः । अनन्वागतस्तेन भवत्यसंगो ह्ययं पुरुष इति पदे पदे प्रतिवचनं च वा
क्यसंदर्भस्याभेदपरत्वं फलयति । अस्यार्थः । अतः कामादिभ्यो विवेकानंतरं मोक्षसाधनीभूत
तसाक्षात्कारायै ब्रूहीति जनकप्रश्नार्थः । तेन जाग्रद्भोगादिनाऽनन्वागतः अस्पृष्टो भवा
तिसंगत्वादिति । पत्यादिशब्देभ्यः । इतश्च जीवस्यासंसारित्वप्रतिपादनपरमिदं वाक्य

शारी.वृ.
१

१०३

जातं । यतोऽस्मिन्वाक्ये पत्यादयः शब्दा असंसारित्वप्रतिपादनपराः संसारित्वप्रतिषेधश्च
परमिदं वाक्यजातं यतोऽध परामृष्टइष्यते ॥ सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिरि
त्यः संसारित्वपराः स न साधुना कर्मणा भूयान्नो एवासाधुना कनीयानित्याद्याः संसा
रित्वप्रतिषेधकाः इति तस्मादसंसारिपरमात्मस्वरूपप्रतिपादनपरोयं वाक्यसंदर्भ इति सि
द्धं ॥ इति श्रीमद्ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां प्रथमाध्यायस्य तृतीयः पादः ॥ ३ ॥ श्री
रामाय नमः । एवं तावत्प्रथमे पादे जिज्ञास्यत्वेन प्रतिज्ञाते ब्रह्मणि जगज्जन्मादिकारणे सम
न्वते समन्वयं वेदान्तानां प्रसाध्य ब्रह्मलक्षणस्य प्रधाने तिव्याप्तिमाशंक्याशब्दत्वेन नि
राकृतमीक्षतेर्नाशब्दमित्यत्र तदनंतरं स्पष्टब्रह्मलिंगानि वाक्यानि ब्रह्मणि समन्विता
नीत्युक्तं द्वितीयतृतीयपादयोरस्पष्टब्रह्मलिंगानि प्रायस उपास्यगानि ज्ञेयगानि च

सूत्र० समन्वितानीत्युक्तं॥ इदानीं तु प्रधानस्याशब्दत्वमसिद्धं कचिच्छाखासु तत्परशब्दानामपि शारी०अ०
१०४ दर्शनादित्याशंक्य तेषामन्यपरत्वप्रतिपादनार्थमयं पाद आरभ्यते ॥ आनुमानिकम १
प्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥ पूर्वस्मिन्पादे ब्रह्मसंदर्भेण ब्र
ह्मैव जगत्कारणं तेन वेदांतप्रतिपाद्यं न प्रधानादीत्युक्तमयुक्तं ब्रह्मवत्प्रधानस्यापि
जगत्कारणत्वेन वेदांतबोध्यतात्तत्कारणत्वपर्वेस्य पर्यायकल्पभेदेन व्यवस्थाना।
दिति। ब्रह्मांगीकारेणाक्षेपादित्याक्षेपसंगतिः सर्वग्रंथेनास्याधिकरणस्य सूत्रकारे
रेवाप्येकशब्दं प्रयुंजानैः सूचिता ॥ अव्यवहिताधिकरणेन तु प्रसिद्धजीवोक्तिभंगेना
प्रसिद्धब्रह्मोक्तिवदप्रसिद्धप्रधानोक्तिरप्येवकाठकवाक्यमस्त्विति दृष्टांतसंगतिः
प्रधानस्याशब्दत्वप्रतिपादनेन ब्रह्मणि वेदांतानां समन्वयदार्ढ्यादस्मिंस्तु सर्वाध्यायसं १०४

गतिरविरोधनयपर्यंतपदविचारत्वात्सर्वेषां नयानामापादं पादसंगतिः ॥ पूर्वपक्षे
ब्रह्मण्येव वेदांतानां समन्वय इति नियमाभावः फलं ॥ सिद्धांते तु तादृशनियम इति विवे
कः ॥ काठकवाक्यं पठ्यते ॥ आत्मानं रथिनं विद्धि शरीरं रथमेव तु ॥ बुद्धिं तु सारथिं विद्धि
मनः प्रग्रहमेव च ॥ इंद्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ॥ आत्मेंद्रियमनोयुक्तं
भोक्तेत्याहुर्मनीषिणः ॥ सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदमिति ॥ अनियतेंद्रिया
देः पुंसः संसारित्वं नियतेंद्रियस्याध्वनः पारं विष्णोः परमं पदमिति श्रावयिष्यता किं
तदध्वनः पारं विष्णोः परमित्याकांक्षायां तेभ्यः प्राग्वेंद्रियादिभ्यः परत्वेन परमात्मानं
विष्णोः पदं दर्शयति ॥ इंद्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः ॥ मनसस्तु परा बुद्धिर्बु
द्धेरात्मा महान्परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः ॥ पुरुषान्न परं किंचित्सा

सू.त्र.० १०५ काष्ठासापरागतिरिति ॥ अस्यार्थः ॥ आत्मनो भोक्तृत्वेन प्राधान्याद्रथित्वं रथस्वा शारी.वृ.० २
मित्वं स्पष्टत्वं शरीरे भोगायतनत्वेन गुणतया रथसमं ॥ विवेकाविवेकवृत्तिभ्यां
बुद्धिरेव शरीरस्थात्मीकारं सुखे दुःखे वाऽपनयतीति सारथिः ॥ मनसा अश्व
रश्मिस्थानीयेन विवेकिनं विषयेभ्य इन्द्रियाणि निगृह्यन्ते तेनैवाविवेकिना ॥ विष
येषु प्रवर्त्यन्ते ॥ तेनोक्तं मनसः प्रग्रहत्वं ॥ इन्द्रियाणि संयतानि मुक्तिद्वारं प्रापयंति
असंयतान्यनर्थसंसारमिति ॥ हयत्वं तेषां ॥ यथाऽश्वो मार्गमाजस्य च गति।
एवमिन्द्रियहयाः स्वार्थमुपरतम्य चलंतीति शरीरादिषु मध्ये शब्दादीनां विषया
णां मार्गत्वं ॥ ननु मार्गे रथिनो स्याद्युपेक्षा ॥ न भोगे विकृपतयास्वभावे नैतद्भोगा
दित्यत आह आत्मेति ॥ आत्मा भोक्तेत्याहुरिति संबंधः तस्याऽसंगस्यायेन्द्रियाऽ १०५

सन्निकर्षे भोगायोगादिन्द्रियमनोयोगो यया भवतीति क्रियाविशेषणेन भोक्तृत्व
माह ॥ इन्द्रियेति ॥ भावे निष्ठा ॥ यद्वा आत्मा देहः ॥ तद्युक्तमात्मानं भोक्तेत्याहुरिति यो
जना ॥ यद्यप्यंतरंगत्वादिन्द्रियाणां ॥ अर्थापेक्षया परत्वं ॥ तथापीन्द्रियाणां ग्रहत्व
मर्थानां शब्दादिनामतिग्रहत्वं श्रुतौ निर्दिष्टमित्यर्थानामेव परत्वं ॥ गृह्णन्ति वशी
कुर्वंति पुरुषपशुमिति ग्रहाः इन्द्रियाणि तेषां विषयाधीनत्वमित्यतिग्रहा विषया
यास्तेनातिग्रहत्वार्थानां प्राधान्यमित्याह इन्द्रियेभ्य इति ॥ सर्वेन्द्रियार्थव्यवहार
स्य मनोमूलत्वात् मनसोऽर्थेभ्यः परत्वं निश्चयात्मकबुद्धिद्वारा विषयोपकुरुपकु
र्वंतीति संशयात्मकमनसो बुद्धेः प्राधान्यं ॥ सर्वं पौरुषितेनोक्तमात्मा सभोक्ता
बुद्धेः परः भोगोकरणत्वात्तस्याः स्वामित्वात् आत्मनो महत्वं ॥ महतः आत्मनः

आत्मनः

सू॰त्र॰ १०६ यदि महतस्यात्मविशेषणत्वेऽआत्मनः परममव्यक्तमिति स्यात् तस्यै विशेषणताशितिब्र शारी॰सू॰ १
षेण तदा महच्छब्देन हिरण्यगर्भबुद्धिरुच्यते ।। तस्याः समष्टिबुद्धिव्यापनादात्मत्वं च ।। एवं।
भूत हिरण्यगर्भबुद्धिं स्मृतिर्दर्शयति ।। मनो महान्मतिर्ब्रह्मा पूर्बुद्धिः ख्यातिरीश्वरः
प्रज्ञा संविच्चितिश्चैव स्मृतिश्च परिपठ्यत इति ।। अयमर्थः ।। सर्वेषां प्रथमं जाता हिरण्यग
र्भबुद्धिपराः ।। तस्या मनस्त्वे संदेहरूपत्वं स्यादित्यत आह मतिरिति महत्त्वमुपपादय
ति ब्रह्मेति ।। भोग्यजातानां धारत्वमाह पूरिति ।। निश्चयात्मकत्वमाह बुद्धिरिति ।। कीर्ति
शक्तिमत्त्वमाह ख्यातिरिति ।। ईश्वरो नियामकः ।। प्रज्ञा लौकिकप्रकृष्टज्ञानं ।। संवि
त् ज्ञानफलं तदुपासकस्य तत्त्वाऽऽत्मेः चितिः चित्प्रधाना ।। स्मृतिः ज्ञातसर्वार्थानुसं
धानशक्तिमती ।। विश्वस्य सिद्धिमकृबुद्धानवतुकृजयपतिपरीति ।। श्रुतिरपि यो ब्रह्मा १०६
स्मृतिर्विधाना २

णं विदधाति पूर्वमित्यादिका हिरण्यगर्भबुद्धौ वेदाविर्भावमीश्वरानुग्रहाद्दर्शयंती तस्या
उत्कृष्टत्वमाह एतन्नादृशा बुद्धिः सर्वासां बुद्धीनां परा उत्कृष्टा ।। अस्मिन् पक्षे पुरुषग्रहणे
नैव तदभिन्नो रथी भोक्ता गृहीतो द्रष्टव्यः ।। आत्मानं रथिनं विद्धीत्यादिकाः निर्दिष्टाः
सर्वे गृहीताः ।। अवशिष्टं रथत्वेन कल्पितं शरीरं अव्यक्ताख्यांऽविद्याकार्यं लक्षणा।
याऽव्यक्तशब्देन निर्दिशति महतः परमव्यक्तमिति ।। एवं वस्तुगत्यर्थः प्रदर्शितः ।। त
त्र संशयः ।। किमव्यक्तशब्देन प्रधानमुच्यते उत सूक्ष्मं शरीरमिति ।। तत्र सांख्यम
तो महदव्यक्तपुरुषशब्दानां तत्त्वत्रयपरत्वसिद्धत्वादव्यक्तं प्रधानमेवेत्याह ।। आनुमा
निकमप्येकेषामिति चेदिति अनुमानगम्यं प्रधानमप्येकेषां शाखिनां अत्र महतः परम
व्यक्तशब्देन पठ्यते ।। इत्यऽशब्दत्वमसिद्धमिति चेदिति सूत्रावयवार्थः ।। परिहरति ने

स॰ऋ॰ १०७ तिकृतः शरीररूपकविन्यस्तगृहीतेः । शरीरस्य सर्वत्राकारेरथरूपेण विन्यस्तकल्पि शारी॰टी॰ १
तस्याव्यक्तशब्देन गृहीतेः । ग्रहणादित्यर्थः । रूपकात्मनाऽरथात्मना विन्यस्तं रूपकवि
न्यस्तं शरीरं च तद्रूपकविन्यस्तं च तत्तथोक्तं तस्य गृहीतेरिति विग्रहः । कथं शरीरप
रोऽव्यक्तशब्दस्तत्राह दर्शयति चेति । पूर्वापरवाक्यसंदर्भः पर्यालोच्यमानोऽन्यन्निर्दि
प्रकांतं ५ नत्वात् तं परिशिष्टं च शरीरमेवाव्यक्तशब्दबोध्यं दर्शयतीत्यर्थः । ननु स्थूलशरीरस्या
व्यक्तशब्दार्हस्य कथमव्यक्तशब्दार्हत्वमित्यत उत्तरं पठति । सूक्ष्मं तु तदर्हत्वात् २ इ
ग्रधितीत्यनुषंगः । तदर्हत्वात् अव्यक्तशब्दार्हत्वादित्यर्थः । गोभिः श्रीणीत मत्सरमि
त्यादिवत् प्रकृतिवाचकशब्देन विकारोऽन्यस्मतद्दिति भावः । गोभिर्गोविकारैः पयो
भिः मत्सरं सोमं श्रीणीत मिश्रितं कुर्यादित्यर्थः । नन्वेतस्मादात्मकाव्यक्तांगीका १०७

रे आगतः प्रधानवादः सांख्योक्तस्यैव प्रधानत्वेनांगीकारादित्यत आह । तदधीनत्वाद
र्थवत् ३ न प्रधानकारणवादो मया कृतः कुतः । तदधीनत्वात् ईश्वराधीनत्वांगीकारा
त् स्वतंत्रं चेतनेनानधिष्ठितमव्यक्तं जगत्कारणमिति सांख्यमतं । सिद्धांते तु ईश्वराधिष्ठितं ।
मायाऽविद्याकाशादिशब्दवाच्यं जगत्कारणमिति महद्वैलक्षण्यं । नन्वीश्वरादेव जगदुत्प
त्तौ अव्यक्ते वैयर्थ्यमित्याशंक्याह अर्थवदिति । प्रयोजनवत्वादित्यर्थः । देवात्मशक्तिं स्वगु
णैर्निगूढां मायां तु प्रकृतिं विद्यादिति श्रुतिसिद्धमीश्वरस्य सहकारिभूतमव्यक्तमव
श्यमंगीकर्तव्यं । नहि शक्तिरहितेश्वरः कार्यलेशं वा कर्तुं समर्थः । अप्रसंगत्वादिति ता
त्पर्यं ॥ नन्वेवमपि कथं शरीरस्य महतः परत्वं कथं वाऽव्यक्तकार्यत्वस्य ज्ञिपादीना
मविशेषे स्थूलशरीरस्यैवाव्यक्तपरार्हत्वमिति चेदुच्यते । महद्वाच्याभीक्ष्णपेक्ष

सूत्र॰ १०८ या हिरण्यगर्भबुद्धेस्तयाऽव्यक्ताख्याविद्यायास्तावत्परत्वं सर्वसिद्धं तदधीनत्वात् भोक्तृ शारी॰ वृ॰
देस्तया च तन्निष्ठपरत्वं तद्विकारे देहे उपचर्यते । इन्द्रियादीनां तत्कार्यत्वाविशेषेऽपि स्व १
स्वशब्दैरेवोपात्तत्वात् परिशेषात् स्वकृताकांक्षाव्यक्तशब्देन स्थूलदेहग्रहणं न्याय्यमिति
आचार्यदेशीयैः सूत्रद्वयमिदमन्यथा व्याख्यातं । शरीरं द्विविधं स्थूलं सूक्ष्मं द्वयमपि स
र्वं वा करणत्वेन गृहीतं । अत्रास्मिन् वाक्ये सूक्ष्ममेवास्य अव्यक्तशब्देन गृहीतं तदर्हत्वा
त्तत्कार्यवत्तदधीनत्वाद्बंधमोक्षव्यवहारस्येति सर्वथाऽपि प्रधानस्यानावकाशः ।
अपि च । ज्ञेयत्वावचनाच्च ॥ ४ ॥ सांख्यैः प्रकृतिपुरुषविवेकान्मोक्ष इति वदद्भिः प्रकृ
तिरपि तदर्थं ज्ञेयत्वेनोक्तं न च ज्ञेयं तेन प्रकृतेरव्यक्तमुच्यते अव्यक्तशब्दमात्रश्रवणा
त् तस्मादपि नाव्यक्तं प्रधानं । वदतीति चेन्न प्राज्ञो हि प्रकरणात् । ५ । अथवाह सांख्यः १०८

ज्ञेयत्वावचनादित्यसंगतं अव्यक्तशब्दवाच्यस्यैवोत्तरत्र ज्ञेयत्ववचनात् अशब्दमस्पर्शा
मरूपमव्ययं तथाऽरसं नित्यमगंधवच्च यत् । अनाद्यनंतं महतः परं ध्रुवं निचाय्य तं मृ
त्युमुखात्प्रमुच्यत इति अशब्दमित्यादिषु प्रत्येकं नित्यमिति संबध्यते ॥ नित्यं सर्वदा ॥
निचाय्य ज्ञात्वा । यादृशं शब्दादिहीनं प्रधानं तादृशमेवेदं वाक्यं ज्ञेयत्वेन वदतीति चेन्न प्रा
ज्ञो हि परमात्मा निचाय्यत्वेन निर्दिष्टः । न प्रधानं कस्मात् प्रकरणात् ॥ पुरुषान्न परं किं
चित् सा काष्ठा सा परा गतिः । एष सर्वेषु भूतेषु गूढात्मा न प्रकाशते ॥ इत्यादिना आत्म
न एव प्रकरणात् ॥ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ किंच ॥ न प्रधानमव्यक्तशब्द
वाच्यं ज्ञेयं वा । यस्मात्त्रयाणामेव अग्निजीवपरमात्मनामेव । एवं स्वर्वरवाक्यपर्यालो
चनया अवकृष्यते नोपन्यासस्तद्विषय एव प्रश्नोऽपि दृश्यते कठवल्लीग्रंथे नान्यस्य । तत्र

सू.न. स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो प्रब्रूहि तं श्रद्दधानाय मह्यमित्यग्निविषयः प्रश्नः। येयं प्रेते शारी.टी.
१०१८ विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष १
स्तृतीय इति जीवप्रश्नः। अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात्कृताकृतात्। अन्यत्र भूता
च्च भव्याच्च यत्तत्पश्यसि तद्वदेति परमात्मप्रश्नः। लोकादिमग्निं तमुवाच तस्मै या इष्टका
यावतीर्वा यथा वेत्यग्निविषयमुत्तरं। हंत त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनं। यथा च मर
णं प्राप्यात्मा भवति गौतम। योनिमन्ये प्रपद्यंते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसं
यंति यथा कर्म यथा श्रुतमिति जीवस्योत्तरं। न जायते म्रियते वा विपश्चिदित्यादि परमा
त्मनः प्रतिवचनं। न ह्येवं प्रधानस्य प्रश्नोत्तरे दृश्यते। यत्राव्यक्तशब्दवाच्यत्वं ज्ञेयत्वं वा
स्यात्। श्रुत्यर्थस्तु हे मृत्यो सः मदर्थं दत्तवरस्त्वं स्वर्ग्यं स्वर्गहेतुमग्निं स्वध्येषि सदास्म १०१८

रसि तेन त्वं तेन तद्विषयां विद्यां वदेत्यर्थः। जीवपरमात्मप्रश्नौ पूर्वं व्याख्यातौ। लोकादि
लोकहेतुं विराड्दृष्ट्योपास्यत्वाल्लोकादित्वमग्निमुक्तवान्नचिकेतसे। याः स्वरूपतो या
दृशीर्यावतीः संख्यातः। यथा वाग्निश्चीयते तत्सर्वमुवाचेति संबंधः। हंत त इदानीं गु
ह्यं गोप्यं चिरंतनं ब्रह्म प्रवक्ष्यामीत्युपक्रम्य जीवमपि ब्रवीति। यथेति आत्मा जीवो मर
णं प्राप्य यथा भवति तथा वक्ष्यामीति योजना। कथं भवतीत्यत आह योनिमिति। मृता
नां पुनर्विचित्रजन्मसंपत्तौ निमित्तमाह यथेति। यद्यप्यस्मिन् कठवल्लीग्रंथे जीवपरमा
त्मनोः पृथक् प्रश्नो नास्ति। वरान् वृणीष्वेति मृत्युना प्रेरितेन नचिकेतसा पितुः सौमन
स्याग्निविद्यात्मविद्यात्मकवरत्रयमेव पृष्टमिति वराणामेष वरस्तृतीय इति लिंगा
न्निश्चितत्वात्तथापि जीवपरयोः कल्पितभेदापेक्षया त्रयाणामित्युक्तं सूत्रकारैः। वस्तु

सटी० तत्तु येयं प्रेत इत्यादिना दृष्टस्यैवात्मनोऽन्यत्र धर्मादित्यादिना धर्मविशेषपुरस्कारेणानुक्ता। शा·भा·टी·
११० षैरित्येक एव ब्रह्मात्मनः भेदस्य च कल्पितत्वं वाक्यपर्यालोचनयाऽवगतं ॥ तथा हि यदेवेह तदमु १
त्र यदमुत्र तदन्विह । मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीति जीवब्रह्मभेददृष्टिमपव
दति ॥ इह देहे यच्चैतन्यं तदेवामुत्रादित्यादावसंसारि ब्रह्म । यच्चामुत्र तदेवेह देहे तु प्रविष्ट
मित्यन्योन्यैक्यमित्यर्थः ॥ भेदं दूषयितुं भेदे निंदति मृत्योरिति ॥ यः कश्चिन्मूढ इह ब्रह्मा
त्मनि नानेव मिथ्याभेदं पश्यति वस्तुतोऽहं भिन्न इति स मरणान्मरणं पुनः पुनः प्राप्नोति
न सुखभागित्यर्थः । तथा जीवब्रह्मानंतरं । अनंत्यं वरं नचिकेतोऽवृणीथा इत्यारभ्य महत्सु नाते
स्तैः कामैः प्रलोभ्यमानोऽपि नचिकेता यदा न च चालितः तदैनं मुमुक्षुत्वेन ताविद्याभीप्सितं नचि
केतसं मन्ये न त्वा कामा बहवो लोलुपंतेति प्रशंस्य ब्रह्ममपि तदीयं प्रश्नांस्मते भगवान । ११०

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो ह
र्षशोकौ जहातीति । तेनापि जीवब्रह्मणोरभेद एवेत्यवगम्यते ॥ यत्तु भयोर्भेदः । तदा जीवब्रह्मा
नंतरं प्रशंसा विकल्पैव स्यात् । अन्यथा तु । ना त्वा बहवो कामा न त्वा लोलुपंत श्रेयो विद्वेदं न ह्नत
वंतः । ततो विद्याभीप्सिनं त्वां मन्येऽहमिति । जीवब्रह्मस्य परमात्मवाक्येनोत्तरमाह तं दुर्दर्शमि
ति । न ह्यत्र भेदमिथ्यात्वे निर्वाहः । यतो जीवब्रह्मैव परमात्मानं प्रतिपादयति उभयोर्भेदेना
त्विकेऽनन्तत्वप्रश्नापो भवेदित्येवमादीमित्यादौ वेदमिथ्यात्वबोधानि ॥ महत्स्व ॥ किंच य ।
या बुद्धेरात्मा महान् परः । वेदाहमेतं पुरुषं महांतमित्यादौ वेदेषु तो महच्छब्दो बुद्ध्याख्या
द्वितीयतत्ववाचीनांगीक्रियते सांख्यैः । तथा वैदिकः अव्यक्तशब्दोऽनाप्रकृतं प्रधानवाची
तस्मान्महत्तः शरीरपरमेवाव्यक्तमित्यन्नाहृत्वं प्रधानस्येति सिद्धं । तमसत्वदविशेषात् ।

सू॰त्र॰ पूर्वमव्यक्तशब्दमात्रप्रत्यभिज्ञानेन प्रधानस्यार्थतोऽप्रत्यभिज्ञानादव्यक्तपदावाच्यत्वेपि शा॰टी॰
१११ त्रिगुणत्वादिनाऽजामंत्रेऽर्थतः प्रत्यभिज्ञानादजापदं प्रधानपरमस्त्विति प्रत्युदाहरण १
संगत्यास्यारंभः॥ अध्यायपादसंगतिफलानि पूर्ववद्बोध्यानि॥ श्वेताश्वतरोपनिष
दि श्रूयते॥ अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जु
षमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य इति। तत्र संशयः। किमजाशब्देन प्रधानमुच्य
ते उत तेजोबन्नात्मिका छांदोग्ये सिद्धावांतरप्रकृतिरिति॥ तत्र न जायत इत्यजा सांख्यसि
द्धा प्रकृतिरेव सत्वरजस्तमोगुणात्मकत्वाल्लोहितशुक्लकृष्णा च भवति किंच एकोजपु
रुषोजुषमाणः सेवमानः कार्यकरणसंघाताभिमानीति यावत्। स तामनुशेते तामजां १११
भ्रमेणात्मत्वेनावगम्य तत्कार्यबुद्धिविशिष्टसुखदुःखादिकमनुभवति। अहं सुखी दुःखी

ति अन्यस्तु विवेकी भुक्तभोगी कृतभोगविवेकी ज्ञानी जहाति त्यक्त्वा मुच्यत इति जीवभेद
प्रतिपादनादजा प्रधानमिति नाशब्दं प्रधानमिति प्राप्ते ब्रूमः। न प्रधानस्यासाधारण्येना
त्र ज्ञापकमस्ति न जायत इत्यजेत्यन्यत्रापि योजयितुं शक्यत्वाल्लोहितादिशब्दस्य रूप
विशेषेषु रूढाः। न रजआदौ यथाकथंचिन्नयनमन्यत्रापि तुल्यं। साधारणशब्दादिदमेत
त्पदवाच्यमिति निर्धारणाभावे दृष्टांतः चमसवदिति यथा अर्वाग्बिलश्चमस ऊर्ध्वबुध्न इत्य
स्मिन्मंत्रे अयं चमस इत्यवधारणं न संभवति कथंचिदर्वाग्बिलत्वादेरन्यत्राप्यवि
शेषात्। एवमजामंत्रेप्यजात्वादेरविशेषान्न प्रधाननिर्णय इति अशब्दं प्रधानमित्यर्थः
न तु इदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति वाक्यशेषाच्छिरश्चमस इति निर्णयो
भवति। इह त्वजामंत्रे केयमजा प्रतिपत्तव्येत्याशंक्य सजातीयश्रुत्यंतरात्तेजोबन्न

द्वारणाऽजामिति पञ्चत्वोऽस्मत्पद्यवाच्यमिति न्यायेनाह ॥ ज्योतिरुपक्रमा तु तथा ह्यधी
यत एके ॥ ज्योतिस्तेज उपक्रमेऽस्या इति यस्यास्तेजोबन्नलक्षणायाः सा ज्योतिरुपक्रमा
तु रवधारणे सैवेहाजा निर्धारिता न प्रधानं कस्मात्तथा ह्यधीयत एके ॥ हि यस्मा
देके शाखिनस्तेजोबन्नात्मिकां प्राभौतिकार्यप्रकृतेस्तथाजो हितादिरूपतामधी
यते ऽत्रामनन्ति ॥ यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्येति ॥ त
याच्चाजो हितादि शब्दसामान्यात्तान्येव तेजोबन्नानीह प्रत्यभिज्ञाप्यन्ते यद्यप्यत्रैवश्वे
ताश्वतरोपनिषदि सर्वोपरपर्यालोचनया मनिर्वाच्यमायाया जगत्कारणत्वप्र
तीतेस्तस्याश्चाजाशब्देन ग्रहणं तथापि हि किं कारणं ब्रह्मेत्युपक्रम्य ते ध्यानयोगा
नुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढामिति वाक्योपक्रमे ईश्वरशक्तेर्मा

यारव्याया जगद्धेतुत्वं गम्यते ॥ वाक्यशेषेऽपि मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमि
ति ॥ यो योनिं योनिमधितिष्ठत्येक इति च तस्या एवावगतिः न स्वतन्त्रप्रधानस्येति सूत्रा
र्थस्तु ब्रह्मणः स्वहृत्वा च जगद्धेतुत्वमिति श्रुतिः ब्रह्मवादिनः प्रतिशंकन्ते किं कारणमिति
पत्नु जगत्कारणं न किं ब्रह्मवान्यदेवेत्यर्थः ॥ यद्वा जगदुत्पत्तौ किमुपकरणवद्ब्रह्मेत्यर्थः ते
दृष्टा ब्रह्मवादिनो नयावन्त्या विमृश्य ध्यानाख्येन योगेनानुगताः परमात्मानमनुप्रवि
ष्टाः सन्तस्तस्यैव देवस्यात्मभूतामेकां नाभ्यस्तां ॥ मायाशक्तिं गुणत्रयवतीं त्रिगुणास्य जग
तो निर्माणे सहकारिणीमपश्यन् निनियोजना ॥ प्रधाने मायाशब्दं वारयन्ति ॥ मायिनमिति
च विद्याशक्तियोनिस्तस्या एकत्वेऽपि कार्यभेदेन भेदादीप्स ॥ तदुक्तं सुरेश्वराचार्यैः ॥ सत
त्वेऽविद्या ते दोषमनागपि न विद्यत इति अधितिष्ठति प्रेरयति न हि परमतेईश्वरस्य तद

स.त्रं० ११३ धिष्ठानात्त्वंसंमतमितिरहस्यं। ननुअजाशब्दोनतावत्तेजोबन्नात्मिकायांप्रकृतौरूढः। छागव शारी.सू. १
त्तजातजात्याधारत्वाभावात्नापियौगिकः। जनिमत्वात्तेजोबन्नानामित्युक्तमधस्तात्। कल्प
नोपदेशाच्चमध्वादिवदविरोधः। नचशब्दःशंकानिवृत्त्यर्थः। तेजोबन्नात्मिकायांप्रकृतौना
जाशब्दस्यानुपपत्तिः। कुतःकल्पनोपदेशात्। यथालोकेप्रसिद्धामनंभुक्तभोगमेकोज
स्तजतिन्नन्यस्तामनुवर्त्ततेएवंत्यागभोगयोःकार्यकरणसंघाताद्युपादानभूतायास्ते
जोबन्नात्मिकायाःप्रकृतेःसाम्यद्योतनार्थकल्पनयाजात्वस्योपदेशात्। यथामधुमि।
त्रस्यादित्यस्यन्नसौवाबस्यादित्योदेवमध्वितिमधुत्वोपदेशोयथावाधेनुभिन्नायावाचो
धेनुत्वोपदेशएवमजाभिन्नायाःप्रकृतेरजात्वोपदेशेनकश्चिद्विरोधः। यदुक्तंजीवभेदो
स्मिन्मंत्रेप्रतिपाद्यतइतितत्रलोकसिद्धभेदानुवादेनबंधमोक्षव्यवस्थापरत्वादस्य ११३
न्नजोह्येको २।

मंत्रस्य। एकोदेवःसर्वभूतेषुगूढइत्यादिनात्मैकत्वागमात्तस्मान्नाजाप्रधानस्यावकाश
इत्यजाशब्दंप्रधानमितिसिद्धं॥ नसंख्योपसंग्रहादपिनानाभावादतिरेकाच्च॥ एवंमाद्या
त्मिकाधिकारेप्रसिद्धत्यागग्रहणप्रयोगादजातेजबन्नादिकेत्युक्तंतथायस्मिन्पंचपंचज।
नाआकाशश्चप्रतिष्ठितइतिमंत्रेपंचजनशब्देनप्रसिद्धमनुष्यग्रहणायोगादवयववृ।
त्त्यासांख्याभिमतपंचविंशतितत्वानांग्रहणमस्तितिदृष्टांतसंगत्यास्यारंभःफलंपूर्वव
दृष्टव्यंबृहदारण्यकेषष्ठाध्यायेश्रूयतेतद्देवाज्योतिषांज्योतिरायुर्होपासतेऽमृतमित्यनं
तरंयस्मिन्पंचपंचजनाआकाशश्चप्रतिष्ठितः। तमेवमन्यआत्मानंविद्वान्ब्रह्मामृतोमृ।
तं। प्राणस्यप्राणमुतचक्षुषश्चक्षुरुतश्रोत्रस्यश्रोत्रंमनसोयेमनोविदुः। तेनिचिक्युर्ब्र
ह्मपुराणमग्र्यमितिपरमार्थतोस्यार्थः। ज्योतिषांसूर्यादीनांज्योतिर्भासकंतद्ब्रह्मदेवा

उपासतेऽस्रायु॥ ह्येनाममृतत्वेन च तेनोपासनेनायुष्मंतो जाता इति सर्ववाक्यार्थः॥ सूर्यादि
ज्योतिरेकं सर्वैः किं प्राणस्य प्राणमित्यादिवाक्यशेषगताश्चत्वारः प्राणादयश्चेति मिलित्वा
पंचजनाः पंच पंचजनशब्दोऽवयवार्थमनपेक्ष्य पुरुषमात्रं वक्ति नो केवलं तएवसुः पुमांसः
पंचजना इत्यमरो जगाद॥ प्रकृते च पुरुषग्रहणे वाक्यस्य निस्तात्पर्यतापत्त्या तत्संबंधिप्राणा
दयो गृह्यंते॥ पंचजनशब्देनैते कतीत्याकांक्षायां पंचेति संख्यासंग्रहणं तथा च पंच पंचजना आ
काशश्चाविद्याख्यो यस्मिन् प्रतिष्ठितः तमेव निष्प्रपंचब्रह्मात्मकममृतमात्मानं मन्य इति
मंत्रदृग्याज्ञवल्क्योक्तेर्जनकः॥ न ब्रह्मवह्रिरेवत्वं किं विद्वांस्त्वं तथादन्यो मर्त्य इति नेत्या
ह॥ विद्वानमृत इति मैवं ब्रह्मास्मीति शेषः॥ अविद्यया कल्पितं मर्त्यत्वमिति भावः॥ प्राणा
दीनां जीवनादिप्रदत्वं पदज्ञस्य ये विदुस्तेन तस्य स्वरूपं पुराणं चिरंतनं अग्रे कार्यदशाया।

घ्राणरसनचक्षुःश्रोत्रत्वक्सु यथा कर्मेंद्रियप्राणस्तेषां धारणं ज्ञानं क्रियत्वं तद्वत्॥ गृह
मप्यनुभूते न भवमग्निर्यं ब्रह्माणि विदुर्निश्चयेन ज्ञातवंत इति॥ तत्र पंचजनशब्देन मूल
प्रकृत्यादीनि पंचविंशतितत्त्वानुच्यंते ततो वाक्यशेषगताः प्राणादय इति संख्यापेततानीति
प्राप्तं तथा हि मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त॥ षोडशकस्तु विका
रो न प्रकृतिर्न विकृतिः पुरुष इति संगृहीतानि पंचविंशतितत्त्वानि वर्त्तंते पंच पंचजना इति
पंचानां जनानामादिम पंचपदेन पंचत्वोक्तौ पंचविंशतिर्जनाः संपद्यंते॥ ते जनाः कतीत्या
कांक्षायां संख्यास्मृतिसंगृहीतानि पंचविंशतितत्त्वानि बंसघ्यत इति नाऽशंक्य प्रधानमिति
स्मृत्यर्थस्तु मूलप्रकृतिः प्रधानमविकृतिरनादित्वात् महदहंकारौ पंचभूतानि सूक्ष्मा।
णि पंचतन्मात्रसंज्ञानि च सप्त महदाद्याः प्रकृतयो विकृतयश्च तत्त्वांतरोपादानत्वे प्रकृ
तित्वं अस्ति हि महतो बुध्याख्यस्याहंकारं तत्त्वं प्रत्युपादानत्वं प्रधानापेक्ष्या विकृतित्वं।

यद्यपि पृथिव्यादीनां विकृतित्ववत् घटाद्यपेक्षया प्रकृतित्वमप्युक्तं तथापि घटादिकं न तत्त्वांतरं
भवतीति ॥ हेतोः पृथिव्यादीनां विकृतिमात्रोपन्यासः ३३॥
स्त्र० ११५ एवं सत्यपि यया विकृतित्वं महदहंकारादीनां हि षण्णां प्रकृतित्वं चाहंकारस्य पंचतन्मात्राणामेका- शारी० भा० १
दशेंद्रियाणां चोपादानत्वात् पंचतन्मात्राणां चाकाशादिमहाभूतप्रकृतित्वं षोडशकस्य
षोडशसंख्यावच्छिन्नस्यैकादशेंद्रियपंचमहाभूतसमुदायरूपस्य विकारत्वमेवेन प्रकृति-
त्वं ॥ पुरुषस्तु कूटस्थ इति स्वत्राभिधीयते ॥ अस्मिन्मंत्रे श्रूयमाणया पंचविंशतिसंख्या
यास्मृतिप्रसिद्धानां पंचविंशतितत्वानामुपसंग्रहात् प्रधानस्य शब्दवत्त्वमित्यपि न कुतः
नानाभावात् ॥ अस्मिन्मंत्रे ॥ सैवं नाम्ना ॥ आकाशशब्देन । चात्माकाशयोः पृथक् श्रूय-
माणत्वात्तौ विहाय गुणत्रयो महदादयो द्वाविंशतिः सन्त्य पंचविंशतिसंख्या पाव-
क्लृप्ताः तथा षंच पंचानां पंचकानामेकपंचकपर्याप्तान्यपंचकव्यावृत्तधर्मवत्तोऽ-
भावेन नानाभावात् पंचपंचजना इत्यनेन ॥ पंचानां पंचकानां ग्रहणमिति प्रतिपादनम- ११५
सर्वादिवाचकयस्मान्निति शा ॥ ३.४ ॥ ग्रहणाभावेन ॥ ३.२॥

शक्य समर्थनं ॥ लोके हि गोपंचकं ब्राह्मणपंचकं चेति पंचकद्वयं वक्तुमुचितं एकपंचकप-
र्याप्तान्यपंचकव्यावृत्तगोत्वादिधर्मवत्त्वादित्यर्थः । नानात्वेपि कथं चित्पंचविंशतिसंख्या
प्रतिपादकत्वांगीकारे बाधकांतरमाह अतिरेकाच्चेति ॥ नह्यस्मिन्मंत्रे पंचविंशतिसंख्ये-
व श्रूयते किंत्वतिरिक्तात्माकाशावपि श्रूयते । तथा च नयोः पंचविंशतितत्वातिरिक्तत्वा-
त्सप्तविंशतितत्वप्रसंगादपसिद्धांतापातः । न च गुणत्रितयविवक्षया पंचविंशतिसंख्याप्-
रणान्न तत्त्वातिरेक इति वाच्यं ॥ तथा सत्यात्माकाशयोः पृथक्कथनवैयर्थ्यात् कथं चि-
द्योगपजातापेक्षयात्मनः पृथक्त्वेन कथनस्य सार्थकत्वेपि आकाशस्य पृथक्कथनं ।
निष्फलमेवेति भावः । वस्तुतो न पंचविंशतिसंख्याप्रतीतिरेव नास्तीत्यभिप्रायेण सूचय-
ति ॥ पंचजनशब्दे समेकत्वेन योगमननये द्रष्टपुरुषेषु रूढत्वात् ॥ नि कतीत्याकांक्षायां पंच

सू॰ ११६ त्वसंख्यानुयायात्तत्संख्यया पंचजना इत्युपपद्यमेदांगीकारे प्रधानजनात्मातिरिक्ततेना शारी॰सू॰ १
न्तित्वस्य पंचत्वस्याद्यपंचत्वेनानन्वयायोगो बाधकः। गुणयोः परस्परानन्वयादर्शनादु।
भयोः पंचतयोः प्रधानजनान्वयसंभवेपि जनेषु दशात्वसंख्याप्रतीतिरेव न पंचविंश
तिसंख्याप्रतीतिरिति न शास्त्रवस्थानं। ननु ते पंचत संख्याकाः पंचजनाः क इति स्वरू
पप्रश्नस्योत्तरमाह। प्राणादयो वाक्यशेषात्। माध्यंदिनशाखायां पंचजनमंत्रानंतरमं
त्रे प्राणचक्षुःश्रोत्रान्नमनांसि श्रूयमाणानि पंचजनशब्देनोच्यंते। कस्मात् वाक्यशे
षात् प्राणस्य प्राणमुत चक्षुषश्चक्षुरुत श्रोत्रस्य श्रोत्रमुतान्नस्यान्नं मनसो ये मनो वि
दुरिति वाक्यशेषात् तेस्य ताहित्यर्थः। अन्नं विराट्। प्राणचक्षुःश्रोत्रमनांसि सूत्रं तयोः
करणमव्याकृताकाशः। ननु माध्यंदिनानां प्राणादिषु त्वसामान्नादन्नत्वपंचसंख्याका ११६

ण्वानां तु कण्वानां कथं पंचसंख्येत्यत आह। ज्योतिषैकेषामसत्यन्ने। एकेषां काण्वाना।
मसत्यन्ने नष्टेवा ज्योतिषां ज्योतिरायुर्होपासतेमृतमिति पूर्ववाक्यस्थज्योतिषा पंचत्वं पूर
णीयमित्यर्थः। तस्माच्छ्रुतं प्रधानमिति सिद्धं। कारणत्वेन चाकाशादिषु यथाव्यपदि
ष्टोक्तेः। पूर्वाधिकरणद्वयेन प्रधानस्याशब्दत्वप्रतिपादनेन जगत्कारणत्वलक्षणं
ब्रह्मण्येवेति नातिव्याप्तमित्युक्तं। कारणविषयाणां वेदांतानां ब्रह्मणि समन्वय उ
क्तः स न संभवति तेषां वेदांतानां परस्परविरुद्धार्थप्रतिपादकत्वेन स्वतो निश्चायक
त्वाभावात् अनुमानसिद्धप्रधानपरत्वे कर्त्तव्ये उक्तसमन्वयासिद्धेरिति आशंकानिरासार्थमिद
मारभ्यते तेन चाविरोधार्थमधिकरणं नेह संगतमिति वाच्यं समन्वयतो नाकार्यत्वाने
स्मृत्यादिमानांतरविरोधाशंकानिरासस्याविरोधाध्यायार्थत्वादिह तु कारणवि

स.त्र.० ११७ षयवाक्यानामेव मिथोविरोधात् न समन्वयो ब्रह्मणीत्याशंकातन्निरासेनैव समन्वयस आरी.ह. १
साध्यताऽध्यायसंगतिसिद्धेः। असत्वस्य बाह्यत्वमुपेत्याऽसत्पक्षनिराकरणेन समम
न्वयस्यापन्यायादसंगतिर्बोध्या। पूर्वं पंचत्वसंख्याग्रहणमन्नेन ज्योतिषा वेति वि
कल्पस्याऽविरोधेऽपि प्रकृते सिद्धे कारणात्मकवस्तुनि विकल्पायोगात् विरोधे सत्यऽ
प्रामाण्यं वाक्यानामिति तन्निरासाय प्रधानस्य कारणत्वमिति प्रत्युदाहरणं लक्ष
णावांतरसंगतिः। पूर्वोत्तरपक्षयोः समन्वयासिद्धितत्सिद्धिः फलमिति विवेकः। अत्र ज
गत्कारणवादिवाक्यानि ब्रह्मणि मानं न वेति विषयो नेति प्राप्तं। कस्मात् परस्परविरोध
दर्शनात् तथा हि क्वचिदात्मन आकाशः संभूत इत्याकाशादिका सृष्टिः श्रूयते क्वचि ११७
त्तत्तेजोऽसृजतेति तेजआदिका क्वचित्तु स प्राणमसृजतेति प्राणादिका क्वचिदक्रमेव

सृष्टिः श्रूयते स इमांल्लोकानसृजत अंभो मरीचीर्मरमापः इति स ईक्षिता परमात्मा लोका
नेवाहश्चमनइत्यिश्चमयशरीरप्रचुरः स्वलेकिंभः शाशार्थः। रश्मिप्रधानोंतरस्थितलोको मरी
चिः। मरमरणप्रधानो यंल्लोको मरः अपबहुलः पाताललोक इति विवेकः। एवं सृष्टौ वि
विरोधे ५ गानेन कारणत्वलक्षितब्रह्मणि विगानं। साक्षादपि जगत्कारणे विगानं रूपतो। असदा इ ६
दमग्र आसीत् ततो वै सदजायतेत्यसतः कारणत्वं क्वचिदवगम्यते। एवमसदेवेदमग्र
आसीन्नन्यदासीन्तत्समभवदिति वस्तुतोयमर्थः। इदं जगदग्रे प्रागवस्थायां असदिवाव्य
क्तमासीत् ततोऽनभिव्यक्तनामरूपादव्यक्तात् कारणात् अभिव्यक्तनामरूपं जगज्जातं।
अव्यक्तमेव व्यक्तं भवतीति यावत्। तत्कारणं यदात्मना समभवत् तत्सदर्थक्रियोन्मु
खमासीदिति क्वचित्तु तद्धैक आहुरसदेवेदमग्र आसीदित्यसद्वादमुपन्यस्य कथमसतः

सूत्र० ११८ सज्जायतेतितन्निरस्यसतःकारणत्वमाह सदेवसोम्येदमग्रआसीदितिकश्चित्संकर्तृकैव ब्र०शां०टी० १
सृष्टिःसूयतेतद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेवव्याक्रियतेति॥तदिदंजगत्तर्हित।
दाप्रागवस्थायामव्याकृतंकारणमासीत्तत्कस्मिंश्चिदात्मनार्थात्मनाचव्याक्रियतव्यक्त
मभवदित्यर्थः।एवंपरस्परविरोधान्नब्रह्मणिसमन्वयोवाक्यानांकिंतुमानादितिप्र
धानजत्वकत्वमितिप्राप्तेब्रूमः।कार्यविषयंविगानमक्रमादिप्रयुक्तं॥नवियदश्रुतेरित्या
सूत्रकारः६ दिनापरिहरिष्यत्याचार्यः।अत्रतुकारणविगानंपरिहरतिच्छावस्तुराद्समानार्थकः॥
शंकानिरासंवक्तिब्रह्मणःकारणत्वेविरोधोनास्तिकुतःयथाव्यपदिष्टोक्तेः।आकाशादिषुय
थाभूतईश्वरःकारणत्वेनव्यपदिष्टएकस्मिन्वेदांतेतथाभूतस्यैवापरवेदांतेपिउक्तेरित्यर्थः।न
चक्वचिदसतःक्वचित्सतःक्वचित्स्वभावादुत्पत्तिश्रवणाद्विरोधइतिवाच्यमित्याहसूत्रकारः ११९

समाकर्षात्॥असन्नेवसभवतिअसद्ब्रह्मेतिवेदचेदिति।असद्वादमपोह्यअस्तिब्रह्मेति
चेद्वेदेतिसदात्मानंनिर्धार्यसोकामयतेति॥सतःसकाशात्सृष्टिमुक्त्वातत्सत्यमित्याचक्षते
इतिसदात्मानमुपसंहृत्यतदप्येषश्लोकोभवतीतिप्रकृतेसदात्मनिश्लोकमुदाहरति।
असद्वाइदमग्रआसीदितितथाचासच्छब्देनसतएवसमाकर्षात्।नासतःकारणत्वशं
केत्यर्थः॥यद्यस्मिंल्लोकेनिरात्मकमसदुच्येत॥तदान्यसमाकर्षणेनान्यस्योदाहर
णत्वकृतासंबंधःश्लोकस्यापद्येत॥एवमग्रआसीदित्यत्रापितस्यदासीदितिसमाक।
र्षादनभिव्यक्तनामरूपमसद्ब्रह्मैव॥एवंतद्धेदंतर्ह्यव्याकृतमासीत्तन्नामरूपाभ्या।
मेवव्याक्रियतेऽत्रापिसएषइहप्रविष्टआनखाग्रेभ्यइतिप्रकृतपरामर्शिना।सइत्य
नेनात्मनःसमाकर्षणात्स्वभावादेवजगदुत्पत्तिर्व्याक्रियतेतिकर्मणएवकर्तृत्वबोधक

त्कारो ल्युच्यते केवलः स्वयमेवेति वत्सत्वपि इत्यकर्त्तृत्वेन विरुध्यते ।। यद्वा कर्मणैवापंच
कारो गम्यते ग्रामस्त्यादिवद्द्रष्टव्यः ।। एवं ब्रह्मणः कारणत्वे । न कस्यचिद्विरोधः । नापि सृष्टि
विरोधात् तत्कारणे ब्रह्मणि विरोधः । सृष्टिवाक्यानां निष्प्रपंचब्रह्मपरत्वेन सृष्टौ तात्पर्या
भावात् ।। श्रुतिरपि । निष्फलसृष्टेः फलवद्ब्रह्मप्रतिपत्त्यर्थत्वं दर्शयति ।। अन्नेन सोम्य ।
शुंगेनापो मूलमन्विछाद्भिः सोम्य शुंगेन तेजोमूलसृष्टेः फलवद्ब्रह्मप्रतिपत्त्यर्थत्वं द
र्शयति । अन्नेन सोम्य शुंगेनापो मूलमन्विछाद्भिः सोम्य शुंगेन तेजो मूलमन्विछ तेज
सा सोम्य शुंगेन सन्मूलमन्विछेति ।। शुंगं कार्यं सन्मूलं ब्रह्म तस्मान्न केनापि विगानमि
ति जगत्कारणवाक्यानां ब्रह्मणि समन्वयः सिद्धः ।। जगद्वाचित्वात् ।। एवं हि गार्ग्याख्यऋ
षिणा बालाकिनाजातशत्रुनामकस्य राज्ञः संवादः श्रूयते ।। कौषीतकिब्राह्मणे ।।

बालाकिरजातशत्रुणा ब्रह्मज्ञेन ब्रह्मणि संवदितुं ब्रह्मनेब्रवाणी सुपक्रम्यादित्यादि
पुरुषान्जीवान्तुक्त्वा तूष्णीं बभूव ।। तमजातशत्रुर्मृषावादिनयापोद्य ।। शिष्यभूताय गा
र्ग्याय ब्रह्मोपदेशार्थमिदमाह । यो वै बालाके एतेषां पुरुषाणां कर्त्ता यस्य वैतत्कर्म स वै
वेदितव्य इति । अस्यार्थः ।। हे बालाके त्वया ये पुरुषा आदित्यादिगता ब्रह्मत्वेनोक्तास्तेषां
पुरुषाणां कर्त्ता न केवलं तेन गदेकदेशपुरुषकर्त्ता अपि सर्वस्यैव जगत इत्याह । यस्येति ।
कर्म पदं जगद्वाचि ।। एवं सामान्यविशेषाभ्यां जगत्कर्त्ता ततो निकृष्टो ज्ञेय इत्याह सइति एव
मस्य संगतिः । इदं तत्कृष्टात् देकवाक्यत्वाऽसकृष्टोनीतः ।। इह बालाकिवाक्यस्य ब्रह्मशा ।
द्वारऽजातशत्रुवाक्यकर्मशब्दो न शक्यते न दंतुयुगेन यानेतुं वाक्यभेदादिति प्रत्यु ।
दाहरणं । यद्वा वाक्यभेदेपि यथोत्तरसकृष्टात् प्राचीनाऽसकृष्टोनीतस्तथोत्तरकर्मश

स्त्र॰ ११० शान्तदनुगुणतयाब्रह्मण्यब्रह्मन्वयनमिति पूर्वोक्तसंगतिः ॥ उक्तवाक्यसमन्वयाऽसिद्धिरस्ति। शारी॰ वृ॰ १
लिंगादिः पूर्वोत्तरपक्षयोः फलं बोध्यं ॥ एवं स्थिते संशयः । किमत्र पुरुषः कर्ता वेदितव्यः प्रा
णो जीवः उताहोस्वित् परमात्मेति ॥ प्राण इति तावत्प्राप्तं ॥ कुतः यस्य वैतत्कर्मेति च
लनात्मकस्य कर्मणो वाय्वात्मक प्राणस्यैव संभवात् वाक्यशेषे चाथास्मिन्प्राण एवैक
धा भवतीति प्राणश्रवणात् ॥ जीवो वा तल्लिंगस्यापि वाक्यशेषे दर्शनात् । तद्य।
थाश्रेष्ठी स्वैर्भुंक्ते यथा वा स्वाः श्रेष्ठिनं भुंजन्त्येवमेवैष प्रज्ञात्मैतैरात्मभिर्भुंक्ते एवमेवै
त आत्मानं भुंजन्तीति ॥ अयमर्थः । श्रेष्ठी प्रधानः पुरुषः स्वैर्भृत्यैरुपकरणैर्भुंक्ते भृ।
त्याश्च श्रेष्ठिनमाच्छादनादिना प्रधानमुपजीवन्ति ॥ एवं जीवोऽप्यादित्यादिभिः प्रका
शादिना भोगोपकरणैर्भुंक्ते । भृत्यवदादित्यादयोऽपि देवा जीवं हविर्ग्रहणादुपा। ११०

जीवंतीति प्राणभृत्त्वाज्जीवस्यैव भोग उपपन्नः तस्माज्जीवमुख्यप्राणयोरन्यतरसमन्वितमि
दं वाक्यमिति प्राप्ते ब्रूमः । अत्र वेदितव्यः पुरुषाणां कर्ता परमात्मैव तथा हि ब्रह्म ते ब्रवाणीत्यु
पक्रम्य बालाकिनादित्याद्यमुख्यात्मसूक्तेषु सत्सु तममुख्यात्मवादिनमपोह्याऽजातश
त्रुणा वेदितव्यतयोपदिष्टः पुरुषकर्ता जीवो मुख्यप्राणो वा न हि भवितुमर्हतीति तथात्वे गार्ग्या
पेक्षयाऽजातशत्रोरविशेषप्रसंगात् पुरुषकर्तृत्वं च परमात्मनोऽन्यत्रांजसा न संभवत्येव न सर्वथा ५
च कर्मशब्दानुपपत्तिः क्रियत इति व्युत्पत्त्या कर्मशब्दस्य जगद्वाचित्वात् प्रत्यक्षाद्युपस्थितं
जगदेतदिति सर्वनाम्ना परामृशति । न च जगदंतर्वर्तिपुरुषकर्तृत्वं पृथक्कुतो वक्तव्यमिति
युक्तं । गार्ग्येण ब्रह्मत्वेनोक्तपुरुषाणामब्रह्मत्वद्योतनाय गोबलीवर्दन्यायेन पृथग्युक्तिसं
भवादिति ॥ जीवमुख्यप्राणलिंगान्नेति चेत्तद्व्याख्यातं ॥ ननु जीवलिंगान्मुख्यप्राणलिं।

यस्येदं कर्म स वेदितव्यः ।५.४।

गात्वेन ब्रह्मपरत्वावधारणमिति चेत्तत्राह व्याख्यातं प्रतर्दनाधिकरणे उपासात्रैविध्या
दिह तद्योगादित्यत्राविरुद्धतया जीवमुख्यप्राणलिंगं ब्रह्मपरं व्याख्यातमित्यर्थः जीव
प्राणत्वे परत्वे ह्युपगम्यमाने ब्रह्मपरत्वस्याप्यावश्यकत्वात्त्रैविध्यं स्यादित्युक्तो
दोषस्तत्रोक्तः प्रकृतेपि समान इति भावः। प्रतर्दनविचारे कर्मपदस्याविचाराद्गतार्थ
ताऽद्रष्टव्या। अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके। जैमिनिराचार्योऽस्मि
न्प्रकरणे। जीवपरामर्शनमन्यार्थं ब्रह्मप्रतिपत्त्यर्थं यतो मन्यते अतो ब्रह्मपरमेवेदं वाक्यं
कुतो मन्यते। प्रश्नव्याख्यानाभ्यां स्यात्पनिजिज्ञासुं बालाकिमाशयाजातशत्रुः सुप्तं
पुरुषसमीपं गत्वा हे सोम राजन्निति सुप्तमाहूय आकारनशरणान्नबोधात्प्राणादीनामभो
क्तृत्वं प्रतिपाद्य यष्टिघातोत्थापनेन प्राणादिव्यतिरिक्तो जीवे प्रतिबोधिते पुनर्जीवातिरि

रिक्ताधिकरणं भवनापादनविषयान्प्रश्नानुत्पत्येमेवचकार। क्वैष एतद्बालाके पुरुषो
ऽशयिष्ट क्व वा एतदभूत् कुत एतदागादिति। अयमर्थः। हे बालाके शयनमेतद्यातन
येन पुरुषः कस्मिन्नधिकरणे स्वापे शयनं कृतवानित्यधिकरणप्रश्नार्थः। एतत्त्र
वनमेकीभावो यथा स्यात्तथा क्वाश्रये सुप्तोऽभूदिति भवनायतनप्रश्नोऽर्थः। शयन
भवनयोराधारं पृष्ट्वोत्थानावस्थायामागमनापादानं पृच्छति कुत इति एतदागम
नं यथा स्यात्तथा कस्माद्बोधावस्थायामागात् उत्थानं कृतवानित्यर्थः। एतत्प्रश्नोत्त
रदानासमर्थं बालाकिं मत्वा स्वयमेवोत्तरमाह यत्रासुप्तः स्वप्नं न कंचन पश्यत्यथा
यास्मिन्प्राण एवैकधा भवतीत्यादि शयनभवनयोराधारमुत्थानापादानं च प्राणशब्दे
नोवाच्यः परमात्मेति उत्तरार्थः। तस्माद्वास्मिन् जीवस्य भोक्तुः शयनभवने यस्मात्तो

त्यानमेकीभावमंशांशत्वं सोऽत्र परमात्मा वेदितव्यतयोपदिष्टः पुरुषकर्तृत्वाच्चापि चैके राज
नेपि तो बालाकत्र जातशत्रुसंवादे एवं स्पष्टं विज्ञानमयं जीवं व्यतिरिक्तं परमात्मानमा
मनंति स एष विज्ञानमयः पुरुषः क्वैष तदाभूत् कुत एतदागादिति प्रश्ने य एषोऽन्तर्हृद
य आकाशस्तस्मिञ्छेते इत्युत्तरे च आकाशः परमात्मेति दहराधिकरणे निर्णीतं तस्मा
त्पुरुषकर्तृत्वेदितव्यः परमात्मनि कौशीतकिब्राह्मणवाक्यं समन्वितमिति सि
द्धं ॥ वाक्यान्वयात् ॥ एवं ब्रह्मोपक्रमसामर्थ्यात् ब्रह्मपरत्वमुक्तं तर्हि तद्वदेव मैत्रे
यी ब्राह्मणवाक्यस्य जीवोपक्रमसामर्थ्याज्जीवपरत्वमस्त्विति दृष्टांतसंगतिः फलं पू
र्ववत् ॥ बृहदारण्यके श्रूयते ॥ स होवाच न वा अरे पत्युः कामाय पतिः प्रियो भवत्यात्मनस्तु
कामाय पतिः प्रियो भवतीत्युपक्रम्य पतिजायापुत्रपशुवित्तादिप्रपंचस्यात्मार्थत्वेन

प्रियत्वमुक्त्वानन्यार्थतया निरुपाधिप्रियत्वेनानतिशयानंदात्मनो ज्ञातव्यतामाह याज्ञवल्क्य
: आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो वा अरे दर्शनेन श्रवणे
न मत्या विज्ञानेनेदं सर्वं विदितमिति ॥ अत्र संशयः ॥ किं जीवोऽत्र द्रष्टव्यत्वादिरूपेणोपदिश्यते
किं वा परमात्मेति तत्र जीव इति प्राप्तं कुतः पतिजायादिभोग्यजातवत्ताभोक्तृत्वोपक्रमात् मध्येपी
दं महद्भूतमनंतमपारं विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञा
स्तीति प्रकृतस्य द्रष्टव्यस्य भूतेभ्यः समुत्थानं जीवत्वरूपेणाद्रष्टृजीवस्य द्रष्टव्यत्वं दर्शयति ॥ मुत्पर्यस्तु
इदं सत्स्वरूपं महदनवच्छिन्नं तं तं सत्यं ज्ञानमनंतं नित्यमपारं सर्वगतं विज्ञानघनो ज्ञानैकतानः ज्ञा
त्वंतराः संमिश्रत्वमेकाकारार्थः ॥ सचैतेभ्यः कार्यकरणाकारेण परिणतेभ्योऽविद्याभूतेभ्यः
साम्येनोत्थाय जीवत्वमनुभूय तान्येव भूतानि ज्ञानादिना ध्वस्तेषु तिसंत्यनु पश्चाद्विनश्यति जी

सूत्रं० १२३ वत्वं त्यजति निहितत्यागानंतरमस्य सत्यादिविशेषज्ञानमस्तीति ॥ तस्माज्जीव इति प्राप्ते ब्रू शारी. सू० १
मः ॥ परमात्मैवात्र द्रष्टव्यत्वेनोपदिष्ट आत्मा कुतः वाक्यान्वयात् । उपक्रमादिपर्यालोचनया
वाक्यस्य ब्रह्मण्येवान्वयादित्यर्थः ॥ तथाहि अमृतत्वस्य तु नाशास्ति वित्तेनेति वित्तसाध्येन कर्म
णा मोक्षं प्रत्याशा नास्तीति याज्ञवल्क्यादुपश्रुत्य मैत्रेयी मोक्षमाशासाना तत्साधनं पृच्छति ॥
येनाहं नामृता स्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मे ब्रूहीति । यदमृतत्वसाधनं त्वं वे
त्थ तदेव मे ब्रूहीत्यर्थः ॥ एवं पृष्टो याज्ञवल्क्य इदमात्मज्ञानमुपदिशति । आत्मा वा अरे द्रष्ट
व्य इत्यादिना । न हि जीवज्ञानान्मोक्ष इति कश्चिदभ्युपैति । अतो द्रष्टव्यः परमात्मा । तथात्म
नो वा अरे दर्शनेनेति परमात्मज्ञानात्सर्वविज्ञानं प्रतिज्ञातं तद्दुंदुभ्यादिदृष्टांतैः साधयन्सर्वस्य प
रमात्मत्वं गमयति । स यथा दुंदुभेर्हन्यमानस्य न बाह्याञ्छब्दाञ्छक्नुयादित्यादिना दुंदु १२३

विनिमहृगीन। अं.४

भिशंखवीणाशब्दादिदृष्टांतैस्तेनोक्तस्तस्यायमर्थः । दुंदुभिशंखवीणापदैस्तज्जन्यसामा
न्यशब्दा लक्ष्यंते । तथा च यथा दुंदुभ्यादिशब्दसामान्याद्दुंदुभ्यादिशब्दविशेषा भेदेन न गृह्यमा
णाः शुक्तिरजतवत्स्वतंत्रवत्कल्पिताः तद्ग्रहणे गृहीता भवंति । तथा चित्स्फुरणं विना
स्थितिकाले स्फुरणशून्यं जगत्तत्र कल्पितं तद्ग्रहणेन गृहीतं भवतीति ततो नातिरिच्य
त इति । तथा एतावदरे खल्वमृतत्वमित्युपसंहारदर्शनाच्चात्र द्रष्टव्य आत्मा परमात्मैवेति
ननु पतिजायादिभोग्यज्ञानेन लिंगेन जीवोपक्रमः प्रतीयते स कथमित्यत आह । प्रतिज्ञा
सिद्धेर्लिंगमाश्मरथ्यः । जीवब्रह्मणोर्हि कार्यकारणयोर्भेदाभेदौ वर्तेते । अत्यंतभेदे एकविज्ञा
नप्रतिज्ञाविरोधप्रसंगात् । तथा च तत्प्रतिज्ञासिद्धेरिदमभेदांशमादाय जीवोपक्रमणं लिं
गमित्याश्मरथ्य आचार्यो मन्यते । जीवस्य कार्यत्वं भेदाभेदौ समादाय जीवोपक्रमो

सू॰त्र॰ १२४ नसत्त्वाकभेदवत्वं चासहमानः समाधानांतरमाह । उत्क्रमिष्यत एवंभावादित्यौडुलोमिः शारी॰ सू॰ १
संसारदशायामत्यंतभिन्नस्य जीवस्य । ब्रह्मात्मतत्साक्षात्कारात्कार्यकरणसंघातादु-
त्क्रमिष्यत । एवंभावात्परमात्मनैकीभावादविष्पदभेदमाहाजीवोपक्रमइत्यौडु-
लोमिराचार्यो मन्यते । नन्विदमप्यसंगतं । सत्यकार्यकरणसंघातवतः । संसारि-
णोऽत्यंतभिन्नस्य । मुक्तिदशायामभेदायोगादित्यऽरुच्या परमं समाधानमाह ।
अवस्थितेरिति काशकृत्स्नः । ब्रह्मण एवाविद्याकल्पितभेदेन जीवरूपेणावस्थिते जीवो-
पक्रमाऽविरोधं काशकृत्स्नाचार्यः श्रुतेस्तात्पर्यज्ञो मन्यते । अतएव विज्ञानात्मभा-
वेन ब्रह्मणो भूतेभ्यः समुत्थानं जीवलिंगत्वेन नागुपन्यस्तं न विरुध्यते । अभेदादेव १२५
तस्माद्दृष्टव्येब्रह्मणि मैत्रेयीब्राह्मणवाक्यं समन्वितमिति सिद्धं । प्रकृतिश्च प्रति-

ज्ञादृष्टांतानुपरोधात् । जन्माद्यस्येति सूत्रेण ब्रह्मणो जगत्कारणत्वमुक्तं तदत्र विचार्यते
यद्यपि जन्मादिनिपानंतर्यमेतस्य युक्तं तथापि निर्णीतनान्यपैवेदांते । निमित्तत्वमात्रसा-
धकानुमितैर्विरोधोक्तिःसुकरेति समन्वयावसाने लिखितमिदमधिकरणमिति बो-
ध्यं । नचजन्माधिकरणवैयर्थ्यमिति विषयसमन्वयसाधनाऽसंभवेन जगत्कारणात्मक
विषयमात्रस्य तत्रोक्तत्वात् । उपादानत्वेनाधिकरणासित्यत्रोक्तमिति न कश्चिद्दोषः ।
जन्मादिनयस्याध्यायादिसंगततादस्यापि तद्विचारात्मकस्यास्याध्यायादिसंगतिः । पू-
र्वपक्षेण केवलविज्ञानात्मवविज्ञानप्रतिज्ञायोगेण त्वंसिद्धांते तन्मुख्यत्वमिति फलभेदः । अ-
त्र संशयः किं ब्रह्मणो जगन्निमित्तत्वमात्रं उतोपादानत्वमपीति । तत्र द्वंतद्वैतबहु-
स्यां प्रजायेयेत्यादिना सर्वज्ञत्वसर्वकर्तृत्वश्रवणात्कुलालवन्निमित्तत्वमात्रमिति

सूत्र॰ १२५ न्यातेब्रूमः। प्रकृतिश्च ब्रह्मोपादानकारणं निमित्तमपि प्रतिज्ञादृष्टांतानुपरोधात् प्रतिज्ञादृष्टां शारी॰मू॰ १
तयोः सामंजस्यादित्यर्थः। प्रतिज्ञा हि येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातमि
ति। अस्यां च प्रतिज्ञायामात्मज्ञानेन सर्वविज्ञानमुच्यमानमात्मन उपादानत्वं गमयति
निमित्तत्वे तदसंभवात् नहि कुलाले ज्ञाते घटादिकं ज्ञातमिति शक्यते वक्तुं। उपादानत्वे तु
तयोरुपादानोपादेययोरव्यतिरेकादुक्तं तज्ज्ञानेन तज्ज्ञानं दृष्टांतोपि यथा सोम्यैकेन मृ
त्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यमित्युपादानवि
षय एव दृश्यते विकारो वागालंबनमात्रं वस्तुतोऽसन्निति यावत्। तदेव साधयति नाम।
धेयमिति मृन्मयशेषं निषेधति। मृत्तिकेति निमित्तत्वमपि प्रतिज्ञादृष्टांतानुपरोधादेवबो।
ध्यं। निमित्तस्योपादानाद्भेदे प्रतिज्ञादृष्टांतयोरसामंजस्यात्। तथाह हरदारराणकेपि प्रति १२५

घ ज्ञादृष्टांतौ दृश्येते आत्मनि खल्वरे दृष्टे श्रुते मते विज्ञात इदं सर्वं विदितमिति प्रतिज्ञाय स
यथा दुंदुभेर्हन्यमानस्य न बाह्यान् शब्दान् शक्नुयाद्ग्रहणाय दुंदुभेस्तु ग्रहणेन दुंदुभ्याघा
तस्य वा शब्दो गृहीत इति दृष्टांतः। घटाद्यधिष्ठानतयानुगतो यः प्रकाशः स उपादानमि
त्यत्र दृष्टांतो यथा तथोच्यते बाह्यान् दुंदुभिशब्दसामान्यबहिर्भूतान् दुंदुभेस्तच्छब्दसा
मान्यस्येत्यर्थः। तथा च हन्यमानदुंदुभिजन्यस्य शब्दसामान्यबहिर्भूतशब्दविशेषानुग्रह
णाय ग्रहीतुं न शक्नुयादिति व्यतिरेकः। अन्वयोपि दुंदुभिशब्दसामान्यस्य ग्रहणेन तु
दुंदुभ्याघातसंजातकाः विशेषशब्दा गृहीता भवंतीत्यर्थः॥ अभिध्योपदेशाच्च॥ इतश्चात्मन
कर्तृत्वं प्रकृतित्वं। कुतः। अभिध्योपदेशात्। ध्यानोपदेशादित्यर्थः। सोकामयतेति ध्यानो।
पदेशात् कर्तृत्वं बहुस्यामिति ध्यानोपदेशात् प्रकृतित्वमिति॥ साक्षाच्चोभयाम्नानात् प्र

सू॰ब॰ १२६ कृतित्वे हेत्वंतरमिदं सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यंत आकाशं प्रत्या शारी॰ भ॰ १
स्तं यंतीत्याकाशशब्देन साक्षाद्ब्रह्म गृहीत्वा जगदुत्पत्तिप्रलययोरुभयोराम्नानाद्ब्रह्म प्र
कृतिरित्यर्थः ॥ यस्मिन्नुत्पत्तिलयौ यस्य कार्यस्य तत्कार्यं प्रति तदुपादानं यथा घटस्य मृ
दिति व्याप्तेरिति भावः ॥ आत्मकृतेः परिणामात् ॥ लोके हि कृतिमान् कर्ता कृतिवि
षयो मृदादिरुपादानमिति व्यवस्था ब्रह्मणे चात्मनः कृतिमत्त्वं कृतिविषयत्वं च श्रूयते तदा
त्मानं स्वयमकुरुतेति आत्मानमिति द्वितीयया कृतिविषयत्वं स्वयमित्यनेन कृतिम
त्वं तथा च ब्रह्म निमित्तमुपादानं च ॥ कुतः आत्मकृतेः ॥ आत्मसंबंधिनी कृतिरात्मकृ
तिः संबंधो विषयविषयिभावः आधाराधारिभावश्च ततो हेतोरित्यर्थः ॥ नन्वात्मनः कर्तृत्वेन
स्वसिद्धस्य कर्मत्वं कृतिकर्मत्वमत आह परिणामादिति परिणामो विवर्तः ॥ सिद्धस्यापि विव १२६

र्त्तात्मना साध्यत्वात्कर्मत्वोपपत्तिरित्यर्थः ॥ सच्च इति प्रकृतिविकारयोः सामानाधिकरण्यं
दृष्टमिति भावः ॥ योनिश्च हि गीयते ॥ यद्भूतयोनिं परिपश्यंति धीराः कर्तारमीशं पुरुषं ब्र
ह्मयोनिमिति च ॥ प्रकृतिवाचकयोनिशब्देनात्मा गीयते यतः ॥ अतश्च प्रकृतिर्ब्रह्मैवेत्य
र्थः ॥ तस्माद्ब्रह्मणः प्रकृतित्वं कर्तृत्वं चेति सिद्धं ॥ एतेन सर्वे व्याख्याता व्याख्याताः ॥ एता
वता ग्रंथेन ईक्षतेर्नाशब्दमित्यादिना अशब्दत्वादिभिः प्रधानकारणवादो निराकृतः
न तु परमाणुस्वभावादिकारणवादाः ॥ तेषामपि कारणत्वबोधकश्रुतयो दृश्यंते ॥ तथा हि
छांदोग्ये श्वेतकेतुं प्रत्युद्दालकः सूक्ष्मवस्तुनि स्थूलस्यांतर्भावं प्रतिपिपादयिषुराह न्यग्रो
धफलमत आहरेति इदं भगव इति भिंधीति भिन्नं भगव इति किमत्र पश्यसीति अण्व्य
इवेमा धाना भगव इत्यासामंगैकां भिंधीति भिन्ना भगव इति किमत्र पश्यसीति न किंचन

सू॰त्र॰ भगवद्गिरातस्यैवैषसोम्यैषोऽणिम्नएवंमहान्न्यग्रोधस्तिष्ठतीतिजगतःप्रागवस्था शारी॰सू॰
१२७ यांदृष्टांतःश्रूयते ॥ तत्रनकिंचनाणुशब्दस्यवर्णाद्वन्यस्वभावाणुकारणवादावा १
ष्टीतिकत्वेनप्रतीयंते ॥ तथाच्चसदेवेदमग्रआसीत्तन्नामरूपाभ्यामेवव्याक्रियते
त्यादौच्चअसत्स्वभाववादौप्रतीयेते ॥ तासांश्रुतीनांतेषुवादेषुतात्पर्यमस्तिनवेति
संशये ॥ अस्तीतिप्राप्तेऽतिदिशति ॥ एतेनेति ॥ प्रधाननिराकरणे ॥ येहेतवोशब्द
त्वाचेतनत्वैकविज्ञानप्रतिज्ञानुपपत्त्यादयस्तेषामणुवादिपक्षेपिसाम्येनसर्वेऽ
णुवादिकारणवादानिराकृतत्वेनव्याख्याताः ॥ नच्चनकिंचनारिज्ञाढ्विरोधः ॥ अ
नभिव्यक्तनामरूपत्वेनाविरोधो ॥ सूक्ष्मताद्यात्मन्यणुशब्दप्रयोगेण ॥ स्वभाववा
दस्तुसर्वसदामाहितः ॥ अभ्यासोऽध्यायपरिसमाप्तिंद्योतयति ॥ तस्माज्जगत्कारणे १२७

सर्वज्ञेचिन्मात्रेवेदांतानांसमन्वयोनान्यत्रेतिसिद्धं ॥ समन्वयेस्पष्टलिंगमस्पष्ट
लेप्फपास्पगं ॥ त्रेपगंपदमात्रंचचिंत्यंपादेचतुर्थकमादिति ॥ ॥ ॥ इतिश्रीप
रमहंसपरिव्राजकाचार्यश्रीमन्मुकुंदगोविंदश्रीचरणशिक्षितश्रीरामकिंकर
धर्मकृतौब्रह्मसूत्रवृत्तौब्रह्मामृतवर्षिण्यांप्रथमाध्यायस्यचतुर्थःपादः ॥ १ ॥ क
ल्याणमस्तु ॥ शुभंभवतु ॥ श्रीरस्तु ॥ ॥

॥ ॥

॥ ॥

सूत्र० १ ॥ॐ नमः॥ ईक्षतिदिशाधिकरणे प्रधानवदशब्दत्वं परमाणुवादीनामपीत्युक्तं॥ संप्रतिप्र न्या०री०वृ० २
धानस्य वैदिकशब्दवाच्यत्वाभावेपि स्मृतिरूपशब्दवत्वमाशंक्य परिहरति॥ स्मृत्यनवका
शदोषप्रसंग इति चेन्नान्यस्मृत्यनवकाशदोषप्रसंगात॥ प्रथमाध्याये सर्वज्ञे सर्वशक्ते
जगज्जन्मादिकारणे सर्वेषां वेदांतानां समन्वयः प्रतिपादितः॥ अशब्दत्वादिहेतुभिः प्रधा
नादिकारणवादाश्च निराकृताः॥ इदानीं द्वितीयेध्याये प्रथमपादे सांख्यादिस्मृतितर्काभ्यां
स्वपक्षे विरोधः परिह्रियते॥ द्वितीयपादे सांख्यादिमतानां दुष्टत्वं प्रतिपाद्यते॥ तृतीयपा
दे स्याद्यभागेन पंचमहाभूतश्रुतीनां परस्परविरोधः परिह्रियते॥ द्वितीयभागेन जीवश्रुती
नां॥ चतुर्थपादे लिंगशरीरश्रुतीनां विरोधपरिहार इत्येतदर्थमध्यायस्यारभ्यते॥ तदुक्तं॥
द्वितीये स्मृतितर्काभ्यामविरोधोन्यदुष्टता॥ भूतभोक्तृश्रुतेर्लिंगश्रुतेरप्यविरुद्धतेति॥ उक्तसम १

न्वयस्य स्मृत्यादिविरोधे॥ तन्निरसनमनेन क्रियत इत्यनयोरध्याययोर्विषयविषयिभावः संबंधः
निर्विषयविरोधपरिहारायोगा॥ द्विषयभूतसमन्वयस्यादौ विचारः कृतः॥ विषयिभूतविरोधप
रिहार इदानीं क्रियत इति युक्तमेतस्याध्यायस्य पूर्वाध्यायानंतर्यं॥ श्रौतसमन्वये विरोधपरि
हारत्वादस्य पादस्य पादस्य श्रुत्यध्यायसंगतिः॥ सर्वत्र पूर्वोत्तरपक्षयोः विरोधाविरोधौ फलमि
ति विवेकः॥ तत्र प्रथमं स्मृतिविरोधपरिहारः॥ अत्र संशयः॥ उक्तसमन्वयः किं सांख्यादि
स्मृत्या विरुध्यते न वेति विरुध्यत इति प्राप्तं कुतः सर्वज्ञकपिलादिप्रणीतत्वेन प्रामाण्यात॥
श्रुतिरपि कपिलमुनिमभ्यनिहतज्ञानं दर्शयति॥ ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बि
भर्ति जायमानं च पश्येत॥ इति॥ यस्तावदग्रे सर्गादौ जायमानं कपिलमामानं ऋषिं स्थितिका
ले च प्रसूतं भूतभविष्यद्वर्तमानविषयकज्ञानैर्बिभर्ति [illegible] तमीश्वरं पश्येदिति योजना

सू॰नं॰ तस्मान्नब्रह्मणिकारणेसमन्वयः।महर्षिप्रणीतप्रधानकारणवादस्मृतीनामनवकाशरूप शारी॰सू॰
२ दोषप्रसंगात्॥नचजगत्कारणेसिद्धेवस्तुनिविकल्पोयुज्यतेतस्मात्प्रधानानुगुणतयास्मृत १
योनेयाइतिचेदितित्पूर्वंसूत्रावयवार्थः॥परिहरतिनेति॥कुतःअन्यस्मृत्यनवकाशदोष
प्रसंगात्॥तथाहिचेतनंप्रकृत्य॥तस्माद्व्यक्तमुत्पन्नंत्रिगुणंद्विजसत्तमिति॥स्मृतिरा
व्याकृतनामरूपप्रपंचस्यब्रह्मजन्यत्वमाह॥तथाभगवद्गीतास्वपि॥अहंसर्वस्यजगतः
प्रभवतिःप्रलयस्तथेतिचेतनकारणत्वंस्मर्यते॥तथाचप्रधानकारणवादेएतत्स्मृती
नामनवकाशोदोषःप्रसज्येते॥अतःस्मृतिद्वयविरोधेश्रुत्यविरुद्धास्मृतिःप्रमाण
मित्यप्रमाणसांख्यस्मृत्यानविरोधः॥श्रुतिश्चेत्तदन्यकपिलविषयाकपिलेक्यंप्र
माणाभावादितिइतस्यसांख्यस्मृतेरनवकाशोनदोषइत्याह॥इतरेषांचानुपलब्धेः २

सांख्यस्मृतिसिद्धानांप्रधानांप्रधानादितरेषांमहदहंकारादीनांतत्त्वानांलोकेवेदेचानु।
पलब्धेश्चसांख्यस्मृतेरप्रामाण्यंनदोषः॥तथाचतदेकदेशंप्रधानस्मृतेरप्यप्रामा
ण्यमितिभावः॥एतेनयोगःप्रत्युक्तः॥अतिदेशात्तनपृथक्संगत्याद्यपेक्षायोग
स्यावत्वेष्वराद्धत्वेतावान्कापिलमताद्विशेषः॥प्रधानादिप्रक्रियासमैव॥तथाचका
पिलमतनिरासेनैवपातंजलमतंनिरस्तंभवतीत्यर्थः॥नन्वातिदेशोवैय्यर्थ्यज्ञापन।
त्वेनश्रुतिसिद्धयोगप्रतिपादकत्वेनप्रामाण्यप्राप्तांकथ्यामतिदेशसार्थक्याह॥तर्हिप्राम
ण्यंकथंतस्माद्योगप्रमेतिचेत्॥उच्यते॥तात्पर्यविषयभूतार्थेप्रामाण्यंहिशास्त्रस्य
ऽप्रामाण्यमावहति॥यथाकापिलस्मृतेः।नहियोगस्मृतेःप्रधानादौतात्पर्यंयेनाऽप्रा
माण्यमवेत्॥किंतुयोगेएवसचाबाधितःश्रुतिसिद्धत्वात्।किंचिदालंब्ययोगःप्रतिपाद

सूत्र० ३ नीय इति॥ परप्रसिद्धप्रधानादिकमादाय न तेन गृहीतं तत्रापि प्रामाण्याशंकायामतिदे शारी०टी०
शादस्य विरोधः। एवं यद्देशोऽसांख्यस्मृतेरविरोधस्तद्देशे प्रामाण्यमित्यधिकरणद्वयस्य ता २
त्पर्यं योगस्य कथं श्रौतत्वमिति चेत्तद्दर्शयामः॥ श्वेताश्वतरोपनिषदि त्रिरुन्नतं स्थाप्य सम-
मं शरीरमित्यादिना योगप्रपंचः कृतः॥ श्रोणिकायग्रीवाशिरांसि उन्नतानि यस्मिन् तच्छरीरं
समं संस्थाप्य युंजीतेति योजना॥ तथा काठकेऽपि॥ तां योगमिति मन्यंते स्थिरामिंद्रियधारणा-
मिति॥ विद्यामेतां योगविधिं च कृत्स्नमिति॥ इंद्रियाणां स्थिरामैकाग्र्यजन्यधारणां यो-
गविदो योगं मन्यते॥ यथोक्तमैकाग्र्यमेव परमं तप इति वक्तुमिति शेषः॥ एतां ब्रह्मविद्यां
योगप्रकारं च सर्वं मृत्योः सकाशात् नचिकेता लब्ध्वा ब्रह्म प्राप्तोऽभूदित्यर्थः॥ न विलक्षणत्वा ३
दस्य तथात्वं च शब्दात्॥ स्मृतिविरोधः परिहृतः॥ इदानीं न्यायविरोधः परिह्रियते॥ यद्या-

तर्कस्यांतरंगत्वाद्बलवत्तरत्वं३ शब्दस्तु बहिरंगत्वान्निर्बलत्वं३

पिसापेक्षत्वात्तर्केणानिरपेक्षश्रुतिसमन्वयस्य न विरोधस्तथापि साक्षात्कारस्य मोक्षसाधना- मुख्य२
त्वेन प्राधान्यात्तर्कस्य दृष्टानुसारेणार्थसमर्पकत्वेनापरोक्षार्थविषयकत्वात्प्रधाने साक्षा-
त्कारस्य विषयतोंऽतरंगं तर्कः॥ शब्दस्तु परोक्षार्थैकबोधनस्वभावो बहिरंगमिति बलव-
त्तर्केण विरुध्यत इत्याक्षेपो युक्तः पूर्वं वेदविरुद्धस्मृतेर्मूलाभावादप्रामाण्यमुक्तं॥ न हि तर्क-
स्य व्याप्तिपक्षधर्मतयोर्मूलयोर्लोकसिद्धत्वात्तेन विरोध इति प्रत्युदाहरणसंगत्यायमा-
क्षेपः॥ आकाशादिकं॥ चेतनप्रकृतिकं॥ जन्यत्वात् घटवत्॥ इति तर्केण समन्वयो विरुध्यते
न वेति संदेहे विरुध्यत इत्याह॥ न विलक्षणत्वादिति॥ जगच्चेतनप्रकृतिकमिति यदुक्तं तन्नयु-
क्तः विलक्षणत्वादस्य॥ अस्य जगतश्चेतनाद्विलक्षणत्वाच्चेतनं ब्रह्म शुद्धं जगदचेतनं परिच्छिन्न-
मशुद्धमिति विलक्षणं॥ यद्धि विलक्षणं॥ न तत्तत्प्रकृतिकं तंतुविलक्षणो घटो न तंतुप्रकृति

चेतनः परमात्मा प्रकृतिः कारणं यस्य तच्चेतनप्रकृतिरेव चेतनप्रकृतिकं ध

क इति ॥ ननु ब्रह्मजगतोर्वैलक्षण्यं कृत इत्यत आह ॥ तथात्वं च शब्दादिति ॥ तथात्वं वैलक्ष
ण्यं ॥ विज्ञानं चाविज्ञानं चाभवदित्यादिश्रुतितोऽवगतमित्यर्थः ॥ अत्र श्रुतौ ॥ अविज्ञानश
ब्देन जडमुच्यते ॥ ननु ब्रह्मवज्जगदपि चेतनं श्रूयते ॥ ते हेमे प्राणा अहंश्रेयसे विवदमाना मृ
दब्रवीत् ॥ आपोऽब्रुवन् ॥ ते ह वाचमूचुस्त्वं न उद्गायेत्यादिश्रुतिभिरित्यत आह ॥ अभिमानि
व्यपदेशस्तु विशेषानुगतिभ्यां ॥ उक्तशंकानिरासार्थस्तु शब्दः ॥ उक्तश्रुतिभिर्न जगत
श्चेतनत्वं प्रत्येतव्यं ॥ यतो मृदाद्यभिमानिनीनां देवतानां तत्र व्यपदेशो भवति ॥ न मृ
दादिमात्रस्य ॥ कुतः ॥ विशेषानुगतिभ्यां ॥ कौशीतकिब्राह्मणे एता ह वै देवा अहंश्रेय
से विवदमाना इति ॥ बृहदारण्यके प्राणसंवादे श्रुतप्राणानां देवताशब्देन विशेषितत्वाच्च
प्राणा इन्द्रियाणि किं तु तदधिष्ठाता देवता इति नेन्द्रियादिजगतश्चेतनत्वं ॥ अग्निर्वाग्भूत्वा

मुखं प्राविशदित्यादिमंत्रार्थवादादिषु सर्वत्र तदभिमानिदेवतानामनुगतेः ॥ श्रवणाच्च
न चेतनं जगत् ॥ ते ह वाचमूचुरित्यत्रापि ते ह देवा वागभिमानिनीं देवतामूचुः ॥ किमिति
त्वं न उद्गायेति भोगमस्मभ्यं संपादयेत्यर्थो बोध्यः ॥ तस्मादचेतनस्य जगतो वैलक्षण्याद्ब्रा
चेतनप्रकृतिकत्वमिति प्राप्ते उच्यते सूत्रं ॥ दृश्यते तु ॥ पूर्वपक्षनिरासार्थस्तु शब्दः ॥ यदुक्तं
चेतनविलक्षणं जगन्न तत्प्रकृतिकमिति ॥ तदचेतनात्पुरुषाद्विलक्षणानां केशलोमादी
नामचेतनानामचेतनात् गोमयाच्चेतनवृश्चिकस्योत्पत्तिर्यतो दृश्यते ॥ अत इत्यर्थः
प्रकृतिविकारयोरत्यंतसादृश्ये प्रकृतिविकारभावानुपपत्त्या ॥ यत्किंचित्सादृश्यं वाच्यं
तच्च प्रकृतेऽपि जगति स्फुरणानुवृत्त्यास्त्यसमानमिति भावः ॥ किं च ब्रह्मण्युपनिषद्व्यतिरि
क्ततर्कादेः प्रमाणस्य प्रवेशाभावान्न तेन विरोधः समन्वयस्य ॥ तथा च श्रुतिः ॥ नैषा त

सूत्र०
५

र्केण मतिरपनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठेति॥ कोऽद्धा वेद क इह प्रवोचत् कुत इयं वि शारी० वृ० २
सृष्टिर्यतस्त्वा बभूवेति॥ ब्रह्मविषया मतिरेषा तर्केण नापनेया न प्रापणीयेत्यर्थः॥ यद्वा॥
ऽतर्केण पनेया निरस्या न भवति किंत्वन्येनैवाचार्येण वेदविदा प्रोक्ता सती सुज्ञाना
य फलावसायिसाक्षात्काराय भवति हे प्रेष्ठ प्रियतमेति नकिकेतसं प्रति मृत्योर्वचनं
को हि ब्रह्मस्वरूपं हारसूमो अद्धा साक्षाद्वेद को वा तत्त्वं को वक्ता वोचदित्यर्थः॥ छान्दसो॥
दीर्घलोपः॥ यतश्चात्मनः सकाशादियं विविधा सृष्टिर्बभूव स एव स्वरूपं वेद नान्य इति॥
मन्त्रप्रतीकयोरर्थः॥ असदिति चेन्न प्रतिषेधमात्रत्वात्॥ ननु चेतनस्य नामादिहीनस्या
चेतननामादिमज्जगद्धेतुत्वे उत्पत्तेः पूर्वं जगदसदेव स्यादिति चेन्न कुतः॥ प्रतिषे
धमात्रत्वात्॥ असतस्स्यादिति योयं प्रतिषेधः॥ स प्रतिषेधमात्रं न तु तस्य प्रतिषेध्य ५

वृत्तिः

मस्तीत्यर्थः॥ अयं भावः॥ नहि कार्यसत्ता कारणान्निरूप्यते किंतु कारणमेव स्थितिदशाया
मपि जगत्ता ब्रह्मैव॥ तयाच ब्रह्मात्मकजगतः सत्त्वमुत्पत्तेः पूर्वमप्यविशिष्टमिति नास
ज्जगदिति॥ आक्षिपति॥ अपीतौ तद्वत्प्रसंगादसमंजसं॥ ननु अशुध्यादिगुणकं ब्रह्मज
गदुपादानमित्यसमंजसं कुतः॥ अपीतौ तद्वत्प्रसंगात्॥ अपीतौ प्रलयसमये जाड्या
शुध्यादिगुणकं जगद्ब्रह्मणि लीयमानं स्वनिष्ठजाड्यादिभिर्धर्मैर्ब्रह्म दूषयेत्॥ यथाऽग
कादौ लीयमानं हिंग्वादिकं स्वनिष्ठगंधादिभिः मिश्रकादिकं दूषयति तद्वत्॥ तथा च तत्व
तकारणस्यमपि ब्रह्मणोऽशुध्यादिः प्रसज्येतेत्याक्षेपं सूत्रार्थः परिहरति॥ ननु दृष्टान्तभा
वात्॥ तुरेवार्थः पूर्वोक्तमसमंजसं नास्तीत्यर्थः कुतः दृष्टान्तभावात्॥ कार्यं कारणे ली
यमानं स्वधर्मैः कारणं न दूषयतीत्यस्मिन्नर्थे शतशो दृष्टान्तानां सत्त्वादित्यर्थः

सूत्र॰ ६ याघटशरावादिकं कार्यं मृदि लीयमानं मृदं स्वनिष्ठधर्मेण रूषयति॥ यथा वा स्वप्नप्र शारी॰सू॰
पंचो न स्वधर्मैः कारणमात्मानं रूषयति॥ तथा मायिकं जगदुत्पत्तिस्थितिलयाख्याव १
स्थात्रयसाक्षिणं परमात्मानं मजगत्स्वनिष्ठजाड्यादिधर्मैर्रूषयेत्॥ परमात्मनो वा
स्थात्रयासंबंधे ह्युक्तं संसृतिरपि नान्वदिमायया सुप्तो यदा जीवः प्रबुध्यते॥ अजमनि
द्रमस्वप्नमद्वैतं बुध्यते तदेति॥ मायायाः हृतस्वरूपो जीवो यदा न्वाचार्यप्रतिपाद
नावस्थायां स्वरूपज्ञानभाक् भवति तदा न्वद्वैतं बुध्यत इति योजना॥ अजमित्यस्या
वस्थायाः संबंधाऽभाव उक्तः॥ अनिद्रमिति लयावस्थायाः॥ अस्वप्नमिति स्थित्यवस्था
या इति भेदः॥ किंच कार्यस्य कारणात्मकत्वेपि न कारणं कार्यात्मकमिति न कार्यधर्मा
रूपणं कारणस्येति समंजसं वेदांतशास्त्रमिति॥ स्वपक्षदोषाच्च॥ ये दोषा विज्ञ ६

ज्ञानात्वात्प्रकृतिविकारभावानुपपत्तिरूपस्तैः प्राकृजगतोऽसत्त्वप्रसंगोऽपीतौ तद्वत्प्रसंग
इति सांख्येनोद्भाविता स्तेसो स्वपक्षेपि समानाः॥ शास्त्रादिहीनप्रधानप्रकाशात्वाद्यादिमते
विज्ञानस्य जगज्जस्यत्वंगीकारादित्यर्थः॥ वस्तुतः प्रपंचसत्यत्ववादिनः सांख्यस्यैवैते दो
षाः नममानिर्वचनीयवादिन इति भावः॥ तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदेवमप्य
विमोक्षप्रसंगः॥ केवलस्य तर्कस्याऽप्रतिष्ठानादपि न स्वतन्त्रनिष्ठितत्वाच्च न तेन समन्वयविरो
धाशंकेत्यर्थः॥ एकेन तार्किकेण यत्नेनानुमितोऽप्यर्थोऽन्येन श्रेष्ठतरेणाऽन्यथा नीयत एव
मन्येन श्रेष्ठतमेनाऽन्यथा नयनमिति तर्कस्याऽप्रतिष्ठानं बोध्यं ननु तर्कमात्रस्याऽप्रति
ष्ठितत्वे॥ धूमवत्तानामंतरं वह्न्यार्थिप्रवृत्त्यनुपपत्तिः॥ वाक्यार्थसंदेहे तर्केणाऽनिर्णयप्रसं
गश्च किंच तर्काप्रतिष्ठानादित्ययमपि तर्कोऽप्रतिष्ठित एवेति न तेन परमातनिराकरण

वेदामूलतर्केण५ नितरांदोषश्चनिर्मोक्षः५ परमगंभीरे४

सूत्र० ण्स्मात् तस्मात् कस्यचित्तर्कस्याप्रतिष्ठितत्वेपि कस्यचित्प्रतिष्ठानसंभवात्॥ तेन समन्व शारी०टी०
८ याविरोधाशंका युक्तेत्याक्षिपति अन्यथानुमेयमिति चेदित्यं तेनाप्रतिष्ठितत्वात्तदन्येन २
प्रकारेण प्रतिष्ठिततर्केण समन्वयविरोधादिकमनुमेयमिति शंकार्थः॥ तर्कस्याप्रति
ष्ठितत्वमंगीकृत्य समाधत्ते॥ एवमपीति अन्यत्र तर्कस्य प्रतिष्ठितत्वेपि प्रकृते लिंगादि
हीने ब्रह्मणि वेदनिरपेक्षस्य तर्कस्याप्रतिष्ठितत्वदोषादनिर्मोक्षः प्रसंग एवेति समाधाना
र्थः॥ यद्वा महतां कापिलकणादादीनां परस्परविप्रतिपत्तेरागमनिरपेक्षेण तर्केण तत्त्वनि
र्णयाभावादनिर्मोक्षप्रसंग इत्यर्थः॥ तस्मादागमविरोधात् तर्कोऽप्रमाणमिति न तेन विरोध इ
ति सिद्धं॥ एतेन शिष्टापरिग्रहा अपि व्याख्याताः॥ अतिदेशत्वान्न पृथक्संगत्याद्यपेक्षा॥ ब्र ८
ह्म न जगदुपादानं॥ विशुद्धत्वाद्व्योमवदित्यनेनैवेशोपि कार्यानुमानेन ब्रह्मकारणताधिक

तद्वदतिदेशः२

समन्वयो विरुध्यते न वेति संदेहे विरुध्यत इति प्राप्तं॥ कुतः अबाधितत्वात् तस्माद्द्व्यणुकादेरण
वोपादानमिति प्राप्ते निडिज्ञाति॥ एतेन न्यायमन्वादिभिः शिष्टैः केनचित् सत्कार्यवादाद्यंशे
न परिगृहीतप्रधानकारणवादनिराकरणप्रकारेण शिष्टापरिग्रहाः शिष्टैः केनचिदप्यं
शेनाप्यपरिगृहीता अण्वादिकारणवादा व्याख्याता निरस्ता द्रष्टव्या इत्यर्थः॥ तर्कस्या
वेदबाधितत्वादिति भावः॥ भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्॥ अद्वितीयाद्ब्रह्मणो ज
गत्सर्गं ब्रुवन् समन्वयः प्रत्यक्षादिना विरुध्यते न वेति संदेहे॥ ब्रह्मणि तर्कस्याप्रतिष्ठितत्वे
पि॥ जगद्भेदे तस्य प्रतिष्ठितत्वाद्विरुध्यत एवेति प्रत्युदाहरणेनायमाक्षेपः॥ भोक्त्रापत्तेरवि
भागश्चेदिति॥ अद्वितीयब्रह्मणो जगदुपादानत्वे भोक्तृभोग्यप्रपंचस्य सर्वस्य ब्रह्मानन्यत्वे
न भोग्यशब्दादेर्भोक्त्रात्मकत्वापत्तेर्भोक्तुर्वा भोग्यात्मकत्वापत्तेः प्रत्यक्षसिद्धः परस्परवि

सूत्र॰ ४ भागो न स्यादिति प्रत्यक्षविरोधः समन्वयस्य ॥ भोक्तृभोग्यप्रपंचो नाद्वितीयवस्तुनि कः पर
स्परं भिन्नत्वात् ॥ व्यतिरेकेण ब्रह्म वदित्यादि तर्कविरोधश्च विपक्षे हेतुश्छिन्नेबाधिकेति
शंकार्थः ॥ समाधत्ते स्याल्लोकवदिति ॥ एकब्रह्मोपादानकत्वेपि भोक्तृभोक्तृभोग्यप्रपंचस्य
परस्परं विभागः स्यात् लोकवत् ॥ यथा मृदात्मनाभिन्नानां घटशरावादीनां परस्परं भेदो
ऽस्ति यथा वा एकरज्जूपादानकानां दंडसर्पादीनां परस्परं भेदः तद्वदित्यर्थः ॥ कल्पितभेदा
सत्त्वान्न प्रत्यक्षविरोधः ॥ दंडादौ व्यभिचारान्न तर्कः प्रमाणमिति मंतव्यं ॥ ननु ब्रह्माभेदे जा
गतोंगीकृत्य लोकदृष्टांतेन विरोधः परिहृतः ॥ तस्य ब्रह्माभेद एव कुतो न स्यादित्याशंक्य ॥
जगतोऽनिर्वचनीयत्वान्न ब्रह्मातिरेकेण सत्त्वमित्याह ॥ तदनन्यत्वमारंभणशब्दादिभ्यः पू
र्वं परिणामवादमाश्रित्य भोक्त्रापत्तेः स्याल्लोकवदिति समाधानमुक्तं ॥ इदानीं विवर्तवाद ८

माश्रित्य परमं समाधानमुच्यते इत्येकफलकत्वं संगतिः संदेहः पूर्ववत् ॥ तस्माद्ब्रह्मणः प्रपं
चस्यानन्यत्वं पृथक्सत्ताराहित्यं कुतः ॥ आरंभणशब्दादिभ्यः एकविज्ञानात्सर्वविज्ञानप्रति
ज्ञासिद्ध्यर्थं दृष्टांत उपन्यस्तः यथा सोम्यैकेन मृत्पिंडेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारंभणं वि
कारो नामधेयं मृत्तिकेत्येव सत्यमिति तत्र मृत्पिंडे ज्ञाते कथं घटादिज्ञानमित्याशंक्य ॥ वि
कारो घटादिर्वागालंबनमात्रं यतो नामधेयं विकारः ॥ ननु नामातिरेकेण विकारोस्तीत्यत आह
मृत्तिकामात्रमेव विकारस्य पारमार्थिकं स्वरूपमिति तस्मिन् ज्ञाते वस्तुतो घटादिर्ज्ञातो भव
तीन कश्चिद्विकारो मिथ्याकारणं तु सत्यमित्ययमर्थो दृष्टांतवाक्ये सिद्धः तथा दार्ष्टांतिकेपि
ब्रह्मव्यतिरेकेण प्रपंचसत्ता नास्तीति तदनन्यत्वसूत्रस्यादिशब्देन ब्रह्मैवेदं सर्वमित्यादिश्रुतिना
न्यत्वप्रतिपादकं गृह्यते तदनन्यत्वे हेत्वंतरमाह ॥ भावे चोपलब्धेः ॥ भावपदकारणसत्त्वा

कारणतानुविधायिः उपलंभपदंज्ञानवाचकं २

सूत्र० ५ चकं॥ तदुपलब्ध्युपलक्षणार्थं एवमुपलब्धिपदंकार्योपलब्धिवाचकं॥ कार्यसत्तोप शारी०ह० २
लक्षणार्थेतयाचायंप्रयोगः विकारः कारणादनन्यः कारणसत्तोपलंभानुविधायिसत्तो
पलंभकत्वात्॥ योयस्माद्भिन्नः नसतत्सत्तोपलंभानुविधायिसत्तोपलंभवान् यथावा
टात्पटइतिहेतौउपलंभपदद्वयत्यागेवह्निसत्तानुविधायिधूमेव्यभिचारःस्यात्तद्वार
णायतद्ग्रहणंसत्त्वपदद्वयत्यागे॥ यथाश्रुतसूत्रेचालोकसत्तोपलंभानुविधायिज्ञान
वतिरूपेव्यभिचारःअतस्तत्पर्यंतग्रहणमिति॥ यद्वाभावाच्चोपलब्धेरितिसूत्रंनकेवलं
मृत्स्नाकार्यकारणयोरनन्यत्वंकिंतुप्रत्यक्षोपलब्धेःभावाच्चानन्यत्वमित्यर्थः॥ नहि
तंतुव्यतिरेकेणपटोनामकश्चिदुपलभ्यतेकिंतुसंयोगविशेषावच्छिन्नास्तंतवएवा
पटव्यवहारविषयाः॥ तत्सत्त्वमुपलभ्यंतेअतोऽनन्यत्वंविकारस्य॥ सत्त्वाच्चा ५

वस्य॥ अवरस्यकार्यस्योत्पत्तेःप्राक्कारणानन्यत्वेनसत्त्वात्सत्त्वश्रवणादुत्पत्त्यनंतरमना
न्यत्वंसिद्धमित्यर्थः॥ ब्रह्मवाइदमग्रआसीदित्यादौप्रपंचोपस्थापकेदंपदस्यब्रह्मसामाना
धिकरण्यात्तदनन्यत्वंहि एवंचान्यथाब्रह्मात्मनापूर्वंप्रपंचस्याऽसत्त्वेतदुत्पत्त्यनुपपत्तेः
नहिसिकतात्मनाऽविद्यमानंतैलंताभ्योजायेतेति॥ असद्व्यपदेशान्नेतिचेन्नधर्मांतरेण
वाक्यशेषात्॥ ननुअसद्वाइदमग्रआसीदित्यादिनाप्रागुत्पत्तेरसत्त्वव्यपदेशान्नकार्यस्य
कारणात्मनापूर्वंसत्त्वमितिचेन्नह्यत्यंतासत्त्वाभिप्रायेणायमसत्त्वव्यपदेशः॥ किंतुव्याकृ
कृततद्रूपधर्मापेक्षयाअव्याकृतत्वंधर्मांतरंतेनधर्मांतरेणायमऽसत्त्वव्यपदेशःकु
तःवाक्यशेषात्नतत्सदासीदितिवाक्यशेषः॥ पूर्वंअस्यंताऽसतोग्रहणेबाधोतत
स्माद्व्याकृतंसदित्युच्यतेअव्याकृतंचासदितिसिद्धंकारणानन्यत्वंकार्यस्य॥ युक्तेः

सूत्र॰ १० शब्दांतराच्च ॥ कारणानन्यत्वमुत्पत्तेः प्राक्सत्त्वं चेति विशेषः युक्तेरेवं घटो जायत इति प्रती- शारी॰ द्वि॰ १
त्या घटस्य तावदुत्पत्तिकर्तृत्वं प्रतिभाति तर्हि उत्पत्तेः प्रागसत्त्वं घटस्यासत्त्वेन कर्तृ-
त्वायुक्तं तस्मात्कारणात्मना सन्नेव घट उत्पत्तिकर्ता ॥ किंच मृदात्मना पूर्वं घटस्यासत्त्वे
मृदेव घटार्थिना नोपादीयेत असत्त्वाविशेषात् यत्किंचिदेवोपादीयेतेत्येवमाद्या-
दियुक्तिरूह्या ॥ पूर्वसूत्रोदाहृतसद्वाक्यांतरं ॥ सदेव सोम्येदमग्र आसीदित्यादौ वि-
द्यमानसच्छब्दः तस्मादपि कारणादनन्यत्वं ॥ पूर्वमुत्पत्तेः ॥ सत्त्वं चेत्यर्थः ॥ युक्तेरित्ये-
तत्प्रपंचयति ॥ पटवच्च ॥ ननु मृद्घटौ भिन्नौ विज्ञानप्रतीतिविषयत्वात् ॥ घटप-
टवदित्युक्ते तस्य हेतोर्व्यभिचारमाह ॥ पटवच्चेति यथा संवेष्टितप्रसारितपटस्य
विज्ञानप्रतीतिविषयत्वेपि न भेदः एवं मृद्घटयोरित्यर्थः ॥ न विज्ञानकार्यका- १०

रित्वमपि हेतुर्व्यभिचारादित्याह ॥ यथा च प्राणादिः ॥ यथा प्राणायामादिना निरुद्धः प्राणा-
पानादिर्जीवमात्रं कार्यं निर्वर्तयति ॥ अनिरुद्धस्त्वाकुंचनप्रसारणादिकं कार्यं करो-
ति न तावता तस्य प्राणस्य भेदोस्ति तस्मात्कार्यकारणयोरनन्यत्वं सिद्धं तदनन्यत्वा-
देकविज्ञानात्सर्वविज्ञानप्रतिज्ञा सिद्धा भवति ॥ इतरव्यपदेशाद्धिताकरणादिदोषप्रस-
क्तिः ॥ पूर्वं कार्यस्य कारणस्याभेदनन्यत्वमेकविज्ञानप्रतिज्ञासिद्धये समर्थितं तर्हि ते-
नैव न्यायेन जीवब्रह्मणोरप्यभेदात् जीवधर्माहिताऽकरणादयो ब्रह्मणि प्रसज्ये-
रन्नित्याक्षेपात्संगतिः ॥ जीवाभिन्नं ब्रह्म जगदुपादानमिति ब्रुवत्समन्वयो विषय-
स किं यदि तादृग्ब्रह्म जगज्जनयेन्न हि स्वानिष्टं जनयेदिति तर्केण विरुध्यते न वे-
ति संदेहे पूर्वपक्षमाह इतरव्यपदेशादिति ॥ इतरस्य जीवस्य तत्त्वमसीत्यादिना ब्रह्म-

सूत्र० मतव्यपदेशादितरस्य ब्रह्मणो वाऽनेन जीवेनात्मनानुप्रविश्येत्यादिना शारीरत्व शारी०द्वि०
११ व्यपदेशाद्ब्रह्मणः स्वशब्दत्वे जीवस्यैव स्रष्टृत्वं स्यात् तथा च हिताऽकरणादिरूपदो २
षप्रसक्तिर्ब्रह्मणः । नजव्यत्यासेनाऽहितरजमरणादि बहुविधानर्थकरणादिरू
पदोषस्य प्रसक्तिरित्यर्थः ॥ आदिपदेन जीवस्य जरादिकं मयासृष्टमिति ज्ञानं
स्यात् ॥ तत्संहर्तृत्वं च स्यादिति दोषो गृह्यते तस्माज्जीवाभिन्नब्रह्मणो नानिषुप्रपंचज
नकत्वं आश्रांतं चेतनत्वादिति न चेतनोपादानकं जगदित्याक्षेपसूत्रार्थः सम
धत्ते ॥ अधिकं तु भेदनिर्देशात् ॥ तुः पूर्वपक्षव्यावृत्त्यर्थः ॥ यतः शारीरादधिकं स
र्वज्ञं सर्वेश्वरं सर्वशक्तिब्रह्म जगदुपादानं स्रष्टृ चेति ब्रूमः ॥ अतो न हिताकरणा ११
दिदोषप्रसक्तिः कुतः भेदनिर्देशात् ॥ आत्मा वा अरे द्रष्टव्यः ॥ सता सोम्य तदा

संपन्नो भवतीत्यादिना कल्पितस्य भेदस्य व्यपदेशादित्यर्थः ॥ नहि ब्रह्मणो नित्यमुक्तस्य हि
तम् अहितं वा किंचिदस्तीति ॥ नहिताऽकरणादिदोषप्रसक्तिः ॥ कल्पितभेदमादायैव सर्वासां क
र्योपपत्तेरिति तात्पर्यः ॥ नन्वेकरूपब्रह्मणो जगत्कारणत्वे ॥ कार्यवैचित्र्यं न स्यादिति दोषं दृ
ष्टांतेन परिहरति ॥ अश्मादिवच्च तदनुपपत्तिः ॥ यथा एकपृथिवीजन्यानामश्मनां बहुवै
डूर्यनीलपद्मरागादिभेदेन वैचित्र्यं एवं ब्रह्मकार्याणां स्वरूपवैचित्र्यं युज्यते ॥ नन्वेकब्र
ह्माश्रितकार्येषु कथं धर्मवैचित्र्यं ॥ कथं वाऽर्थक्रियावैचित्र्यं इत्याशंकानिरासार्थमादि
वच्चेत्युक्तं ॥ तस्यार्थः ॥ यथा एकपृथिव्याश्रितानां बीजानां बहुविधं पत्रपुष्पफलसार्यमाधं
धरसादिवैचित्र्यं ॥ यथा एकस्यान्नस्य केशनखादिविचित्रार्थक्रियाकारित्वं ॥ तत्सर्वमु
पपद्यत इति तदनुपपत्तिः ॥ उक्तदोषाऽनुपपत्तिरित्यर्थः ॥ उपसंहारदर्शनान्नेतिचेन्न

सूत्र० १२

क्षीरवद्धि ॥ असहायाद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयो विषयः ॥ स किं ब्रह्म नोपादानं क शा०रा०टी० २
र्तृ वा असहायत्वात्संभवदिति न्यायेन विरुध्यते न वेति संशये ॥ पूर्वमौपाधिकजीव
भेदाश्रिताः करणादिदोषा नास्तीत्युक्तं ॥ संप्रत्युक्तबाधितोपि विभक्तं ब्रह्मणः प्रेरकादिकं ना
स्ति ब्रह्मणो नानाभावादिति प्रत्युदाहरणेनाक्षिप्य समाधत्ते उपसंहारेति ॥ लोके कुलालस्य
कर्तुर्दंडचक्राद्युपसंहारदर्शनान्मृदो वोपादानस्य ॥ स्वभिन्नकुलालादिसंहारदर्शना
त्तदुभयविलक्षणस्य ब्रह्मणो जगत्कर्तृत्वमुपादानत्वं वा संभवतीति चेदिति शंकार्थः ॥
समाधत्ते क्षीरवद्धीति हि शब्दो हेत्वर्थः ॥ यथा लोके क्षीरं बाह्यसाधनान्यनपेक्ष्य स्वदध्या
कारेण परिणमते तद्वद्ब्रह्मापीत्यर्थः ॥ पयोष्ण्यसापेक्षत्वं क्षीरस्यास्तीति वाच्यं ॥ औष्ण्य
स्य दधिभावे त्वरामात्रनिमित्तत्वादिति श्रुतिरप्यसहायस्य ब्रह्मणः कार्यकारित्वं दर्शय १२

ति ॥ न तस्य कार्यं करणं च विद्यते ॥ न तत्समश्चाभ्यधिकश्च दृश्यते ॥ परास्य शक्तिर्विविधै
व श्रूयते स्वाभाविकी ज्ञानबलक्रिया चेति ॥ ननु चेतनत्वे सत्यसहायत्वं हेतुरतो न क्षीरे व्यभि
चार इत्याशंक्य चेतनदृष्टांतेनास्य व्यभिचारमाह ॥ देवादिवदपि लोके ॥ लोक्यतेनेनेति लो
कः शास्त्रं मंत्रार्थवादेतिहासादि तस्मिन्यथा देवाः पितर ऋषय इत्येवमादयश्चेतनाः स्वतः
सिद्धसामर्थ्याः साधनांतरं बाह्यमनपेक्ष्य ॥ संकल्पमात्रेणैव नानादिव्यकार्यकर्त्तारो दृ
श्यंते तद्वद्ब्रह्मापीत्यर्थः ॥ अयं भावः कुलालस्य बाह्याभावे आंतरं च संकल्पादिकमपेक्ष्य का
र्यकर्तृत्वं भवति ॥ देवादयस्त्वांतरसंकल्पमात्रमपेक्ष्य कार्येषु समर्थास्तथात्र यथैकस्य ।
पर्जन्यनेसामर्थ्यं तथैवान्यस्येति नियमाभावात् ॥ न दृष्टांतेन वस्तुव्यवस्थानमिति ॥ ननु नि
रवयवाद्ब्रह्मणो जगत्सर्गं ब्रुवन्समन्वयः सावयवस्यैव नानाकारेण परिणाम इति

सूत्र० १३ न्यायेन विरुध्यते नवेति श्रुत्यादिकदृष्टांतकथने न ब्रह्मणः परिणामित्वभ्रमोत्पत्त्या सं शारी०वृ० २
देहे कार्यकारणभावसंगत्या पूर्वपक्षयति ॥ कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा पू
वाधिकरस्यारंभो न्यादकत्वेन कारणत्वमेतस्य कार्यत्वमिति बोध्यं ॥ ननु ब्रह्म निर
वयवं वा परिणमते सावयवं वा आद्ये कृत्स्नस्य ब्रह्मणः कार्याकारेण परिणामप्रसक्तिः
ततश्च कार्यातिरिक्तं ब्रह्म तस्यातद्दर्शनत्वश्रुतिविरोधश्च कार्यस्य प्रत्यक्षत्वात् द्वितीये
कृत्स्नप्रसक्तिर्नास्ति एकांशपरिणामेप्यंशः परांशस्थिति संभवात्तथापि निष्कलमि
विरोधः० त्यादि निरवयवत्वशब्दकोपः ॥ उभयस्मिन्पक्षेप्यनित्यत्वप्रसंग इति ब्रह्मणः परिणा
मित्वभ्रममूलकः पूर्वपक्षः ॥ सिद्धांतयति ॥ श्रुतेस्तु शब्दमूलत्वात् ॥ तु शंकापति शा
संभूते नतावेकृत्स्नप्रसक्तिरस्ति कुतः श्रुतेः । यथा जगदुपादानत्वं ब्रह्मणः श्रु १३

यते एवं कार्यव्यतिरेकेण ब्रह्मणः सत्त्वं श्रूयते ॥ एतावानस्य महिमेत्यादौ ॥ तथा च श्रुत्यैव वि
वृत्तवादः स्फुटीकृतः नहि परिणामवादे कार्यव्यतिरेकेण सत्त्वं संभवति ॥ तस्मात्कार्यातिरे
केण ब्रह्मणोऽवस्थानश्रुतिर्नोक्तदोष इत्यर्थः ॥ ननु श्रुतिर्वा कथं कार्यातिरेकेण ब्रह्मणः सा
त्वं बोधयेत् कथं युक्तिबाधितत्वादित्यत आह शब्दमूलत्वादिति ॥ ब्रह्मणः शब्दैकप्रमाणकत्व
द्यथा शब्दं कार्योपादानत्वं तदतिरेकेण सत्त्वं चाविरुद्धमित्यर्थः ॥ जगतो ब्रह्मविवर्त्तत्वेन ॥
स्वप्नप्रपंचवन्मायिकत्वान्नद्दुपादानत्वेपि ब्रह्मणो न कृत्स्नप्रसक्त्यादिदोषः स्वप्नसाक्षि
वदित्याह ॥ आत्मनि चैवं विचित्राश्च हि ॥ आत्मनि स्वप्नदृशि एवं ब्रह्मणीव हि यस्मादेते
रेकस्मिन्नात्मनि स्वप्नदृशि निरवयवे विचित्राः सृष्टयः श्रूयंते न तत्र रथा न रथयोगा न
पंथानो भवंत्यथ रथान्रथयोगान्पथः सृजत इत्यादौ स्वप्ने रथादीनामभावेक

सूत्र० १४ र्थं तदुपलब्धिरित्याशंक्योक्तं श्रुतावर्थेत्यादिसूत्रे च शंकैव मायाविदृष्टांतं समुद्धिनोति शारी० सू०
१४ यथा लोके मायावी स्वरूपानुपमर्द्देनैव विचित्रा हस्त्यश्वादिसृष्टयो दृश्यंते॥ तथा ब्र २
ह्मण्यपि विविधसृष्टिरित्यर्थः॥ यच्चोभयोः समो दोष इति॥ न्यायेन कृत्स्नप्रसक्त्यादी
नामनुज्ञायत्वं दर्शयति॥ स्वपक्षदोषाच्च॥ सांख्यादयोऽपि निरवयवं प्रधानं जगत्कारणमा
मीत्यं गौणं चक्रुः॥ तथा च कृत्स्नप्रसक्त्यादिदोषाः सर्वे समानाः॥ अणुवादिनोऽपि परमा
णुद्वयसंयोगेन द्व्यणुकादिसृष्टिमंगीचक्रुः संयोगः किं व्याप्यवृत्तिरव्याप्यवृत्तिर्वाद्ये
वे दृष्टविरोधः कार्ये प्रथिमानुपपत्तिश्च द्वितीये सावयवत्वं विनाऽव्याप्यवृत्तिसंयोगा
नुपपत्तिर्निरवयवत्वव्याकोप इत्यादयो दोषाः समानाः ब्रह्मवादे ते दोषा न संतीत्यत १४
स्मादत्यंतमुपपन्नः परमात्मकारणतावादः एकस्यापि ब्रह्मणो विचित्रकार्यशक्ति

मत्त्वमुक्तं तत्समर्थयति॥ सर्वोपेता च तद्दर्शनात्॥ मायाशक्तिमतो ब्रह्मणो जगत्सर्गं ब्रु
वत्समन्वयोऽशरीरस्य न मायेति न्यायेन विरुध्यते न वेति संदेहे पूर्वोक्तशक्तिमत्त्वविषय
कुशंकानिरासेन॥ तत्समर्थनात्मकत्वात् विषयेमाविषयिभावसंगत्या विरुध्यत इति पू
र्वपक्षे राद्धांतः॥ सर्वोपेता सर्वशक्तियुक्ता परा देवता॥ कुतः तद्दर्शनात् तस्याः सर्वशक्ति
योगस्य श्रुतौ दर्शनादित्यर्थः॥ सर्वकर्मा सर्वकामः सर्वगंधः सर्वरसः सर्वमिदमभ्यात्त
इत्यादिश्रुतिर्द्रष्टव्या॥ विकरणत्वान्नेति चेत्तदुक्तं॥ सर्वशक्तियुक्तानामपि देवादीनां च
क्षुरादिकरणवतामेव विचित्रकार्यकर्तृत्वमवगम्यते। अचक्षुष्कमश्रोत्रमित्यादिना॥
ब्रह्मणो विकरणत्वावगमान्न कर्तृत्वमिति चेत्॥ यदत्रोत्तरं वक्तव्यं तत्सूत्रमेव विजृंभण
त्वाद्देवादिवदपि लोक इत्यादावुक्तं श्रुत्यैकसमधिगम्यत्वान्न तर्केण विरोधाशं

सूत्र० कायथाएकस्य तथैवान्यस्येति नियमाभावादित्यादिकमित्यर्थः ॥ ब्रह्मणो जगत्कर्तृ- शारी०
१५ त्वं हेत्वंतरेणाक्षिपति ॥ न प्रयोजनवत्त्वात् ॥ एवं प्रसक्तकामाद्ब्रह्मणो जगत्सर्गे बुद्ध- २
वत्समन्वयो बुद्ध्या विनाफलेन न सृजति स्वर्त्तानन्येन नत्वासंमतवदिति न्यायेन विरुध्य-
ते न वेति संदेहे पूर्वोक्तकर्तृत्वाक्षेपसंगत्या पूर्वपक्षः ॥ ब्रह्मणो जगत्कर्तृत्वं न संभवति ॥
नित्यतृप्तत्वेन प्रयोजनाभिसंधिविरहितत्वात्स्वेच्छावत्त्वहत्तेः प्रयोजनवत्त्वावगमादिति
अत्र राद्धांतः ॥ लोकवत्तु लीलाकैवल्यं ॥ तुरुक्तशंकानिरासकः ॥ यथा लोके राजतद-
मात्यादीनां फलं विनैव केवललीलारूपाः प्रवृत्तयो दृश्यंते यथा चोच्छ्वासादयः स्वभावादेवो-
त्पद्यंते एवं ब्रह्मणोपि विचित्रकार्यरचनां लीलाकैवल्यं केवललीलामात्रं न फलसापे- १५
क्षं कथं चित्रजनादीनां लीलायां फलसंभवेति नित्यतृप्तस्य ब्रह्मणो लीलामात्रमेत-

दित्यभिप्रायः ॥ विभ्रांतरेण ब्रह्मणः कारणत्वमाक्षिप्य समाधत्ते ॥ वैषम्यनैर्घृण्ये न सापेक्ष-
त्वात्तथा हि दर्शयति ॥ निरवद्याद्ब्रह्मणो जगत्सर्गं ब्रुवत्समन्वयो विषयः सृष्टिकर्ता
ऽसावद्य इति न्यायेन विरुध्यते न वेति विषयेऽत्र एवंमायामय्या लीलया ब्रह्मणो यत् सृष्टत्व-
मुक्तं तस्याक्षेपात्संगतिसिद्धेः पूर्वपक्षः ॥ ब्रह्म किं प्राणिकर्मसापेक्षं जगत्कर्तृ निरपेक्षं
वा नाद्यः ॥ अनीश्वरत्वप्रसंगात् ॥ द्वितीये वैषम्यनैर्घृण्ये प्रसज्येयातां कांश्चित्ति पंगादी-
नत्यंतदुःखिनः सृजति ॥ कांश्चिन्मनुष्यादीन्सुखदुःखसाधारणा ॥ न्कांश्चिद्देवादीनत्य-
त्यंतसुखिन इति वैषम्यं ॥ सर्वसंहर्तृत्वाच्च नैर्घृण्यं ॥ न तत्र सावद्यत्वं प्रसज्येतेति शंकां
निराह ॥ वैषम्यनैर्घृण्ये न स्यातां ॥ कस्मात्सापेक्षत्वात् ॥ प्राणिकर्मसापेक्षत्वात्कर्मानपे-
क्षत्वे निर्वैषम्यादिः स्यान्न सापेक्षत्व इत्यर्थः ॥ ननु सापेक्षत्वेऽनीश्वरत्वं श्रुत्यादिसेवानु-

सू॰त्र॰ सारेण फलदातृराज्ञोऽराजत्वादर्शनात्॥ ईश्वरस्तु पर्जन्यवद्द्रष्टव्यः। यथा न बीजे स शारी॰ब्र॰
९६ त्यपि न पर्जन्यं विनांकुरोत्पत्तिस्तद्वदिति कर्मणैवोपपत्तौ किमर्थमीश्वरस्वीकार इति। १
चोद्यं स्तुन्यापराकृतमित्यादिभाष्येण द्रष्टव्यं॥ नन्वीश्वरस्य कर्मसापेक्षत्वं कुत इत्यत आह
तथा हि दर्शयतीति॥ श्रुतिः स्मृतिश्चेत्यर्थः॥ एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोके
भ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इति पुण्यो वै पुण्येन कर्मणा
भवति पापः पापेनेत्याद्या श्रुतिः॥ यमुन्निनीषत एवं नेतुमिच्छतीश्वरस्तं साधु कर्म कारया
तिः पूर्वजन्मकृतसुकृतवशादिति योजना॥ पुण्यः सुखी पापो दुःखी॥ स्मृतिस्तु ये यथा मां
प्रपद्यन्ते तांस्तथैव भजाम्यहमित्याद्या द्रष्टव्या॥ न कर्माविभागादिति चेन्नानादित्वात्॥ सदेव
सोम्येदमग्र आसीदेकमेवाद्वितीयमित्यादि॥ नासृष्टेः प्राग्विभागावधारणा॥ न तदा ९६

नीं कर्मास्ति॥ ततः कर्मापेक्षया विषमा सृष्टिरित्यसंगतमिति चेत्॥ न अनादित्वात्संसारस्य।
बीजांकुरवत्॥ हेतुहेतुमद्भावोपपत्तेरित्यर्थः॥ पूर्वसृष्टिसंपादितधर्माधर्मप्रपंचस्यात्यं
तिकनाशाभावात् तदपेक्षयोत्तरसृष्टौ न किंचिद्बाधकमिति भावः॥ ननु संसारस्यानादित्वं
कुत इत्यत आह॥ उपपद्यते चाप्युपलभ्यते च॥ संसारस्यानादित्वमुपपद्यते च॥ अन्य
थाऽकस्मादेव सृष्ट्यंगीकारे मुक्तस्यापि पुनर्जन्मप्रसंगात् पूर्वसृष्टिसादृश्यानुपपत्ते
श्च॥ श्रुतिस्मृत्योः संसारस्यानादित्वमुपलभ्यते च॥ अनेन जीवेनात्मनानुप्रवि
श्य नामरूपे व्याकरवाणीति प्राणनिमित्तेन जीवशब्देन सृष्ट्यादौ शासरमभिजल्पन्
प्राणधारणादिसंसारस्यानादित्वं दर्शयतीति॥ धाता यथापूर्वमकल्पयदित्यादिश्रु
तिरपि॥ पूर्वकल्पसद्भावं दर्शयति॥ स्मृतिरपि संसारस्यानादित्वमाह॥ न रूपमस्ये

सूत्र० ९७ हतयोपलभ्यतेनांतोनचादिर्नचसंप्रतिष्ठेति॥ स्मृत्यर्थस्तु॥ अस्यसंसारवृक्षस्यक शारी० टी०
ल्पितस्यरूपंपारमार्थिकंस्वरूपंब्रह्मतयाघटादिवदिहसंसारस्यनाहंतैर्व्यवहार २
भूमौनोपलभ्यतेनचांतोऽवधिरस्यविनाब्रह्मविद्यामुपलभ्यतेनाप्यादिः॥ अनिर्वच
नीयत्वादेवतापिसंप्रतिष्ठामध्यमिति॥ इदानींपरपक्षप्रतिषेधप्रधानपादमारब्धु
कामःस्वपक्षेनिर्दुष्टतामुपसंहरति॥ सर्वधर्मोपपत्तेश्च॥ पूर्वाधिकरणेकर्मवशा
दीश्वरस्यविषमसृष्टिहेतुत्वमुक्तंतदुक्तविषयसृष्टिप्रयोजककर्मणःसत्त्वात्तदुपा
दानत्वप्रयोजकस्यगुणत्वस्याऽभावान्नोपादानमितिप्रत्युदाहरणसंगत्यास्यारंभः
निर्गुणादब्रह्मणोजगत्सर्गंकुर्वन्तमनुयोयन्निर्गुणंतन्नोपादानं॥ यथागंधवदितिन्या
येनविरुध्यतेनवेतिसंदेहेविरुध्यतइतिप्राप्तेब्रूमः॥ सर्वधर्मोपपत्तेश्चेति॥ सर्वज्ञत्वा ९

ममपरज्ञानंनष्टंइतिपरज्ञानविहीनानां परतत्त्वज्ञातिविशिष्टविः ४

रणत्वसर्वज्ञत्वादयःकारणधर्मायेविद्यंतेतेषांपूर्वोक्तप्रकारेणब्रह्मण्युपपत्तेर्ब्रह्मैवा
जगत्कारणमित्यौपनिषदंशास्त्रंनिर्दोषमित्यर्थः॥ अयंभावः॥ यन्निर्गुणंतन्नोपादानमिति
व्याप्तौकिंपरिणामित्वाभावोव्यापकउतविवर्त्तोपादानत्वाभावः॥ नाद्यः इष्टत्वात्॥ नद्वि
तीयः॥ आरोपिताऽनित्यत्वोपादानेज्ञानजात्यादौव्यभिचारात् तस्मान्निर्गुणत्वेब्रह्मणोवि
वर्त्तजगदुपादानत्वमविरुद्धमितितस्मान्नकथमन्वयस्याविरोधइतिसिद्धं॥ इतिश्रीमद्ब्र
ह्मसूत्रवृत्तौद्वितीयाध्यायस्यप्रथमःपादः॥ १॥ एवंतावत्प्रबंधेनमुमुक्षूणांसम्यक्ज्ञानो
पायवेदांतानांसमन्वयःप्रतिपादितः॥ तस्मिन्समन्वयेपरपरिकल्पितदूषणनिरा
सेनस्वपक्षःस्थापितः॥ इदानींमुमुक्षूणांअद्वैतशास्त्रेनिर्विचिकित्सप्रवृत्तिसिद्ध्ये
परमतदूषणप्रधानः॥ पादआरभ्यते॥ रचनानुपपत्तेश्चनानुमानंसांख्यमत

श्रेष्ठत्वात्।

सू॰त्र॰ स्यशिष्टपरिगृहीतत्वेनाभ्यर्हितत्वात्॥ तदादौ निराक्रियते॥ पूर्वमीक्षतेर्नाशब्दमित्या ब्रारी॰ह॰
१८ दिना प्रधानपरत्वेन वेदांतानां व्याख्यानं निरस्तमिह तु प्रधानसाधकवेदनिरपेक्षयु २
क्तीनामाभासत्वमुच्यत इति न पौनरुक्त्यं॥ अत्र सांख्यादिमतनिरासेन समन्वयस्य
तन्मतविरोधनिरासद्वारा दृढीकरणादस्य पादस्य कृत्स्नाध्यायस्य संगतौ बोध्ये
समन्वये विरोधनिरासेन स्वपक्षस्थापनपर प्रथमपादेनाऽस्य पादस्योपजीव्योपजी
वकभावः संगतिः॥ स्वपक्षस्थापनं विना परमतनिरासायोगात् स्वसिद्धांतज्ञानहेतुत्वा
द्वा पूर्वपादस्योपजीव्यत्वं बोध्यं परमतनिरासपरत्वादेव सर्वेषामधिकरणानां पा
दसंगतिः॥ सर्वधर्मोपपत्तेश्चेत्यनेन ब्रह्मणि कारणधर्माणामुपपत्तिरित्युक्ते तेषां
प्रधानएवोपपत्तिः किं न स्यादितिन्यायोपस्थाननिरासादनयोरधिकरणयो॥ १८

प्रकृतेः५

राक्षेपलक्षणाऽवांतरसंगतिः॥ फलं तु पादसमाप्तिपर्यंतं परमतयुक्तिविरोधाऽविरोधा
भ्यां समन्वयाऽसिद्धितसिद्धी इति विवेकः॥ तत्र प्रधानमचेतनं जगदुपादानमिति सांख्य
सिद्धांतो विषयः॥ संदिह्यमानस्यैवाधिकरणविषयत्वात् स च सिद्धांतः संदिह्यते किं प्रमाण
मूलो भ्रममूलो वेति॥ तत्र प्रमाणमूलएवेति युक्तं तथा हि बाह्याध्यात्मिकं जगत्सुखदुः
खमोहात्मकसामान्योपादानकं भवितुमर्हति तदन्वितत्वात्॥ यद्यदन्वितं तत्तदुपादानकं
यथा मृदन्वितं घटादिकं॥ मृदुपादानकमिति॥ तथा च यदेवं सुखदुःखमोहात्मकं किंचि
त्सिद्धं॥ तदेव सत्वरजस्तमोगुणात्मकं प्रधानमिति प्रामाणिकः सांख्यसिद्धांत इति प्रा
प्ते ब्रूमः॥ उक्तानुमानसिद्धं प्रधानं न जगदुपादानं॥ कुतः रचनानुपपत्तेः॥ चेतनाऽप्रेरिता
त्स्वेष्टव्यज्ञानशून्यात्प्रधानाऽदनेकविधविचित्रजगद्रचनानुपपत्तेरित्यर्थः॥ लोके

सू॰वृ॰
१९५

विचित्रप्रासादादिरचनायां बुद्धिकशलशिल्पादिकार्यं तद्दृष्टांतादितिभावः ॥ सूत्रेनचशरे
नहेतोः स्वरूपासिद्धिं समुच्चिनोति ॥ सुखादीनामांतरत्वप्रतीतेस्तदन्वितत्वंजगतोसिद्धंत
स्मादप्रामाणिकः सांख्यसिद्धांत इति ॥ प्रवृत्तेश्च ॥ साम्यावस्थापन्नागुणाहि प्रधानंसा
म्यावस्थायां च न किंचित्कार्यं जायते ॥ किंतु साम्यावस्थात्रच्यवते नगुणानामंगांगिभावेजा
ते कार्यस्योदय इति प्रक्रिया सा न युक्तान्योकेनचेतनरथादिप्रवृत्तेश्चेतनाधीनत्वदर्शना
त् प्रधानस्य साम्यावस्थाप्रच्युतिरूपप्रवृत्तेश्चेतनप्रेरणं विनानुपपत्तेरित्यर्थः ॥ पयों
बुवच्चेत्तत्रापि ॥ ननु अचेतनस्य स्वयं प्रवृत्तिरपि दृश्यते ॥ यथा क्षीरं वत्सविवृद्धये स्वयमेव प्र
वर्त्तते यथा वा जलं स्वयमेव स्यंदते ॥ तथा पयोंबुवत्प्रधानं स्वयमेव प्रवर्त्तेद् इति चेत् ॥ त
न यतस्तत्रापि परमात्मा प्रेरकः श्रूयते ॥ योप्सु तिष्ठन्नित्यादिना ॥ तथा च पञ्चत्वान्नयमेवरः

शा॰रा॰हृ॰
२
१९५

पयोंबुनोरितिभावः ॥ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ स्वैपि च तस्वतंत्रं प्रधानं जगदु
पादानं ॥ कुतः व्यतिरेकानवस्थितेः ॥ कौ सांख्यानां मते योगुणाः साम्येनावतिष्ठमानाः प्र
धानं ॥ ततव्यतिरेकेण प्रधानस्य प्रवर्त्तकं निवर्त्तकं वा किंचिद्बाह्यमपिस्यमवस्थितेः
च्छक्तिपुरुषस्तूदासीनो न प्रवर्त्तको न निवर्त्तक इत्यतोऽनपेक्षं प्रधानमनपेक्षत्वाच्च कदा
चित्प्रधानं महदाद्याकारेण परिणमते ॥ कदाचिन्न परिणमत इत्येतद्युक्तमीश्वरस्य
तु सर्वज्ञत्वात्सर्वदाशक्तित्वान्महामायत्वाच्च प्रवृत्तस्य प्रवृत्तीनविरुध्येते स्वतंत्रस्य तस्य
कारणत्वे सर्वदा कार्यप्रसक्तौ केवलचिदपि कार्यव्यतिरेकस्यावस्थितत्वऽभावप्रसं
गादित्यर्थः ॥ तदपि कुतः ॥ स्वानपेक्षत्वात् ॥ स्वतंत्रस्य प्रधानस्याचेतनादिसहकार्यंत
राऽनपेक्षत्वाभ्युपगमात्तयेत्यर्थः ॥ अन्यत्राभावाच्च न तृणादिवत् ॥ ननु तृणो

सूत्र० दकादिकं निमित्तांतरनिरपेक्षमेव क्षीराकारेण परिणमते ॥ तद्वत्प्रधानमपीति चेन्न ॥ अतः शारी० टी०
२० न्यत्राभावात् धेन्वादेरन्यत्र बलीवर्दादौ तृणादेः क्षीरभावस्याभावादित्यर्थः ॥ तथा च धे १
न्वादिसापेक्षमेव तृणादिकं क्षीरीभवति निरपेक्षत्वे बलीवर्दादावपि क्षीरीभावप्रसंगइ
तिभावः ॥ अभ्युपगमेप्यर्थाभावात् ॥ प्रधानस्य स्वतः प्रवृत्त्यभ्युपगमे पुरुषार्थस्यापेक्षा
भावे प्रसंगादित्यर्थः ॥ न चेष्टापत्तिः ॥ प्रधानमचेतनं चेतनस्य पुरुषार्थं साधयितुमेव प्र
वर्त्तत इति स्वाभ्युपगमविरोधादिति भावः ॥ यच्चार्थाभावात्प्रयोजनाभावादित्यर्थस्तथा
हि न तावत्प्रधानप्रवृत्तिः पुरुषस्य भोगापवर्गार्था भोग्यानामानंत्याद्ध्यनिर्मोक्ष
प्रसंगान्नाप्यपवर्गार्था भोगाऽभावप्रसंगात् प्रधानस्याप्रवृत्तिप्रसंगाच्च ॥ पुरु
षस्य स्वरूपेणावस्थितिलक्षणस्य मोक्षस्य प्रधानाऽप्रवृत्त्यैव सिद्धेस्तस्मात्प्र २०

योजनाभावात्प्रधानस्य जगद्धेतुत्वं ॥ पुरुषाश्मवदिति चेत्तथापि ॥ ननु पुरुष एव प्रधान
स्य प्रवर्त्तकः ॥ ननु स्वयमप्रवर्त्तमानः कथं परं प्रवर्त्तयेदिति चेत्पुरुषाश्मवदिति ब्रूमः ॥ लो
के यथा पंगुः पुरुषः स्वयमप्रवर्त्तमानोंऽधं प्रवृत्तिशक्तिमंतं प्रवर्त्तयति ॥ यथा वाऽयस्कांतो
श्मा सन्निधिमात्रेणाऽयः प्रवर्त्तयति एवं पुरुषः प्रवर्त्तक इति चेन्न ॥ यतस्तथापि दोषाणा
मनिर्मोक्षः ॥ तथा हि प्रधानस्य पुरुषप्रेर्यत्वे प्रधानं स्वतंत्रमिति स्वाभ्युपगमविरोधः
पुरुषस्य प्रवर्त्तकत्वे कूटस्थत्वहानिः स्वस्य व्यापारं विना प्रवर्त्तकत्वायोगात् ॥ पंगोर
पि वाग्व्यापारस्य सत्त्वादयस्कांतस्यत्व नित्यसन्निधिरेव व्यापारः प्रधानपुरुषसन्निधे
र्नित्यत्वेन व्यापारत्वायोगः नित्यस्यापि व्यापारत्वे प्रधानप्रवृत्त्यविच्छेदप्रसंगइत्या
दयो दोषा द्रष्टव्याः ॥ ब्रह्मणस्त्वाविद्यकं प्रवर्त्तकत्वमिति न कोप्यस्य हानिः ॥ अयंपिता

सूत्रं० नुपपत्तेश्च ॥ अपि च गुणत्रयसाम्यावस्था प्रकृतिः । साम्यावस्थाप्रच्युत्या गुणानामं शारी० टी०
२१ गांगिभावे महदाद्युत्पत्तिरिति वदतां सांख्येनेदं वक्तव्यं प्रकृतिः किं कूटस्थोत विकारि २
णी आद्ये परस्परानपेक्षाणां गुणानां साम्यावस्थाप्रच्युतत्वांगांगिभावानुपपत्तेः कार्या
नुदयप्रसंगः प्रच्युत्यंगीकारे स्वरूपहान्यापत्तेः द्वितीये किं स्वतः प्रच्युतिरुतान्यतः
नाद्यः सदा कार्यप्रसंगात् ॥ न द्वितीयः पुरुषस्योदासीनत्वादन्यानभ्युपगमाच्च ॥ अतः
प्रच्युत्यभावेनांगांगिभावानुपपत्तेः कार्याभावप्रसंग इत्यर्थः । अन्यथानुमितौ च
ज्ञशक्तिवियोगात् ॥ नन्वनपेक्षस्वभावाः कूटस्थाश्च गुणा नानुमीयन्तेऽस्माभिः किं तु ॥
अन्यथा प्रकारान्तरेणैव यथा कार्योत्पत्तिसंभवस्तथानुमीयन्ते ॥ कार्यानुमेयत्वात्तथाप्य
नपेक्षत्वांगांगिभावासंभवात्कार्योत्पादः संभवतीति चेन्न ज्ञशक्तिवियोगाद्गुणानां २१

ज्ञानशक्तिरहितत्वादित्यर्थः ॥ अयं भावः ॥ अचेतनानां गुणानां साम्यावस्थाप्रच्यु
त्यादियोग्यत्वेऽपि प्रच्युतेर्निमित्तत्वासंभवात्किंचित्तु वक्तव्यं तथा चान्यस्य निमित्तस्यासं
भवेन ॥ सतो वैषम्ये सर्वदा वैषम्यं स्यात् ॥ सतोऽप्यवैषम्ये सदा साम्यप्रसंग इत्यंगांगित्वानु
पपत्तिस्तदवस्थेति कार्यानुत्पादोऽपि तदवस्थ इति ॥ विप्रतिषेधाच्चासमंजसं ॥ सांख्या हि
क्वचिन्महतः पंचतन्मात्रसर्गं वदन्ति क्वचिदहंकारात् ॥ क्वचिदेकादशेन्द्रियाणि ॥ क्वचि
द्दींद्रियाणि त्वगिंद्रियेन सर्वव्याप्तसप्तेंद्रियाणीति स्थापयन्ति ॥ तथान्यपरस्परविप्रतिषे
धादसमंजसं सांख्यमतमित्यर्थः ॥ तस्मात्सांख्यमतस्य भ्रान्तिमूलत्वात्तद्दोषयुक्ति
विरोधः समन्वयस्य नास्तीति सिद्धं ॥ ननु प्रसंगस्य ब्रह्मोपादानकत्वे ब्रह्मवच्चेतनत्वं स्या
त्कारणगुणानां स्वकार्येष्वप्यभावात् ॥ इत्याशंक्येमं नियमं तदीयप्रक्रियया व्यभिचारा

सूत्र० २२ यति॥ महद्दीर्घवद्वा ह्रस्वपरिमंडलाभ्याम्॥ प्रपंचस्य प्रधानानिष्टाऽऽख्यत्वादिगुणाऽना शा०रो० ह० २
नयात्॥ प्रधानानुपादानकत्वं ब्रह्मगुणचेतनत्वाऽनन्वयात्॥ ब्रह्मोपादानकत्वं नस्या
दितिदृष्टांतसंगत्यास्यारंभः॥ यद्यपिस्वपक्षेदोषनिरासात्मकस्याधिकरणस्यारणनात्र
संबंधः किंतु स्मृतिपाद एव॥ तथाप्युक्तावांतरसंगतिर्जोमादिहल्लिखितमितिमंत
व्यं॥ अत्र चेतनाद्ब्रह्मणो जगत्स्वंबुबुदसमन्वयो विषयः॥ स किंकारणगुणाःका
र्यस्वसमानजातीयगुणारंभका इति न्यायेन विरुध्यते न वेति संदेहे विरुध्य इति प्रा
प्ते॥ व्यभिचारान्नविरोध इति राद्धांतः॥ सूत्रे वाशब्दश्चार्थे यथोक्ताणुसृष्टुच यं ब्रूते तथा
चतुरस्रपरिमंडलाभ्यां॥ द्व्यणुकपरमाणुभ्यां॥ महदाद्यणुवच्चेतनाद्ब्रह्मणोऽचेत
नं जगज्जायतीतियोजना॥ वैशेषिका हि कस्याऽऽदरणोभ्यं॥ द्व्यणुकात्महद्दीर्घं च त्र्यणु २२

कं जायते॥ द्व्यणुकगतह्रस्वत्वाणुत्वे तु॥ त्र्यणुके स्वसमानजातीयह्रस्वत्वाणुत्वे नारभे
ते॥ किंतु॥ द्व्यणुकगतद्वित्वसंख्या॥ त्र्यणुके महत्त्वादिकमारभत इति वदंति॥ एवं प
मंडलात्परिमाणोरणुद्व्यणुकं जायते॥ परमाणुगतपारिमांडिल्यं तु द्व्यणुके पारिमांडि
ल्यं न जनयति॥ किंतु॥ परमाणुगतद्वित्वसंख्या द्व्यणुकेऽणुत्वादिकमारभंत॥ इति प्रक्रि
यां दर्शयंति॥ एवं दर्शयतां वैशेषिकाणां॥ कारणगुणाः कार्ये स्वसमानजातीयगुणा
रंभका इति नियमाभासं वदतां कथं तज्ज्ञानं भवेत्॥ व्यभिचारस्य स्फुटत्वादिति तात्पर्यं॥
एतेन शिष्टापरिग्रहा अपि व्याख्याता इत्यस्यायं प्रपंच इति॥ नेते न पौनरुक्त्यं शंकनीयमि
ति॥ इदानीं प्रकृतं परमतनिरासमुपक्रमते॥ उभयथापि न कर्मातस्तदभावः॥ प्रास
गिकाऽव्यवहितेनाऽस्य संगतिर्नापेक्षितेति व्यवहितेनोच्यते॥ ननु प्रधानस्य चेतनाऽ

सूत्र० २३ नधिष्ठितत्वात्॥ कारणत्वाभावेतर्हिचेतनाधिष्ठिताः परमाणवः॥ कारणंजगत इतिप्र- शारी० वृ०

त्कदाहरणेनाप्यारंभः॥ अत्र परमाणुप्रक्रियया जगदुत्पत्तिरिति वैशेषिकेसिद्धांतो वि- २

षयः स किंमानमूलो भ्रांतिमूलो वेति विशये॥ मानमूल इति प्राप्ते ब्रूमः॥ वैशेषिकाः ख-

लु कर्मणा सृष्टेः पूर्वं निश्चलयोः परमाण्वोः संयोगेद्व्यणुकाद्युत्पत्ते॥ त्पत्तिरितिवदं-

ति तस्य कर्मणः किंनित्त॥ निमित्तमभ्युपगम्यतेन वा आद्ये कर्मनिमित्तत्वेन॥ प्र-

सिद्धंजीवप्रयत्नाद्यभिघातादिकमंगीकर्तव्यंन॥ हि तत्संभवति सृष्ट्युत्तरकालीनत्वा-

क्रियानुपपत्तिः २ त्तस्य द्वितीये कर्मानुत्पत्तिः॥ अतउभयथापि न कर्म॥ अतःकर्माभावात्तदभावः द्व्यणु-

कादिक्रमेण सृष्ट्युत्पादाभाव इत्यर्थः॥ यद्वा॥ जीवादृष्टंचेशादाद्यंकर्मपरमाणुष्वि-

तितत्सिद्धांतस्तथापि तदृष्टंकिंजीवनिष्ठंवा परमाणुनिष्ठंवा॥ उभयथापि न कर्म॥ २३

अदृष्टस्याचेतनस्य कर्माभिमुख्यायोगात्तथात्वे सर्वदासृष्टिप्रसंगात्॥ नंचजीवोऽदृष्टस्यप्रे-

रक॥ तदानींतस्यज्ञानवत्त्वाभावात्॥ ननुवैशेषिकाभिमतईश्वरः प्रेरकइतिचेदुच्यतेअत-

सर्गाभावइत्यर्थः॥ यद्वा॥ परमाण्वोः संयोगोत्पत्तौ सृष्टिर्विभोगोत्पत्तौ च प्रलयस्तयोश्च

संयोगविभागयोः कर्मैवहेतुरिति तत्सिद्धांतस्तथाच संयोगहेतुः॥ कर्म नास्तीत्युक्तं॥ एवं

विभागहेतुकंकर्मनास्तिनिमित्तस्यादृष्टस्यनोदनादेरभावात् दृष्टंचभोगायमिवनप्र-

लयायमित्युभयथापिनकर्मातः संयोगविभागहेतुकर्माभावात्तदभावस्तयोः सृष्टिप्रल-

ययोरभावइत्यर्थः॥ तस्मादनुपपन्नः परमाणुकारणवादः॥ समवायाभ्युपगमाच्चसा-

म्यादनवस्थितेः॥ तदभावइत्यनुषंगः॥ तस्यपरमाणुकारणवादस्यासंभवइत्यर्थः॥

कुतः परमाणुद्व्यणुकयोः समवायाभ्युपगमात्॥ अभ्युपगमेकोदोषस्तत्राह

सू॰ २४ साम्याद नवस्थितेश्चेति ॥ यथाह्यणुकं परमाणुभ्यामत्यंतं भिन्नं सत्समवायमपेक्षते । एवं
समवायोऽपि समवायिभ्यामत्यंतं भिन्नः सन्नन्येन समवायेन समवायिभ्यां संबध्येत भिन्नत्व शारी॰सू॰ २
साम्यात् संबंधस्य संबंधत्वादर्शनात् ॥ तथा च तस्यापि भिन्नत्वसाम्यात्समवायांतरमित्यन
वस्था स्यादित्यर्थः ॥ स्वरूपस्य संबंधत्वे समवायलोपप्रसंग इति बोध्यं तथा च समवाया
सिद्धौ समवेतद्व्यणुकादिसृष्ट्यसिद्धिः स्यादिति भावः ॥ नित्यमेव च भावात् ॥ परमाणू
नां प्रवृत्तिस्वभावत्वे ॥ प्रवृत्तेर्नित्यमेव भावात् ॥ प्रलयाभावप्रसंगः ॥ निवृत्तिस्वभावत्वे ॥
निवृत्तेर्नित्यमेव भावात्सृष्ट्यभावप्रसंग इति भावः ॥ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ चतु
र्विधाः परमाणवो रूपस्पर्शादिमंतो नित्याश्चाणवश्चेति वैशेषिकसिद्धांतः । स नोपप
द्यते ॥ तथा हि परमाणवोऽनित्याः स्थूलाश्च भवितुमर्हंति रूपादिमत्त्वात्पटादि २४

वत्पटो हि रूपादिमत्त्वात् ॥ स्वकारणतंत्वपेक्षया स्थूलोऽनित्यश्च तद्वज्जगत्कारणस्यापि
रूपादिमत्त्वे चानित्यत्वप्रसक्तौ कारणापेक्षया स्थूलत्वं स्यादिति जगत्कारणस्य रूपा
दिमत्त्वमिति तात्पर्यं सूत्रार्थस्तु मन्वते जगत्कारणस्य रूपादिमत्त्वात् ॥ अणुत्वनित्य
त्वविपर्ययः स्थूलत्वमनित्यत्वं च प्रसज्येत लोके रूपादिमतः पटादेस्तथा दर्शनादिति ॥
उभयथा च दोषात् ॥ रूपरसगंधस्पर्शात्मिका पृथिवी स्थूला ततो रूपरसस्पर्शात्मि
का आपः सूक्ष्मा रूपस्पर्शात्मकं तेजः सूक्ष्मतरं स्पर्शात्मको वायुः सूक्ष्मतम इत्यनुभवा
गमसिद्धा प्रक्रिया ॥ तत्र पृथिव्यादिवत्परमाणवोऽप्युपचितापचितगुणात्मका
कल्प्यं तेन वा न्याय्येणुत्वव्याघातः ॥ उपचितापचितगुणात्मकपृथिव्यादेः स्वरूपोप
चयदर्शनात् ॥ गुणानां द्रव्यादतिरिक्तत्वेपि ॥ तादृशगुणत्वेन ॥ पृथिव्यादौ

सूत्र० ३५ नाणुपञ्चयदर्शनात् ॥ अणुत्वव्याघातश्च न वा गुणगुणिनोर्भेदः संभवति ॥ भेदे वा स्वस्वगु- शारी० टी०
णगुणिभावानुपपत्तेः स्थितौ तत्कार्यपृथिव्यादिषु रूपाद्यनुपलंभप्रसंग इत्युभयथापि २
दोषादनुपपन्नः परमाणुकारणवादः ॥ अपरिग्रहाच्चात्यंतमनपेक्षा ॥ प्रधानवा-
दो हि सत्कार्यत्वाद्यंशेन मन्वादिभिः शिष्टैः परिगृहीतः परमाणुकारणवादस्तु केनचिदं-
शेन केश्चिदपि शिष्टैः परपरिगृहीत इति शिष्टापरिग्रहाच्चात्यंतमनपेक्षा परमाणुकार-
णवादे कर्त्तव्या वेदविद्भिरित्यर्थः ॥ सूत्रे च शब्देन वैशेषिकाभिमतषट्पदार्थासंभवः ॥
सूचितः ॥ स चासंभवः प्रतिपादितो भगवता भाष्यकृता तस्माद्भ्रांत्येकमूलत्वे वैशेषिकादिम-
तेन न समन्वयस्य विरोध इति सिद्धं ॥ समुदाय उभयहेतुकेपि तदप्राप्तिः ॥ वैशेषिकस्याव- २५
त्परिमाणभेदेन देहादेवशाश्वतत्वविनाशित्वांगीकारादात्मनः स्थायित्वांगीकाराच्चा-

र्द्धवैनाशिकः सर्वक्षणिकत्ववादिनस्तु पूर्णवैनाशिका इत्यर्द्धवैनाशिकवैशेषिकमत-
निराकरणानंतरं पूर्णवैनाशिकमतं बुद्धिस्थमिदानीं निराक्रियत इत्यवांतरसंग-
तिरुद्दिष्टस्य व्याख्या ॥ तत्र तावद्बुद्धमुनिना त्र्यागम उपादिष्टः ॥ स चागमो वैभाषिकसौत्रांति-
कविज्ञानवादिसर्वशून्यवादाख्यश्चतुर्विधशिष्यप्रतिपत्तिवैचित्र्याच्चतुर्विधो भव-
ति ॥ तत्र वैभाषिकसौत्रांतिकयोर्ज्ञानं तदतिरिक्तपदार्थाश्च सर्वे क्षणिकाः सत्यभूताः संति
इयान्परं भेदो वैभाषिकस्य घटादिपदार्थाः प्रत्यक्षाः सौत्रांतिकस्य तु ज्ञाने घटाद्याका-
रैरुत्पन्ने तेनाकारेण प्रत्यक्षेणाप्रत्यक्षाः घटादयोऽनुमीयंत इति ॥ तत्रादौ वैभाषिकसौ-
त्रांतिकयोर्बाह्यार्थास्तित्वाविशेषोऽनयोर्मतमेकीकृत्य तन्मतं प्रमाणसूत्रं भाति सूत्रवे-
ति संदेहे प्रमाणसूत्रमिति ज्ञातं तथाहि पृथिव्यप्तेजोवायवश्चत्वारि भूतानि चतुर्विधपरमा-

सूत्र० २६ णुपुंजस्वरूपाणि एवं भौतिकानि रूपादिविषयेंद्रियाणि परमाणुपुंजस्वरूपाणि न हि परमा शारी० द०
णुसमूहव्यतिरेकेण अवयविभूतं किंचित्कार्यमस्तीति ॥ परमाणुहेतुकः पृथिव्यादिसमुदा २
यो बाह्यः ॥ आध्यात्मिकश्च समुदायः स्कंधहेतुकः ॥ तथाहि ॥ रूपविज्ञानवेदनासंज्ञासंस्का
राख्याः पंचैते स्कंधाः ॥ तत्र रूपस्कंधः सविषयेंद्रियाणि विषयाणां रूपादीनां आध्यात्मि
कत्वमाध्यात्मिकेंद्रियसंबंधादिष्टव्यं ॥ अहमित्यालयविज्ञानप्रवाहो विज्ञानस्कंधः सुखा
दिप्रत्ययो वेदनास्कंधः ॥ गौरश्व इत्यादिशब्दादिविशिष्टवस्तुविषयिकः सविकल्पकप्रत्य
यः संज्ञास्कंधः ॥ रागद्वेषमोहधर्माधर्माः संस्कारस्कंधः ॥ तत्र विज्ञानस्कंधश्चित्तमि
त्यात्मेति च गीयते ॥ इतरे स्कंधाश्चैत्ताः ॥ एतेषां चित्तचैत्तानां स्कंधानां समुदायः
सर्वव्यवहारास्पदं ॥ आध्यात्मिकश्च स्कंधहेतुक इति सर्वक्षणिकत्ववादिनो वैभा २६

समुदायकर्तुः ५ इंद्रियद

षिकसौत्रांतिकयोर्मतं ॥ तन्निराकरोति समुदाय उभयहेतुकेऽपि तदप्राप्तिरिति ॥ उभयहेतु
केऽपि समुदाये ॥ परमाणुहेतुके बाह्यसमुदाये ॥ स्कंधहेतुके आध्यात्मिकसमुदाये च तदप्रा
प्तिस्तस्य समुदायस्याप्राप्तिरित्यर्थः ॥ अचेतनानां परमाणूनां स्कंधानां च स्वतः समुदा
याऽयोगादन्यस्य च स्थिरस्य चेतनस्य समुदायकर्तुरनभ्युपगमादिति सूत्रवाक्यशेषः
इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥ ननु संहंतुर्भोक्तुश्चेतनस्याभावेऽपि सं
घात उपपद्यते ॥ तथाहि अविद्यासंस्कारो विज्ञानं नामरूपषडायतनं स्पर्शो वेदनेत्ये
वंजातीयकानां ॥ अविद्यादीनामितरेतरप्रत्ययत्वादितरेतरकारणत्वाद्घटीयंत्रवदनिशा
मावर्तमानेष्वविद्यादिष्वर्थाक्षिप्तः संघात उपपद्यत इति शंकार्थः ॥ कोऽयं प्रत्ययते जन
कत्वेन गच्छतीति व्युत्पत्त्या प्रत्ययशब्दः कारणवचनः ॥ अविद्यादीनामयमर्थः ॥

सू०भा०
२७

क्षणिकेषु स्थिरत्वनित्यत्वादिबुद्धिरविद्या सा च विषयेषु रागाद्यात्मकसंस्कारहेतुः स शारी०अ०
च संस्कारो गर्भस्याद्यं विज्ञानं जनयति तस्माच्चालयविज्ञानात्पृथिव्यादिचतुष्टयं शरी २
रस्य समुदायस्य कारणभूतं जायते ॥ तदेव नामाश्रयत्वान्नामेत्युच्यते तच्च नाम
सितासितादिरूपं तच्छरीरं जनयति ॥ गर्भभूतस्य देहस्य कललबुद्बुदाद्यवस्था ना
मरूपशब्दार्थत इति पर्यवसन्नं ॥ पृथिव्यादिचतुष्टयं नामरूपं च शरीरं विज्ञान
धातुश्चेति षडायतनानि यस्येंद्रियजातस्य तत्षडायतनं ॥ नामरूपेंद्रियाणां मिथः
संबंधः ॥ स्पर्शस्ततः सुखादिका वेदना ततः पुनरविद्यादय इति निराकरोति नेति
कुतः उत्पत्तिमात्रनिमित्तत्वात् ॥ अयमर्थः ॥ द्विविधो हि कार्योत्पादस्त्वयाभिमतः हे
त्वधीनः कारणसमुदायाधीनश्चेति। तत्र हेत्वधीनो यथा बीजादंकुरः ततः अंकुरात्पत्रं पत्रा २७

त्कांड इत्यादौ ॥ कारणसमुदायाधीनो यथा ॥ पृथिव्यप्तेजोवाय्वाकाशकालविशेषाणां मे
लने सति ॥ तेभ्य उपकृताद्बीजादंकुरो जायते ॥ आध्यात्मिकः कार्योत्पादोऽपि पूर्ववद्द्विविध
स्तत्राद्यो हेत्वधीनकार्योत्पादोऽविद्यादीनां द्वितीयस्तु पृथिव्यप्तेजोवाय्वाकाशालयविज्ञाना
नां समवायात्कार्यस्योत्पाद इति ॥ कार्येऽकुरादौ काठिन्यस्नेहपाकादीनां दर्शनात्पृथिव्या
दीनां कारणत्वमूह्यं ॥ उभयविधेऽपि कार्योत्पादे नचेतनापेक्षेति ॥ तत्राद्यं संघातकल्पद्विती
यं कार्योत्पादं हेतुसमुदायाधीनं दूषयति ॥ उत्पत्तिमात्रनिमित्तत्वादिति ॥ अविद्यादीनां मि
तरेतरकारणत्वेऽप्युत्पत्तिमात्रनिमित्तत्वात् ॥ न हेतुसंघाताधीनः कार्योत्पादः संभवति संहं
तुः स्थिरस्य चेतनस्यानंगीकारादित्यर्थः ॥ सर्वक्षणिकत्ववादिनां हेत्वधीनोऽपि कार्योत्पा
दो न संभवतीत्याह ॥ उत्तरोत्पादे च पूर्वनिरोधात् ॥ कार्यकालेऽविद्यमानस्यैव मृदादेः

सूत्रं॰ २८

कारणत्वं दूषयति नन्वनष्टस्य ॥ भवन्मते तूत्तरस्य कार्यक्षणस्योत्पादे पूर्वस्य कारणक्षण-
स्य निरोधात्तूत्पन्नांगीकारान्न हेतुत्वहानिरपि कार्योत्पादः संभवतीत्यर्थः ॥ ननु तर्हि हेतु-
क एव कार्योत्पादोऽस्तु तथा च नोक्तदोष इत्याशंक्याह ॥ असति प्रतिज्ञोपरोधो यौगपद्य-
मन्यथा ॥ असति हेतौ कार्योत्पत्त्यंगीकारे ॥ पूर्वज्ञानचक्षुरालोकविषयेषु चतुर्षु
सत्सु कार्यं नीलादिज्ञानं जायत इत्यस्याः प्रतिज्ञाया उपरोधः स्यात् ॥ अन्यथा का-
र्यं सहेतुकमित्यंगीकृत्ये कार्यपर्यंतं हेतोः स्थित्यंगीकारे हेतुफलयोर्यौगपद्यं ॥
एकस्मिन्काले स्थितिः स्यादित्यर्थः ॥ तथा च क्षणिकत्वप्रतिज्ञाहानिरिति भावः ॥
प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥ वैनाशिकाः खलु बुद्धिपूर्व-
कं नाशमभावनामबुद्धिपूर्वकनाशं ॥ आकाशं चेति त्रयमप्य ॥ वस्तु सन्निरूपाख्यं ॥ २८

ब्र॰ री॰ वृ॰ १

निर्हेतुकं तुच्छमिति वदंति ॥ तत्राकाशस्य निरोपाख्यत्वमुत्तरसूत्रे निराकरिष्यते ॥ अत्र तु बुद्धिपू-
र्वकनाशाऽबुद्धिपूर्वकनाशरूपनिरोधद्वयं निराक्रियते प्रतीपा प्रतिकूला संतं घटमसंतं
करोमीत्येवमाकारिका संख्या बुद्धिः प्रतिसंख्या ॥ तत्पूर्वको निरोधो नाशः प्रतिसंख्यानि-
रोधस्तत्पूर्वको नाशोऽप्रतिसंख्यानिरोधस्तयोर्निरोधयोः संतानिषु ॥ संतानेष्वप्राप्ति-
रसंभव इत्यर्थः ॥ कुतः अविच्छेदात् ॥ न तावन्निरोधद्वयं संतानगोचरत्वं संतानस्याऽ-
विच्छेदात्संतानविच्छेदो हि चरमसंतानिविच्छेदाद्वक्तव्यः ॥ स न युक्तः ॥ चरमसंतानिनः
कार्यान्तरजनकत्वे संतानस्याविच्छेद एव ॥ अजनकत्वे चरमसंतानिनोऽर्थक्रियाका-
रित्वरूपसत्त्वाभावेनाऽसत्त्वे तासत्त्वात्पूर्वसंतानिनां सर्वेषामप्यसत्तापरिशेषापत्तिः ॥ अ-
र्थक्रियायाअभावात् ॥ नापि संतानिप्रतियोगिकत्वं निरोधद्वयस्य ॥ संतानिनां घटादी-

सूत्र० २५

नां क्षणिकत्वेन बुद्धिपूर्वकनाशायोगात्॥ नाप्यबुद्धिपूर्वकस्य॥ मूलनाशस्तत्वदप्फा- शारी० टी०
पगतः संभवति॥ मूलस्य मृदादेः प्रत्यभिज्ञायमानत्वात्॥ तस्मान्निरोधद्वयस्यानुपपत्तिः २
उभयथा च दोषात्॥ स्थिरत्वादिभ्रांतिरूपायाः अविद्यायाः किं सम्यक्ज्ञानादिना नाशः उत स्व-
तो वा नाद्यः निर्हेतुकनाशाभ्युपगमहानिप्रसंगात्। द्वितीये सम्यक्ज्ञानोपदेशानर्थ-
क्यमित्युभयथापि दोषादसंगतं सौगतं मतमित्यर्थः॥ आकाशस्य निरुपाख्यत्वं
दूषयति॥ आकाशे चाविशेषात्॥ आत्मन आकाशः संभूत इति श्रुत्या वाच्यु-
णिकत्वेन चाऽऽकाशोपि पृथिव्यादिवद्वस्तुत्वप्रतिपत्तेरविशेषान्न निरुपाख्यत्वमि-
त्यर्थः॥ आत्मनः क्षणिकत्वं दूषयति॥ अनुस्मृतेश्च॥ अनुभवमनु॥ अनंतरमु- २५
त्पद्यमाना स्मृतिरनुस्मृतिस्तद्भावात्॥ आत्मनोऽनुभवितुर्न क्षणिकत्वमित्यर्थः

अन्यानुभूतेऽन्यस्य स्मरणायोगादिति भावः॥ नासतोऽदृष्टत्वात्॥ क्षणिकात्कार्योत्पत्तिमि-
च्छता यदभावाद्विरूपात्स्यादेव कार्योत्पत्तिरंगीत्ततेति भाति॥ पूर्वक्षणनाशं विना कार्यक्ष-
णोत्पत्त्ययोगात्तस्मादभावाद्वोत्पत्तिः स्वग्रंथे दर्शिता॥ तथा चाऽसतोऽभावान्निःस्व-
रूपात्कार्योत्पत्तिर्न युक्ता कुतः अदृष्टत्वात्॥ निरुपाख्यात्॥ नरविषाणादेः कार्योत्पत्तेरदृ-
ष्टदेः कार्योत्पत्तेरदृष्टत्वादित्यर्थः। दृष्टत्वादिति वा पदच्छेदः सत एव मृदादेः कार्योत्पत्तेर्दृष्ट-
त्वादित्यर्थः। उदासीनानामपि चैवं सिद्धिः॥ किं चैवमभावाद्वोत्पत्त्यंगीकारे उदासीनानां
तत्तत्कार्यसाधनेषु कृष्यादिष्वप्रवर्त्तमानानां स्वगृहे तूष्णीमुपविष्टानामपि पुंसां स्वाभि-
मतस्य कार्यस्य सिद्धिः स्यादित्यर्थः। तस्मात्क्षणिकमूले वैभाषिकसौत्रांतिकयोर्बाह्या-
र्थवादिनोर्मतेन समन्वयस्य न विरोध इति सिद्धं॥ नाभाव उपलब्धेः॥ एवं क्षणि-

सूत्र० कबाह्यार्थवादनिराकरणं कृतं तन्निराकरणमुपजीव्य क्षणिकविज्ञानमात्रसत्त्ववादिम शारी०भा०
३० त्मवतिष्ठतस्य न यौरुपजीव्योपजीवकभावः॥ संगतिः॥ विज्ञानवादिनो बौद्धस्य योयं सिद्धां २
तो विज्ञानातिरिक्तस्य बाह्यपदार्थस्याभाव इति सोस्याधिकरणस्य विषयः स किं मान
मूलो भ्रान्तिमूलो वेति संदेहे मानमूल इति प्राप्तं॥ तथाहि नीलादिविज्ञानस्य स्वरूपतः स
र्वीयान॥ अस्य विशिष्टत्वाद्बाह्यार्थवादिनापि तस्य नीलादिज्ञानत्वसिद्धये॥ नीलाद्याका
रत्वमंगीकरणीयं॥ तथा च तेनैवाकारेण सर्वव्यवहारोपपत्तौ किं बाह्येन नीलादिनार्थे
ध्याकायमानेन॥ तथा च स्वप्रकाशनीलादिविज्ञानस्य क्षणिकत्वात्साकारत्वाच्च॥ स्था
पि निराकारविज्ञानाद्ब्रह्मणो जगत्सर्गं ब्रुवतस्समन्वयो न सिध्यतीति प्राप्ते ब्रूमः॥ विज्ञानव्य
तिरिक्तो नामार्थानामभावो न संभवति कुतः॥ उपलब्धेः॥ विज्ञानातिरिक्तो नामार्थानां घ ३०

प्रातिभासिकी सत्ता व्यावहारिकी सत्ता पारमार्थिकी सत्ता ३

टः पटः स्तम्भ इत्यादावनुभवसिद्धत्वादित्यर्थः॥ ननु विज्ञानाकारेणानुभवस्यान्यथासिद्धिः बाह्यार्थं विना
तत्सारूप्यात्मकाकारस्य तानेति चासिद्धेः॥ एवं च प्रतीयमानो बाह्यार्थ एवेति न ज्ञानस्य
साकारत्वं॥ नापि क्षणिकत्वं॥ मानाभावादनुमानस्य पक्षाद्यनेकज्ञानसाध्यतया स्था
यिनमनुमातारं विनानुदयादिति स्थायिनिराकारब्रह्मणि समन्वयो न विरुध्यत इति ज्ञा
नं न तु जाग्रद्व्यवहारस्य यायानुत्पन्नाः सर्वे प्रत्यया॥ निरालंबनाः प्रत्ययत्वात्॥ स्वप्नगंधर्वन
गर॥ मायाविनिर्मितपायादिवदिति चाशंक्य दृष्टांते बाधितविषयित्वमुपाधिरित्याह
वैधर्म्याच्च न स्वप्नादिवत्॥ स्वप्नादिप्रत्ययस्य जाग्रत्प्रत्ययस्य चान्योन्यबाधितविषयत्व
बाधितविषयत्वरूपवैधर्म्यान्न स्वप्नादिदृष्टांतेन निरालंबनत्वं जाग्रत्प्रत्ययस्येत्य
र्थः॥ चशब्देन दृष्टांते साध्यवैकल्यं सूचितं॥ स्वप्नादावपि प्रातिभासिकविषयाणां॥

सूत्र० ३१ सत्वादिति॥ किंचवाह्यार्थानामभावेघटज्ञानमित्यादिवैचित्र्यंज्ञानेनस्यान्नचपूर्वपूर्वज्ञा शारी०द०
नादिविचित्रवासनाबलाद्वैचित्र्यंस्यादितिवाच्यं॥ बाह्यार्थाऽभावेवासनानामप्यभा २
वादित्याह॥ नभावोनुपलब्धेः॥ वासनानांनभावोनसंभवइत्यर्थः॥ कस्मादनुपल
ब्धेः॥ तुत्सत्वेबाह्यार्थानामनुपलब्धेरित्यर्थः॥ वासनानांबाह्यानुभवव्याप्यत्वाद्व्याप
काऽभावेव्याप्याभावइतिबाह्यार्थानुभवस्यवासनांप्रतिकारणत्वात्कारणाभावेका
नाम६ र्याभावइतिवातात्पर्यंकिंचवासनानांसंस्काराभिधानानांतत्पक्षेन्वाश्रयासंभवाद
नुपपत्तिः॥ नन्वहमित्यालयप्रत्ययएवाश्रयइत्यतआह॥ क्षणिकत्वाच्च॥ आलय
विज्ञानस्यक्षणिकत्वांगीकारान्नाश्रयत्वं॥ संस्काराश्रयत्वेवाक्षणिकत्वं॥ संस्कार
समानकालीनस्यवासंस्कारकालेऽसतोवाश्रयत्वायोगादितिभावः सर्वथानुप ३१

त्तेश्च॥ पश्यनतिष्ठनेत्याद्यपशब्दप्रयोगाद्ग्रंथतोऽनुपपन्नमिदंवेदबाह्यानांमतं॥ मुक्तप्र
कारेणार्थतोप्यनुपपन्नमिति॥ सर्वथानुपपत्तेर्नादरणीयंश्रेयोर्थिभिःसौगतंमतमित्यर्थः
दर्शनमितिवक्तव्येपश्यनेत्यपशब्दःस्थानमितिवक्तव्येतिष्ठनेत्यपशब्दः॥ दृशेस्तिष्ठते
श्चधातोःशितिप्रत्ययेपश्यतिष्ठादेशौभवतः॥ नतुल्युट्प्रत्ययेतस्याशित्वादितिबोध्यं
ननुबाह्यार्थस्यदस्यकेवलविज्ञानमात्रवादस्यचोक्तरीत्याऽसंभवाच्छून्यंनिस्स्वरूपं
मेवप्रपंचतत्त्वंकिंनस्यादितिशंकायां॥ पुनर्नाभावउपलब्धेरित्यादीनेसूत्राणिशू
न्यमतनिरासपरत्वेनयोज्यते॥ प्रपंचशून्यत्वस्यसर्वप्रमाणबाधितत्वेन॥ तन्निरासा
यष्टयक्तु॥ अपत्तानपेक्षणात्॥ तथाहि॥ ज्ञानार्थयोर्नाऽभावःप्रमाणैरुपलब्धेरित्या
र्थः॥ वैधर्म्याच्चेतिसूत्रंपूर्ववत्॥ व्याख्येयं॥ प्रपंचस्यस्वप्नेबाधाधिष्ठानेकिंचित्सत्त्वंवक्तव्यं

सूत्र० निरधिष्ठानवाधायोगात् तस्मान्नाधिष्ठानस्य तेन्मते नभावः न सत्वं ॥ प्रमाणगतस्तद्रूपप्र- शारी० वृ०
६१ द्वेरितिनभावोतुपलब्धेरितिसूत्रार्थः ॥ क्षणिकत्वान्वेतिसूत्रे ॥ भिक्षुकैः पूर्वमुपदेशोत्सग्य २
हारः ॥ तथा चक्षणिकत्वदार्थानं गीकृत्य ॥ तेषां क्षणिकत्वोपदेशात्तन्योपदेशान्तव्याहता
र्थबोधकः सुगत इत्यर्थः ॥ त्वंत्यसूत्रं कृतव्याख्यातं ॥ तस्माच्छ्रोते केवलारणाबोधमते ॥ न
न समन्वयव्यवरोधत इति सिद्धं ॥ नैकस्मिन्नसंभवात् ॥ एवं सुत्यक्तवानां बौद्धानांमा-
तेनिरस्ते विवसनानां जैनानां महतां बुद्धिस्पंबुद्धिसन्निधिलक्षणांसत्यानिराक्रियते ॥
तत्र संक्षपः किं निरंबरमतं मानमूलमथांति मूलमिति ॥ मानमूलमिति प्राप्तं तथाहि ॥
स्यादस्ति स्यान्नास्ति स्यादस्तिनास्ति च स्यादवक्तव्यः ॥ स्यादस्ति चावक्तव्यः स्यान्ना- ३२
स्ति चावक्तव्यः स्यादस्तिनास्ति चावक्तव्यश्च इत्येवं रूपसप्तभंगनयमस्तित्वनास्ति

त्वादिविरुद्धधर्मद्वयमादाय सर्वेषु पदार्थेषु योजयंती विवसनाः पदार्थमात्रस्यानेकरूपत्वमा-
चक्षते तेउपादानादिव्यवहारसिद्धये ॥ स्वन्यया वस्तु न एकरूपत्वेन ॥ सर्वात्मना स्ति त्वं नास्ति-
त्वं नास्तित्वं वावक्तव्यमिति प्राप्यात्मना पि सत्ता ॥ किंस्त्रत्राप्यर्थमुपादानादिव्यवहारेणस्या-
त् ॥ स्वतः केनचित्तद्घटादिरूपेणास्ति ॥ केनचित्स्वा प्यादिरूपेण नास्तीत्यनेकरूपत्वमेवव्या-
क्तनः ॥ सप्तनयं भंगो नाम सप्तस्वस्तित्वादिषु वस्तव्येकत्रविरोधभंगः ॥ तत्रयोन यो युक्तिः
न इत्यर्थः स्यादस्तीत्यादेरयमर्थः ॥ स्यात्मदं कथंचिदित्यर्थकं वस्तुनोस्तित्वविवक्षाया
माद्यो भंगः ॥ स्वसत्वविवक्षायां द्वितीयो भंगः ॥ क्रमेणोभयवांछायां तृतीयो भंगः युगप-
दुभयवांछायामस्तित्वनास्तित्व नास्तित्वयोर्युगपद्वक्तुमशक्यत्वादवक्तव्यत्वंव-
क्तनइतिचतुर्थो भंगः ॥ आद्यचतुर्थयोर्भंगयोः क्रमेण वांछायां पंचमो भंगः ॥ द्विती

यच्चतुर्थयोर्विकल्पयोः पक्षेभंगः ॥ स्याद्वाद्युक्तितीयच्चतुर्थविकल्पानां बाहुल्यापां सप्तमोभंग इति एवमेका
त्वानेकत्वनित्यत्वानित्यत्वादिविरुद्धधर्मद्वयमादायोक्तन्यायो योजनीय इति तस्माद्युक्तमा
त्मस्य सत्त्वमसत्त्वं चेत्येवमादिविरुद्धानेकधर्मवत्त्वमेवेत्येकस्मिन्नपि ब्रह्मसमन्वयो न सिध्यती
ति प्राप्ते ब्रूमः ॥ नैकस्मिन्नसंभवादिति ॥ एकस्मिन्परमार्थसत्ये वस्तुनि विरुद्धधर्माणामसं
भवाद्वस्तुनो नैकरूपत्वं नास्तीत्यर्थः ॥ यदस्ति तदस्त्येव न नास्ति ॥ यन्नित्यं तन्नित्यमेव नानि
त्यं यथा प्रत्यगात्मा वस्तुभूत एवं प्रपंचस्यापि त्वन्मते वस्तुत्वात्तस्यानेकरूपत्वसंभवोऽस्म
न्मते तु प्रपंचो न सत्तास्पदं किंतु अनिर्वचनीय एव तेन न सर्वव्यवहारसंभव इति भावः ॥
एतेषामार्हतानां देहपरिमाण एवात्मेति मतं तद्दूषयति ॥ एवं चात्माकात्स्न्यं ॥ यथैकत्र
विरुद्धधर्मासंभवो दोषस्तेषामार्हतानां मते एवमात्मनोऽकात्स्न्यं परिच्छिन्नत्वं दोषांत ३३

रं स्यात् ॥ जीवस्य देहपरिमाणत्वांगीकारादित्यर्थः ॥ तथा च परिच्छिन्नत्वादात्मनो घटादिवद
नित्यत्वं स्यादिति भावः ॥ किंचात्मनो देहपरिमाणत्वे मनुष्यात्मनः ॥ कर्मवशात् ॥ गजशरीरे कृ
त्स्नप्रवेशो न स्यात् ॥ पुत्तिकाशरीरे वा कृत्स्नस्यात्मनः प्रवेशो न स्यात् ॥ ननु जीवस्य सावयव
त्वांगीकारात्पर्यायेण गजादिशरीरप्राप्तौ केचिदवयवा आगच्छंति सूक्ष्मपुत्तिकाशरीरप्रा
प्तौ च केचिदपगच्छंतीति न मनुष्यात्मनः स्थूलसूक्ष्मशरीरप्राप्तिविरोध इत्याशंक्य निरा
करोति ॥ न च पर्यायादप्यविरोधो विकारादिभ्यः ॥ पर्यायादपि अवयवागमनागमनाभ्या
मपि तत्तत्स्थूलसूक्ष्मशरीरपरिमाणत्वस्यात्मन्यविरोध इति नैवेत्यर्थः ॥ कुतः विका
रादिभ्यः ॥ आत्मनः ॥ सावयवत्वेन तत्तच्छरीरप्राप्त्या वृद्धिह्रासवत्त्वांगीकारे ॥ विकारव
त्वप्रसक्तौ प्रदीपादिवदनित्यत्वं स्यादनित्यत्वे च बंधमोक्षाभ्युपगमो बाध्येत नजन्तुं

सूत्र० विकान्यायेनसंसारसागरेमग्नस्यबंधविच्छेदात् ॥ संततोर्ध्वगमनंमुक्तिर्भवतीतित्वा शा०वृ०
३४ याम्क्षपगमाहुरिति ॥ यद्वा ॥ पूर्वसूत्रेपरिशिष्टत्वादात्मनीतित्यक्तंस्यादितिक्रमयु २
क्तं ॥ स्वनित्यत्वेपिबोधवत्संतानेननित्यत्वोपपत्तेरित्याशंक्याहनचेत्यादिसूत्रंपर्याया
दपिसतानरूपेणनित्यत्वस्यात्मन्यविरोधइतिनचेत्यर्थः ॥ कुतः ॥ विकारादिभ्यः संता
नस्यसंतानिव्यतिरिक्तस्यसत्वेतस्यचसंतानिनन्यत्वाद्विकारवत्वंस्यादेवंचसत्वेनै
रात्म्यवादप्रसंगइत्यर्थः ॥ किंच ॥ स्वंत्यावस्थितेश्चेमयनित्यत्वादविशेषः मुक्तात्मनो
यत्परिमाणंतदंत्यंतच्चनित्यमप्यणुत्वावृन्यतमपरिमाणत्वेनव्यवस्थितंचेतिजैन
सिद्धं ॥ तस्मात्तथाचस्वंत्यस्यपरिमाणस्यत्वेनावस्थितेस्तद्दृष्टांतेनात्मपरिमाणत्वेना
हेतुनोभयोराद्यमध्यमपरिमाणयोर्नित्यत्वप्रसंगात् ॥ नपाणिमाद्यमध्यमोत्पाप ३४

रिमाणानामविशेषःसाम्यंस्यादित्यर्थः ॥ नित्यपरिमाणानांत्रयाणामेकत्रासंभवान्नित्यत्वमा
पाद्यतेनसाम्यपादितमितिचेदस्त्वंपरिमाणसाम्येस्थूलसूक्ष्मशरीरस्थाश्रितेपरिमाणवैष
म्यंनस्यादितिभावः ॥ यद्वा ॥ सर्वदैकमेवपरिमाणंस्यादित्यापाद्यंतथाहि ॥ स्वत्वपरिमाणा
स्यजन्यत्वेनित्यत्वविरोधादाद्यमध्यमकाजावस्थानंचक्तव्यमितियदंत्यपरिमाणमणुमह
त्वादितदेवैकंसर्वदास्यात्त्रान्यत्रयाचांत्यपरिमाणस्यावस्थितेरणुत्वाद्यन्यतमत्वेननियता
त्वादाद्यमध्यमकालयोरुभयोस्तस्यपरिमाणस्यनित्यत्वादेकत्वादविशेषः ॥ जीवोणुश्चे
दणुरेवमहांश्चेन्महानेवस्यादित्यर्थः ॥ तथाचनशरीरपरिमाणनियमइतिभावः ॥ तस्मा
दयुक्तविवसनमतेननसमन्वयस्यविरोधइतिसिद्धं ॥ इदानींकेवलंनिमित्तकारण
मेवेश्वरोनोपादानमितियेषांसेश्वरसांख्यपातंजलिशैवकाणभुग्गादीनांमतंतद्दी

सूत्र० ३५ यं दूषयति ॥ पत्युरसामंजस्यात् ॥ पूर्वं सत्त्वासत्त्वयोरेकत्रविरोधादसंभव उक्तस्तत्कक्षं ॥ तद्व शारी०टी०
दुपादानकर्तृत्वयोरेकत्रविरोधादसंभव इति दृष्टांतसंगतिः निमित्तोपादानोभयात्मकं ब्रह्म २
समन्वयासंभवाक्षेपे सिद्धांतः ॥ पत्युरीश्वरस्य जगदुपादानप्रधानादिप्रेरकत्वेन जगन्नि
मित्तत्वमात्रं न संभवति कुतः ॥ असामंजस्यात् ॥ ईश्वरस्य जगत्सर्जने प्रवृत्तौ रागद्वेषादि
प्रसंगात् ॥ असामंजस्यं स्यात् ॥ प्रवृत्ते रागद्वेषादिपूर्वकत्वेन लोके दृष्टत्वात् दृष्टानुसारि
त्वात्कल्पनामानाः अस्माकं तु श्रुत्यनुसारित्वादनिर्वचनीयवादित्वाच्च न दोष इति भावः
संबंधानुपपत्तेश्च ॥ प्रेर्यप्रधानादिभिः प्रेरकस्येश्वरस्य संबंधो वाच्यः ॥ असंबद्धस्या
प्रेरकत्वायोगात् ॥ न च संबंधः संभवति निरवयवत्वात्तयुतसिद्धत्वाच्च संयोगस
मवाययोरनुपपत्तेरित्यर्थः ॥ सिद्धांते त्वविद्यादिप्रेरकत्वं कल्पिततादात्म्येनोपप ३५

स्वमिश्रत एव सिद्धः ॥

द्यत इति भावः ॥ किं च कुंभकारस्य मृदादिप्रेरकत्वदृष्टांतेनेश्वरस्य प्रधानादिप्रेरकत्वं कल्पनीयं
न हि तत्संभवति प्रधानस्य रूपादिहीनत्वेन दृष्टमृदादिवैलक्षण्यात् ॥ प्रधानादिविषयका
प्रेरणायाः ईश्वरस्यानुपपत्तेरित्याह ॥ अधिष्ठानानुपपत्तेश्च ॥ अधिष्ठानं प्रेरणा सिद्धां
ते तु न दृष्टापेक्षा श्रुत्येकशरणा इति भावः ॥ करणवच्चेन्न भोगादिभ्यः ॥ ननु करणानी
ंद्रियाणि चक्षुरादीनि अप्रत्यक्षाण्यपि यथा जीवेन प्रेर्यंते एवं प्रधानादिकमप्रत्यक्षमपीश्वरेण
प्रेर्यतामिति चेन्न कुतः ॥ भोगादिभ्यो दोषेभ्यः ॥ जीवो हींद्रियग्रामं भोगार्थं प्रेरयति तद्दृष्टांते
नेश्वरस्य प्रेरकत्वे तस्य भोगादयः प्रसज्येरन्नित्यर्थः ॥ यद्वा ॥ सशरीरस्यैव प्रेरकत्वदर्श
नादीश्वरस्य च शरीरानुपपत्तेर्न प्रेरकत्वमित्याह ॥ अधिष्ठानानुपपत्तेश्च ॥ भो
गाधिष्ठानं शरीरमधिष्ठानशब्दार्थः ॥ करणवच्चेन्न भोगादिभ्यः ॥ करणवदिंद्रियाधि

सूत्र० ष्ठानं शरीरमित्यर्थः॥ तदीश्वरेणांगीक्रियत एवेति चेन्न शरीरवत्वे भोगादिप्रसंगादीश्व शारी०वृ०
३६ रत्वमेव न स्यादित्यर्थः॥ अंतवत्वमसर्वज्ञता वा॥ किं च प्रधानजीवेश्वराणां या संख्या २
यच्च परिमाणं तदुभयमीश्वरेण परिछिद्यते न वा आद्ये परिछिन्नसंख्यावत्वात्॥ परि
छिन्नपरिमाणवत्वाच्च तेषां प्रधानजीवेश्वराणां घटादिवदंतवत्वं विनाशित्वं स्या
त्॥ द्वितीये ईश्वरस्यासर्वज्ञत्वं स्यादित्यर्थः॥ तस्मादसंगतं तार्किकपरिकल्पिते
श्वरकारणवादेन॥ न निमित्तोपादानब्रह्मसमन्वयविरोध इति सिद्धं॥ उत्पत्त्यसंभवा
त्॥ एवं केवलाधिष्ठात्रीश्वर इति वेदबाह्यसंगतमते निरस्ते निमित्तं प्रकृतिश्चेश्वर इति
भागवतमतस्य वेदसंगतार्थत्वात्॥ तदंगीकृतजीवोत्पत्त्यंशोऽपि प्रमाणमूलत्वा
स्यादिति प्रत्युदाहरणसंगत्यारंभः॥ तेषां भागवतमतं प्रमाणमूलं भ्रांतिमूलं वे ३६

तिसंदेहे प्रमाणमूलमिति प्राप्तं तथाहि॥ वासुदेवः खलु परमात्मा परमार्थतत्त्वं जगदुपादा
नं निमित्तं च तस्माद्वासुदेवात्संकर्षणाख्यो जीव उत्पद्यते॥ तस्माज्जीवात्प्रद्युम्नाख्यं मनो जायते
मनसश्चानिरुद्धाख्योऽहंकार इति॥ तथा च जीवाभिन्नाद्ब्रह्मणो जगत्सर्गं ब्रुवतः समन्वयस्या
संभव इति प्राप्ते वेदाविरुद्धांशमंगीकृत्य वेदविरुद्धजीवाद्युत्पत्त्यंशं दूषयति उत्पत्त्य
संभवादिति परमात्मनो वासुदेवाज्जीवस्योत्पत्तेरसंभवात्॥ न तन्मतं साध्वित्यर्थः॥ अन्य
थाजीवस्योत्पत्त्यंगीकारे घटादिवदनित्यत्वापत्त्या भगवत्प्राप्तिरूपमोक्षस्तस्य दस्फ[?] गतः क
स्य स्यादित्यर्थः॥ न च कर्तुः करणं॥ लोके कर्तुर्देवदत्तादेः सकाशात्करणस्य कुठारादेरु
त्पत्त्यदर्शनात्कर्तुः करणं मनो जन्यत इत्येतदयुक्तं इत्यर्थः तस्मात्तन्मतमसंगतमि
त्यर्थः॥ अयं भावः॥ किं जीवो मनः करणांतरमासाद्य जनयति अथ नासाद्य वा आद्ये

सू०वृ०
४७

तत्करणांतरं जीवजन्यं न वा ॥ आद्येऽनवस्था ॥ आद्यविकल्पावुत्तरासंभवात्‌ ॥ द्वितीये तदे शारी०अ०
वमनोऽस्त्विति ॥ न मनसो जीवजन्यत्वं आद्यद्वितीये करणरहितस्य जीवस्य कार्यजननसाम २
र्थ्यांगीकारे किं मनः कल्पनयेति ॥ ननु संकर्षणादयस्तु यो न जीवादिरूपाः किंतु वासुदेवव
द्विज्ञानस्वरूपा ईश्वरा एवेत्याशंक्याह ॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ संकर्षणादीनां त्र
याणां वासुदेववद्विज्ञानादिभावे वा ॥ विज्ञानैश्वर्यवत्त्वे वा ॥ दोषनिरवकाशत्वरूपत्वेऽपि तदप्र
तिषेधः ॥ तस्योत्पत्त्यसंभवरूपदोषस्य प्रकारांतरेणाऽप्रतिषेध इत्यर्थः ॥ तथा हि न तावा
न्नतु सर्ववासुदेवादीनामीश्वराणां किंचित्प्रयोजनमस्ति एकेनैव सिद्धेः ॥ भगवानेवैको
वासुदेवः परमार्थतत्त्वमिति तत्सिद्धांतहानिश्चानन्तानामीश्वराणां संकर्षणादीनां त्रयाणां
वासुदेवत्वस्यानामेव ॥ वासुदेवादुत्पत्तिरभ्युपगम्यत इति नोक्तदोष इति चे ॥ न ह्यंग ४७

तदुत्पत्त्यसंभवो दोषः संकर्षणादीनामीश्वरत्वाविशेषे वासुदेवस्य ततोऽतिशयाऽभावेन त्रया
णां वासुदेवेन जन्यत्वाऽनुपपत्तेरिति ॥ विप्रतिषेधाच्च ॥ कश्चित्तानैश्वर्यशक्तिबलवीर्यतेजां
सि वासुदेवे गुणा इति प्रतिपादयंति ॥ कश्चिच्चोक्तगुणा एवात्मानो वासुदेवा भगवंत इत्यभेदं
गुणगुणिनोर्वर्णयंति ॥ तथा च परस्परं विप्रतिषेधाच्चासमंजसमिदं भागवतं मतमित्य
र्थः ॥ तस्मान्निरवद्ये ब्रह्मणि वेदांतानां समन्वय इति सिद्धं ॥ इति श्रीमद्ब्रह्मसूत्रवृत्तौ द्विती
याध्यायस्य द्वितीयः पादः ॥ २ ॥ न विषदश्रुतिविरुद्धत्वात्परपक्षाणामप्रामाण्यमुक्तं तदि
श्रुतीनामप्यन्योन्यविरोधाद्ब्रह्मकारणवादस्याप्यनपेक्षत्वं स्यादिति शंकानिरासार्थं
परं पादद्वयमारभ्यते ॥ पादद्वयस्यापि श्रुतीनामप्यन्योन्यविरोधेन समन्वयदृढीकर
णात्श्रुत्यध्यायसंगतिः ॥ पूर्वपादेनास्य प्रासंगिकी संगतिः शंकाव्याजेन दर्शितां तत्र

सू०वृ०
४८

तावदादौ सृष्टिवाक्यानामविरोधं प्रतिपादयितुमाकाशमाश्रित्य विचार्यते॥ आकाश
स्य किमुत्पत्तिरस्ति उत नास्तीति॥ यद्यस्ति तर्हि विरोधः॥ तथाहि छांदोग्ये आकाशवायू
विना तत्तेजोऽसृजतेति तेजआदिका सृष्टिः श्रूयते तैत्तिरीयके तु॥ आत्मन आकाशः सं
भूत इत्याकाशादिका। तथा चानयोर्वाक्ययोर्विरोध इति पूर्वपक्षः॥ आद्याया पूर्व
पक्षे श्रुतीनां मिथो विरोधादप्रामाण्यं फलं सिद्धांते विरोधाभावात्प्रामाण्यमिति
बोध्यं। एवं प्राप्ते एकदेशिमतेन समाधत्ते॥ न वियदश्रुतेः॥ वियन्नोत्पद्यते कुतः॥ अ
श्रुतेः॥ वियत उत्पत्तिप्रतिपादकवाक्यस्याश्रवणादित्यर्थः॥ यद्यप्यात्मन आकाशः
संभूत इति श्रुतिरस्ति तथापि सा गौणीति सूत्राभिसंधिः॥ तथा चाकाशस्योत्पत्तेरन
भ्युपगमादेव न विरोध इति सूत्राभिसंधिमजानानाः शंकते॥ अस्ति तु॥ तुशब्दः॥ पक्षां

शारी०२०
१
४८

तरपरिग्रहे॥ छांदोग्ये आकाशोत्पत्तिश्रुत्यभावेऽपि सा श्रुतिस्तैत्तिरीयकेऽस्तीत्यर्थः॥ तथा न
विरोधस्तदवस्थ इति शंकितुरभिप्रायः॥ एकदेशी स्वाभिप्रायं प्रकटयति॥ गौण्यसंभवात्॥
न ह्याकाशस्योत्पत्तेः श्रुतिर्मुख्या किंतु गौणीकृता॥ असंभवात्॥ आकाशोत्पत्तौ समवायि
कारणादिसामग्र्यभावात् किंतु तेन नित्यत्वानुमानानाकाशस्योत्पत्तेरसंभवादिति सू
त्रार्थः॥ शब्दाच्च॥ वायुश्चांतरिक्षं चैतदमृतमित्यादावमृतशब्दात्॥ नाकाशस्योत्पत्तिरि
त्यर्थः॥ ननु आत्मन आकाशः संभूत इत्यादिवाक्ये संभूतशब्दस्याकाशे गौणत्वं तेजआदौ
तु मुख्यत्वमित्येतद्विरुद्धं एकस्मिन्वाक्ये एकस्य शब्दस्य गौणमुख्यत्वादर्शनादित्यत आ
शंक्याह॥ स्याच्चैकस्य ब्रह्मशब्दवत्॥ यथा तस्मिन्नेव प्रकरणे अन्नं ब्रह्मेति व्यजानादित्यादा
वन्नादिषु ब्रह्मशब्दो गौण आनंदो ब्रह्मेत्यत्र मुख्यः॥ विषयभेदात्॥ एवं प्रकृतेऽपि विषयभे

न्न परित्यागः

सूत्र० ३५ दाहेकस्य संभूतत्वाच्छब्दस्य गौणत्वं मुख्यत्वं चस्मादित्यर्थः ॥ इदमेकदेशिमतं दूषयन् सिद्धांतय शारी० हृ०
ति ॥ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ विज्ञेयाद्ब्रह्मणः कृत्स्नस्य वस्तुजातस्याव्यतिरेकाद २
व्येकत्वविज्ञानात्सर्वविज्ञानप्रतिज्ञायाश्च हानिर्भवति ॥ ब्रह्मभिन्नसत्ताकस्य नित्यस्याकाश
स्याऽभ्युपगमे तु प्रतिज्ञा बाध्येत तस्मादाकाशस्योत्पत्तिमंगीकृत्य ॥ ब्रह्माधीनसत्ताक
त्वाद्ब्रह्मणि ज्ञाते सर्वमाकाशादिकं ज्ञातं भवतीति सा प्रतिज्ञा समर्थनीयेत्यस्याकाशोत्प
त्तिरित्यर्थः ॥ किंच ॥ प्रतिज्ञायाः समर्थनं कार्यकारणाभेदपरेभ्यः ॥ शब्देभ्यो भवति ॥ तथा
हि कार्यकारणाभेदप्रतिपादनपरैर्मृदादिदृष्टांतैः प्रतिज्ञां संसाध्य तत्साधनायैव सदेव
सोम्येदमग्र आसीदेकमेवाद्वितीयं तदैक्षत तत्तेजोऽसृजतैतदात्म्यमिदं सर्वमित्यादि ३५
शब्दैः कार्यजातं प्रदर्श्य तस्य ब्रह्माऽव्यतिरेकं दर्शयंतीति इदं सर्वमाकाशस्याऽकार्यत्वे बा

प्रथमं वा पश्चाद्वा इति २

ध्यतं स्यादिति ॥ नन्वेवमुत्पत्तिमत्त्वे सिद्धे पूर्वोक्तविरोधपरिहारः कथमिति चेदुच्यते छांदो
ग्ये हि तेजःसृष्टत्वविमानं श्रूयते नाऽऽकाशत्वमपि तैत्तिरीयके तु आकाशाद्वायुर्वायोरग्निरिति तेज
सस्तृतीयत्वं श्रूयते ॥ तथा चैतयोर्वाक्ययोरेकवाक्यताऽदनकाशे तैत्तिरीयकश्रुत्यनुसारे
णाऽऽकाशं वायुं च सृष्ट्वा तद्ब्रह्म तेजोऽसृजतेति छांदोग्यश्रुतिः परिणम्यत इति नाऽनयोर्वाक्यो
र्विरोध इति ॥ यदुक्तं तैत्तिरीयश्रुत्युक्तिर्गौणी साम्याऽभावादिति तन्नित्यत्वात्तु मा
नोच्छेनितत्वश्रौतस्य ब्रह्मण एव विपत्सामर्थ्यात्तादित्यभिप्रेत्य तद्धीयानुमानमनुमानमनु
माने नैव दूषयति ॥ यावद्विकारं तु विभागो लोकवत् ॥ तु शब्दश्चाकाशोत्पत्त्यसंभवाशंक
व्यावृत्त्यर्थः ॥ यतो यावद्विकारजातं विभागोदृश्यते ॥ नद्यप्रत्यक्षविकारे ब्रह्मणि विभागा
द्दर्शनात् ॥ लोकस्य घटादेर्विकारस्यैव विभक्तत्वदर्शनादित्यर्थः ॥ तथा चायं प्रयोगः ॥ आ

सूत्र॰ ४०

काशादिक्कालमनःपरमाणवः परधीनसत्ताकाः स्वसमानसत्ताकविभागवत्वात् घटा शारी॰ द॰

शरावादिवदित्याकाशोत्पत्तिवादिनं प्रतिविभुत्वहेतोः परोक्तस्यासिद्धिरपि बोध्या ॥ २

आकाशेऽमृतत्वश्रुतिप्रयोगस्त्वापेक्षिकः ॥ अमृता देवा इतिवदिति सिद्धं ब्रह्मकार्यं विय

दिति ॥ ननु ब्रह्मणो योग्ये वायोरुत्पत्तिर्न श्रूयते तैत्तिरीयके तु श्रूयते ॥ तथा च पूर्ववदनयोर्वा

क्ययोर्विरोधपरिहारार्थं वायूत्पत्तिर्गौणीति वाच्यं किंच सैषाऽनस्तमिता देवता यद्वा

युरिति वायोर्जन्मप्रतिषेधाच्च नित्यत्वमित्याशंकामतिदेशेन निराकरोति ॥ एतेन मात

रिश्वा व्याख्यातः ॥ एतेन वियदुत्पत्तिमत्त्वव्याख्यानेन वायुरपि वियदवच्छिन्नब्रह्मजा

न्यत्वेन व्याख्यात इत्यर्थः ॥ वायोर्नित्यत्वे एकविज्ञानप्रतिज्ञाहान्यापत्तेः समानत्वादिति

भावः ॥ वायोर्जन्मप्रतिषेधश्चापेक्षिकः ॥ अतिदेशोत्वान्नष्टयवतुल्ये संगत्यपेक्षेति मंत ४०

व्यं ॥ असंभवस्तु सतोऽनुपपत्तेः ॥ पूर्वमसंभावितोत्पत्तिकयोरपि वियत्पवनयोरुत्पत्तिरसि

श्रुतिबलादित्युक्तं ॥ तद्वद् ब्रह्मापि ब्रह्मांतरकार्यमस्तु कार्यकारित्वाद्विपदादिवदित्यनुमा

नानुगृहीतया जातो भवसि विश्वतोमुखः इत्यादि ब्रह्मजन्मश्रुत्वा ब्रह्मणोऽप्युत्पत्तिरस्ति

ति दृष्टांतसंगत्या इदमारभ्यते ॥ न च ब्रह्मणो नित्यत्वप्रतिपादकश्रुतीनामनुक्तानुमाना

नुगृहीतश्रुत्या विरोधोऽस्ति न वेति संदेहे अयमेव विस्फुलिंगोत्पत्तिवद्ब्रह्मांतरात् ॥ ब्रह्मणो

त्पत्तिरुक्तश्रुतिबलादस्त्येवेति विरोध इति प्राप्ते ब्रूमः ॥ सतः सदात्मकस्य ब्रह्मण उ

त्पत्त्यऽसंभवतिः ॥ कुतः अनुपपत्तेः सत्तामात्रात् ॥ सामान्यस्योत्पत्तेरनुपपत्तिः वि

शेषस्यैव घटादेः सामान्यजन्यत्वदर्शनात् ॥ ब्रह्मणश्च विशेषत्वेन जन्यत्वे प्रकृता

कं सामान्यं तदेवैनो ब्रह्म ब्रह्मणः कार्यत्वेऽध्यस्तत्वे न जगदधिष्ठानत्वानुपपत्तेश्चेत्यर्थः

अस्माकं१

सूत्र०
धा५१

जन्मश्रुतिरौपाधिकविषया न चास्य कश्चिज्जनितेत्यादिबहुश्रुतिविरोधादित्यवि- शा०रा० टी०
रोधः॥ तेजोऽतस्तथा ह्याह॥ तत्तेजोऽसृजतेति छांदोग्ये ब्रह्मजत्वं तेजसः श्रूयते तैत्तिरीयके तु वा- २
योरग्निरिति वायुजत्वमित्यनयोर्वाक्ययोर्विरोधोऽस्ति न वेति संदेहे सामान्यात्सामान्यस्यो-
त्पत्तिर्मास्तु सामान्याद्वायोर्विशेषस्य तेन सउत्पत्तिः संभवति एवं श्रुतिबलात् सर्वोपादा-
न ब्रह्मजत्वमपीत्यस्ति विरोध इति प्रत्युदाहरणसंगत्या पूर्वपक्षे पूर्वपक्षे पूर्वं ब्रह्मणः
कार्यत्वेन तदुपादानत्वं न संभवत्युभयोरपि कार्यत्वात् तेजः प्रत्युपादानत्वं नास्त्येवेति
ब्रह्मारन्नजत्वं तेजस इत्यविरोधः॥ वायोरग्निरिति पंचमी क्रमार्था न तु हेत्वर्था इत्येक-
देशिना सिद्धांतः कृतस्तं दूषयति तेतोऽतथास्तथा ह्याहेत्यतो मातरिश्वनः सकाशा- ५१
त्तेजो जायत एव हि यतस्तयोर्वायुजत्वं वायोरग्निरिति श्रुतिराह॥ न चेयं पंचमी क्रमार्था

वायोऽनंतरं तेज इति पदांतरकल्पनाऽप्रसंगात्॥ किंच॥ आत्मनः आकाशः संभूत इ-
त्यादौ पृथिव्याः ओषधय इत्यंते च हेतुपंचम्या दर्शनात् मध्ये कस्मात्क्रमार्थपंचमीत्वे संग-
तमेव न त्वेवं कश्चिद्ब्रह्मजन्यत्वं कश्चिद्वायुजन्यत्वमिति विरोधः॥ वायोः ब्रह्मानन्यत्वेन वा-
युभावापन्नब्रह्मजन्यत्वस्य छांदोग्ये वाक्यार्थस्यैव वायोरग्निरिति वाक्यस्याप्यर्थत्वेना-
विरोधादिति॥ आपः॥ अतस्तथा ह्याहेत्यनुवर्तते तेजोऽनंतरभावित्वात्॥ अप्पृथि-
व्योरिति तेजसो वायुजन्यत्वकथनानंतरं तयोरप्पृथिव्योः क्रमेण बुद्धिस्थत्वात्॥
बुद्धिसन्निधिलक्षणसंगत्या॥ क्रमेणाधिकरणद्वयमारभ्यते॥ तदपोऽसृजतेत्या-
दिवाक्यस्यापां ब्रह्मजन्यत्वप्रतिपादकस्याग्नेराप इति वाक्येन विरोधोऽस्ति न संदेहे पूर्वं-
वद्विरोधोऽस्तीति पूर्वपक्षे अपामग्निदाह्यत्वात् तज्जन्यत्वं नास्त्येवेति अविरोध इत्यो-

सूत्र॰ ६२ कदेशिसिद्धांतं दूषयति ॥ आपोइति ॥ आपोऽतस्तेजसो जायते ॥ हि यस्मात्तथा तेजो शा॰री॰वृ॰
जन्यत्वमग्नेराप इति श्रुतिराहेत्यर्थः ॥ त्रिवृत्कृतयोस्तेजसोर्दाह्यदाहकभावेप्यत्रिवृ २
त्कृतयोर्न विरोधः ॥ छांदोग्ये तेजोऽवधित्वं ब्रह्मतत्त्वस्य श्रूयत इति पूर्ववद्विरोधपरि
हारो बोद्धव्यः ॥ अथानंतरभाविपृथिवीमाश्रित्य विचारयति ॥ पृथिव्यधिकाररूप
शब्दांतरेभ्यः ॥ ता आप ऐक्षंत ॥ बह्व्यः स्याम प्रजायेमहीति ॥ ता अन्नमसृजंतेति
श्रूयते ॥ तत्र संशयः किमन्नशब्देनौदनादिकमुच्यते ॥ किंवा पृथिवीति ॥ तत्रान्नश
ब्दस्यौदनादौ प्रसिद्धत्वाद्व्रीह्यादिकमेवान्नशब्देनोच्यते ॥ तथा च व्रीहियवादेस्तज्ज
न्यौदनस्य च योगेन रूढ्या वान्नशब्दवाच्यस्य कथंचिदब्जन्यत्वं ॥ कश्चित्तु पृथिव्या ओ
षधयः ओषधीभ्योऽन्नमित्यन्नपृथिव्यादिजन्यत्वमित्यनयोः श्रुत्योर्विरोध इति ॥ प्राप्ते ६२

ब्रूमः ॥ पृथिव्येवात्रान्नशब्देनोच्यते ॥ न व्रीह्यादिकं कुतः अधिकाररूपशब्दांतरेभ्यस्तत्तेजोऽसृ
जतेति महाभूतोत्पत्त्यधिकारात् तत्कर्मतदन्नस्येति कृष्णरूपस्यान्नशब्दवाच्यस्य पृथिवी
त्वज्ञापकस्य श्रवणाच्च ॥ समानप्रकरणेऽन्येभ्यः पृथिवीति च तद्यदपां शर आसीत्तत्सम
हन्यत सा पृथिव्यभवदिति च पृथिव्या एवाब्जन्यत्वं प्रतिपादकशब्दांतरसत्त्वादिच्चेत्यर्थः
तत्र सृष्टिकाले यदपां शरो घनीभावश्चासीत् ॥ तत्समहन्यत ॥ स घनीभावः संघातात्मना प
रिणतश्चासीत् सैवापां कठिनाकारपरिणामरूपा पृथिव्यभवदिति श्रुत्यर्थः ॥ तस्मान्न व्री या
ह्याद्यन्नस्याबुपादानकत्वं किंतु पृथिव्युपादानकत्वमेवेत्यविरोध इति सिद्धं ॥ तदभिध्याना
देव तु तल्लिंगात्सः ॥ एवं तावत्सृष्टिक्रमे महाभूतश्रुतीनामविरोधः प्रतिपादितः इदानीं गग
नभूतानि आश्रित्य आश्रयेभावसंगत्यान्यद्विचार्यते ॥ किं महाभूताभिमानिन्यो देवताः स्वतं

त्राण्येव भौतिकोत्पादने प्रवर्तंते॥ उतेश्वराधिष्ठिता इति विषये॥ आकाशाद्वायुरित्यादिना॥
सस्वकार्योत्पत्तौ स्वातंत्र्यश्रवणात् तत्तत्त्राण्येवेति ब्रह्मणः सर्वसृष्टिकर्तृत्वप्रतिपादकश्रु॥
त्यानुत सृष्टिश्रुतीनां विरोध इति प्राप्ते ब्रूमः॥ स परमात्मा तत्तत्कार्यगोचरेक्षणात्मकाभि॥
ध्यानादेवेक्षिता॥ तत्कारणाधिष्ठाता स एव कार्यं सृजति कस्मात् तल्लिंगात्॥ तस्य परमात्म
नः सर्वनियंतृत्वरूपलिंगस्य यः पृथिव्यां तिष्ठन्नित्यादिना श्रुतत्वादित्यर्थः॥ पृथिव्यापदभि
मानिदेवतायां॥ अथेयंभागः॥ अस्य त्वाशादिपदानां भूतमात्रे रूढत्वात् देवतापरत्वे लक्षणां
पत्तेः॥ न भूताभिमानिदेवतानां स्यात् तंत्र्यमाकाशाद्वायुरित्यादौ श्रुतं॥ ननु ता आप ऐक्षं
तेत्येतत् अबादिपदानां देवतापरत्वे लिंगं॥ तदात्मेक्षणस्य तदवच्छिन्नब्रह्मनिष्ठत्वादिति॥
न देवतानां स्वातंत्र्यं किंचित्स्यादिति॥ विपर्ययेण तु क्रमोऽत उपपद्यते च॥ एवंभूतानां

६३

मुत्पत्तिक्रमे चिंतिते लयक्रमो बुद्धिस्थः प्रसंगत्या विचार्यते॥ एतस्य विचारस्य प्रयोजन॥
मद्वैतब्रह्माभिध्यानं प्रासंगिकत्वादेव नास्मिन्पादे संगतिराशंकनीया॥ तत्र किं भूतानामुत्प
त्तिक्रमेणैव लयक्रम उत सोपानपरंपरारूढस्य क्रमेणैवारोहणवच्च क्रमेणैव लयप॥
क्रम इति संदेहे॥ श्रुतोत्पत्तिक्रमेणैवेति प्राप्ते ब्रूमः॥ अत उत्पत्तिक्रमाद्विपर्ययेणैव लयप्र॥
क्रमः॥ स्वस्वकारणे कार्याणां लयस्य दर्शनात्॥ आकाशादीनां चोत्तरोत्तरस्य तं प्रतिकारण॥
णत्वस्वीकृतत्वात्॥ किंच व्युत्क्रमेणैव लयक्रम उपपद्यते॥ अन्यथोत्पत्तिक्रमेणैव लयांगी
कारे सति॥ कार्यकारणस्य नाशादितिस्यात्॥ तत्राप्युक्तमित्यर्थः॥ भूतोत्पत्तिलयविचारस्य प्र॥
प्रयोजनं॥ अद्वैतब्रह्मध्यानं॥ तत्प्रयोजनकं करणोत्पत्तिक्रमभेदप्रयोजनकत्वसंगत्या
विचारयति॥ अंतराविज्ञानमनसी क्रमेण तल्लिंगादिति चेन्नाविशेषात्॥ पूर्वोक्तभूतो

त्पत्तिलयक्रमः इंद्रियोत्पत्तिक्रमेण विरुध्यते न वेति संदेहे विरुध्यत इत्याह ॥ अंतरेति ॥ एत
स्माज्जायते प्राणो मनः सर्वेंद्रियाणि च ॥ खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणीति
वाक्यं ॥ तल्लिंगग्रहणेनोच्यते ॥ विज्ञायते अनेनेति व्युत्पत्त्या विज्ञानशब्देन बुद्धिरिंद्रियाणि च गृ
ह्यंते निश्चयात्मकमंतःकरणं बुद्धिः संशयात्मकं च मन इति भेदः ॥ तानींद्रियबुद्धिमनांसि
भूतानामात्मनश्चांतराले ॥ तल्लिंगात्तस्यासृष्टेर्गमकात्पाठात्क्रमादित्युक्रम्यते ॥ तथा चा
त्मन इंद्रियबुद्धिमनांसि तेभ्यश्च भूतानीत्यनेन क्रमेणात्मनस्त्वाकाशः संभूत ॥ इत्यादिक्र
मस्य बाध इत्यनयोर्वाक्ययोर्विरोध इति चेत् ॥ नाविशेषात् ॥ इंद्रियमनोबुद्धीनां भौ
तिकत्वेन भूतोत्पत्तिक्रमादिंद्रियोत्पत्तिक्रमस्याविशेषाद्येन क्रमेण भूतोत्पत्तिस्तेनै
व क्रमेण भौतिकोत्पत्तिरित्यविरोध इत्यर्थः ॥ एतस्माज्जायते प्राण इत्यादिश्रुतिस्तु स

र्वेषामात्मनः सकाशादुत्पत्तिमात्रं ब्रूते नैक्रममिति भावः ॥ श्रुतौ न क्रमनापि वाक्येन भूतसृ
ष्टिवाक्यानां विरोध इति सिद्धं ॥ एवं तत्पदार्थसर्वोपादानब्रह्मसिद्ध्युपादेयभूतकरण
श्रुतिविरोधो निरस्तः ॥ इदानीं त्वंपदार्थसिद्ध्ये जीवविषयश्रुतिविरोधो निरस्यते ॥ पादस
माप्तिपर्यंतं ॥ तत्र जीवोत्पत्तिनाशानिमित्तकजातेष्ट्यादिशास्त्राणां जीवनित्यत्ववादिशा
स्त्रस्य च विरोधोस्ति न वेति संदेहे देवदत्तो जातो मृतश्चेति लौकिकव्यपदेशानुगृहीतजात
कर्मादिशास्त्रविरोधोस्त्येव यथा करणोत्पत्तिश्रुत्या भूतश्रुतेर्न विरोधः ॥ तथा जीवोत्प
त्तावपि भूतश्रुतिविरोधस्याभावो वाच्यः स न संभवति उक्तयुक्त्या जीवोत्पत्तावुक्तभूतो
त्पत्तिक्रमभंगस्याभावादुपकत्वादिति प्राप्ते फलाहरणे न पूर्वपक्षे राद्धांतः ॥ चराचरव्यपाश्र
यस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥ यो यं लौकिकस्तयोर्जन्ममरणयोर्व्यपदे

सू०त्र० शः देवदत्तो जातो मृतश्चेति ॥ एष चराचरव्यपाश्रयः स्थावरजंगमदेहविषयो मुख्यो जीवे तु शा०री०स०
६५ भाक्तः गौणः स्यात् ॥ कुतः जन्ममरणव्यपदेशस्य तद्भावभावित्वाद्देहोत्पत्तिविनाशानु २
विधायित्वादित्यर्थः ॥ देहप्रादुर्भावाद्यपेक्षत्वे जातकर्मादिविधानमिति न तेन शास्त्रेण
जीवनित्यत्वशास्त्रस्य विरोध इति भावः ॥ एवं देहोत्पत्तिविनाशयोर्जन्मनाशौ मा भूतां केव
ह्यंतयोर्जीवस्य जन्मनाशौ किं न स्यातां स्वर्गादिफलकर्मशास्त्रविरोधाऽभावादिति प्रत्युक्
दाहरणेन विस्फुलिंगदृष्टांतेन एतस्मादात्मनः सर्वे एत आत्मानो व्युच्चरंतीत्यादेर्जीवा
त्मनः परस्माद्ब्रह्मणः ॥ उत्पत्तिवाक्यस्याऽविकृतस्यैव ब्रह्मणो जीवभावेन प्रवेशवाक्य
स्य च विरोधसंदेहे विरोधोऽस्तीति प्राप्ते ब्रूमः ॥ नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः ॥ नात्मा जी
वो नोत्पद्यते कुतः ॥ अश्रुतेः ॥ उत्पत्तिप्रकरणेषु जीवोत्पत्तेरश्रुतेस्ताभ्यः ॥ श्रुति ६५

भ्यो जीवस्य नित्यत्वावगमात् ॥ नन्वजीवो म्रियते स वा एष महानज आत्माऽजरोऽमरोऽमृत इत्यादि
श्रुतयो जीवनित्यत्वपरा इति ज्ञेयाः ॥ यत्तु क्वचिद्विस्फुलिंगदृष्टांतेन परस्माद्ब्रह्मणो जीवो
त्पत्तिश्रवणं तत्कार्यकरणसंघातोपाधिनिमित्तमिति श्रुत्यैव स्फुटीकृतं विज्ञानघन एवायं जीव
एतेभ्यः कार्यकरणसंघातानां पंचभूतेभ्यः उत्पत्तिमनु सामान्येनोद्भूय तानि भूतानि नश्यंति
संति ॥ स एवमनुनश्यन्विनश्यति विना ज्ञानं तरं संज्ञा नास्तीति यावत् एवं कश्चिन्नो केमे नैयायिका प्र
ब्रूते नैवमा भगवान्मोहांतमापीपदन्नवा अहमिमं विजानामि न प्रेत्य संज्ञास्तीति अथ यं
प्रति मोहांतं मोहवापीपदद्दाऽपादितवानसि प्रेत्य ॥ नाज्ञानंतरं संज्ञा नास्तीतीदमहं
न विजानामि त्वं तु प्रेत्य संज्ञा नास्तीति वदन्मां मोहयसीति प्रश्नार्थः ॥ तत्रोत्तरं न वा अरेऽहं
मोहं ब्रवीमि अयं विनाशी वा अरेऽयमात्मानुच्छित्तिधर्मेति ॥ अविनाशित्वमपरिणा

मित्वं तत्र हेतुरनुच्छित्तीति मोहं मोहकरं वाक्यं संज्ञाव त्वादि विशेषविज्ञानं नास्तीति मयो
क्तं न स्वरूपाभाव इति नाहं मोहवादी भूतमात्रा प्रयुक्तमेवास्योत्पत्त्यादिकं न स्वाभाविकमि
तितात्पर्यं ॥ ज्ञोत एव ॥ अत्रायं पुरुषः स्वयंज्योतिरित्यादि स्वप्रकाशात्मबोधकश्रुतेः प्रपञ्च
ज्ञः एष एव ब्रह्मोऽहमित्याद्यागंतुकज्ञानवत्त्वादिश्रुतिभिर्विरोधोऽस्ति न वेति संदेहे ॥ स्तीति
पूर्वपक्षे पूर्वाधिकरणसिद्धजीवानुत्पत्तिमुपजीव्य ॥ सिद्धांतयति ॥ ज्ञोऽत एवेति ॥ जीवो ज्ञः
स्वयंप्रकाशस्वरूपः ॥ अत एवानुत्पत्तिमत्त्वादेवेत्यर्थः ॥ अनुत्पन्नो हि स्वयंप्रकाशं त्वे
नोपहितं जीव इत्याह यातीति ॥ तथा च ब्रह्माभिन्नजीवोऽपि स्वयंप्रकाश इति भावः ॥ प्रपंचा
ज्ञः रित्यादिश्रुत यच्चागंतुकत्वमभिप्रायेणास्वप्रकाशत्वात् विरोधे न नेतव्या इत्यवि विरोध
इति सिद्धं ॥ न तु र्थ्यं ॥ उत्क्रांतिगत्यागतीनां ॥ आत्मनो ब्रह्माभेदयोग्यत्वाय ॥ नित्य

त्वं स्वप्रकाशत्वं चोक्तं इदानीं स्वप्रकाशत्वादौ पक्षहिष्कृत नवच्छिन्नस्वरूपत्वमणुत्वनिरासे
न साधयतीत्यांतरबहिर्भावः संगतिः एतदनंतरमाद्यधिकरणत्रयेणानवच्छिन्नत्वा
दपि बहिष्कर्तृत्वमध्यस्तमात्मनीति प्रतिपाद्येति ॥ ततो ब्रह्माभेदयोग्यजीवस्यांशत्वाधि
करणे ब्रह्मैक्यं विवक्ष्यत इत्यापादमवांतरसंगतयः ॥ अत्रानवच्छिन्नत्वश्रुतीनामेषोऽणु
रात्मा चेतसा वेदितव्य इत्याद्यणुत्वश्रुतिभिर्विरोधोऽस्ति न वेति संदेहे ॥ अस्मीत्याहोत्क्रां
तीति जीवस्योत्क्रांतिगत्यागतीनां श्रवणादणुर्जीवः स यदास्माच्छरीरादुत्क्रामति सततस
वागादिभिः प्राणैः सहोत्क्रामतीति मरणसमये ॥ उत्क्रांतिः श्रूयते ॥ एके चास्माल्लोकात्प्रयं
ति चंद्रमसमेव ते सर्वे गच्छंतीति ॥ तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण इति गत्या
गती श्रूयेते ॥ इदं चात्मनो विभुत्वे न संभवतीति ॥ अणुत्वं परिशिष्यते शारीरपरिमाणमत

सूत्र०
६७

नोनित्यत्वविरुद्धत्वेनासंभवादिति। आत्मनानीत्तरयोः यद्युत्क्रांतिर्देहस्वाम्यनिवृत्ति शारी० अ०
रूपाविभुत्वेपिसंभवति॥ तथाप्युत्तरयोर्गत्यागत्योः॥ स्वात्मनाजीवात्मनासंबद्धत्वादणुत्व २
मित्यर्थः॥ नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात्॥ ननुनायंजीवोऽणुः अतच्छ्रुतेः अनणु
त्वश्रुतेः॥ सवाएषमहानजआत्मासत्यंज्ञानमनंतंब्रह्मेत्यादिनामहत्त्वश्रुतेरितिचेन्न॥
इतराधिकारात्॥ इतरस्यब्रह्मणः सर्वेषुवेदांतेषुप्रधानतयाज्ञेयत्वेनप्रकृतत्वात्॥ त
स्यैवमहत्त्वश्रुतिरित्यर्थः॥ स्वशब्दोन्मानाभ्यांच॥ एषोणुरात्माचेतसावेदितव्यइति॥
स्वस्याणुत्वस्यवाचकशब्दजीवोऽणुः॥ वालाग्रशतभागस्यशतधाकल्पितस्यच॥ भा
गोजीवःसविज्ञेयइत्युन्मानाच्चसर्वेभ्यः स्थूलपरिमाणेभ्य उद्धृत्यमानमुन्मानं अ
त्यंतापकृष्टपरिमाणमितियावत्॥ तस्मादित्यर्थः॥ ननुआत्मनोऽणुत्वेजाह्नवीतो ६७

निमग्नस्यदेहव्यापिशैत्योपलब्धिविरोधइत्यतआह। अविरोधश्चंदनवत्॥ यथाचंदन
विंदुःशरीरैकदेशस्थः सर्वशरीरव्यापिसुखंजनयति। तथाजीवोपिदेहव्यापिनंशैत्याद्यु
पलंभंकरिष्यतीत्यर्थः॥ अवस्थितिवैशेष्यादितिचेन्नाभ्युपगमाद्धृदिहि॥ ननुभावचंदन
दृष्टांतः॥ अवस्थितिवैशेष्यात्तत्रत्वक्षीणचंदनविंदोरेकदेशेऽवस्थितिर्ज्ञायतेजीवस्यतुनैव
मित्यतःतुल्यत्वादित्यर्थः॥ तथाचव्यापिशैत्याद्युपलंभरूपकार्येणमहत्त्वकल्पनंयुक्तमि
तिशंकामिथ्यापः॥ निराकरोतिनेतिकुतः अभ्युपगमात्॥ जीवाणुत्वस्य॥ कथमभ्युपग
म्यतेतत्राह हृदिहीति॥ हृियतोऽल्पपरिमाणेहृदिजीवःपठ्यते॥ योऽयंविज्ञानमयःप्राणे
षुहृद्यंतर्ज्योतिःपुरुषइत्यादौतस्माज्जीवस्याणुत्वंश्रुत्याभ्युपगम्यतइत्यर्थः॥ अतोन
दृष्टांतवैषम्यमितिभावः॥ गुणाद्वालोकवत्॥ आत्मनोणुत्वेपितन्निष्ठस्यज्ञानस्यगुणा

सूत्र० ४८ स्य व्यापकत्वांगीकारात् ॥ व्यापकगुणाश्च व्यापिकार्यंभविलोकवत् व्यापिप्रभागुणकप्रदी शारी० द्वि०
पादिवत् ॥ गृहनिष्ठदीपस्याल्पत्वेऽपि प्रभात्मकगुणवशाद्यथा गृहव्यापिप्रकाशनादिकार्यं २
जायते तद्वदित्यर्थः ॥ ननु ज्ञानस्य व्यापकत्वे गुणजीवव्यतिरेकेणावस्थानं वक्तव्यं तदयुक्तं
गुणिव्यतिरिक्तदेशे गुणस्यावस्थानादर्शनात् ॥ न च दीपप्रभान्यायः प्रभाया दीपसंयु
क्तद्रव्यांतरत्वादित्याह ॥ व्यतिरेको गंधवत् ॥ यथा गुणस्यापि गंधस्य गुणिव्यतिरेके
णावृत्तिः पुष्पपुटिकातो दूरतोऽपि तत्पुष्पसंसर्गो गंधोपलंभदर्शनात् ॥ तद्वत् गुणिव्यतिरे
केण ज्ञानस्येत्यर्थः ॥ तथा च दर्शयति इह प्रविष्ट आ नखाग्रेभ्य इति श्रुतिरपि चैतन्यगुणे
नात्मनो देहव्याप्तिं दर्शयतीत्यर्थः ॥ पृथगुपदेशात् ॥ प्रज्ञया शरीरं समारुह्येत्यात्मज्ञान
योः कर्तृकरणभावेन पृथगुपदेशात् ॥ व्यापिगुणद्वारास्य जीवस्य शरीरव्याप्तिः । ४८

विष्फुलिंगदृष्टांतेनाविकृतस्यैव ब्रह्मणो जीवभावो ॥ स वा एष महानिति ॥ ५ ॥

गम्यते तथा च व्यापकं ज्ञानं जीवस्य गुण इति महत्त्वश्रुतीनां बाध इति प्राप्ते जीवाणुत्वस्यौ
पाधिकत्वात् । न वास्तवापरिच्छिन्नत्वश्रुतिबाध इति सिद्धांतयति ॥ तद्गुणसारत्वात्तु तद्व्यप
देशः प्राज्ञवत् ॥ तुशब्दः तत्पूर्वपक्षनिरासवाचकः स्वगुणजीवः किं ब्रह्मणस्तत्त्वांतरमुतवि
कार उताहोस्वित् ब्रह्माभिन्नः ॥ नाद्यः एकविज्ञानात्सर्वविज्ञानप्रतिज्ञाबाधप्रसंगात् ॥ न द्वितीयः इ
त्युक्तं तस्मात्सर्वश्रुत्यनुसारी तृतीयः पक्षः परिशिष्यते तथा च ब्रह्मणोऽनवधिकमहा
त्तानयमीक्षीवोऽप्यनवधिकमहत्त्ववान् ॥ स एष महानज आत्मा योयं विज्ञानमय इति विज्ञा
नमयस्य जीवस्य स्वतो महत्त्वावगमात् ॥ एषोऽणुरात्मा चेतसा वेदितव्य इत्येतज्जीववि
षयं वेदितव्यत्वश्रवणात् किंतु ॥ चक्षुराद्यगोचरत्वेन दुर्विज्ञेयब्रह्मविषयं ॥ बालाग्रशत
भागस्येति वाक्यं तु जीवस्यौपाधिकमणुत्वमनूद्य ॥ स चानंत्याय कल्पत इति वाक्य

सूत्र० ५० वस्यानाद्याविद्यात्मभावित्वमित्यपि द्रष्टव्यं॥ ननु सुषुप्तौ ब्रह्मसंपत्तिकायनौ द्वयोरभ्युपग शारी० वृ० २
मात्रबुद्धिसंयोगस्याप्यविद्यात्मभावित्वमित्यत आह॥ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगा
त्॥ यथा बाल्ये पुंस्त्वादेः सत एव यौवनेऽभिव्यक्तिरेवं बुद्धिसंयोगादेः सुषुप्तौ सूक्ष्मात्मना स
त एवाभिव्यक्तिसंभवादाद्याविद्यात्मभावित्वे न विरुद्धमित्यर्थः॥ ननु बुद्ध्यपरपर्यायांतःक
रणे किं प्रमाणम् यत्प्रयुक्तः संसारः स्यादित्यत आह॥ नित्योपलब्ध्यनुपलब्धिप्रसंगो वान्य
था॥ इदमंतःकरणमवश्यमभ्युपगंतव्यं अन्यथा मनसोऽनभ्युपगमे सर्वेषामिंद्रियाणां
स्वस्वविषयसन्निधानदशायां नित्योपलब्धिप्रसंगः युगपत्सर्वविषयोपलब्धिप्रसं
गः॥ मनोव्यतिरिक्तज्ञानसामग्र्याः सत्वात्॥ यदि सत्यामपि सामग्र्यां फलाभावस्तदानि ५०
त्यानुपलब्धिप्रसंगः॥ एकस्याप्युपलब्धिर्न स्यादित्यर्थः॥ अथ वा एकस्योपलब्धि

तस्मात् यस्याः वृद्धावाः नवृद्धानाम्याप्युपलब्ध्यनुपलब्धी भवतस्तन्मनः ५ अथानंतरं मनोविना ६

मितरेषामनुपलब्धिमिच्छता॥ ज्ञानसामग्र्यामध्येऽन्यतरस्यात्मनं इंद्रियस्य वा नियमः श
क्तिप्रतिबंधो वा कर्तव्यः॥ सम संभवति निर्धर्मके आत्मनि शक्तेरभावात्॥ नापींद्रियस्य श
जीवस्य ४ क्तिप्रतिबंधः प्रतिबंधकाभावात्॥ तस्माद्व्यासंगस्थले इच्छैव नियामिकेति वक्तव्यं॥ इच्छा
च नात्मनः निर्गुणब्रह्माभिन्नत्वस्य श्रुतिशतेभ्यः प्रतिपादनात्॥ कामः संकल्प इत्यादिश्रु
त्या मनोधर्मत्वस्यैवावगतत्वात्॥ तत्तस्माद्व्यासंगनियामके च्छाऽन्यथानुपपत्त्या
श्रुत्या च सिद्धमंतःकरणं तत्प्रयुक्त एवात्मनि संसार इति तद्गुणसारत्वमेवात्मनः कर्तृ
त्वसाधने न प्रपंचयति॥ कर्ता शास्त्रार्थवत्त्वात्॥ अत्रात्मनोऽसंगत्वश्रुतौ नांकृतुरिष्टसा
धनबोधकविधिवाक्यौ विरोधसंदेहे सांख्योक्तबुद्धिकर्तृत्वमावर्तनेनात्मन एव कर्तृ
त्वमनेन साध्यते तच्च कर्तृत्वमौपाधिकमित्यनंतराधिकरणे वक्ष्यते॥ इति न॥ विरोध इत्य

सूत्र॰ भिप्रायेण सिद्धांतयति ॥ कर्तेति ॥ आत्मैव कर्ता न बुद्धिः कर्तुरपेक्षितोपायबोधकविधिशास्त्र शा॰ री॰ टी॰
५१ स्यार्थवत्त्वात् ॥ आत्मनः कर्तृत्वे विधिवाक्यमर्थवद्भवति ॥ अन्यथा बुद्धिः कर्त्री आत्मा फ २
लभोक्तेति कर्तुरपेक्षितोपायबोधकं शास्त्रमनर्थकमेव स्यात् तस्मात् केवलबुद्धेः कर्तृत्वं किं
त्वात्मन इति ॥ विहारोपदेशात् ॥ स ईयतेऽमृतो यत्र काममिति ॥ स्वे शरीरे यथाकामं परि
वर्तत इति च जीवप्रकरणे स्वप्नावस्थायां विहारस्य संचरणस्योपदेशात् ॥ जीवस्य कर्तृत्व
मित्यर्थः ॥ अकर्तुः संचरणायोगादिति भावः ॥ यत्र स्वप्नेऽमृतः स जीवः कामं विषया
नीयते गच्छतीत्यर्थः ॥ परिवर्तते विहरति ॥ किंच ॥ उपादानात् ॥ प्राणानां विज्ञानेन वि
ज्ञानमादायेत्यात्मनो ग्रहणश्रुत्युपादानश्रवणात् ऽकर्तुरुपादानायोगादात्मनः ॥
कर्तृत्वमित्यर्थः ॥ प्राणानामिंद्रियाणां विज्ञानेन मनसा तज्जन्यबुद्ध्या विज्ञानं ग्रहणश ५१

क्तिमादाय स्वापे हृदयं गच्छतीति ॥ योजना व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥ विज्ञानं
यज्ञं तनुते कर्माणि तनुतेपि चेति लौकिकवैदिकक्रियायां विज्ञानशब्दवाच्यस्यात्मनः कर्तृत्व
व्यपदेशाच्चात्मनः कर्तृत्वमित्यर्थः ॥ यज्ञं संकल्पं ॥ ननु विज्ञानशब्दो बुद्धिपरो न जीवपर इ
त्यत आह ॥ न चेदिति विज्ञानशब्दो जीवपरो चेन्न तर्हि निर्देशविपर्ययः स्यात् ॥ बुद्धेः कर
णत्वेन कर्तृव्यत व्यपदेशो विज्ञानं यज्ञं तनुत इति न स्यात् ॥ किंतु ॥ विज्ञानेनेति स्यादित्य
र्थः ॥ ननु स्वतंत्रस्यात्मनः कर्तृत्वे निष्टं न कुर्यात् ॥ किंतु ॥ स्वस्येष्टमेव कुर्यादित्यत आह ॥ उ
पलब्धिवदनियमः ॥ यथोपलब्धौ स्वतंत्रोप्यात्मा इष्टमनिष्टं चोपलभते तद्वदिष्टमनि
ष्टं च संपादयितीति अनियम इत्यर्थः ॥ अयं भावः ॥ स्वातिरिक्तकारणानपेक्षत्वरूपं
स्वातंत्र्यं तावन्न संभवति ईश्वरस्यापि तदभावात् ॥ किंतु ॥ सकलकारकप्रेरकत्वं ॥

सूत्र० तथा च तेषु कारकेष्वनिष्टसाधनेष्वपीष्टसाधनत्वभ्रमात् ॥ अनिष्टमपि प्राप्नोतीति ॥ शारी० वृ०
५२ शक्तिविपर्ययात् ॥ इतश्च बुद्धिव्यतिरेकेण जीवः कर्ता न बुद्धिरन्यथा बुद्धेः कर्तृत्वे कर- २
णशक्तिविपर्ययात् ॥ करणशक्तिर्हीयते यावच्च चेष्टाप्रवृत्तिः करणसहितस्यैव कर्तुर्लो-
के कार्यकारित्वदर्शनात् ॥ बुद्धेरपि करणान्तरं कल्प्यतां यस्यात्तथा च नाममात्रे विवादो
न वस्तुनि करणव्यतिरिक्तस्यैव तथापि कर्तृत्वाभ्युपगमात् इति ॥ समाध्यभावाच्च ॥
आत्मा कारकवृत्तिर्विद्यमानाप्यसतीवयत्र भवति स समाधिशब्देनोच्यते ॥ तस्य समा-
धेरात्मनोऽकर्तृकत्वेऽभावप्रसंगात् ॥ समाध्यन्यथानुपपत्त्याप्यात्मनः कर्तृत्वमित्य-
र्थः ॥ समाधिग्रहणं श्रवणमनननिदिध्यासनानामुपलक्षणम् ॥ एवं बुद्धिव्यतिरिक्ता-
त्मनः सिद्धं कर्तृत्वं तच्च स्वाभाविकं किंवौपाधिकमित्याह ॥ यथा च तक्षोभयथा ॥ ५२

पूर्वं सांख्याभिमतबुद्धिकर्तृत्वनिरासेनात्मनः कर्तृत्वं समर्थितं तत्किं स्वाभाविकमौपा-
धिकं वेति संदेहे ॥ पूर्वोक्तशास्त्रार्थवत्त्वादिभिरेव हेतुभिः स्वाभाविकमित्यस्यासंगत्वश्रु-
तिविधिशास्त्रयोर्विरोध इत्यास्याधिकरणस्य पूर्वः पक्षः ॥ न त्वेतस्य पूर्वपक्षस्य एतदधिक-
रणनिरस्यत्वे पूर्वाधिकरणं व्यर्थमिति चेत् ॥ न तस्य बुद्धिकर्तृत्वनिरासेन तदधिकरणविष-
यकर्तृत्वप्रतिपादकत्वाद्व्यर्थतेति तत्रेदमुत्तरं नतावत् ॥ कर्तृत्वं स्वाभाविकं कस्त्वावौपाधि-
कत्वे न कर्तृत्वस्य स्फुटीकृतत्वात् ॥ तथाहि व्याकाशोऽविपरिपततः ॥ रूपेनस्यैवात्मनः उपा-
धिकृतं भ्रमस्वप्नजागरितयोः श्रावयित्वा सुषुप्तौ वाऽनौपाधिकस्य तस्यात्मनः परमात्मा-
नंदेन संपरिष्वक्तस्यैकत्वमाभावं श्रावयति ॥ तद्वा अस्यैतदाप्तकाममात्मकाममका-
मंरूपं शोकांतरमित्यारभ्य एषास्य परमा गतिरेषास्य परमा संपदेषोस्य पर

सूत्र० ५३ मोक्षोकारणीभूतस्य परमानंद इत्यंतेन तदेतत्त्वाप्तं ब्रह्मास्य जीवस्यात्मकामं कामयितृ इः काम शारी० टी०
५३ यितव्यः परः॥ सर्वत्र सर्वरूपेण कामयितव्यमित्यर्थः॥ तत्र हेतुराप्तकाममिति॥ आप्ता २
काम त्वे हेतुरकाममिति॥ यतः परं काम्यं नास्ति तदकामं॥ अशेषशोकसंसर्गशून्या
त्वादिप्याप्तकामत्वमित्याह॥ शोकांतरमिति॥ शोकाद्दंतरं भिन्नमित्यर्थः॥ शोकं दुःखमंता
रयति विवारयतीति वा उक्तस्य सुषुप्तात्मस्वरूपस्य परमपुरुषार्थत्वमाह एषेत्यादिना
एतदेवाभिसंधाय भगवान्॥ सूत्रकारो दृष्टांतेनोपाधिकं कर्तृत्वमित्याह॥ यथा च तक्षो
भयथेति॥ यथा तक्षा उभयथा वास्यादिकरणान्यपेक्ष्य कर्ता दुःखी भवति अनपेक्ष्य तु स्व
रूपेणाकर्ता सुखी भवति॥ तथात्मापि बुद्ध्यादीनि करणान्यपेक्ष्य कर्ता संसरति अ
नपेक्ष्य तु स्वभावतोऽकर्ता परमानंदः॥ न चावश्यत्वर्थः॥ स्वाभाविककर्तृत्वनिरासं ब्रूते शा ५३

स्त्रार्थवत्त्वादित्यादिहेतवश्च कर्तृत्वं विनानुपपन्ना॥ तत्साधयंति न तु कर्तृत्वस्य स्वाभाविकत्वा
मपि तद्विनानुपपत्तेरभावात्॥ यदुक्तं विज्ञानं यज्ञं तनुत इति बुद्ध्यतिरिक्तात्मनः कर्तृत्वव्यप
देश इति॥ तत्र विज्ञानशब्दस्य निर्देश्यस्तत्त्वबुद्धौ रूढत्वात्॥ स एष वाचश्चित्तस्योत्तरोत्तरक्रमो
यद्यज्ञ इति श्रुत्यंतरे॥ यज्ञस्य वाग्बुद्धिजन्यत्वावगमात्॥ अत्रापि यज्ञसाधनं विज्ञानं बुद्धि
रेवेति अवधारणाच्चापि चित्तेन ध्याता वाचा मंत्रोच्चारणप्रयोज्यायते तेन चित्तस्य वाचश्च पूर्वोत्तर
भावोपपत्त इति श्रुत्यर्थः॥ तस्मादौपाधिकमात्मनः कर्तृत्वमिति सिद्धं॥ परात्तु तच्छ्रुतेः॥ यत्तु
नरौपाधिकं जीवस्य कर्तृत्वमुक्तं तत्किमीश्वरायत्तं नवेति संदेहे जीवस्य करणाधिपत्यादे
व कर्तृत्वसिद्धेः तस्येश्वरायत्तत्वं नेति प्राप्ते नन्वेष ह्येव साधु कर्म कारयति तं यमेभ्यो लोके
भ्य उन्निनीषत एष उ एवासाधु कर्म कारयति तं यमधो निनीषत इति श्रुत्येश्वरायत्ता

सूत्र० ५७ तं कर्तृत्वस्येति वाच्यं तथाते विधिनिषेधस्यानेरीश्वरप्रेरणाभिषिक इति विधिनिषेधशास्त्र शारी० ह०
वैयर्थ्यं स्यादिति ॥ शाङ्कोत्तु शाङ्केन पूर्वपक्षं निरस्य प्रतिजानीते परादिति ॥ परमेश्वरादेव जी। २
वस्य कर्तृत्वादिसंसारस्य मोक्षस्य च सिद्धिर्भवितुमर्हति कुतः ॥ तच्छ्रुतेः ॥ कर्तृत्वादेरीश्वर
यत्तत्वश्रुतेः ॥ एष ह्येव साधु कर्म कारयति ॥ य आत्मनि तिष्ठन्नात्मानमन्तरो यमयतीत्या।
द्यापादस्य यः ॥ नन्वीश्वरस्य कारयितृत्वे धर्ममेव कारयेत् नाधर्ममन्यथा के नचित्तुं सा
धर्मैकेन चित् धर्मं कारयतीति वैषम्यनिर्दत्ते तेस्यातामित्यत आह ॥ कृतप्रयत्नापेक्षस्तु
विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥ तु शङ्कां निरासार्थः ॥ जीवेन कृतो यः प्रयत्नो धर्मा।
धर्मलक्षणस्तदपेक्षएवेश्वरो ऽस्मिन्नपि जन्मनि धर्मादिकं वा कारयति । तदपेक्षस्तु
स्वादि फलं ददातीति तेन वैषम्यनैर्घृण्येन प्रसज्येते तेन चानादित्वात्संसारस्य पूर्वजन्मकृतधर्मा ५७

द्यपेक्षा युक्तैव न त्वीश्वरस्य कृतप्रयत्नापेक्षत्वं कुत इत्यत आह ॥ विहितप्रतिषिद्धावैयर्थ्यादि
भ्य इति ॥ ईश्वरस्य कर्मसापेक्षत्वे खलु ज्योतिष्टोमेन स्वर्गकामो यजेत ब्राह्मणो न हन्तव्य
इत्यादयो विहितप्रतिषिद्धयोरवैयर्थ्यं तत्वान्यथा विधिनिषेधवाक्यमनर्थकमेव स्यात्
धर्मकृतो दुःखमधर्मस्य सुखसंपादयेदित्यादिदोषाच्चादिशब्दार्थः ॥ तस्मादीश्वरएवा
दृष्टद्यनाद्यनुसारेण धर्मादिकारयति तदनुसारेण फलदाता चेति सिद्धं ॥ अंशो नानाव्य
पदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥ एवं तावन्नित्यः स्वप्रका
शः कर्तात्मेत्युक्तं तस्य सिद्धांशभेदयोग्यतस्यानुब्रह्माभेदः साध्यते ॥ अत्र पञ्चात्मनिति
ष्ठन्नित्यादिभेदश्रुतिजातस्य ॥ तत्त्वमसीत्याद्यभेदश्रुतिजातस्य सावविरोधसंदेहे ॥।
नमवत्त्वाद् सिविरोधइतिशाङ्के भेदं विना पूर्वोक्तिस्य जीवेश्वरयोरुपकार्योपकारक

सूत्र॰ भावस्य स्वामिभृत्यत्वस्यैवं संबन्धसापेक्षस्यानुपपत्तेः॥ अंशभेदं विना तत्त्वमसीत्यादेरनुपपत्तेरित्य शारी॰ टी॰
५५ नयोः समबलत्वं न चोभयविधश्रुतिभ्याम् अंशांशिभावांगीकारात्॥ नविरोध इति वाच्यं ई २
श्वरस्य निरंशत्वादित्याशंक्य विरोध इति प्राप्ते ब्रूमः॥ अंश इत्यादिना। जीव ईश्वरस्यांश इवां
शो न तु स्वाभाविको वा॥ ईश्वरस्य निष्कलमित्यादिनिरंशत्वश्रुतिविरोधोऽत ईश्वरस्य
कल्पितांशो जीवः कुतः॥ पुनर्जीवेश्वरयोरंशांशिभावः॥ भेदाभेदश्रुतिभ्यामित्याह॥ ना
नेत्यादिनैकत्वं तेन सूत्रेण॥ पञ्चात्मनि तिष्ठन्नित्यादिना जीवेश्वरयोर्नानाव्यपदेशाद्भेद
व्यपदेशात्॥ अन्यथा चापीत्यन्यथा नानात्वस्यापि व्यपदेशादित्यर्थस्तथा ह्येके शाखिन आथ
र्वणिकाः॥ ब्रह्म दाशा ब्रह्म दासा ब्रह्मैवेमे कितवा इत्यादिना ब्रह्मणो दाशकितवादिभावमा
मनन्ति॥ तस्मात्तच्छन्यनानात्वस्याभेदस्य च व्यपदेशादित्यर्थः॥ दाशाः कैवर्ताः दासा भृत्याः ५५

कितवा द्यूतकृतो नष्टाः॥ तस्मात्प्रत्यक्षसिद्धभेदानुवादेन श्रुतीनामभेदपरत्वात्कल्पितभे
दवानंशो जीव इति॥ मंत्रवर्णाच्च॥ पादोऽस्य विश्वा भूतानीति मंत्रवर्णादपि जीवोंऽश इत्यर्थः॥ भू
तानि स्थावरादयो जीवाः पादोंऽश इत्यर्थः॥ अपि च स्मर्यते॥ किं चेश्वरांशत्वं भगवद्गीतासु म
मैवांशो जीवलोके जीवभूतः सनातन इति स्मर्यते तस्मादीश्वरांशो जीवः॥ ननु जीवस्येश्वरांश
त्वे जीवगतदुःखेनेश्वरस्य दुःखित्वं स्यात्॥ पादादिगतदुःखेनांगिनो देवदत्तस्य दुःखित्वदर्श
नादित्यत आह॥ प्रकाशादिवन्नैवं परः॥ यथा जीवो दुःखी नैवं परस्यात्मा दुःखी प्रकाशादि
वत्॥ यथा सौरश्चान्द्रमसो वा प्रकाशो नभो व्याप्य वर्तमानो वक्रकाष्ठाद्युपाधिकृतवक्रभा
वमापन्नोऽपि न वस्तुतो वक्रभावं प्रतिपद्यते यथा चाकाशो घटादिषु गच्छत्सु गच्छन्निव न व
स्तुतो गच्छतीत्यादिरित्यर्थः॥ बिंबयोरीश्वरजीवयोर्भेदस्य च त्वान्न जीवदुःखित्वं उपाधेस्

सूत्र॰ ५६ पहितत्वैज्ञपातित्वादिति भावः ॥ जीवदुःखेनेश्वरस्य दुःखित्वाभावे स्मृतिमप्याह ॥ स्मरंति च शारी॰ ह॰ २
तत्र यः ॥ परमात्मासौ स नित्यो निर्गुणः स्मृतः ॥ न लिप्यते फलैश्चापि पद्मपत्रमिवांभसा
कर्मात्मा त्वपरो योऽसौ मोक्षबंधैः ॥ स युज्यते ॥ इत्यादिना व्यासादयो जीवदुःखेनादुःखि
त्वमीश्वरस्य स्मरंतीत्यर्थः ॥ चशब्देन तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाक
शीतीत्याद्याः श्रुतिः सूचिता ॥ ननु नान्योतोस्ति द्रष्टा ॥ मृत्योः स मृत्युमाप्नोति य इह नानेव
पश्यतीत्यादिना जीवेश्वरभेदमात्रप्रतिषेधात्सर्वभूतेषु चैतन्यस्यैकरसत्वा ॥
त्कथं मित्रसेवितव्यं दातृपरिहर्तव्यमित्यादिलौकिकोनुज्ञापरिहारो स्यातां ॥ कथं वा ऋ
तौ भार्यामुपेयात् गुर्वंगनां नोपगच्छेत ॥ इत्यादिवैदिकावनुज्ञापरिहारौ संगच्छेते इत्याशंक्या
ज्यभेदाकाशादित्यत आह ॥ अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत् ॥ कौ लौकि ५६

कौ वैदिकौ चानुज्ञापरिहारौ सर्वत्रात्मन एकत्वेपि शरीरसंबंधात् संगच्छेते ॥ देहसंबंधस्त
दात्म्यं तत्र देहविशिष्टत्वेनात्मभेदादस्ति ग्राह्यत्याज्यभेदः स्मीतिरादिवत् ॥ यथाग्नौ तिषो
वक्रौरेकत्वेपि श्मशानसंबंधी वह्निः परिहार्यः नेतरः ॥ यथा वा सौरप्रकाशस्यैकोप्यमेध्या
दिसंपृक्तः परिहार्यो नेतरः एवमात्मापीत्यर्थः ॥ ननु तथापि सर्वशरीरेषु कर्मकर्तृत्वेन
तस्यैकत्वादेकदेवदत्तशरीरावच्छेदेन कर्मकरणे धर्मादिकं यज्ञदत्तशरीरावच्छेदेनापि
जायेतेत्यत आह ॥ असंततेश्चाव्यतिकरः ॥ परिच्छिन्नांतःकरणोपाधिकस्य कर्तुः प
रिच्छिन्नस्य देवदत्तात्मनो यज्ञदत्तशरीरेणासंततेरसंबंधात्कर्मादिरव्यतिकरः ॥ देवदत्तस्य श्रमकरः७
यज्ञदत्तस्य शरीरावच्छेदेनापि धर्मादिप्रसंगो नास्तीत्यर्थः ॥ आभास एव च ॥ यथानेकु
वरुजलप्रतिबिंबितानां सूर्याभासानां मध्ये एकस्मिन् ॥ सूर्याभासे कंपमाने सूर्याभासां

सूत्र० ५७ तरं न कंपते ॥ एवमीश्वराभास एवायं जीव इति नैकस्मिन् जीवे बंधमोक्षादिसंबंधिनि जीवांतरस्य बं शारी० वृ० २
मोक्षादिसंबंध इत्यर्थः ॥ किं च ॥ येषां सांख्यादीनां बहवो विभवश्चात्मानः सर्वशरीरसंबंधिनः ।
तेषामेव बंधमोक्षादिसांकर्यं प्राप्नोति ॥ तथा हि ॥ सांख्यमते तावद्भोगसाधनप्रधानसन्निधान
स्य सर्वात्मनामविशिष्टत्वादेकस्यात्मनः सुखादिसंबंधे सर्वात्मनां सुखादिसंबंधः स्यादिवा
न्यायमतेऽपि देवदत्तात्मनः सुखादिहेतुमनःसंयोगस्य सर्वात्मनामविशिष्टत्वात्फलानियमः
स्यादेव ॥ नन्वदृष्टनियमात्फलनियम इति नेत्याह ॥ इयं चाशंकान्वदृष्टानियमात् ॥
सू० ॥ सांख्यमते प्रधानसमवेतमदृष्टं ॥ ततश्च प्रधानस्य सर्वसाधारण्याददृष्टस्याप्यनिय
मात्फलानियमस्तदवस्थः न्यायमतेऽपि चादृष्टहेतुमनःसंयोगस्य सर्वात्माविशेषाददृ
ष्टस्यादृष्टस्य नेत्येवंरूपस्यादृष्टनियमस्याभावात्फलानियम इत्यर्थः ॥ नन्वहमिदं फलं ५७

सजन्य२

प्राप्नवानि इदं परिहरिष्यामि इदं करिष्ये नेदं करिष्ये इत्येवंरूपाभिसंध्यादयः प्रत्यात्मनियताः
संतः स्वप्रयोज्यादृष्टनियमहेतवो भविष्यंतीत्यत आह ॥ अभिसंध्यादिष्वपि चैवं ॥ अभि
संध्यादिष्वपि साधारणमनःसंयोगसाध्यत्वाददृष्टवदनियम इत्यर्थः ॥ प्रदेशादिति चेन्ना
न्तर्भावात् ॥ न चात्मनां विभुत्वेऽपि स्वस्वशरीरावच्छिन्नेनात्मप्रदेशेनाभिसंध्यादिहेतुम
नःसंयोग इति भवत्यभिसंध्यादिनियम इति चेन्न सर्वात्मनां सर्वशरीरेष्वंतर्भावादस्या
त्मन इदं शरीरमित्यत्र नियामकाऽभावादस्यात्मनोऽस्मिन्शरीरे प्रदेश इति प्रदेशइति
प्रदेशकल्पना न संभवतीत्यर्थः ॥ तस्मादस्मत्पक्ष एव सकलदोषाभाव इति सिद्धं ॥ इति
श्रीमद्ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां द्वितीयाध्यायस्य तृतीयः पादः ॥ ३ ॥ एवं महाभूतजी
वस्मृतिविरोधं परिहृत्य लिंगशारीरविषयस्मृतिविरोधं परिहर्तुं पादांतरं करिष्यमाणः

सूत्र० ५८ पूर्वाधिकरणे कर्तृस्वरूपावधारणेन बुद्धिस्थानां कर्त्रुपकरणानामिंद्रियाणामुत्पत्तिं शारी०वृ०
साधयति ॥ तथा प्राणाः ॥ अस्मिन्नपि पादे पूर्वपक्षे श्रुतीनां मिथो विरोधेनाऽप्रामाण्यात् २
समन्वयाऽसिद्धिः फलं सिद्धांते तासामविरोधेन प्रामाण्यात् ॥ समन्वयसिद्धिरिति बोध्यं
तत्र तावदात्मनः ॥ आकाशः संभूत इत्यादावुत्पत्तिप्रकरणेष्विंद्रियाणामुत्पत्तिर्न श्रूयते
क्वचित्त्वृषयो वाव तेऽग्रेऽसदासीत्कतमे ऋषय इति प्राणा वा ऋषय इत्युक्त्वा सृष्टेः प्रा
गिंद्रियाणां सद्भावश्रवणादनुत्पत्तिरिति भाति ॥ क्वचित्तु एतस्माज्जायते प्राणो मनः स
र्वेंद्रियाणि च ॥ खं वायुर्ज्योतिरापः पृथिवीत्यादौ उत्पत्तिरिंद्रियाणां श्रूयते ॥ एतासां
श्रुतीनां मिथो विरोधोऽस्ति न वेति संदेहे विनिगमकाऽभावादस्ति विरोध इति प्राप्ते सृष्टेः
पूर्वमिंद्रियसद्भावस्यावगत्यानुत्पत्तिश्रुतिर्गौणीत्यविरोध इत्येकदेशिनामिष्टं ॥ ति ५८

नियामकाभावः २

तं दूषयति ॥ तथा प्राणा इति ॥ तथा एतस्माज्जायते प्राण इत्यादावुदाहृतवाक्यस्याकाशादिवा
त्प्राणा इंद्रियाणि जायंते ॥ उत्पत्तिश्रुतेरविशेषादित्यर्थः ॥ यदुक्तं सृष्टेः प्रागिंद्रियसद्भावश्र
वणादनुत्पत्तिश्रुतिर्गौणीति तत्राह ॥ गौण्यसंभवात् ॥ गौण्या उत्पत्तिश्रुतेरसंभवो गौण्यसंभ
वस्तस्मादेकदेश्युक्तमयुक्तमित्यर्थः ॥ प्राणानां नित्यत्वे एकविज्ञानप्रतिज्ञाबाधेनेति भावः
सद्भावश्रुतिस्तु हिरण्यगर्भावांतरप्रकृतिरूपप्राणानां स्वविकारापेक्षया प्राक्स
त्त्वं बोधयति अवांतरप्रलये हिरण्यगर्भेंद्रियाणामुगर्भेंद्रियाणां लयाभावादिति बोध्यं ॥ इं
द्रियाणां बहुत्वं जन्मेत्यत्र हेत्वंतरमाह ॥ तत्प्राक्श्रुतेश्च ॥ तत्र त्वेतस्माज्जायते प्राण इ
त्यादिवाक्ये जायत इति जन्मवाचिपदस्य ॥ खवाय्वादिषु मुख्यस्य ॥ तेरवाद्यपेक्षया प्राणादि
षु वागिंद्रियादिषु ॥ श्रुतेश्चेंद्रियाणां मुख्यं जन्मेत्यर्थः ॥ एकस्मिन्वाक्ये एकस्य पदस्य क

सूत्र० ५२५

विशीर्णत्वं कनिष्ठत्वमित्यस्या संभवादित्यर्थः ॥ उत्पत्तिप्रकरणे इंद्रियाणामुत्पत्तिर्नि शारी०वृ० २
रूपत इति यदुक्तं तन्न बाधं दोष्येतत्यत्वेः श्रुतत्वादित्याह ॥ तत्पूर्वकत्वाद्वाचः ॥ ब्रह्मप्रकृतिका
नि तेजोऽबन्नानि तद्विकारैनीच्यंते तथाच प्राणेन मनसा च सहितो या वाचः । अन्नमयं हि सोम्य
मन आपोमयः प्राणस्तेजोमयी वागित्यनेन तेजोऽबन्नजन्यत्वाभिधानाद सत्युत्पत्तिश्रुति
रित्यर्थः ॥ तस्मादुत्पत्तिश्रुतिसभावात्तुष्टेः प्राक्कल्पावस्थ तेष्वान्यविषयत्वादस्ति श्रुतौ
नामविरोध इति सिद्धं ब्रह्मविकारत्वमिंद्रियाणामिति ॥ एवमिंद्रियाणामुत्पत्तिं प्रसाध्यते
ऽयो जीवस्य विवेकार्थं तदाश्रितसंख्यां निर्णेतुकामः आश्रयाश्च पिमावसंगत्या पूर्वपक्षय
ति ॥ सप्तगतेर्विशेषितत्वाच्च ॥ सप्त वै प्राणाः प्रभवंति तस्मादिति सप्तेंद्रियाणि श्रूयंते कनि
दष्टौ ग्रहा अष्टावतिग्रहा इत्यत्राष्टौ ग्रहाः पुरुषपशुबंधका इंद्रियाणि रागाद्युत्पादनद्वा ५२५

इंद्रियाश्चित्य३

रेणेंद्रियाकर्षकाविषयाश्चातिग्रहा इत्यर्थः ॥ सप्त वै शीर्षण्याः प्राणाः ॥ द्वाववांचावित्यत्र नम
व ॥ अर्वांचौ पायूपस्थौ ॥ नव वै पुरुषे प्राणा नाभिर्दशमीत्यत्र दश ॥ दश वै पुरुषे प्राणा आत्मै
कादश इत्यत्रैकादश ॥ आत्मा नमः ॥ एवं कनिष्ठा दशकनिष्ठयो दशेंद्रियाणि रूपयंते ता
सां श्रुतीनां विरोधसंदेहे विरोधोस्तीति प्राप्ते ॥ एकदेशिमतं सप्तैवेंद्रियाणि कुतः गतेः
श्रुतत्वात्सप्तत्वावगतेरित्यर्थः ॥ किंच ॥ सप्त वै शीर्षण्याः प्राणा इतींद्रियाणां शीर्षण्यपदेन
विशेषितत्वात्सप्तेंद्रियाणि ॥ ये शीर्षण्याः सप्त द्वे चक्षुषी द्वे श्रोत्रे द्वे नासिके एका वागिति ते
प्राणा इति सप्तानामेवेंद्रियत्वावगमात् ॥ अष्टत्वादिसंख्याश्रवणं त्वेकस्यैवांतःकरणस्य संज्ञाप
निरूपणार्थस्य करणरूपवृत्तिभेदेन मनोबुद्ध्यहंकारचित्तानीति चतुष्टयवत्सप्तानामेव बहुत्व
भेदेनोपपद्यते इह विरोधः श्रुतीनामिति प्राप्ते तद्दूषयति ॥ हस्तादयस्तु स्थितेऽतो नैवं ॥ तु शब्दे
ति

सूत्र० ६० नप्राणानांसत्वमित्यसः।यतोहस्तौवैग्रहइत्यादिनाहस्तादयोव्यतिरिक्ताःप्राणाःश्रूयंते।स शारी० अ० २
प्तत्वसंख्यायामसंभावितांतर्भावे।सप्तत्वातिरेकेस्थिते।।सप्तत्वसंख्याइंद्रियनिर्देशकादशा
त्वसंख्यायामंतर्भावयितुंशक्यतेन्यूनसंख्यायाअधिकसंख्यायामंतर्भावसंभवात्।।अ
तोनैवंमंतव्यंसप्तैवप्राणाइतिसूत्रार्थः।।यद्यपितोनेंद्रियपंचकंकर्मेंद्रियपंचकंमनश्चेति
एकादशेंद्रियाणिविहायबुद्ध्याहंकारौप्राणानांद्वादशत्वत्रयोदशत्वसंख्याऽपादकौ।
श्रूयेते।तथापितयोरंतःकरणभेदत्वान्नाधिकसंख्यापादकत्वमित्येकादशेंद्रियाणितानि
रवेद्यं।सप्तवैशीर्षण्याःप्राणाइत्यत्रनसप्तोद्देशेनप्राणत्वविधानं।किंतुप्राणोद्देशेनसप्ता
नभेदमात्रेणस्तुतिर्णामेवेंद्रियाणांसप्तत्वमितिनतद्विरोधः।।नववैपुरुषेप्राणानाभिर्दश
मीतिवाक्यंपुरुषाकारदेहछिद्राभिप्रायंनप्राणाभिप्रायमित्यविरोधइति।।सिद्धं ६०

ननिदंसूत्रद्वयव्याख्यानमसंगतंसप्तप्राणाःप्रभवंतीतिप्राणरसनचक्षुःश्रोत्रत्वङ्मनोवाचां
सप्तत्वावगतिशीर्षण्यानांविशेषितत्वमितिहेतुद्वयवैयधिकरण्येनसूत्रेचकारानुपपत्तेः।
येशीर्षण्याःसप्तैवप्राणानेतरइत्यत्रपरिसंख्यापत्तेश्च।।अतएवतदुत्तरंद्वितीयसूत्रव्याख्या
नमप्यसंगतमितिचेत्तर्ह्यन्यथासूत्रद्वयंव्याख्यास्यामः।मरणसमयेयेषांसहगमनंतेषां
मेवभोगसाधनत्वादिंद्रियत्वं।।तथाचश्रुत्यंप्राणमनूत्क्रामंतं सर्वेप्राणाअनूत्क्रामंतीति
प्राणादीनांसप्तानामेवगतेःसहगमनस्यैवश्रवणात्।।सप्तैवेंद्रियाणि।।ननुसर्वांशस्यैव
गणात्कथंसप्तानामेवगतिश्रवणंतत्राह।।विशेषितत्वाच्चेति।।सयत्रैषचाक्षुषःपुरुषःप
राङ्पर्यावर्ततेऽथारूपज्ञोभवत्येकीभवतिनपश्यतिनजिघ्रतिनरसयतेनवदतिन
शृणोतिनमनुतेनस्पृशतीत्याकृतिरितिचक्षुरादीनांसप्तानामेवप्रकृतानांविशेषितत्वात्

सूत्र० ६१

दंसर्वज्ञस्य प्रकृतगामी सर्वेषां प्राणानां भोजयितव्यात्स्य न सर्वज्ञस्येयं यामिमं चितन प्रकृतत्वात्प्राणोप शारी०द०
रसंहृदिति शंकासूत्रार्थः ॥ यत्रोत्क्रांत्यवंस्थायां नं चतुरधिष्ठातृदेवः स एष चाक्षुषः पुरुषो वाऽचक्षु २
रूपी रूपादिविषयाव्याप्तिं विहाय वर्त्तते ॥ तदानीमेषमरूपज्ञो भवति हृदये चक्षुरेकीभवता
तिषां स्पृष्पां स्पनायं पश्यतीत्याहुरिति श्रुत्यर्थः ॥ सिद्धां ॥ न सूत्रार्थस्तत्र सम्यो तिरिक्तादृष्टा
त्वाद यो पि बंधकत्वेन स्वरूपं तेहस्तौ वै यहृद्रत्यादिना ग्रहत्वं बंधकत्वं हस्तादीनां मस्तगमनं
विनानसंभवति सर्वेषां प्रमाणानामनुक्रामंतीत्यविशेषेण सर्वेंद्रियाणामुत्क्रांतिश्रवणा
च्च भवंत्येकादशोत्क्रांतिमंतः संतः प्राणाः ॥ न च सर्वज्ञस्य प्रकृतविशेषितसम्प्रमाणा
रतं प्रकरणाच्युते वर्जायेत्वात ॥ सर्वेषां प्राणानां भोजयितव्यात्स्य च नत्वन्यगत्या प्रकृत पर ६१
त्वसर्वज्ञस्य श्रुतेरिति ॥ शिष्टसूत्राक्षरार्थः ॥ स्पष्टं दिति तस्मादेकादशैरोत्क्रांतिमंतः प्राणा

इतिसिद्धं ॥ नन्विंद्रियाणांमुत्क्रांतिर्नसंभवति तेषामपरिच्छिन्नाहंकारजन्यत्वेन विभुत्वादित्याशं
पसंगत्यासांख्यमतं दूषयति ॥ अणवश्च ॥ इमे प्राणा अणवः परिच्छिन्ना ॥ इंद्रियाणामाहंत्वेन सू
क्ष्माश्चेत्यर्थः ॥ ननु परमाणवइतिसूत्रार्थः ॥ तथा त्वेच्छाएवात्मपक्षो क्रानां शरीरव्याप्तिसुखा
दिकं नस्यादित्यादिदोषाणां प्रसंगो दितीइंद्रियाणां विभुत्वेकाशीस्यविषेशाद द्रानस्यशा
नेसेतुवासिनामपिस्यातांउक्रांतिगत्यागतिश्रुतिविरोधश्चस्यादित्यादिदोषान्द्रष्टव्याः
तस्मात्परिच्छिन्नाः सूक्ष्माश्च प्राणाइतिसिद्धं ॥ इंद्रियाणामुत्पत्त्यादिकमुक्त्वामुख्ये प्राणे फ
त्पत्तिसंदेहेच्चाद्याधिकरणन्यायमतिदिशति ॥ श्रेष्ठश्च ॥ इंद्रियास्वरूपेणो प्रोच्यते तच्चा
पारान्मुख्यप्राणस्यमेदचिंताकरिष्यमाणास्तु करोतिमध्येऽयमतिदेशः कृतः ॥ न भूत्सु
रासीदमृतं न तर्हि न रात्र्याच्च कन्यासीत्मकेतः ॥ आनीदवातं स्वधया तदेकं तस्मा

सूत्र० ६२ धान्यं न परः किंच ॥ नासीत्यत्रानीत्पदेन प्राणसंचरस्य महाप्रलये श्रुतत्वात् ॥ संचार- शारी० ६
वतः प्राणस्य स्थितिरिति न प्राणस्योत्पत्तिरित्यभ्यधिकाशंकायामयमतिदेशः ॥ इंद्रि- २
यवत्तस्मिन्नपि प्रागेव सविकारः ॥ एतस्माज्जायते प्राणः इत्युत्पत्तिश्रवणस्याविशेषा-
दित्यर्थः ॥ श्रुत्यर्थस्तु तर्हि तस्मिन्महाप्रलये मृतकमृत्तिकवत्प्राणो नासीदस्तु तदेव मोऽस्पंदना-
नासीत्तया रात्रेरह्नस्य प्रकेतश्चिह्नभूतश्चंद्रः ॥ सविता न तास्तां स्वधया सहेति संबंधः
स्वधाशब्देन पितृभ्यो दीयमानमन्नं तदर्चनं चोच्यते ॥ तर्हि शून्यवादः स्यादित्यत आ-
ह ॥ आनीदिति तदेवैकं मूलकारणं परं ब्रह्माऽवातं वाय्वादिप्रपंचरहितमानीत् ॥
आसीदिति यावत् ॥ तस्माद्धान्यन्नोऽन्यत्किंचिदपि नास ह ॥ न बभूव किंचेति हकारस्यार्थ-
इति मुख्यप्राणस्योत्पत्तिचिंतानंतरं तत्स्वरूपं निरूपयति ॥ न वायुक्रिये पृथगुपदेशात् ६२

यः प्राणः स वायुरिति महानेव वायुरेव प्राण इति श्रूयते ॥ तथा च महान्वायुरेव प्राण इत्येकः
पूर्वपक्षः ॥ नन्वयं पूर्वपक्षोऽसंगतः ॥ छांदोग्ये मनो ब्रह्मेत्युपासीतेत्युपक्रम्य मनोरूपब्रह्म-
णो वाक्प्राणचक्षुःश्रोत्रैश्चतुष्पात्त्वं वदन् प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्यो-
तिषा भाति तपति चेति ॥ भातिश्चाभिव्यक्तो भवतीति तपति स्वव्यापारे उद्युक्तो भवतीति ॥ वाय्वपेक्ष-
या प्राणस्य भिन्नत्वकथनेन निर्धारिणो भावात् ॥ अत्र प्राणस्य प्राणेंद्रियत्वेऽपि ॥ एतस्माज्जा-
यते प्राणः खं वायुरित्यादौ भेदनिर्देशेन निर्धारिणोऽभावात्तादवस्थ्यादिति चेत्तर्हि तिष्ठतु-
श्रुतिद्वयं मिथो विरुद्धं ॥ सांख्यमतरीत्या इंद्रियव्यापार एव प्राणोऽस्त्विति प्राप्ते ब्रूमः ॥ प्रा-
णो न वायुक्रिये ॥ न वायुर्नापींद्रियव्यापार इत्यर्थः ॥ कुतः एतस्माज्जायते प्राण इत्यादौ त-
त्तत्तद्वायोरिंद्रियेभ्यश्च प्राणस्य पृथगुपदेशादित्यर्थः ॥ नन्विंद्रियेभ्यः पृथगुपदेशो गोबलि-

ह्ययसुपदेशः१

सू॰ ६३ यव्यापारास्तै नास्तीति चेन्न वृत्तिवृत्तिमतोरभेदात् ॥ तादर्थ्येन यः प्राणः स वायुरिति श्रुतिविरो- शारी॰ अ॰
धः कथं परिहरणीय इति चेत् ॥ उच्यते ॥ महावायुरेव हि प्राणापानादिपंचात्मनावतिष्ठमा- २
नः प्राण इत्युच्यते तथा च विकारविकारिणोर्वस्तितोऽभेदकाल्पनिकभेदयोः सत्त्वान्न भेदश्रु-
त्योर्विरोध इति सिद्धं ॥ ननु पूर्वपक्षे वागादीन्द्रियव्यापाराभ्यां जीवस्य विवेकः फलं सिद्धांते तदु-
भयातिरिक्तप्राणगदपीति विशेषः ॥ न तूभयातिरिक्तस्य श्रुत्यवगतस्वतंत्रभावस्य प्राण-
स्य देहेऽस्फयगमे जीवप्राणयोरुभयोः स्वतंत्रयोरेकरणवाक्यताभावात्स द्वःशारीरोन्मथा-
न प्रसंग इत्यत आह ॥ चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः ॥ तुरुक्तस्य प्राणस्वातंत्र्यस्य नि-
रासार्थः ॥ प्राणस्य न जीववत्स्वातंत्र्यं किंतु राजापेक्षया मंत्रिण इव गुणभाव एव ॥ स्वातंत्र्यं
तस्य प्राणस्य प्रजापेक्षया मंत्रिण इव इंद्रियापेक्षया तथा च नोक्तदोष इति तात्पर्यार्थः ६३

उक्तस्य३

सूत्रार्थस्तु चक्षुरादिवत्प्राणोपि जीवं प्रति करणभूतः कुतः तत्सहशिष्ट्यादिभ्यः तैश्च-
क्षुरादिभिः सह प्राणसंवादादिषु प्राणस्य शिष्टेः शासनादित्यर्थः समानजातीयानामेव
सहशासनस्य युक्तत्वात् ॥ आदिशब्देनाचेतनत्वभौतिकत्वादिहेतुसंग्रहः ॥ ननु प्राणस्य च-
क्षुरादिवत्करणत्वं न युक्तं ॥ असाधारणविषयाभावादित्यत आह ॥ अकरणत्वाच्च न दो-
षस्तथा हि दर्शयति ॥ न चोक्तदोषः प्राणस्याकरणत्वादेव कथं तर्ह्यात्मानं प्रति करणभावः
इंद्रियांतरेष्वसंभावितस्यासाधारणस्य कार्यस्य निर्वाहकत्वादिति ब्रूमः ॥ तथा हि श्रु-
तिरुक्तकार्यं प्राणस्यासाधारणं दर्शयति ॥ प्राणसंवादे वागादिभ्यो मुख्यप्राणस्य श्रे-
ष्ठत्वं निर्धारयिता च रिष्टः प्राण उवाच ॥ मा मोहमापद्यथाहमेवैतत्पंचधात्मानं प्रविभज्यैतद्बा-
णमवष्टभ्य विधारयामीति बाणं शरीरं प्राणेन रक्षन्नवरं कुलायमिति श्रुतिरपि देहस्थि-

सूत्र० तिः॥प्राणनिमित्तेत्याह॥अथवरं चूनेकासुचिनीडं कृत्वायं देहात्स्वयं गृहं॥प्राणास्मिपत्यारक्ष ब्रा०री०ट०
६४ न्नजीवः सुप्तिं यातीति योजना॥न केवलं देहधारणमेवास्याः साधारणकार्यं किं त्वन्यदपी २
त्याह॥सूत्रं पंचवृत्तिर्मनोवद्व्यपदिश्यते॥यथा मनोऽनेकवृत्त्या स्याः साधारणकार्यापि वृत्त
या नैकधा व्यपदिश्यते॥एवमुच्छ्वासनिश्वासस र्वशरीरोत्क्रान्त्या स्यानिवृत्त्यादि कार्याणि॥
पंच पंचकार्यं भक्षितान्नादिरसानां समवेततत्त्वेन सर्वांगेषु नयनेत्य पंचवृत्तिः प्राणमाणोव्यप॥
दिश्यते क्रमेण प्राणोपानो व्यान उदानः समान इति तदसाधारणकार्यापेक्षया जीवोपक
रणत्वं मनोवदिति सिद्धं॥एवं सुखस्य प्राणस्योत्पत्तिं स्वरूपं चोक्त्वा परिमाणं विशेष विष
यमाः॥प्राणाणुत्वमिवहोत्क्रान्त्यादिश्रुतेः॥समणभिस्त्रिभिर्लोकैः समोऽनेन सर्वेणे
णेति श्रुतेः प्राणविभुत्वमिति यथायाममियो विरोधः स्मिन्नवेति संदेहे॥अणवश्चेत्य ६४

करणत्वात्यातिदेहो न सिध्यति॥तयति॥अणुश्च॥चक्षुरादिवत्प्राणोपि परिच्छिन्नः सूक्ष्मश्चेत्यर्थः
समएभिर्लोकैरिति श्रुतिस्तु समष्टिवायुपरा नाध्यात्मिकप्राणमात्रपरेत्यविरोध इति॥अंत
रंगप्राणस्वरूपकथनानंतरं बहिरंगं परिमाणमुच्यते इति संगतिर्बोध्या॥ज्योतिराद्यधिष्ठा
नं तु तदामननात्॥पूर्वमाध्यात्मिकप्राणस्याणुत्वमाधिदैविकवायोः समएभिरिति व्या
पित्वमित्युक्तं॥तत्प्रसंगेनाध्यात्मिकानां प्राणानामाधिदैविकदेवताधीनचेष्टावत्त्वमस्ति
न वेति विचार्यत इति प्रसंगसंगतिः॥अत्र चक्षुषा हि रूपाणि पश्यतीति श्रुत्या चक्षुरादेः देव
तानिरपेक्षचेष्टावत्त्वं प्रतीयते॥आदित्यश्चक्षुर्भूत्वाक्षिणी प्राविशदित्यादिश्रुत्या तु सूर्यादिदेवता
धीनचेष्टावत्त्वं प्रतीयते॥अनयोर्मिथो विरोधोस्ति नवेति संदेहे अस्ति विरोध इति प्राप्ते॥ए
कदेशिसिद्धांतः॥देवतानां करणाधिष्ठातृत्वेनाम्नाने वभोक्तृत्वप्रसक्तौ जीवस्य भोक्तृत्वं

सूत्र० प्रसक्तौ जीवस्य भोक्तृत्वं न स्यादिति युक्तिसहकृताया श्रुतेः पाठातिश्रुतेर्बलीयस्त्वादादित्य शारी० भा०
६५ श्चक्षुरित्यादिश्रुतेर्गौणार्थत्वेति न विरोध इति तं दूषयति ॥ ज्योतिरित्यादिना तु शब्दः सिद्धांत तन्निरा २
सार्थः ॥ अधिष्ठीयते प्रेर्यत इत्यधिष्ठानं अधिष्ठितमित्यर्थः ज्योतिरादिभिरग्न्याद्यभिमानिनी
भिर्देवताभिरधिष्ठितमेव वाक्चक्षुरादिकं नैष्कृते तदामननात् ॥ तस्य देवताधिष्ठितत्वस्या
दित्यश्चक्षुरित्यात्मकश्रुत्यादित्यर्थः ॥ अचेतनानां स्वतन्त्रस्थातुपपत्तेरिति युक्तिरपि द्रष्ट
व्या ॥ अग्निर्णी प्राविशदित्येवं प्रेरकभावेनेति श्रुत्यर्थः ॥ नन्वदेवतानामेव भोक्तृत्वं तस्मा
श्रवणात् ॥ योयदधिष्ठाता स तत्साध्यफलभोक्तेति व्याप्तेरसारथौ व्यभिचारः ॥ नन्वदेव
ताइंद्रियसाध्यफलभोगिन्यः इंद्रियाधिष्ठातृत्वात्जीववदिति व्याप्य ॥ कृतपापफलभो
गस्येंद्रियसाध्यस्य न ह वै देवान्पापं गच्छतीत्यादिवेदेषु बाधितत्वात् ॥ नन्व चक्षुषादी ६५

त्यादिश्रुतिविरोधः ॥ नन्वदेवतानपेक्षत्वस्याश्रवणादिति सिद्धं देवाधिष्ठेयत्वं प्राणानामिति
किंच ॥ श्रुत्यंतरेपि प्राणदेवतयोरधिष्ठात्रधिष्ठेयभावं द्योतयति स वै वाचमेव प्रथमाम
त्यवहत्सा यदा मृत्युमत्यमुच्यत सोऽग्निरभवदित्यादिना वागादीनामग्न्यादिभावापत्तिक
थनादग्न्यादिभावस्य तदधिष्ठातृकत्वमेव ॥ अन्यस्यासंभवात् ॥ स प्राणो वाचमेव प्रथमा
मुद्गीथकर्मणि प्रथमामत्यवहत् ॥ मृत्युमतीत्य निराकृत्य प्रापयत् ॥ इंद्रियाणां प्राणा
धीनस्थितिकत्वात्प्राणस्य वागादिस्थितिसंपादनद्वारा तन्मृत्युनिराकर्तृत्वं बोध्यं ॥ किं प्रा
पयदित्याशंक्य प्राणो वाचः स्थितिं संपाद्याग्निदेवतया साकमधिष्ठात्रधिष्ठेयभावं प्रापय
दित्याह ॥ सा यदेति सा वाक् प्राणेन यदा मृत्युमत्यमुच्यत तदाग्निस्थितिका सती स्वयमग्निरभ
वदतद्देवताका भवदिति श्रुत्यर्थः ॥ यदुक्तं देवतानामेव भोक्तृत्वप्रसंग इति तत्राह ।

सूत्र० ६६ प्राणवता शब्दात् ॥ प्राणवता जीवेनैवेंद्रियाणां स्वस्वामिभावः संबंध इति यस्माद्भोगभागी जीव ब्र०री०टी०
एवेति यावत् ॥ कुतः शब्दात् ॥ अथ यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शना २
य चक्षुरित्यादिश्रुतेरित्यर्थः ॥ अथ देहे प्राणप्रवेशानंतरं यत्र कृष्णतारे छिद्रभूतमा
काशमनुविषण्णं चक्षुरनुगतं चक्षुस्तत्र स चाक्षात्मा चक्षुर्यांत्रिस्थाक्षुषस्तस्य रूपादिदर्शना
यहन्त्रिरूपाय चक्षुर्न चैतन्यायेति श्रुत्यर्थः ॥ एतत्सूत्रतात्पर्यार्थो न त्वदेवतानामेव भो
क्तृत्वमित्यादिनोक्तेः तस्यत्वमित्यत्राह ॥ तस्य जीवस्यैव कर्मोपार्जिते देहे कर्तृत्वेन ॥ भोक्तृ
त्वेन ॥ नित्यत्वान्न देवतानां भोक्तृत्वमस्मिन्शरीर इत्यर्थः ॥ तस्माद्देवतानां प्राणाधिष्ठातृ
त्वे ॥ न किंचिद्बाधकमिति सिद्धं ॥ ननु सत्स्विंद्रियेषु तदधिष्ठातृदेवताचिंता ॥ तान्येव प्राण
व्यापारव्यतिरेकेण न संतीत्याशंके पैसमाधत्ते ॥ तइंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥ एत ६६

स्माज्जायते प्राणो मनः सर्वेंद्रियाणीति श्रुतेर्मुख्यप्राणादिंद्रियाणां तत्त्वांतरत्वं प्रतीयते ॥
हंतास्यैव सर्वे रूपमसामेति ॥ त एतस्यैव सर्वे रूपमभवन्निति श्रुतेर्मुख्यप्राणात्मत्वमिंद्रियाणां
गम्यते ॥ हंत इदानीमस्यैव मुख्यप्राणस्यैव सर्वे वागादयो वयं रूपमसामेत्यांशिषं दत्त्वा ते वा
गादय एतस्यैव प्राणस्य रूपं बभूवुरित्यर्थः ॥ तथा चानयोर्विरोधः संदेहे नियामकाभावाद
स्ति विरोध इति प्राप्ते ॥ एतस्माज्जायते प्राण इति वाक्ये मनः सर्वेंद्रियेभ्यः पृथक् निर्दिष्टत्वेपि नेंद्रि
स्यकृतं६ येभ्यस्तत्त्वं ॥ किंत्विंद्रियत्वमेवेति यथा तद्वत्प्राणादिंद्रियाणां पृथक्निर्दिष्टत्वेपि न प्राणात्तत्त्वां
तरत्वमिति नामैनवाक्येन हंतास्येति वाक्यस्य विरोध इत्येकदेशी समाधत्ते ॥ तं दूषयति त इं
द्रियाणीति प्राणात्तत्त्वांतराणींद्रियाणीति बहिरेवं भवितुं ॥ तत्र हेतुस्तद्व्यपदेशादिति भे
दव्यपदेशादित्यर्थः ॥ उक्तहेतुरितरेण सूत्रभागेन विवृणोति ॥ तइति श्रेष्ठात्मुख्यप्राण

यत्तत्त्वांतरत्वं तत्तैवलाक्षणिकवाक्प्रवृत्तिः नतुतत्त्वांतरव्यतिरिक्तेषु६

सूत्र० ६७ दन्यत्र॥ अन्येते प्रकृता वागादयः प्राणाइंद्रियाणीत्युच्यंते॥ न प्राणः एतस्माज्जायते इत्यादौ शारी०ह० २
व्यपदेशभेददर्शनात्॥ ननु भेदव्यपदेश इंद्रियमनसोरपि समानइत्कक्रमितिचेन्न मनः॥
षष्ठानींद्रियाणीतिस्मृत्या मनस इंद्रियेभ्यस्तत्त्वांतरत्वाभावाभ्युपगमात्॥ न च प्रकृतेपिहि
तास्येतिश्रुतेंद्रियाणां प्राणात्तत्त्वांतरताभावाभ्युपगमः तेनतस्यैव सर्वे रूपमभवन् ता
स्मादेतएतेनाख्यायंते प्राणा इति वाक्यशेषेणेंद्रियेषु प्राणशब्दस्य लाक्षणिकत्वप्रति
पादकेन प्राणादिंद्रियाणां तत्त्वांतरत्वाभ्युपगमात्॥ नहींद्रियेभ्योऽतत्त्वांतरेष्वमुख्येंद्रिया
णशब्दो लाक्षणिको हेतुस्तस्मात्त एतस्यैव सर्वे रूपमभवन्नित्यनेन प्राणाधीनत्वेव्यवत्त्वमिं
द्रियाणामुच्यते॥ न तत्त्वव्यापारत्वं॥ किंच॥ भेदश्रुतेः॥ वागादींद्रियप्रकरणमुपसंहृत्या
यहेममासन्यं प्राणमूचुरिति भिन्नप्रकरणे प्राणस्येंद्रियेभ्यो भेदेन श्रुतेर्न प्राणव्यापारत्वमिं ६७

प्राणव्यापारत्वं२

नइंद्रियाधीनमित्यर्थः १

द्रियाणामित्यर्थः॥ अथास्येमवमासन्यं प्राणं वागादयऊचुरितिश्रुत्यर्थः॥ इतश्च प्राणादिंद्रि
याणि तत्त्वांतराणीत्याह॥ वैलक्षण्याच्च॥ सुषुप्तावस्थायां प्राणस्य स्थितिर्नेंद्रियाणामिति बहु
वैलक्षण्यात्तत्त्वांतराणीत्यर्थः॥ तस्मान्नोदाहृतवाक्ययोर्विरोध इति सिद्धं॥ एवं यथाक्तमा
ष्यानुसारेणोक्तं॥ अन्ये तु बहिः प्रतिज्ञाकल्पनादिदिषप्रसंगात्॥ व्यपदेशभेदस्य संज्ञाभेद
रूपस्य तत्त्वांतरत्वे साध्ये व्यभिचारित्वात्करणभेदरूपस्य तस्य भेदश्रुतेरित्यनेना
पौनरुक्त्यापातादन्याधिकरणद्वयं कल्पयामासुः तथाहि किमेकादश वागादय एवेंद्रि
याणि उत मुख्यप्राणोपीति विषये इंद्रियमिंद्रलिंगमित्यादि पाणिनिस्मरणात्प्राणस्या
पि वागादिवज्जीवस्यावापन्नपरमेश्वरलिंगत्वादिंद्रियत्वमिति प्राप्ते॥ सिद्धांतः॥ श्रेष्ठात्मु
ख्यप्राणादन्यत्र ते वागादय एवेंद्रियाणि कुतः तद्व्यपदेशात्॥ इंद्रियत्वव्यपदेशादिंद्रिय

प्राणिनिस्सूत्रं३

स्वत्र वेदितव्यः पुरुषाणां कर्त्रपरमात्मैवेति वत् ५

सू०त्र० शास्त्रप्रतीतेषु पूर्वैरितियावत्स्मरणानुरूपत्वं स्वैरेन्द्रियग्राह्यस्य॥ यथा कुर्वन्ति तत्स्मृतिं दर्शया शारी०टी०
६८ ति गच्छतीति गौरिति वदिति॥ ननिदमयुक्तं प्राणव्यापारातिरेकेणेंद्रियाणामसत्त्वादित्या २
शंक्येदमारभ्यते॥ भेदश्रुतेः वैलक्षण्याच्चेति॥ एतस्माज्जायते प्राणइत्यादिना यत इत्यादि दू
षितात्स्वं तमत्र पठितव्यं॥ प्रकरणभेदाद्वैलक्षण्याच्च न प्राणव्यापारत्वमिंद्रियाणामिति नो
कवाक्यविरोधइति इदं भाष्यं दूषणमयुक्तं॥ जगंध्यानितौ दित्वादौ बहिः प्रतिज्ञादश्वानां
दिंद्रियरूपाः॥ प्राणाः श्रेष्ठादन्यइत्यंतेः प्रतिज्ञासंभवाच्च पुनरुक्तशाष्टानामेकस्मिन्नवाक्ये
प्यकृजन्म व्यपदिशेदितिहेतोर्भाष्येविवक्षितत्वात्॥ तस्मिंश्च यमेवसृष्टिवाक्यसु दाहृत्य
प्राणेंद्रियशब्दयोरस्तु नरुक्तपुतिपादनात्॥ प्राणस्यनिविषयत्वेनेंद्रियत्वसंज्ञायायोग्या ९
दिंद्रियत्वेनसंज्ञायेदेहादावपिसंज्ञायं प्रसंगात्तन्निबीजमपिकरणत्वयकल्पनमिति

दिक्॥ एवं नवियदक्षतेरित्यौरस्यभूताद्यत्याद्यव्यापारभूतोत्पत्तिविषयक्षतिविरोधोनिर
स्तः इदानीमुत्पाद॥ कव्यापारभूतोत्पादनविषयक्षतिविरोधोनिरस्यते॥ तत्रात्रिवृत्कृत
भूतोत्पादनं परमेश्वरमेवेति श्रुतिषु निःशंकमवगतं त्रिवृत्कृतभौतिकोत्पादने तु क्षति
षु विप्रतिपत्तिर्दृश्यते॥ तथाहि सदात्मकात्॥ ब्रह्मणस्तेजोबन्नानां परोक्षत्वेन देवतापदयो
ग्यानां सृष्टिमुक्तोपदिश्यते सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानु
प्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति सा सप्तबुद्ध्याख्या
देवता पूर्वमीक्षणं कृत्वा व्यवहारायोग्यसूक्ष्मभूतान्युत्पादयित्वा तेन व्यवहारेमावाप्य
वहारयोग्यभौतिकोत्पादनार्थं पुनरेतेन प्रकारमाह हंतेत्यादि करवाणीत्यंतेन अनेने
ति पदात्पूर्वं व्यवहारापेक्षायामितिः शेषः॥ तत्र संशयः॥ किं जीवकर्तृकं त्रिवृत्कृतभौ

छां०
६८

तिकीत्यादनसुतपरदेवताकर्तृकमितिसंगतिसूत्रं पूर्वंनामरूपभेदात्प्राणेंद्रिययोर्भेदउ ग्रा०टी०
क्तमुक्तं तत्प्रसंगेन नामरूपव्याकरणं किंकर्तृकमितिविचार्यत इति प्रसंगजत्वेनबोध्या १
सत्र्लोके चारेण परसैन्यं प्रविश्यसंकलयामीत्यादौ नराज्ञः साक्षात्संकलनकर्तृत्वं किंतु
चारस्यैवेति॥ यथा तद्वदनेनजीवेनेति विशेषणाज्जीवकर्मेव भातीति कीत्यादिनमिति भवद्व
स्य वाक्यस्याकाङ्क्षोह वै नाम नामरूपयोर्निर्वहिते तिवाक्येन विरोध इति प्राप्तेब्रूमः॥ संज्ञा
मूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्॥ तुशब्दो जीवकर्तृकत्वनिरोधः॥ त्रिवृत्कुर्वतः प
रमेश्वरस्यैव संज्ञामूर्तिक्लृप्तिः॥ नामरूपव्याकरणं कार्यं भवितुमर्हतीति कस्मात्॥ सेयं देव
तेक्षतेत्येकमव्याकरणीवोतिव्याकरणस्य परादेवताकर्तृकात्वोपदेशात्॥ न चाने ६८
नजीवेनेतिविशेषणात्जीवकर्तृकत्वं॥ मेरुसमुद्रादिनामरूपादिव्याकरणेसामर्थ्या

भावरूपलिंगसहकृतसन्निधेर्बलीयस्त्वेनानेनजीवेनेत्यस्य सन्निहितानुप्रविश्येत्यनेन सं
बंधात्॥ अनेनजीवेनेत्यस्य गुणभूतस्य व्याकरवाणीत्यनेन प्रत्यक्षानेनान्वययोग्यताल
क्षणलिंगस्योक्तसन्निध्यपेक्षया दुर्बलत्वात्॥ तस्मात्सर्वत्रैव परकर्तृकमेव नामरूपव्याक
रणमित्यविरोध इति सिद्धं॥ एवं यदविज्ञातमिवाभूदित्येतासामेव देवतानां समासेनेत्य
तेन श्रुतिप्रबंधेन तेजोऽबन्नानां त्रिवृत्करणमुक्त्वा तासामेव देवतानां बहिस्त्रिवृत्कृतानामध्या
त्मम परं त्रिवृत्करणमुक्तं॥ इमास्तिस्रो देवताः पुरुषं प्राप्य त्रिवृत्त्रिवृदेकैका भवतीति
तद्विदा नामाचार्यो यथायथाश्रुतं दर्शयति॥ मांसादिभौमं पयायशब्दमितरयोश्च॥ अपि ता
विशेषरूपेण दृष्टमिवाभूदिति यत्तत्र्यासां तिसृणां देवतानां समासः समुदाय इतिया
वदितिश्रुत्यर्थः॥ इमास्तिस्त्रिवृत्कृता देवता॥ पुरुषं शरीरं प्राप्याधिवृत्क्रापतयदूपेण
पुरीषादीति रूच्येत स्पष्टारीरारुहिहस्य दर्शनं यतस्ततश्चाहा मांसादानि मांसादिर्यस्य मनः पुरीषस
तदिदं मांसादिभौमं ॥३॥

सूत्र० ७० णैकैकदेवतातेजआदिलक्षणा वर्त्तते इति द्वितीयकृत्यर्थः॥ तथाहि पृथिव्याव्रीहियवादि शारी०सू० २
रूपायाः पुरुषेणाशितायाः कार्यत्रयं शारीरे वर्त्तते पुरीषमांसमनश्चेति एवं पीतानामपां
मूत्रलोहितप्राणश्चेति कार्यत्रयं॥ तेजसोप्यादिदीपकस्य घृतादिरूपस्य कार्यत्रयं अस्थि
मज्जावागिति प्राणस्य जलाधीनस्थितिकत्वसाम्येन जलकार्यत्वव्यपदेशः॥ तस्य वायु
कार्यत्वप्रसिद्धेः॥ एवं मनसोप्यन्नभक्षणे स्वास्थ्यमात्रेण तत्कार्यत्वं॥ वाचोपि ज्ञानाद्युक्ता
त्वसाम्येन तेजःकार्यत्वव्यपदेश इति बोध्यं॥ एवं देहे कार्यत्रयरूपेण वर्त्तनमेवाध्या
त्मिकं त्रिवृत्करणमिति॥ तदिदमाह सूत्रकारः॥ मांसादीति भूमेरन्नात्मिकायाः कार्यं भौ
मं मांसादि आदिपदेन पुरीषमनसी गृह्येते एवमितरयोरप्तेजसोः कार्यमात्मिकायाः
कार्यं भौमं तव्यमर्थः॥ एवमनेन सूत्रेण त्रिवृत्करणमेतदधिकरणविषयः प्रदर्शितः ७०

तत्रैषा शंका भवति॥ ननु सर्वेषां त्रिवृत्करणे विशेषाभावादियं पृथिवी इमा आप इदं तेजइ
त्यसाधारणो हि व्यवहारः कथं संगच्छते कथं वाध्यात्मिकव्यवहारः॥ इदं मांसादि पृथि
वीकार्यं इदं जलस्येति तत्राह॥ वैशेष्यात्तु तद्वादस्तद्वादः॥ तु शब्दो रुशंकानिरासार्थः॥ सर्वे
षां पृथिव्यादीनां त्रिवृत्करणाविशेषेपि वैशेष्यात्स्वभागाधिक्यात्तद्वादः पृथिव्यादिवादः
संगच्छते इत्यर्थः॥ अभ्यासोध्यायसमाप्तिद्योतनार्थः॥ तस्मात्सिद्धः श्रुतीनामविरो
धानां ब्रह्मणि समन्वयः॥ ॥ इति श्रीब्रह्मसूत्रवृत्तौ द्वितीयाध्यायस्य चतुर्थः पादः॥ श
कल्याणमस्तु॥ शुभं भवतु॥ श्रीरस्तु॥ ॥

॥ श्रीकृष्णाय नमः ॥ पूर्वस्मिन्पादे जीवोपकरणभूतभौतिकानि ब्रह्मणो जातान्युक्तानि तदुपजीव्य
तदुपहितस्य जीवस्य संसारप्रकारं वैराग्यार्थं निरूपयितुं देहान्तरारंभे भूतसूक्ष्मसंपरिष्वक्तस्यैव लो
कान्तरगमनमित्याह ॥ तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां ॥ पूर्वस्मिन्नध्याये ब्रह्म
णि समन्वयस्य ॥ स्मृतिन्यायश्रुतिविरोधनिरासेनाऽनध्यवसायलक्षणाऽप्रामाण्यनिरासे ॥ तयो
र्विचारो भवतीत्यनयोरध्याययोर्हेतुहेतुमद्भावः संगतिः ॥ अत्र प्रथमपादे जीवस्य परलोकगमना
गमनविचारेण वैराग्यं निरूप्यते ॥ तस्माज्जुगुप्सेतेति श्रुतेः ॥ द्वितीयपादे त्वंपदार्थतत्पदार्थ
योः परिशोधनं क्रियते ॥ तृतीयपादे सगुणविद्यासु गुणोपसंहारः ॥ चतुर्थपादे निर्गुणब्रह्मज्ञा
नस्य बहिरंगाणि यज्ञादीनि ॥ अंतरंगाणि शमादीनि च निरूप्यंते ॥ अत्र श्लोकः ॥ तृतीये विरति
स्तत्त्वंपदार्थपरिशोधनं ॥ गुणोपसंहृतिर्ज्ञानबहिरंगादिसाधनमिति ॥ तथा च तत्तद्विचारात्मक

तेन तत्तदधिकरणानां तत्तत्पादसंगतिर्बोध्या ॥ तत्र जीवो मुख्यप्राणेंद्रियसहकृतो मनोविद्याध
र्माधर्मपूर्वभवसंस्कारात्मकपूर्वप्रज्ञासहकृतः ॥ पूर्वदेहं परित्यज्य देहान्तरं गच्छतीति श्रुतिसिद्धं
तादृशो जीवः किं देहान्तरारंभकैः पंचीकृतभूतभागैः ॥ एतद्देहवन्मुख्यप्राणादीनामाश्रयभूतैऽ
रसंपरिष्वक्तो गच्छत्युत संपरिष्वक्तो वेति संदेहे मानाभावादसंपरिष्वक्तो गच्छतीति पूर्वपक्षः ॥ तयोश्च
निराधारप्राणादिगमनासंभवात् न वैराग्यमिति फलं ॥ सिद्धांते तु तत्संभवाद्वैराग्यमिति बोध्यं ॥ तत्रा
यं सिद्धांतः ॥ तदंतरप्रतिपत्तौ देहान्तरप्रतिपत्तौ तदारंभकभूतैः संपरिष्वक्तो रंहति गच्छति ॥ कुतः प्र
श्ननिरूपणाभ्यां ॥ तथाहि द्युलोकपर्जन्यपृथिवीपुरुषयोषित्सु पंचस्वग्निषु दृष्ट्योपासनारूप्यपंचा
ग्निविद्याप्रस्तावे ॥ प्रवाहणाख्यस्य राज्ञः सभां प्रविष्टं श्वेतकेतुं राजा पप्रच्छ ॥ वेत्थ यथा पंचम्यामा
हुतावापः पुरुषवचसो भवंतीति ॥ अयमर्थः ॥ अस्मिन्लोके जलमयदधिमयः प्रकृतिकद्रव्यका

सूत्र॰
२

होमेश्रद्धाख्यवैंकृतेतत्कृतंजलंयजमानेप्राप्यतद्वाराद्युलोकाख्याग्निंगच्छच्छ्रद्धाख्याहुतित्वमाप॥ शा॰री॰सू॰
न्नंयजमानेंद्रियाधिष्ठातृदेवास्तस्मिन्नग्नौजुहृतितच्चहुतंजलंसोमाख्यदेहात्मनापरिणाम॥ ३
ते॥ सचजलमयोदेहःपर्जन्येग्नौवृष्ट्यभिमानिदेवैर्विशेषेहुतःसन्वृष्टिर्भवति॥ तदेवजलं
सोमाख्यदेहभावंवृष्टिभावंचापन्नं॥ पृथिव्यामग्नौहुतंसदन्नीहियवाद्यन्नभावमाप्नोति॥ ता
न्यान्नान्नभावमापन्नान्यापःपुरुषाग्नौहुताःसत्योरेतोभावमाप्नुवंति॥ ताश्चरेतोभावमापन्नाः
पंचमाहुतिरूपाश्चापोयोषिदग्नौहुतागर्भात्मनास्थिताः॥ पुरुषइतिसंज्ञांलभंते इतिपुरुषव
चस्त्वमपामिति॥ वस्तुगतिः॥ तांवस्तुगतिंजानन्नेवराजापंचम्यामाहुतौहुतायांयथापुरुष
शब्दवाच्यात्त्वापः॥ पुरुषाकारेणपरिणमंते॥ तथाकिंत्वंवेत्थेतिपप्रच्छएवंपृष्टःश्वेतकेतुः २
पितरंगौतममागत्योवाचैवंराज्ञाहंपृष्टोस्मितस्योत्तरंनजानामीतिसचगौतमःस्वयमप्यज्ञः

ममागत्योवाचैवंराज्ञाहंपृष्टोस्मितस्योत्तरंनजानामीतिसचगौतमःस्वयमप्यज्ञःसन्राजसमी
पंगत्वातांविद्यांब्रह्मात्पुरावान॥ एवमुक्तस्यराज्ञोगौतमंप्रतिनिरूपणंपंचाग्निविद्योपदेशस्तत्र
त्रापांपुरुषवचस्त्वप्रकारःस्फुटीकृतः॥ एवंप्रश्ननिरूपणाभ्यामवाग्भिस्तसंपरिष्वक्तोरंहती
तिगम्यते॥ नतूक्तप्रश्ननिरूपणाभ्यामद्भिः॥ संपरिष्वक्तोगच्छतीतिगम्यते॥ तयात्रकथम
वितरभूतपरिष्वंगसिद्धिरत्राह॥ त्र्यात्मकत्वात्तुभूयस्त्वात्॥ उक्तचोद्यनिरासार्थः॥ त्र्य
पांत्रिवृत्करणश्रुत्यात्र्यात्मकत्वादेहस्य॥ यजमानद्वारानिर्गताद्भूजन्यतेसिद्धेइतरभूत
कयजन्यत्वंतत्परिष्वंगश्चसिद्ध्यति॥ यद्वा॥ वातपित्तश्लेष्मभिःत्रिभिः॥ शरीरस्यत्र्यात्मकता
कतमात्रजन्यत्वंनसंभवति॥ वातपित्तौपोषकपुस्तेजःकार्यत्वात्तथाचायंवितरभूतत्रयज
न्यत्वमपि॥ गंधस्वेदपाकप्राणावकाशानांपंचभूतकार्याणांदर्शनात्॥ नहिसूतावब्ज

ग्रहणं कथं तत्राह ॥ भूयस्त्वादिति ॥ यद्यपि देहे पृथिव्या भूयस्त्वमेव ॥ तथापि तेजआद्युपेतया अ-
पां भूयस्त्वं बोध्यं प्राणगतेश्च ॥ प्राणानां मुख्यप्राणचक्षुरादीनां जीवदशायां देहात्मना स्थि-
तत्वात्स्थितानां गमनदर्शनात् ॥ तमुत्क्रामंतं प्राणोनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा
अनूत्क्रामंतीति श्रुत्या मरणकाले प्राणानां गतिश्रवणात् ॥ भूताश्रिता एव प्राणा गच्छंतीति
वक्तव्यं ॥ तथा च भूतसंपरिष्वक्तस्य रंहणमित्यर्थः ॥ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वा-
त् ॥ ननु यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राणश्चक्षुरादित्यमित्यादिना वागादी-
नां प्राणानां अग्न्यादिषु देवेषु गते र्जीवस्य श्रवणात्तेषां लोकांतरे प्रतिगतिर्यया भूतसंपरि-
ष्वंगसिद्धिः स्यादिति चेन्न प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंतीति श्रुति विरोधेन यत्रा-
स्येत्यादिश्रुतेरोषधीर्लोमानि वनस्पतीन् केशा इति सहपाठेन ॥ भाक्तत्वावगमात् ॥ न हि मृत ३

स्य लोमानि केशाश्च वृत्त्यह्ने गाढ्दृष्टप्रमाणानां ओषधिवनस्पतिषु लयं गच्छंतीह दृष्टं पंते ॥ अतस्तत्राह
भागत्वं अग्न्यादिषु वागादिलयस्यौपचारिकत्वमित्यर्थः ॥ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः
ननु द्युलोकादिषु पंचाग्निष्वपामाहुतित्वे सिद्धे पंचम्यामाहुतावपां पुरुषवचस्त्वं प्रकाशेन निश्चे-
तुं शक्यते ॥ तदेव नास्ति ॥ प्रथमे द्युलोकाख्याग्नावपामाहुतित्वस्याश्रवणात् किंतु ॥ तस्मिन्ने-
तस्मिन्नग्नौ देवाः श्रद्धां जुह्वतीति ॥ प्रथमेऽग्नौ श्रद्धैवाहुतित्वेन श्रूयत इति चेन्न ॥ न हि यतस्ता
एवापः श्रद्धाशब्देनोच्यंते कुतः उपपत्तेः ॥ अपां हि होमद्रव्यत्वेनाहुतित्वं संभवति ॥ मनोवृ-
त्ति विशेषरूपश्रद्धायास्तु मनसः सकाशात् ॥ पृथक्कृत्य होमायोपादातुं न शक्यंते ॥ तदाहुतिजा-
न्यसोमाख्यशरीरादेरप्याहुत्यानुपपत्तिश्च तस्मात्श्रद्धा सर्वमस्मिन्लोकेऽबहुलदर्शि पयः ॥
पंचतिजन्यस्य हुतस्य द्युलोकाग्नौ श्राहुतित्वेन पर्यवसानादस्तु श्रद्धाशब्दो लाक्षणिकस्त

सू०वृ०
५

र्थः ॥ आपो हास्मै श्रद्धां संनमंते पुण्याय कर्मण इति श्रुतावपां श्रद्धाजनकत्वश्रवणात् ॥ तेन
मंत्रसेन वा सुश्रद्धाशब्दस्य जलग्रहणं ॥ अस्मै पुंसे आपो दर्शनमात्रेण स्नानादिपूरणपकर्म-
सिद्ध्यर्थं श्रद्धां संनमंते जनयंतीति श्रुत्यर्थः ॥ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥ ननु
भवतु सोमहस्यादिक्रमेण पंचम्यामाहुतावपां पुरुषवचस्त्वप्रकारस्तथाप्यः वादिभूतपा-
रिष्वक्तो जीवो रंहतीत्युक्तमेवमश्रवादिवक्तो वस्य रंहसागकर्तस्याश्रुतत्वादिति चेन्नेष्टा-
दिकारिणां प्रतीतेः ॥ अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवंतीत्यादि
[illegible]गाहृस्येष्ठितारइष्टापूर्तादिकर्मकारिणां धूमादिमार्गेण चंद्रलोकप्राप्तिरुक्ता ॥ तानि-
ष्टादिकारिणश्चंद्रलोकस्य सोमराजशब्देन निर्दिशति ॥ एष सोमो राजेति ॥ ह्यपि पंचा-
ग्निविद्यायां तस्मिन्नग्नौ देवाः श्रद्धां जुह्वति ॥ तस्या आहुतेः सोमो राजा संभवतीति सोमराजश-

शारी०वृ०
३
५

ब्दश्रवणात्तत्रापीष्टादिकारिणः प्रतीयंते अतो भूतसंपरिष्वक्तजीवानां रंहणमित्यर्थः ॥ ननि-
ष्टादिकारिणां भूतपरिष्वक्तानां चंद्रलोकं प्रति रंहणं कर्मफलभोगायेत्येतत्संगतं ॥ ते चं-
द्रं प्राप्यान्नं भवंति तांस्तत्र देवा यथा सोमं राजानमाप्यायस्वापक्षीयस्वेत्येवमेनांस्तत्र
भक्षयंतीति श्रुतेश्चंद्रलोकं गतानामिष्टादिकारिणामन्नत्वेन भक्ष्यत्वश्रवणात् ॥ यथा यज्ञे
सोमं राजानं चमसस्थमृत्विजः ॥ आप्यायस्व पुनराप्याय्याप्य अपक्षीयस्व पुनः पुनरप-
क्षय्यापक्षय्य भक्षयंत्येवमेतान् कर्मिणो देवा भक्षयंतीति श्रुत्यर्थः ॥ तत्रोत्तरमाह ॥ भाक्तं वा-
नात्मवित्त्वात्तथा हि दर्शयति ॥ वाशब्दश्चोदितदोषनिरासार्थः ॥ तेषामिष्टादिकारिणामन्न-
त्वं भाक्तमेव न मुख्यं अन्यथा स्वर्गकामो यजेतेति श्रुतिबाधप्रसंगात् ॥ अतः ॥ कर्मिणां दे-
वान् प्रति उपभोगादिकर्मोपकरणत्वमात्रेणान्नत्वव्यपदेशः ॥ कर्मिणामनात्मवित्त्वाद्वा-

सूत्र० ५

देवानामुपतिगुणभावेन भोग्यत्वं तथा हि श्रुतिरनात्मविदां देवभोग्यत्वं दर्शयति ॥ अथ योऽन्यां देव-
तामुपास्तेऽन्योऽसावन्योऽहमस्मीति ॥ न स वेद यथा पशुरेवं स देवानामिति भेददृष्टिमानऽनात्म-
वित्त्वात्पशुवद्देवानामुपकरोतीति ॥ हविरादिदानेनेति ॥ देवभोग्य इति श्रुतितात्पर्यं ॥ यद्वा नात्म-
वित्त्वादित्यादिसूत्रभागस्यायमर्थः ॥ पंचाग्निविद्याविदत्रात्मविच्छब्देनोच्यते ॥ तया चात्मवि-
त्त्वं चाग्निविद्याविदस्तन्न भवतीत्यनात्मवित्तस्य भावस्तत्त्वं तस्मादित्यर्थः ॥ केवलेष्टादिकारिणां
पंचाग्निविद्यानभिज्ञानां देवानत्रत्यत्वभावेन भोग्यत्वं तस्मादित्यर्थः ॥ केवलेष्टादिकारिपं-
चाग्निविद्याप्रशंसार्थं गौणमेवस्त्रुतानुक्तमिति भावः ॥ नन्वत्र तस्य मुख्यत्वेपि प्रशंसासंभ-
वतीत्यत आह ॥ तथाहीति ॥ यथात्र तस्य गौणत्वं तथा हि श्रुतिर्दर्शयति स सोमलोके विभूति-
मनुभूय पुनरावर्तत इति ॥ तस्येष्टादिकारिणः सोमलोके विभूत्यनुभवोक्त्या तस्य मुख्यत्वे ॥ शारी०वृ० ३ ५

नसंभवति ॥ तस्मादत्र तस्य गौणत्वात्स्वर्लोकभोगार्थं भूतसंपरिष्वक्तस्य रंहणमिति सिद्धं ॥ कृ-
तात्ययेनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवं च ॥ सर्वकर्मसमवेतानामपां पंचमाहुतौ पुरुषा-
त्मना परिणामश्रवणं हेतुमाश्रित्याबादिभूतपरिवेष्टितस्य जीवस्य रंहणमुक्तं ॥ तत्रमुक्तं स्वा-
र्गादवरोहतां जीवानां कर्माभावेन ॥ तत्र समवेतापामप्यभावादित्याक्षेपसंगतिः ॥ सर्वपक्षे नंद
लोकभोगानंतरं तस्मादवरोहतां कर्माभावेन नरत्वनुगुणतिर्यगादियोनिप्राप्त्यभावात् कर्मफ-
लेषु वैराग्यमिति ॥ फलं सिद्धांते कर्मणः सत्त्वात्तवैराग्यमिति विवेकः ॥ एवं हि स्वर्गिणामवरोहतां
श्रूयते ॥ तस्मिन्यावत्संपातमुषित्वाथैतमेवाध्वानं पुनर्निवर्तंत इत्यारभ्य रमणीयचरणा रम-
णीयां योनिमापद्यंते कपूयचरणाः ॥ कपूयां योनिमिति ॥ तस्मिंश्चंद्रलोके यावद्भोक्तव्यकर्मो-
षित्वा भोक्तव्यकर्मसमाप्त्यनंतरमेतमेव वक्ष्यमाणमध्वानमाकाशाद्वायुधूमाभ्रादिरूपं प्रतिपु

सूत्र॰ ६ नरागच्छंतीति चागता रमणीयचरणाः पुण्यकर्माणो ब्राह्मणादियोनिं व्रजंति कपू। शारी॰वृ॰ ३
यचरणाः॥ कुत्सितकर्माणस्तिर्यगादियोनीर्जायंत इति तत्र संशयः॥ किं स्वर्गादवरोहंतः
सानुशया उत निरनुशया इति॥ अनुशय इति आमुष्मिकफलप्रापककर्मातिरिक्तं कर्मो।
च्यते॥ तत्र यावत्संपातमुषित्वेति सर्वकर्मनाशानंतरमवरोहणश्रवणात्॥ निरनुशया ए।
वावरोहंतीति प्राप्ते ब्रूमः॥ कृतस्य स्वर्गसुखप्रापककर्मजातस्य भोगेनात्यये नाशेऽनुशया।
यावानेवावरोहंति॥ कुतः दृष्टस्मृतिभ्यां॥ तथा हि दृष्टा प्रत्यक्षा श्रुतिः॥ तद्य इह रमणीयच।
रणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वा वैश्ययो।
निं वा अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरन् श्वयोनिं वा सूकर।
योनिं वा चंडालयोनिं वेति तेषां कर्मणां मध्ये ये केचिदिह कर्मभ्रमोपुण्यं पकृतवंतस्ते स्वर्गा ६

दवरोहंतो रमणीयां ब्राह्मणादियोनिमापद्येरन्निति॥ यत्तदभ्याशो ह इति तं हि अव्यवहपमेवे।
त्यर्थः॥ योनिशब्दस्यानवचनः॥ शरीरं ब्रूते॥ यद्वा॥ लोके जन्म नैव प्रति प्राणपृच्चावचमध्या।
रूपभोगो दृष्टः॥ स च निरनुशयानामवरोहतां न कारणमाकस्मिकत्वस्यादिति सिद्धं तस्य दृष्टत्वा।
दित्यर्थः॥ स्मृतिरपि॥ वर्णा आश्रमाश्च स्वकर्मनिष्ठिताः॥ प्रेत्य कर्मफलमनुभूय ततः शेषेण वि।
शिष्टदेशकालकुलरूपायुःश्रुतवित्तवृत्तसुखमेधसो जन्म प्रतिपद्यंत इति॥ सानुशयाना।
मेवावरोहणं दर्शयति॥ वर्णाश्च स्वर्मिणः॥ आश्रमा आश्रमिणः॥ प्रेत्यास्माल्लोकादमुष्मा।
च्चंद्रलोकमधिरुह्येत्यर्थः॥ ततः शेषेणेत्युक्तफलादन्येन कर्मणानुशयाख्येन जन्म प्रतिप।
द्यंत इति संबंधः॥ श्रुतं शास्त्रं वृत्तमाचारः देशादयो विशिष्टा येषां ते तथोक्ता इति॥ यत्तु यावत्सं।
पातमुषित्वेति सकलकर्मनाशानंतरमवगमितितन्न यावत्स्वर्गस्य स्वर्गे भोक्तव्यस्याशेषकर्मप

सूत्र० रतेन सकलकर्मपरत्वाऽभावादिति ॥ तस्मात्सिद्धं सानुशयानामवरोहणं ॥ तेच कर्मशेषेणावरो शारी०भा०
१ हेयेन मार्गेण चंद्रलोकमारूढास्तेनैव मार्गेणावरोहंत्युत मार्गविशेषेणेति प्रश्ने उत्तरमाह २
यथेतमनेवं चेति धूमाकाशयोरेवारोहणमार्गे श्रुतयोरवरोहणमार्गे श्रुतत्वाद्यथेतं यथाग
तमवरोहंतीति गम्यते ॥ सर्वश्रुतानां रात्र्यादीनामश्रवणादभ्राद्यधिकस्य श्रवणाच्चानेवंशब्द
मार्गविपरीतमार्गेणावरोहंतीति यथाश्रुत सर्वमार्गेणेत्यर्थः ॥ चरणादिति चेन्नोपलक्षणा
र्थेति कार्ष्णाजिनिः ॥ ननु रमणीयचरणा रमणीयां योनिमापद्यंत इति श्रुतिबलान्नानुशा
यानामवरोहणमित्येतदसंगतं तस्यां श्रुतौ चरणाद्योन्यापत्तिश्रवणात् चरणस्याचारा
त्मकस्य कर्मणोनुशयाद्भिन्नत्वादिति चेन्नायं दोषः ॥ यतः कर्मकार्ष्णाजिनिराचार्यश्चर
णश्रुतिरनुशयोपलक्षणार्थेति मन्यते ॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ ननु चरण १

श्रुतिरनुशयोपलक्षणार्थेति मन्यते ॥ आनर्थक्यमिति ॥ नेसंगतं चरणस्यैव सदाचारदुरा
चारात्मकस्य सत्सद्योनिप्रापकत्वसंभवात् ॥ अन्यथा कर्मण एवानुशयाख्यस्य सत्सद्
द्योनिप्रापकत्वे चरणस्यानर्थक्यं स्यादिति चेन्नेष्टादिकर्मणां चरणाख्याचारनिर्वर्त्यत्वे
न चरणापेक्षत्वात्तेन चरणस्यार्थवत्त्वादित्यर्थः ॥ वस्तुतः कर्मचरणयोर्न भेद इत्याह ॥ सुकृ
तदुष्कृते एवेति तु बादरिः ॥ बादरिस्त्वाचार्यः सुकृतदुष्कृते एव चरणशब्देनोच्येते इति म
न्यते लोके इष्टादिकारिणि धर्मं चरत्येष महात्मेति कर्मचरणयोरभेदेन प्रयोगदर्शनादित्य
र्थः ॥ तस्मादिष्टादिकारिणां चंद्रलोकं गतानां पुनरवरोहणेऽनुशयोस्तीति सिद्धं ॥ एवमि
ष्टादिकारिणां गतिं विचार्याथेतेभ्यो निकृष्टानामनिष्टादिकारिणां गत्यागती विचारयितुमि
ष्टादिकारिण एव चंद्रलोकं गच्छंतीत्येतदाक्षिपति ॥ अनिष्टादिकारिणामपि श्रुतं ॥ अत्र

ब्रसू० पापिनांस्तुभमार्गेण गमनमपि नास्तीति सिद्धांतोक्त्या वैराग्यहेतुकरणात्पादसंगतिः॥ सर्वप शारी०३०
८ शेष्टानिष्टकारिणामविशेषेण चंद्रलोकगतेरिष्टादिकरणं व्यर्थमिति॥ फलमिति सिद्धांते ३
पापिनां चंद्रलोकगत्यभावात्तदर्थं यज्ञादिकरणं सार्थकमिति विवेकः॥ अत्र पापिनां चंद्र
लोकगतिरस्ति न वेति संदेहे अस्तीत्याह। अनिष्टेति। इष्टादिकारिणामिवानिष्टादिकारिणाम
पि चंद्रलोकगमनं। ये वै के चास्माल्लोकात्प्रयंति चंद्रमसमेव ते सर्वे गच्छंतीति श्रुत्या श्रुतं।
अतोऽधर्मिण एव चंद्रलोकं गच्छंतीत्येतत्तदसंगतमित्यर्थः॥ ननु धर्मिणामधर्मिणां च चंद्रलो
कगमनं पापिनां नरकप्राप्तिबोधकशास्त्रविरुद्धमिति चेन्न पापिनां चंद्रलोकगमनांगीकारेपि
तत्र भोगानंगीकारात्॥ किंतु॥ चंद्रलोकगमनमात्रं कृतात्ततोवरोहंतां पापिनां नरकेष्वेवागम ८
वइतिभावं ब्रूते॥ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात्॥ वुः सर्वपदज्ञविरा।

सार्थः॥ भोगार्थं हि चंद्रलोकगमनं तत्र पापिनां भोगासंभवात्तद्गमनं व्यर्थमेवातश्चंद्रलोक
मेवते सर्वे गच्छंतीति श्रुतिरिष्टादिकारिमात्रविषया सर्वे सुकृतिन एव चंद्रलोकं गच्छंतीति पा
पिनस्तु यमलोकमारुह्य संयमने यमालये स्वपापानुरूपा यामीर्यातना अनुभूय पुनरिमं लो
कं प्रत्यवरोहंतीत्येवं भूतावेवेतरेषां पापिनामारोहावरोहौ भवतः कुतस्तद्गतिदर्शनात् यम
लोकगतेः श्रुतौ दर्शनादित्यर्थः॥ न सांपरायः प्रतिभाति बालं प्रमाद्यंतं वित्तमोहेन मूढं॥ अयं
लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे इति॥ वैवस्वतं यं गमनं जनानामित्यादिकं पा
पिनां यमलोकगतौ लिंगं सम्परायवद्रूपभावेन परः परस्ताद्देहपाताद्र्ध्वमयते गम्यते इति श्रुत्या
त्मा संपरायः परलोकः॥ तत्साधनभूतकर्मविशेषः सांपरायः स बालमविवेकिनं विशेषतो नि
त्तनिमित्तेन मोहेन मूढं छन्नदृष्टिं अत एव प्रमाद्यंतं प्रमादं विषयासक्तिं कुर्वंतं प्रति न भाति सम्यक्

लोनकेवलममुत्रैव ॥ किंतु ॥ विपरीतदर्शी यतोयमेवलोको न पानादिरस्ति न पर इति मन्यमानो
ऽस्तस्मात्तदनुरूपं पापमाचरन्पुनःपुनर्जन्ममरणाद्यास्यामेममवशमापद्यत इति ॥ कृत्या
नचिकेतसं प्रतिवचनं ॥ जनानां परलोकं गतानां पापिनां संगमने सम्यग्गम्यं वैवस्वतं यमं रा
जानं हविषा प्रीणयतेत्यर्थः ॥ स्मरंति च ॥ मन्वादयः शिष्टाः पापिनां नरकभोगं स्मरंति ॥ अत
श्च धर्मिणामेव चंद्रलोकगमनं नास्ति पापिनामित्यर्थः ॥ अपि च सप्त ॥ सप्त रौरवाद्यो नरकाः पा
पफलभूमित्वेन स्मर्यंते पौराणिकैः तान् पापिनः प्राप्नुवंतीति न चैतन्प्राप्तिरिति भावः ॥ ननु
पापिनो यमसंबंधिनीर्यातना अनुभवंतीति ॥ यदुक्तं ॥ तदसंगतं रौरवादिषु चित्रगुप्तादी
नामधिष्ठातृत्वस्मरणादित्यत आह ॥ तत्रापि च तद्व्यापारादविरोधः ॥ तत्रापि रौरवादिषु
चित्रगुप्तादीनामधिष्ठातृत्वस्मरणादित्यत आह ॥ तत्रापि च तद्व्यापारादविरोधः ॥ तत्रापि

रौरवादिष्वपि तस्यैव यमस्याधिष्ठातृत्वव्यापारादविरोधः ॥ चित्रगुप्तादीनां यमप्रयुक्तत्वादिति भावः
उपासकानामर्चिरादिमार्गः ॥ केवलकर्मिणां धूमादिमार्ग इति श्रुतिस्मृत्यादिषु व्यवस्थात
यां चैतन्मार्गद्वयभ्रष्टानां पापिनां तृतीयमार्गोक्तेरपि न तेषां चंद्रप्राप्तिरित्याह ॥ विद्याक
र्मणोरिति तु प्रकृतत्वात् ॥ पंचाग्निविद्यायां प्रवाहणाख्येन राज्ञा पृष्टे तैर्जनैर्वेत्थ यथासौ लोकः
कथं न संपूर्यत इत्येवं प्रकारं किं त्वं न जानासीति श्वेतकेतुः ॥ एष तस्य प्रश्नस्य श्वेतकेतुपि
तरं गौतमं प्रति राज्ञ एव प्रतिवचनं श्रूयते ॥ अथैतयोः पथोर्न कतरेणचनेतानीमानि क्षुद्रा
ण्यसकृदावर्तीनि भूतानि भवंति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौ लोको न संपूर्य
त इति ॥ अथैतयोरिति पदस्यार्थमाह सूत्रकारः ॥ विद्याकर्मणोरितीति अर्थ इति शेषः कुतः
विद्याकर्मणोरेव देवयानपितृयाणात्मकं मार्गद्वयसाधनत्वेन प्रकृतत्वात् ॥ प्रकृतत्वात्क

सूत्र॰ त्वमेतच्छब्दस्य युक्तमित्यर्थः ॥ एतदुक्तं भवति ॥ एतयोर्विद्याकर्मणोः पथ्योर्मार्गसाधनयोरन्य श्रा॰ टी॰
१० तरेण मार्गसाधनेन विद्यया कर्मणा वान्यतरस्मिन् पथि नाधिकृता ये पापिनस्तेषां क्षुद्रजंतुत्व ३
प्राणोसकृदावर्तिर्जन्ममरणबाहुल्ययुक्तस्तृतीयः पंथा इति नचैवं प्राप्तिरिति श्रुतौ जायस्व
म्रियस्वेत्यनेन जन्ममरणबाहुल्ययुक्तस्थानं शाद्योमार्गद्वयोपक्रमानुरोधात्तृतीयमार्ग
लक्षणपि निरुक्तेनुशब्देन नचेदमसमवते सर्वे गच्छंतीति श्रुतिप्रयुक्तशंकानिरासः कृतः ॥ सर्व
शब्दस्य पुण्यपुरुषमात्रपरत्वादिति भावः ॥ ननु पापिनामस्मिन् लोके देहप्राप्त्यर्थं चंद्रलो
कगमनमंगीकर्तव्यं पंचम्यामाहुतावापः पुरुषवचसो भवंतीत्याहुतिसंख्यानियमेन देहप्रा
प्त्यभिधानादन्यथा संख्यानियमाभावप्रसंग इत्यत आह ॥ न तृतीये तथोपलब्धेः ॥ तृतीयमार्गप्रवि
ष्टानां पापिनां देहप्राप्त्यर्थमाहुतिसंख्यानियमो नादरणीयः ॥ कुतः तथोपलब्धेः ॥ संख्यानियमं १०

विनैव जायस्व म्रियस्वेत्येतत्तृतीयं स्थानमिति श्रुतौ तृतीयमार्गे देहप्राप्तेरुपलब्धेरित्यर्थः इष्टा
दिकारिणामेवायं संख्यानियम इति भावः ॥ किंच ॥ पंचम्यामाहुतावापः पुरुषवचसो भवंतीति
पंचम्यामाहुतावपां पुरुषवचस्त्वं प्रतिपाद्यते न पंचम्यामाहुतौ वापः पुरुषवचसो भवंतीति
त्वं निषिध्यते वाक्यभेदप्रसंगात् तथा च ये चंद्रं गतास्तेषां संख्यानियम इतरेषां तु विनैव संख्या
नियमं भूतांतरसंश्लिष्टाभिरद्भिर्देहस्यारंभ इत्यनियमः ॥ स्मर्यतेपि च लोके ॥ अपि च लोके
भारतादौ द्रोणधृष्टद्युम्नादीनां सीताद्रौपद्यादीनां चायोनिजत्वं स्मर्यते ॥ तत्र द्रोणादीनां यो
षिदाहुतिरेका नास्ति धृष्टद्युम्नादीनां योषित्पुरुषविषये द्वे आहुती न स्त इत्याहुतिसंख्याया
अनियमः ॥ एवमन्यत्रापीति भावः ॥ दर्शनाच्च ॥ किंच ॥ लोके जरायुजांडजस्वेदजोद्भिज्जेषु चतुर्वि
धेषु देहेषु स्वेदजोद्भिज्जयोः स्त्रीपुंव्यक्तिसंयोगं विनैवोत्पत्तिदर्शनान्नाहुतिसंख्यानियम इत्यर्थः

सूत्र० ११

जरायुजंमनुष्यादिशरीरंअंडजंपक्ष्यादिकंस्वेदजंयूकादिकंउद्भिज्जंवृक्षादिकं।ननुतेषांसर्वे॰ वारा०वृ० ३
षांभूतानांशरीरेषुबीजानिभवंत्यांडजंजीवजमुद्भिज्जमितिस्मृतौशरीरत्रैविध्यंश्रूयते।अतः
कथंचातुर्विध्यमतआह।तृतीयशब्दावरोधःसंशोकजस्य।स्मृतावंडजंजीवजमुद्भिज्जमि
त्यत्रतृतीयेनोद्भिज्जशब्देनावरोधःसंग्रहः।संशोकजस्यस्वेदजस्यदंशादिकंहिपृथ्वीमुद्भि
द्यजायतेस्वेदजंतुजलमुद्भिद्येत्युभयोरप्युद्भेदकत्वाविशेषादुद्भिज्जपदेनसंग्रहःश्रुतौक्तः
नह्येतावताचातुर्विध्यहानिर्भवतिस्थावरजंगमात्मकत्वेनोभयोर्भेदस्यदुरपह्नवत्वादिति
भावः।तस्मादनिष्टादिकारिणांनचंद्रलोकप्राप्तिःकिंत्विष्टादिकारिणामेवेतिसिद्धं।त
त्स्वाभाव्यापत्तिरुपपत्तेः।पूर्वमिष्टादिकारिणःस्वर्गंगताःकर्मफलभोगानंतरंसानुशयाअ
वरोहंतीत्युक्तंअथतेषामवरोहप्रकारश्चिंत्यते।तत्रावरोहश्रुतिः।अथैतमेवाध्वानंपुन ११

र्निवर्तंतेयथेतमाकाशमाकाशाद्वायुंवायुर्भूत्वाधूमोभवतिधूमोभूत्वाऽभ्रंभवत्यभ्रंभूत्वामेघो
भवतिमेघोभूत्वाप्रवर्षतीति।अत्रभोक्तव्यकर्मसमाप्त्यनंतरंअध्वानमेवाऽऽपद्यतेति।यथाग
तमित्यर्थः।इदमुपलक्षणंअन्येनेत्यपिद्रष्टव्यं।यावत्संपातमुषित्वाचंद्रलोकेदेहमास्थायतत्रस्थाः
कर्मक्षयेणतत्राकाशंगतास्तत्समायदाभवंति।तदातद्वपुर्हित्वाअनुशयिनोजीवाअ
प्याकाशसमाभवंतीत्याह।आकाशमिति।एवंवाय्वादावपियोजनीयं।वायुर्भूत्वावायुस
मोभूत्वाएवमेवमग्रेऽपीतिसिद्धांतार्थः।पूर्वाधिकरणेजायस्वम्रियस्वेतितृतीयस्थानमित्या
दिस्थानशब्दस्यमार्गद्वयोपक्रमसामर्थ्यात्तृतीयमार्गलक्षकत्वमुक्तं।नह्युक्तंद्वौमौद्वौमा
र्गाणावित्युपक्रम्यापरंतीयस्यादौतृतीयस्योपक्रांतसजातीयस्यैवदर्शनादिहेतुर्भवतिश्रु
तेर्मुख्यार्थपरित्यागेमानाभाववदनित्युदाहरणसंगतिः।पूर्वपक्षेभवतिश्रुतेर्मुख्यत्वसिद्धिःफ

सूत्र० १२ तं सिद्धांते गौणत्वसिद्धिरिति विवेकः ॥ तत्र संशयः किं स्वर्गादवरोहंतो जीवा आकाशादिस्वरूपं शारी०अ० ३
प्रतिपद्यंते उत तत्साम्यमिति तत्र तद्भवतिश्रुतेर्मुख्यत्वादवरोहतामाकाशादिस्वरूपापत्तिरेवा
जीवानामिति प्राप्ते ब्रूमः ॥ जीवानां नैराकाशादिभिः साभाव्यापत्तिः साम्यापत्तिरेव कुतः उपपा
त्तेः ॥ लोके क्षीरस्य दधिभावो युक्तः क्षीरकाले दध्यभावादिहेतुः पूर्वं विद्यमानाकाशादिभावो
जीवस्य दुरुपपादः ॥ किंच ॥ जीवस्याकाशस्वरूपापत्तौ वाय्वादिक्रमेणावरोहाभावप्रसंग
स्यादिति युक्तिवशाद्भवतिश्रुतेर्गौणत्वमंगीकर्तव्यमित्याकाशादिसंबंधमात्रमेव जीवानां सं
बंधस्य सादृश्यापत्तिरिक्तो न संभवतीति सादृश्यमेवेति सिद्धं ॥ एवमाकाशादिषु वर्षांतेषु पूर्वपू
र्वसादृश्यापानंतरमुत्तरोत्तरसादृश्यमित्युक्तं तदुपजीव्य विचार्यते ॥ किं जीवश्चिरकालमेकसादृ
श्येनावस्थाय परसादृश्यं गच्छत्युताल्पकालमिति विषये नियामकशास्त्राभावादनियम इति प्रा १२

प्ते सिद्धांतयति ॥ नातिचिरेण विशेषात् ॥ जीवो नातिचिरेणाल्पकालमेवाकाशादिवर्षांतेसादृश्ये
नावस्थाय वर्षधाराद्वारा पृथिवीं प्रविशतीति कुतः विशेषात् ॥ पृथिव्यनंतरं व्रीह्यादौ प्रवेशमु
क्त्वा व्रीह्यादिभ्यो जीवस्य निःसरणसमये व्रीह्यादिषु चिरकालावस्थानरूपविशेषं दर्शयि
त्वा निःसरणं दर्शयति श्रुतिः ॥ अतो वै खलु दुर्निष्प्रपतरमिति ॥ एकस्तकारो लुप्तः छांदसप्र
क्रियया अतो अस्माद्व्रीह्यादिभावात् दुर्निष्प्रपततरं दुःखतरं जीवानां निःसरणं भवतीत्यर्थः
व्रीह्यादिभ्यो जीवस्य दुःखेन निःसरणं भवतीत्युक्तेः आकाशादिभ्यः सुखं निःसरणं जातमिति प्र
तीयते ॥ यथा लोके कश्चिन्मंत्रिणोनेकराजसभासंचारं कृत्वा ॥ कस्यांचिद्राजसभायां चिरं रोलि
काप्रतिष्ठामविंदत्तेनुक्ते इतरासु सभासु चिरं रोलिकां न लब्धवानिति प्रतीयते तद्वत् ॥ व्रीह्याका
शादिषु सुखदुःखे जीवस्य दीर्घकालावस्थानाल्पकालावस्थाने एव ॥ तदानीं स्मृज शरीरमा

सूत्र० वेन॥ मुख्यसुखदुःखयोरसंभवात्॥ तस्मात्व्रीह्यादिप्रवेशात्पूर्वमल्पमेवकालंतत्तत्सादृ- शारी०सू०
१३ श्येनावस्थानमितिसिद्धं॥ अन्याधिष्ठितेपूर्ववदभिलापात्॥ तस्मिन्नेवावरोहेजीवानांवर्षधा- ३
राद्वारापृथिवीप्रवेशानंतरंपठ्यते॥ तइहव्रीहियवाओषधिवनस्पतयस्तिलमाषाइतिजा-
यंतइति॥ नेत्यनुशयिनोजीवाइत्यर्थः॥ तत्रसंशयः॥ किंजीवानांव्रीह्यादिभावेनजन्ममु-
ख्योतजीवांतराधिष्ठितेव्रीह्यादौसंसर्गमात्रमिति॥ तत्रपूर्ववत्तुर्निष्पतरश्चाहस्य
सर्वोक्तयुक्तिवजातविरकालावस्थानजन्यकतेपिप्रकृतेश्लीस्यदधिमावेनेवाबादिभूतसं
परिष्वक्तजीवानामवादिकाराव्रीह्यादिभावेनमुख्यस्यैवजन्मनःसंभवात्व्रीह्यादिस्थावरश-
शरीरेषुसुखदुःखभाजोऽनुशयिनोजीवाइतिप्रत्युदाहरणेपूर्वपक्षेसिद्धांतः॥ अन्येजीवैरा-
धिष्ठितेव्रीह्यादौसंसर्गमात्रमनुशयिनांभवतिपूर्ववत्॥ यथाकाशादौसंसर्गमात्रंतद्वत्॥ कु- १३

तःपूर्ववदभिलापात् यथाकाशादिषुवर्षांतेषुकर्मपरामर्शमंतरेणैवप्रवेशउक्तएवंव्रीह्या-
दिष्वपिकर्मपरामर्शंविनैवप्रवेशाभिलापादित्यर्थः॥ पूर्ववदितिपदस्यहेतोश्चार्थद्वयाभिप्राये-
णापयुक्तमितितुनरुत्याद्यपव्याख्यातं तस्मात्कर्मपरामर्शाभावात्॥ नव्रीह्यादिष्वनुशयि-
नांसुखदुःखभाक्त्वं यत्रत्वनुशयिनांसुखदुःखभोक्तृत्वं तत्रकर्मपरामर्शो रमणीयचरणाइ-
त्यादिनाह्युपचरति॥ जायंतइतिश्रुतिः॥ संसर्गमात्राभिप्रायानमुख्येतिबोध्यम्॥ अशुद्धमि-
तिचेन्नशब्दात्॥ ननुज्योतिष्टोमादिकंकर्मपशुहिंसायोगादशुद्धंतत्कारिणामनुशयिनांव्री-
ह्यादिषुस्थावरेषुदुःखानुभवार्थंमुख्यमेवजन्मास्तितिचेन्नज्योतिष्टोमादेः॥ शास्त्रादिविशि-
ष्टात्कर्मत्वेनावगतत्वान्नदुःखहेतुत्वमित्यर्थः॥ किंच॥ रेतःसिग्योगोथ॥ अथव्रीह्यादिभावा-
नंतरमनुशयिनांरेतःसिंचतीतिरेतःसिक् तद्योगस्तद्भावः श्रूयतेतावज्जायते॥ योरेतःसिंचति

सू॰वृ॰ १४

रूपतावभवतीति ।। अनुशयी व्रीह्यादिवत्कारापुरुषे प्रविष्टस्तद्रूपो भवति तत्रासंगच्छतीत्य शारी॰ ३॰
र्थः ।। नन्वेवमनुशयिनो रेतःसिग्भावो मुख्यः संभवति ।। इदानीं पुरुषे प्रविष्टत्वेनाशनयोवन् ३
तारेतस्सिग्भावस्य संसर्गो वक्तव्यः ।। तथा च व्रीह्यादावपि संसर्ग एव स्थाकाशादावपि संसर्ग
स्यैवावगतत्वेन संदंशन्यायादिति भावः ।। नन्वनुशयिनां सर्वत्र संसर्गस्यैवांगीकारे मुख्या
जन्मापि न स्यात् ।। तथा रमणीया योनिमापद्येरन्नित्यादिश्रुतिर्गौण्येव प्रसंग इत्यतस्त्वा
ह ।। योनेः शरीरं ।। योनौ रेतःसिक्प्रविष्टे ततः शरीरमनुशयिनामनुशयाख्यकर्मभोगाय
जायत इत्याह शास्त्रं ।। तद्य इह रमणीयचरणा इत्यादि ।। तस्माद्ब्राह्मणादियोनावेवानुश
यिनां मुख्यं जन्म न व्रीह्यादाविति निगत्यागतिविवेककृतं वैराग्यं ज्ञानसाधनमित्यनवद्यं ।। इ
तिश्रीमत्सूत्रवृत्तौ शारीरकस्य तृतीयाध्यायस्य प्रथमः पादः ।। १ ।। एवं गत्यागतिनिरूपणे १४

न कर्मफलेभ्यो विरक्तस्य महावाक्यार्थज्ञानाय तत्त्वंपदार्थौ शोधयितुं पादमारभमाणो गत्या
गतिनिरूपणेनैव जाग्रदवस्थानिनिरूपितेत्यभिसंधायात्मनः स्वयंप्रकाशत्वसिद्धये स्वप्नाव
स्थां वक्तुं सूत्रं पठयति ।। संध्ये सृष्टिराह हि ।। तथा चानयोः पादयोर्हेतुहेतुमद्भावः संगतिः सि
द्धे विरक्तस्य पादस्य प्रवृत्तेस्तत्त्वंपदार्थयोर्मध्ये त्वंपदार्थस्योद्देश्यत्वात्तस्यानन्तोपात्ततः
प्राक्तस्यावस्थानिर्मुक्तत्वं प्रतिपाद्यते ।। तत्रस्थापादसमाप्तेस्तत्पदार्थो विचार्यते ।। तत्र स्वप्ना
वस्थायां जाग्रदानन्तर्यात्स्वप्ने ज्योतिष्ट्वसिद्धौ स्वप्नसाधनताद्यादौ विचारः जाग्रदवस्थायां
स्सूर्यादिप्रकाशमतेनात्मनः स्वप्रकाशत्वं दुर्ग्रहं स्वप्ने तु सूर्याद्यभावेपि प्रत्यक्षं तथाहुरुपम
नात्मसुप्रह्मिति ।। स्वप्नस्य सत्यं ज्योतिष्ट्वसिद्धौ स्वप्नसाधनं तं गंतव्यं ।। एवं हि स्वप्नमध्ये प्रकृ
त्यमभ्युपते ।। ननु नरयानरथयोगान्पंथानो भवत्यथ रथान्रथयोगान्पथः ।। सृजत इत्यादि

सूव॰ १५

तत्रसंशयः॥ किंस्वप्नसृष्टिर्व्यावहारिकीघटादिवदुतस्विच्छुक्तिरजतवन्मायामात्रमिति॥ पूर्वपक्षे शारी॰वृ॰ ३
सूत्रादिवत्सत्यास्वप्नावस्थातोजीवस्पृष्टयत्करणयोगाद्भेदरूपवाक्यार्थान्वयोसि
द्धिः फलं॥ सिद्धान्तेतन्नसिद्धिरितिभेदः॥ तत्रेदंपूर्वपक्षसूत्रंसंध्येसृष्टिरितिसंध्येजाग्रत्सुषुप्त्योः॥ सं
धौभवेस्वप्नेसृष्टिर्व्यावहारिकीवहियतःश्रुतिरेवमाह॥ अथरथान्रथयोगान्पथःसृजत
इति॥ निर्मातारंचैकेपुत्रादयश्च॥ किंचैकेशाखिनोस्मिन्नेवस्वप्नेकामानांनिर्मातारंतथा
जीवमिवपरमात्मानमामनंति॥ यएषुसुप्तेषुजागर्तिकामंकामंपुरुषोनिर्मिमाणइति॥ ए
षुचक्षुरादिकरणेषुसुप्तेषुनिर्व्यापारेष्वित्यर्थः॥ ननुश्रुतौकामानांबुद्धिवृत्तिविशेषाणांनि
र्मातापरमात्मेतिस्फूर्तेनार्थनिर्यातेत्यतआह॥ पुत्रादयश्चेतिकाम्यंतेइतिव्युत्पत्त्यापु
त्रादयएवकामाइत्यर्थः॥ निर्मातृत्वंपरमात्मनइत्यर्थः॥ तथाचस्वप्नसृष्टिःसत्याईश्वर १५

बाधस्यैवाभिव्यक्तिः ४

कर्तृकत्वात्क्रियादिवदित्यनेनसूत्रेणोक्तं तस्मात्श्रुत्यनुमानाभ्यांस्वप्नसृष्टिःसत्येतिप्राप्ते
ऽभ्यत्याह॥ मायामात्रंतुकार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्॥ तुशब्दःपक्षनिरासार्थःस्वाप्नसृष्टि
र्मायामात्रंशुक्तिरजतवत्कुतः॥ कार्त्स्न्येनदेशकालादिसंपत्त्याबाधाभावेनचानभि
व्यक्तस्वरूपत्वात्॥ नहिरथादीनामुचितोदेशःस्वप्नेसंभवति॥ देहांतर्नाडीषुविष्टमनोवा
च्छिन्नसाक्षिनिष्ठत्वात्राप्युचितः॥ कालोपिघटिकामात्रवर्तिनिस्वप्नेबहुसंवत्सरसाध्यसं
सरणस्यदर्शनात्तस्मात्प्रातिभासिकएवस्वप्नप्रपंचः॥ यदुक्तं॥ अथरथान्रथयो
गान्पथःसृजतइतिजीवकर्तृकांसृष्टिंश्रुतिराहेतिसृष्टेःसत्यमितितच्छ्रुत्यैवनतत्ररथानर
थयोगानपंथानोभवंतीत्यादिकयास्वप्नेरथाद्यभावबोधिकयापरिहृतंअनुमानेचोचि
तदेशादिजन्यत्वमुपाधिः॥ स्वप्नसृष्टिःसत्याईश्वराकर्तृकत्वादित्यत्रयत्रयत्रसत्यत्वंतत्रतत्रोचि

तद्देशादिजन्यत्वं यत्र यत्र ईश्वरकर्तृकत्वं तत्र तत्रापि तद्देशादिजन्यत्वं नेति साध्यव्यापकस्य सा
धनाव्यापकस्य चोदितदेशादिजन्यत्वस्योपाधेर्मर्दितत्वेमानतात्व्यभिचारस्तिभावः॥ हेतुमि
थिव्यश्रुत्यंतरे समहिकर्तृत्वं तिस्वयंविहत्य स्वयं निर्माय स्वेन ज्योतिषा प्रस्वपितीति स्वप्नस्रष्टेर्जी
वकर्तृकत्वश्रवणात्॥ स्वयं विहत्य पूर्वदेहं निश्चेष्टं कृत्वा स्वयं निर्माय॥ स्वप्नदेहं संपा
द्य स्वेन भासा स्वीयांतःकरणवृत्त्या स्वेन ज्योतिषा स्वरूपचैतन्येनेत्यर्थः॥ तथा च कामंकामं
पुरुषो निर्मिमाण इत्यत्रापि जीव एव निर्माता ज्ञेयः॥ ननु स्वप्नस्य मिथ्यात्वे। सत्यशुभाशुभसूच
कत्वं न स्यादित्यत आह॥ सूचकश्च हि श्रुतेराचक्षते च तद्विदः॥ स्वापिगजादिवत्काशो सत्य एव
वस्तुतः॥ स स्वप्नसूचकत्वस्य साध्वसाधुसूचनस्य हेतुः॥ तथा हि यदा कर्मसु काम्येषु स्त्रियं स्व
प्नेषु पश्यति समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने इत्यादिश्रुतेरवगम्यते स्वप्न॥ व्याच

चैतन्येन स्वप्नाध्यायविदः॥ शुभाशुभसूचकत्वं स्वप्नस्येत्यर्थः॥ यद्यपि स्वप्नकाशस्यासंबंधं नैव योप
रागे रोगे च सूचकत्वमिति वस्तुतः॥ सत्यत्वमप्रयोजकं तथापि रजतस्य सत्यहर्षादिजनकत्ववा
स्तवस्य सूचकत्वमविरुद्धमिति तात्पर्यं॥ ननु यथेश्वरः संकल्पमात्रेण जगत्सृजति एवं तदंशो
जीवोपि संकल्पमात्रेण निमित्तेन स्वात्मं जगत्सृजतु तथा चोचितनिमित्ताभावान्मिथ्या स्वप्न
सृष्टिरित्यसंगतमित्यत आह॥ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बंधविपर्ययौ॥ जीवेश्वरयोर
भेदेपि मायया पैश्वर्यस्य तिरोहितत्वात् न जीवस्य संकल्पमात्रेण स्वप्नसृष्टत्वमिति पराभिप्रायः जी
वस्य तिरोहितमैश्वरत्वं परस्यात्मनो भिध्यानादभेदाभ्यासरूपध्यानात् ज्ञानादीश्वरत्वमादा
दभिव्यक्तं भवति॥ कुतः ततः ईश्वरादज्ञानात् बंधः ज्ञानात्तद्विपर्ययो मोक्ष इति श्रुति दर्शया
ति॥ तस्मादीश्वरत्वसाधनादभिरहितानां नैश्वरत्वाभिव्यक्तिरित्यर्थः॥ श्रुतिस्तु पठ्यते॥ ज्ञात्वा देवं स

सूत्र० १८ र्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः ॥ तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं शारी०भा०
केवल आप्तकाम इति ॥ देवं स्वप्रकाशमीश्वरमहं तेन साक्षात्कृत्य सर्वपाशानां मिथ्याज्ञानरा २
गादीनां क्लेशानामपहानिः क्षयो यस्य संभवति ॥ एवं क्षीणैः क्लेशैस्तत्कार्यजन्ममरणक्षयो
भवति निर्गुणविद्याफलमुक्त्वा सगुणविद्याफलमाह ॥ तस्येति ॥ तस्येश्वरस्याभिमुख्येन ध्या
नाद्युक्तहानिद्वयापेक्षया तृतीयमणिमाद्यैश्वर्यं देहभेदे देहविश्लेषे सिद्धे देहपातं भुक्त्वा नि
र्गुणविद्योदये केवलोऽद्वितीय आप्तकामो निरतिशयानंदात्मनैवावतिष्ठत इति ॥ क्रममुक्ति
वाक्यार्थः ॥ ननु जीवस्येश्वरत्वतिरोभावे को हेतुरित्याशंक्याह ॥ देहयोगाद्वा सोपि ॥ सोपि जीव
स्येश्वरत्वतिरोभावो देहेंद्रियादियोगात् ॥ यथा भस्मयोगाद्वह्नेः प्रकाशनसामर्थ्यतिरोभावस्त
द्वदित्यर्थः ॥ ननु जीवस्येश्वरत्वाभाव एवास्त्विति शंकां वारयाह ननिरस्यति ॥ न चेदमस्य श्रुतिसहस्र १८

सिद्धत्वादिति भावः ॥ तस्मात्तु निमित्तसामग्र्यभावात्काममस्य वसरे वाधिगतत्वाच्च मुक्तिरूपवत्स्वाप
मात्रं स्वप्नदर्शनमिति तत्र स्वप्नावि निर्मुक्तो यमात्मेति सिद्धं ॥ एवं बाह्यकरणोपरमरूपं स्वप्नमात्म
नः ॥ स्वप्नकारणतार्थं परीक्ष्यांतःकरणोपरमरूपां सुषुप्तिं स्वप्नानंतरभाविनीं तस्य बंधतापनि
रूपयति ॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ सुषुप्तेः स्वप्नाभावरूपत्वात् ॥ तदानंतर्याच्च हेतु
हेतुमद्भावः ॥ आनंतर्यं वा संगतिः ॥ तत्र सुषुप्तिवाक्यानि विप्रतिपन्नानि हृदयं तेनद्यैवं च सुप्त
ः ॥ समस्तः संप्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सुप्तो भवतीति ॥ तत्तासु स्वप्नाद्यव
स्थासु पत्र्यावस्थापामेतद्बाह्येंद्रियोपरमणं यथास्यात्तथा सुषुप्तः ॥ संहृतबाह्येंद्रियवृत्तिपा
वत्समस्तः ॥ अविशेषवृत्तिः ॥ संप्रसन्नः संहृतांतःकरणस्वप्नदास्वप्नं न जानाति तदा नाडीषु सु
प्तस्यार्थः ॥ कश्चिन्नाडीभिः मरणानंतरं पुरीतति सुषुप्तिः प्राप्तेनाभिः ॥ तत्स्वमृष्यपुरीतति शेत

सू॰वृ॰
१८

इति ॥ क्व तर्हि परमात्मनि सुप्तिः ॥ श्रूयते य एषोंतर्हृदय आकाशस्तस्मिन् शेत इति सता सोम्य तदा शारी॰वृ॰
संपन्नो भवतीत्यादिभिः ॥ तत्र संशयः ॥ किं जीवस्य नाडीपुरीतत्परमात्मनां मध्ये यत्र कुत्र विसु ३
षुप्तिरुत नाडीपुरीतत्प्रवेशानंतरं परमात्मन्येवेति ॥ तत्र पूर्वपक्षे सुषुप्तिस्थानविकल्पाज्जीव
स्य ब्रह्मैक्यानियमः ॥ सुषुप्तौ भ्रमनिवृत्तावपि रुषब्रह्मैक्यप्राप्तेरनियमादिति ॥ फलं सिद्धांतेत
न्नियम इति भेदः ॥ तत्रैकयागनिष्पादकत्वेन श्रुतव्रीहियववदेकस्वापनिष्पादकनाड्यादी
नां विकल्प इति प्राप्ते ब्रूमः ॥ तदभावस्स्वप्नाभावः ॥ सुषुप्तिर्नाडीष्वात्मनि चेति नाड्यादीनां समुच्च
य एव न विकल्प इत्यर्थः ॥ समुच्चयश्च नाडीपुरीतत्प्रवेशं विना संपत्तेरभावात्तयोर्नाडी
पुरीततोर्गुणत्वेन परमात्मनः ॥ प्रधानत्वेन ज्ञेयः ॥ कुतः तच्छ्रुतेः ॥ तस्य नाड्यादीनां सुषुप्तिस्था
नत्वस्य श्रुततात् उक्तसमुच्चयानंगीकारे श्रुतीनां संग्रहो न स्यादिति भावः ॥ किंच ॥ विभोर्जीव १८

स्य स्वप्नानंतरं नाडीपुरीततोः ॥ संचारोंतःकरणाद्युपाधेः ॥ सत्वात्संभवतीत्युपाधिसंचारं विना स्व
तस्तस्य संचाराभावात् सुषुप्तौ तदुपाध्यभावात् नाडीपुरीततोः ॥ शयनं जीवस्य न संभवतीत्यपि
द्रष्टव्यं ॥ अतः प्रबोधोस्मात् ॥ यतः परमात्मैव सुषुप्तिस्थानमत एवतो हेऽस्मात्परमात्मनो जी
वस्य प्रबोध उपदिश्यते ॥ प्रबोधकाले कस्माज्जीवात्मनः समुत्तिष्ठंतीति प्रश्ने परमात्मनः स
काशादुत्तिष्ठंतीति ॥ श्रवणादात्मनोन्यसुप्तिस्थानत्वे रहस्यश्रवणं बाध्येत ॥ अन्यत्र सुषुप्तस्या
न्यस्मादुत्थानायोगादिति भावः ॥ तस्मात्सुषुप्तौ मिथ्याज्ञानाभावमात्रेणोपब्रह्मसंपत्तेः ॥ सताम्
ज्ञानानिवृत्तौ साकल्येन ब्रह्मसंपत्तिरविरुद्धेत्यस्ति जीवस्य ब्रह्मत्वनियम इति सिद्धं ॥ स एव क
र्मानुस्मृतिशब्दविधिभ्यः ॥ सुषुप्त्यंते परमात्मनः सकाशाज्जीव उत्तिष्ठतीति परमात्मैव सुषुप्ति
स्थानमित्युक्तं ॥ तदयुक्तं ॥ सुप्तादन्यस्य प्रबोधसंभवेन ॥ सुप्तस्य नाड्यादिस्थानत्वेप्यु॰ दिशोधादि

त्याद्भेपात्संगतिः ॥ सर्ववदेव फलं ॥ तत्र यः सुप्तो जीवः ॥ स रागो निश्वसिति उत स वान्यो वेति ॥ अनि
यम इति संशये ॥ जनराज्ञो शिष्नविंशेरिव अनियम इति प्राप्ते क्रमः ॥ यः सुषुप्तो जीवस्स रागो नि
श्वसिति नान्यः ॥ कुतः कर्मानुस्मृति शब्दविधिभ्यः ॥ पंचभ्यो हेतुभ्यो दिनद्वयसाध्यकर्मणोर्द्धं कृत्वा
सुप्तः ॥ पुनरुत्थाने परा ऽ विशिष्टमर्द्धं कर्म करोति ॥ अनुशास्ते न परत्य निशायां योहं सर्वं दिने काशी
नाथमद्राक्षं सोहमिदानीं मणिकर्णिकायां स्थितोस्मीत्याद्याकारस्स्मृच्यते ॥ पश्चाद्भवं गता
स्य स नाहृशः काशीनाथ इत्यादिस्मरणं स्मृतिशब्दे नोच्यते पुनः ॥ इतिन्यायं प्रतिपोन्याउव
ति ॥ बुधं तां ये वेत्त्यादिश्यति ज्ञानं शब्दः ॥ अयने गमनमायः ॥ प्रतिनियतगमनं प्रति न्यायः ॥ स
यथा भवति ॥ तथायो निशारोगं तिसुप्तः ॥ पुनरागच्छति जागरायेत्यर्थः ॥ कर्मविद्या विधयो विधि
शब्दे नोच्यंते ॥ यदि सुप्तस्य पुनर्नोत्थानेन तदोक्तहेतवो बाध्येरन्न इत्यर्थः ॥ तस्मात्सुप्त एवोत्तिष्ठ।

तीति सिद्धं ॥ एवमवस्थात्रयनिर्मुक्तमात्मनः तुरव्यमिवाभिणतुक्त्वा मूर्छावस्था किं सुप्तावंतर्भ
वति ॥ उतातिरिक्ता वेति संदेहे अतिरेके प्रमाणाभावात्सुषुप्तिरेव मूर्छेत्युपजीव्योपजीवका
भावेन पूर्वपक्षे सिद्धांतः ॥ मुग्धेर्द्धसंपत्तिः परिशेषात् ॥ पूर्वपक्षे मूर्छावस्था विवेकार्थं यत्नो न
कार्य इति फलं सिद्धांते तु यत्नः ॥ कर्तव्य इति बोध्यं न तावत्स्वप्नजागरिते मूर्छावस्था ज्ञानाभावा
त्नापि मरणावस्था प्राणोष्मणोः सत्त्वात् ॥ नापि सुषुप्तिः वैलक्षण्यात् ॥ मुग्धस्य शरीरे कंपो।
भयंकरं वदनं ॥ निस्सृते उन्मीलिते नेत्रे निस्सृतस्य प्राणो व निश्वसिति नैवं सुषुप्तो भवति तस्मात्
परिशेषात् अर्द्धसंपत्तिर्मुग्धातिरिक्तैव ननु मुग्धेपि बाह्यांतःकरणानामभावेन सत्संपत्तेः सु
षुप्ताविवाविशेषात्कथमर्द्धसंपत्तिरिति चेत् ॥ सत्यं न हि ब्रह्मणो ऽर्द्धसंपत्तिं मुग्धस्य ब्रूमः ॥ किं
तु ॥ सुषुप्त्यवस्थायां धर्माः ॥ प्रसन्नवदनत निमीलितनेत्रत्वप्राणोच्छ्वासविशेषविज्ञानराहित्या

दयः॥ नच विशेषविज्ञानराहित्यादिना दैन्यधर्मजातेन मूर्छावस्थायाः संपन्नता दर्शनेन मरणा
वस्थाधर्मज्ञातेन कंपनादिना च युक्तत्वाद्धर्षसंपन्न्यिर्मूर्छेत्युच्यत इत्यनवद्यं॥ एवमुद्देश्यत्वेनत्व
पमं जिज्ञास्यं त्वंपदार्थस्य भक्ताशं सर्वावस्थाविनिर्मुक्तं निर्विशेषं संशोध्य तज्जिज्ञास्यो परमा
नंतरं जिज्ञास्यं विधेयं तत्पदार्थमवसरसंगत्या शोधयितुं तस्य निर्विशेषत्वमाह॥ नस्थानतोपि
परस्योभयलिंगं सर्वत्र हि॥ सर्वकामः सर्वगंधः सर्वरस इत्यादिना ब्रह्मणः सविशेषत्वं श्रूयते
अस्थूलमनणिवत्यादिना निर्विशेषत्वं॥ तत्र संशयः॥ किमुभयश्रुत्यनुसारादुभयरूपं ब्रह्मोतै
करूपं एकरूपमित्यत्रापि सविशेषं निर्विशेषं वेति द्वयं पक्षे विरूपं ब्रह्मध्येयं सिद्धांते निर्विशेष
मेवेति फलभेदः॥ तत्र यथा मूर्छावस्थायाः॥ विरुद्धसुषुप्तिमरणावस्थोभयधर्मवत्वं तथा ब्रह्म
णउभयरूपत्वं भवतु स्वतन्त्वाश्वेति दृष्टांतेन पूर्वपक्षे सिद्धांतः॥ न तावत्स्वतः परस्य ब्रह्मणः उभ २०

एकदैवमूर्ततंत्रंबरत्व नवया भावश्चेतितद्वत्॥१॥

यरूपत्वं संभवति स्वस्य वस्तुनोऽनेकरूपायोगात्॥ नह्येकमेव वस्तु एकदा तद्वत्तदभाववञ्च दृष्टं
एतेन मूर्छादृष्टांतो निरस्तः वैलक्षण्यात्॥ नापि स्थानतः उपाधितः॥ परस्योभयरूपत्वं नाग्निकं
युक्तं ह्यग्निसंयोगमात्रेण जलस्योष्णस्वभावत्वादर्शनात्॥ तस्मादेकरूपं ब्रह्म तदप्येकरूपत्वं
निर्विशेषत्वमेव हि यतः सर्वत्र वेदांतेषु ब्रह्मपरेषु अशब्दमस्पर्शमित्यादिषु सविशेषत्वनिरा
सेन ब्रह्मोपदिश्यते तस्मान्निर्विशेषमेवैकरसं ब्रह्म॥ न भेदादिति चेन्न प्रत्येकमतद्वचनात्
ननु न निर्विशेषमेव ब्रह्म कुतः भेदात्॥ प्रतिविद्यं ब्रह्मणश्चाकारभेदेन भेदात् कस्यांचिद्विद्या
यां चतुष्पाद्ब्रह्मोपदिश्यते कस्यांचित्षोडशकलं कस्यांचित्त्रैलोक्यशरीरं वैश्वानराख्यं तस्मा
त्सविशेषमपि श्रुतिसामर्थ्यादंगीकर्तव्यमिति चेन्न प्रत्येकं प्रत्युपाधिश्रुतवचनात् ब्रह्मणः
परस्याभेदस्यैव श्रवणादित्यर्थः॥ यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चाय

मध्यात्मंशारीरस्तेजोमयोमृतमयः॥पुरुषोयमेवसयोयमात्मेत्यादिश्रुतौब्रह्मणःसर्वोपाधिपृ
थिव्यबादिषुभेदःश्रूयते॥अस्यांपृथिव्यांतेजोमयःस्वप्रकाशोनाशरहितोयःपुरुषःयश्चा
त्मानंदेहमधिकृत्यवर्त्तमानः॥शारीरोजीवस्तावुभौसर्वेषांभूतानामुपकारकौसंतौमधुसः
शारीरश्चपृथिव्यभिन्नःपुरुषोयमेवयोयमात्मासर्वकारणभूतइतिश्रुत्यर्थः॥अपिचैतमेके
किंचैकेशाखिनएवमेदनिंदापूर्वकमभेदमेवब्रह्मणःसमामनंतिमनसैवेदंब्रह्माप्तव्यंने
हनानास्तिकिंचन॥मृत्योःसमृत्युमाप्नोतियइहनानेवपश्यतीतिशाखाचार्यसंस्कृतमनसै
वेदंब्रह्मज्ञातव्यंज्ञातेतिहब्रह्मणिकिंचिदपिभेदजातंनास्तियस्तुविद्याहकृतंनानारूपसदि
तिपश्यतिसमरणान्मरणंपुनःप्राप्नोतीत्यर्थः॥ननुसगुणनिर्गुणपरश्रुतिद्वयेसतिकथं
निर्गुणेब्रह्मणिपक्षपातस्तत्राह॥अरूपवदेवहितत्प्रधानत्वात्रूपादिहीनंनिर्विशेषमे

सविशेषेतात्पर्यउपासनातात्पर्यंचा२॥

वब्रह्मावधारयितव्यंनसविशेषंकुतः॥अस्थूलमित्यादिनिषेधशास्त्रस्यनिर्गुणब्रह्मप्रधान
त्वादित्यर्थः॥उपासनावाक्यानांसविशेषेतात्पर्याभावात्तात्पर्यांगीकारेवाक्यभेदापत्तेरितरे
षांसविशेषवाक्यानांसत्यज्ञानादिसिद्धप्रपंचानुवादकत्वेननिर्विशेषपरत्वात्तदनन्यत्वमित्या
दिनाप्रपंचमिथ्यात्वसाधनाच्चनसविशेषत्वंब्रह्मणःप्रामाणिकमितिभावः॥ननुतर्हिसवि
शेषश्रुतीनांकागतिरतआह॥प्रकाशवच्चावैयर्थ्यात्॥यथासूर्यादिप्रकाशोवक्रवंशाद्यु
पाधिनावक्रऋज्वादीर्घह्रस्वऋजुरिवभवतितद्वद्ब्रह्मापिपृथिव्याद्युपाधिनावशात्तत्तदाकारमिव
भवतितादृशान्योपाधिकाकारः॥सविशेषश्रुतीनांगतिरितितासामवैयर्थ्यान्निरर्थकत्वा
भावात्नविरोधइत्यर्थः॥ननुकिदृशंनिर्विशेषंब्रह्मेत्यतआह॥आहचतन्मात्रं॥तन्मात्रंचै
तन्यैकरसंनिर्विशेषंश्रुतिराह॥यथासैंधवघनोनंतरोबाह्यः॥कृत्स्नोरसघनएवैवंवाऽरे

सूत्र०
२२ अयमात्मानंतरोबाह्यः॥ कृत्स्नः प्रज्ञानघनएवेतिराकरसेहदृष्टांतः॥ यथालोकेसैंधवघनोल
वणामूर्तिर्विशेषोनंतर्बहिश्चविलक्षणरसशून्यः सर्वोलवणैकरसस्तथायमात्मांतर्बहिर्भेद शारी०सू० ३
रहितःसर्वः॥ प्रकाशातिरेकतानास्तिएतीतिश्रुत्यर्थः॥ किंच॥ प्रपंचनिषेधमुखेनब्रह्मणउ
पदेशाद्ब्रह्मनिर्विशेषंसविशेषत्वेसविशेषवाक्यैरेवतत्सिद्धेर्निर्विशेषोपदेशानर्थक्यंभवे
दित्यतश्चाह॥ दर्शयतिचाथोअपिस्मर्यते॥ अथातआदेशोनेतिनेत्यादिश्रुतिर्निषेधमुखे
नैवब्रह्मदर्शयति॥ प्रपंचभूतोक्त्यानंतर्यमथशब्दार्थः॥ तस्मा॥ परब्रह्मधीहेतुत्वमतः॥ शब्दार्थः॥
इतिशब्दः॥ सर्वोक्तप्रपंचभूतपरामर्शी तद्विशेषावधिभूतः॥ परमात्मेत्यादेशउपदेशइत्यर्थः॥
मूर्तगतायोब्राह्मस्तयार्थः॥ तथास्मर्यतेचनिषेधमुखेनब्रह्मेत्यर्थः॥ ज्ञेयंयत्तत्प्रवक्ष्यामियं
ज्ज्ञात्वामृतमश्नुते॥ अनादिमत्परंब्रह्मनसत्तन्नासदुच्यतइतिभगवद्गीताआदिमत्कार्य २२

मस्यनविद्यतइत्यनादिमत्कार्यरहितमित्यर्थः॥ नसन्नकारणंकस्यचिन्नकार्यंसप्रपंचकस्यचि
दित्यर्थः॥ अतएवचोपमासूर्यकादिवत्॥ यतएवपरप्रतिषेधोपदेशोनिर्विशेषोयमा
त्माऽतएवौपाधिकसविशेषत्वमादायजलसूर्यकादिवदित्युपमागृह्यते॥ यथाह्ययंज्यो
तिरात्माविवस्वानपोभिन्नाबहुधैकोनुगच्छन्॥ उपाधिनाक्रियतेभेदरूपोदेवःक्षेत्रेष्वेवम
जोयमात्मेति॥ एकएवतुभूतात्माभूतेभूतेव्यवस्थितः॥ एकधाबहुधाचैवदृश्यतेजलचंद्र
वत्॥ ज्योतिःस्वभावोविवस्वानेकोपिनानापात्रगताभिन्नाअपोनुगच्छन्बहुधाक्रियते॥
एवमयमात्मादेवःस्वप्रकाशोऽजःकूटस्थनित्यएकोपिभिन्नेषुक्षेत्रेष्वनुगच्छन्नुपाधि॥
नाभेदरूपःक्रियतइतियोजना॥ तथाचैतद्दृष्टांतबलादपिब्रह्मणोनिर्विशेषत्वमितिसूत्रा
कृतात्पर्यंदृष्टांतवैषम्यंशंकते॥ अंबुवदग्रहणात्तुनतथात्वं ननुयथांबुसूर्यादिभ्योमूर्तेभ्योमि

सू॰
२३

न्तं दूरस्थं प्रतिबिंबोपाधिभूतमुपजायते॥ तद्वद्व्यापकस्यात्मनो दूरस्थोपाधेरग्रहणात्तदात्म शारी॰ वृ॰
नोमूर्तत्वाभावाच्च विषमो दृष्टांत इति॥ ननु यथा तेन सूर्यादितुल्यत्वमिति शंका कार्या: तत्रोत्तर ३
माह॥ वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामंजस्यादेवं॥ यथा सूर्य प्रतिबिंबस्य जलांतर्भू
तस्य जलगतवृद्धिह्रासादिभाक्त्वं न स्वाभाविकमित्येतावतांशेनोभयोर्दृष्टांतदार्ष्टांतिका
योः सामंजस्याद्भवति सूर्यादिदृष्टांतः॥ नहि सर्वात्मना साम्यं दृष्टांतदार्ष्टांतिकयोः शक्यते वक्तुं
दृष्टांतत्वविरोधादिति भावः॥ किंचागमसमधिगम्येर्थे न चोद्यमित्याह॥ दर्शनाच्च॥ परस्यैव ब्र
ह्मणो देहांतरानुप्रवेशस्य प्रतिबिंबभावरूपस्य श्रुतौ दर्शनादित्यर्थः॥ पुरश्चक्रे द्विपदः पुर
श्चक्रे चतुष्पदः॥ पुरः स पक्षी भूत्वा पुरः पुरुष आविशदिति श्रुतिः। पुरः शरीराणि द्विपादयुक्ता २३
नि चतुष्पादयुक्तानि च चक्रे कृतवान् पुरस्थूलाद्यभिव्यक्तेः सर्वंसस्वरूपद्रष्टारः पक्षी लिंगशरी

रं भूत्वा पुरः शरीराणि स्वस्यान्याविशदित्यर्थः॥ तस्मान्निर्विशेषमेव चैतन्यैकरसं ब्रह्मेति सिद्धं॥ न
तु निषेधश्रुतिभिर्निर्विशेषं ब्रह्म सिध्यतीति यदुक्तं॥ तदुक्तं॥ एताभिर्ब्रह्मणोपि निषिद्धत्वादि
त्याशंक्य संगत्याधिकरणमारभ्यते॥ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः॥ तत्र पूर्व
पक्षे ब्रह्मासिद्धिः फलं सिद्धांते तत्सिद्धिरिति बोध्यं॥ द्वे वाव ब्रह्मणो रूपे मूर्तं चेत्युपक्रम्य पंचभू
तात्मकं रूपद्वयं तेजोबन्नात्मकं भूतत्रयं मूर्तं स्थावरजंगमाद्यौ काशात्मकं भूतद्वयं परि
च्छिन्नममूर्तमिति विभज्य तत्र मूर्तस्य सूर्यस्य स्थूलगोलकं च कार्यसारः॥ अमूर्तस्य तु सूर्या
न्तर्वर्तिकरणात्मको हिरण्यगर्भस्थूलगोलके दक्षिणे चक्षूरूपेण वर्तमानः सार इति चोक्त्वोत
स्य करणात्मकलिंगशरीररूपस्य हिरण्यगर्भस्य पुरुषशब्दवाच्यस्य वासनामयानि रूपा
णि मायामयानि दर्शयित्वा रूपद्वयवतो ब्रह्मणः स्वरूपं बोधयितुमिदमारभ्यते॥ अथात आदे

देवावइत्यस्यार्थः

सूत्र० २४ शोनेतिनेतिनह्येतस्मादितिनेत्यन्यत्परमस्त्यथनामधेयंसत्यस्यसत्यमितिप्राणावैसत्यंतेषामे आरी०त्र० ३
षसत्यमित्युपक्रमेवाक्यशेषः ॥ एवकारार्थः ॥ सपरिकररूपद्वयोपन्यासानंतर्यमथशब्दार्थः ॥
रूपद्वयोपन्यासस्यब्रह्मज्ञानहेतुत्वंब्रह्मणोवक्तव्यत्वेनपरिशेषोवाततःशब्दार्थः ॥ इतिशब्देनब्र
ह्मणोरूपद्वयंसपरिकरंयदुपन्यस्तंतत्परामृश्यतइतिशब्देनपरामृष्टंसर्वंनञावीप्सयानिषि
ध्यतेनेतिनेतीति ॥ वीप्सयाविषयजातस्यसर्वस्यनिषेधेह्यः विषयः ॥ सत्यत्वान्निषेधावा
धित्वतइतिनिर्विचिकित्सज्ञानंभवति ॥ एवंनेतिनेतीतिब्रह्मोपदेशंकृत्वानेतिनेतीत्युपदेशस्या
कोर्थइत्याकांक्षायांतमेवोपदेशंनिर्वक्तिनह्येतस्मादितिहियस्मादेतस्मान्नेतिनेतीत्यादिष्टाद्ब्र
ह्मणोन्यद्व्यतिरिक्तंनास्तिब्रह्मैववस्तुपरमस्तितस्मान्नेतीत्युच्यतइतिनिर्वचनवाक्यस्यार्थः ॥ यद्वा
नेतिनेतीतियःप्रपंचनिषेधरूपआदेशःकृतःसएतस्मादित्यनेनपरामृश्यते ॥ एतस्मान्नेतीतिप्र २४

पंचनिषेधरूपाद्ब्रह्मोपदेशान्नान्यत्परमुपदेशनंनह्यस्तीत्यर्थः ॥ ब्रह्मणोनामधेयकथनव्या
जेनापिस्वरूपमाह ॥ अथेति ॥ नेतिनेतीतिनिषेधस्यब्रह्मविषयत्वामावक्तुंनार्थोथशब्दःना
मधेयमाह ॥ सत्यस्यसत्यमितितद्व्याख्याश्रुतिः ॥ प्राणाइतिप्राणशब्देनलिंगशरीरमुच्यते
तस्यसत्यत्वंस्थूलदेहापेक्षयातस्यापितेद्रष्टव्यएषपरमात्मासत्यस्यापिपरंसत्यमितिवस्तु
गतिः ॥ ननुनेतिनेतीतिनिषेधस्यकोवाविषयइतिसंदिह्यतेकिंप्रपंचोब्रह्मवेत्युतउभयमपि
निषिध्यतेउतैकमेकमित्यत्रापिकिंप्रपंचोनिषिध्यतेउतब्रह्मेतितत्रनिरात्मकाभावादुभय
मपिनिषिध्यतइतिप्राप्ते ॥ पक्षा ॥ निरधिष्ठाननिषेधायोगात्तदेकंब्रह्मैवनिषिध्यतेप्रपंच
स्यप्रत्यक्षसिद्धत्वेननिषेधायोगादितिप्राप्तेब्रूमः ॥ ब्रह्मणोयद्रूपद्वयंसपरिकरंप्रकृतंप्रधानं
एतावत्त्वमियत्तापरिच्छिन्नत्वंतत्प्रकृतैतावत्त्वंतदेवप्रतिषेधतिनेतिनेति ॥ नेत्यादिश्रुतिः ॥ इतिशब्दस्य

प्रधानत्वेन प्रकृतपरामर्शित्वात् ब्रह्म तु न प्रधानत्वेन प्रकृतं देवाद्ब्रह्मणो रूपमिति ।। रूपद्वया-
त्मकजगदुपसर्जनत्वेनैवोक्तत्वादितश्च ब्रह्मणो न निषेधः ।। यस्मात्ततः प्रपंचनिषेधानंतरं
भूयो ब्रह्मास्तीति ब्रवीति ।। नह्येतस्मादिति परमस्तीत्यंतं निर्वचनवाक्यं तस्मादित्यर्थः ।। ब्रह्मणोपि
निषेधे किमस्तीति ब्रूयादिति भावः ।। निर्वचनवाक्यस्य द्वितीयव्याख्यायां तु ततः प्रपंचनिषेधस्य
परस्तादस्य नामधेयमित्यादिवाक्यं ब्रह्म ब्रवीत्यतो नेतीत्यादिवाक्येन निषेधमात्रं न ज्ञेयं ।। किंतु ।।
तेन निषेधेन भावरूपं ब्रह्म ज्ञातव्यमिति सूत्रभागस्यार्थः ।। न च प्रपंचनिषेधे प्रत्यक्षविरोधः ।। ना-
स्य व्यावहारिकप्रामाण्यापादित्यनवद्यं ।। ननु यदि ब्रह्मास्ति तर्हि गृह्यतामेतन्नेत्याह ।। तदव्यक्तमा-
ह हि ।। तद्ब्रह्माव्यक्तं स्वस्य साक्षिरिक्तमानागोचरं ।। हि यतः श्रुतिराह ।। न चक्षुषा गृह्यते नापि वाचा ना-
न्यैर्देवैस्तपसा कर्म्मणा वा ।। स एष नेति नेत्यात्माऽगृह्यो न हि गृह्यत इत्यादिना ब्रह्मणः प्रत्यक्षा-

द्यगोचरत्वं सर्वैर्देवैरिंद्रियांतरैरित्यर्थः ।। नेति नेतीति पञ्चाम्नायास्यतः स एषोऽगृह्यः अग्रा-
ह्यः ।। यस्मान्न हि गृह्यते ग्रहणायोग्य इत्यर्थः ।। तर्हि सर्वदा ब्रह्मग्रहणाभावे मोक्षो न स्यादित्या-
शंक्याह ।। अपि संराधने प्रत्यक्षानुमानाभ्यां ।। अपि चैवमात्मानं संराधने समाध्यवस्थायां
कृतार्थाः ।। पश्यंतीति प्रत्यक्षानुमानाभ्यां श्रुतिस्मृतिभ्यामवगम्यते ।। तथा हि श्रुतिः ।। परांचि खा-
नि व्यतृणत्स्वयंभूस्तस्मात्पराङ् पश्यति नांतरात्मन् ।। कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृ-
त्तचक्षुरमृतत्वमिच्छन्निति ।। ज्ञानप्रसादेन विशुद्धसत्वस्ततस्तु तं पश्यति निष्कलं ध्यायमान
इति स्वयंभूः परमात्मा खानि श्रोत्रात्मकाकाशोपलक्षितानि इंद्रियाणि परांचि अनात्मवि-
षयाणि व्यतृणत् हिंसितवान् इंद्रियाणां हिंसाऽनात्मविषयतया सर्जनमेव तथा सर्जने गम-
कत्वात् ।। तस्मादिति ।। ननु यदींद्रियैः परांचमेवार्थं पश्यति नांतरात्मानं कथं तर्ह्यात्मज्ञानं तत्रा-

स्व० २६

२॥ कश्चिदिति॥ कश्चिद्धीरो विवेकी आवृत्तचक्षुः॥ संयतेन्द्रियो मोक्षमिच्छन् प्रत्यगात्मानं समाधा शारी०सू० ३
वीक्षितवानित्यर्थः॥ ज्ञानस्य करणव्युत्पत्त्या अन्तःकरणस्य प्रसादेन रागादिरहितेन विशु
द्धसत्त्वः॥ प्रत्यक्प्रवणान्तःकरणः॥ ततस्तु विशुद्धसत्त्वाद्देहोऽस्तमात्मानं निरवयवं ध्यायमा
नः॥ पश्यति साक्षात्करोतीत्यर्थः॥ स्मृतिरपि॥ यं विनिद्रा जितश्वासाः संतुष्टाः संयतेन्द्रियाः ज्यो
तिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः इति जितश्वासा इति प्राणायामपराः॥ योगात्मत्वा
ध्यानात्मकयोगगम्यत्वं॥ ननु जीवेश्वरयोर्ध्यातृध्येयभावांगीकारे भेदः स्यादित्याशंक्याह
प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्॥ यथा सौरः प्रकाशश्चाकाशो वांगु
ल्याद्युपाधौ कर्माणि भिन्न इव वक्र इव भाति वस्तु तत्त्वैकरूपस्तद्वत्प्रकाशस्थानीयात्मापि ध्यानज्ञाना
दौ कर्मण्युपाधौ भिन्न इव वक्र इव भाति वस्तुतस्त्ववैशेष्यरूपमेकरूपत्वमेवात्मनः कुतः अ २६

भ्यासात् तत्त्वमसीत्याद्यभेदश्रुत्यभ्यासादित्यर्थः॥ अतोऽनन्तेन तथा हि लिंगं॥ अतो भेदस्यौपा
धिकत्वादविद्ययाभेदं निरस्य जीवोऽनन्तेन परमात्मना एकत्वं गच्छति॥ तथा हि लिंगमप्यर्थज्ञाप
कं श्रुतिर्जानं ब्रह्मैव सन् ब्रह्माप्येतीत्यादि॥ एवं जीवब्रह्मणोः पारमार्थिकमभेदमुक्त्वा स्वमत
शुद्ध्यर्थं भेदाभेदपक्षमुपन्यस्यति॥ उभयव्यपदेशात्त्वहिकुण्डलवत्॥ ध्यातृध्येयभावादिना
भेदस्याभेदस्य च श्रुतौ व्यपदेशाज्जीवेश्वरयोर्भेदाभेदौ भवतः॥ कुतः तु शब्दः॥ सिद्धान्तभेद
द्योतनार्थः॥ अहिकुण्डलवत्॥ कुण्डलमहेः संस्थानविशेषः॥ अहिकुण्डलयोरहित्वेनाभेदः कुं
डलत्वेन भेदस्तद्वदित्यर्थः॥ धर्मभेदेन भेदाभेदाविति पक्षमुक्त्वा एकधर्मावच्छेदेनैव भेदा
भेदाविति पक्षमाह॥ प्रकाशाश्रयवद्वा तेजस्त्वात्॥ यथा प्रकाशः सौरस्तदाश्रयश्च सवि
ता तयोर्नात्यन्तभेदस्तेजस्त्वाविशेषात् तथापि भिन्नत्वेन प्रतीयते॥ तथा चैकतेजस्त्वावच्छेदे

ब्र.सू.० २७ नैवप्रमाणवत्वाद्भेदाभेदौ यथा तद्वज्जीवेश्वरयोर्भेदाभेदावित्यर्थः॥ ननु भेदस्य पारमार्थि शा.भा.० ३
कत्वे ज्ञानान्निवृत्तेरसंभवान्मोक्षो न स्यादेकावच्छेदेन तयोरेकत्वांगीकारे लोके विरोधकथैव
न स्यादित्यादिदोषपरमतेमत्वास्तु सिद्धांतमाह पूर्ववत्॥ प्रकाशवच्चावैशेष्यमित्यत्रै
वं भेदस्यौपाधिकत्वमभेदः पारमार्थिक इति पर्योक्तं सएवसिद्धांतोस्तु पेत्य॥ प्रतिषेधाच्च ना
न्योतोस्ति द्रष्टेत्यादिशास्त्रेण परमात्मातिरिक्तस्य चेतनस्य नेति नेत्यादिवाक्यैः॥ प्रपंचस्य
च प्रतिषेधात् ब्रह्माद्वितीयमित्ययमेवसिद्धांत इत्यर्थः॥ तस्माच्छ्रुतिव्रजात् निर्विशेष एकः पर
मात्मेति सिद्धं॥ ननु नेति नेतीति ब्रह्मातिरिक्तं वस्तु निषेध्यमित्युक्तं न युक्तं ब्रह्मणः सेतुतो
न्मानादिव्यपदेशेन वस्त्वंतरसत्वावगमात् द्युभ्वाद्यधिकरणे सेतुत्वस्य गौणत्वेन नीतत्वेपु २७
न्मानादीनां गतेरदर्शनादित्याक्षिपति॥ परमतः सेतून्मानसंबंधभेदव्यपदेशेभ्यः॥ न च सर्वप
रवशादौ मानाभावेत्यस्मिन्नस्त्वेव॥ सर्वेभ्यः स्थूलपरिमाणेभ्यश्च हृत्यमानसुन्मानं॥ सुत्वंताप
द्व स्यपरिमाणमितियावत्॥

द्युभ्वाद्यधिकरणसिद्धांतेऽसिद्धिः फलं सिद्धांते न तत्सिद्धिरिति बोध्यं॥ अत ब्रह्मातिरिक्तं वस्त्व
स्ति नवेति संशये॥ अस्तीत्याह॥ परमिति॥ अतो ब्रह्मणः परं वस्त्वस्ति अथय आत्मा स सेतुरि
ति ब्रह्मणः सेतुत्वव्यपदेशात् तथाच ब्रह्म सद्वितीयं सेतुत्वात् जलसेतुवदित्यनुमानयुक्तं
ब्रह्मचतुष्पादित्यादिश्रुतावुन्मानव्यपदेशात् तेनावदिदमिति॥ परिच्छिन्नत्वव्यपदेशादेउपसमी
पस्यकयसाधनपाषाणादिवत्सद्वितीयं ब्रह्मेत्युन्मानशब्दार्थः॥ वाक्त्वो दिशाएकः पादः॥
पृथिव्यंतरिक्षं द्यौः समुद्र इति द्वितीयः पादः॥ अग्निसूर्यचंद्रमा विद्युदिति तृतीयः पादः
चक्षुः श्रोत्रं वाङ्मन इति चतुर्थपादः॥ इति श्रुतावुपासनार्थं चतुष्पाद्ब्रह्मेत्युक्तमिति गंतव्यं॥ सुषु
प्तौ प्राज्ञेनात्मना शारीरः संपरिष्वक्त इत्यादिना ब्रह्मणः संबंधव्यपदेशात् संबंधत्वेन हेतुमा घ
टादिवत्सद्वितीयत्वेन घटादिवत्सद्वितीयत्वमिति संबंधार्थः॥ अथादित्ये हिरण्मयं पुरुषमीश्वरं

सूत्र० व्यपदिश्यतेनोभेदेनाक्षितुरूपस्यव्यपदेशात्परस्मात्त्वास्मद्द्वितीयमितिदर्शिताभेसेतुत्वादिहे शारी०३०
२८ तोरसिद्धिमाह॥ सामान्यात्तु॥ मृद्दारुमयेहिसेतुशब्दोरूढोलोकेनहितादृशंसेतुत्वंब्रह्म ३
णोस्ति॥ किंतु॥ सेतुर्यथाजलस्यव्यवस्थापकएवंब्रह्मणोपिसकलजगन्मर्यादाव्यवस्थापक
त्वेनप्रसिद्धसेतुसामान्यात्॥ सेतुत्वव्यपदेशइत्यर्थः॥ तुशब्दःपूर्वपक्षनिरासार्थः॥ एकवि
ज्ञानेनसर्वविज्ञाविरोधःसर्वेषामनुमानानांबोध्यः॥ उन्मानव्यपदेशोपिनमुख्यइतिद्वितीयं
हेतुमपिमिथ्यासिद्धाद्दूषयति॥ बुद्ध्यर्थःपादवत्॥ ब्रह्मचतुष्पादितिस्थितावुन्मानव्यपदेशोबुद्ध्य
र्थः॥ पादवदुपासनार्थः॥ निर्विशेषस्यबुद्धिस्थत्वायोगादुपासनाधाराबुद्धिस्थत्वयोगादुन्मा
नव्यपदेशोनमुख्यइत्यर्थः॥ पादवत्यथाब्रह्मप्रतीकस्यमनसोवाक्प्राणचक्षुःश्रोत्राणिपा २८
सनार्थंपादत्वेनव्यपदिश्यन्ते॥ तद्वदित्यर्थः॥ स्थानविशेषाद्धेतुद्वयमप्यसिद्धमाद्दूषयतिस्थानवि

शेषात्प्रकाशादिवत्॥ सुषुप्तौब्रह्मणोजीवेननघटस्यपटेनेवसंबंधः॥ किंतु॥ स्थानविशेषात्
बुद्ध्याद्युपाधिविशेषात्प्राप्तस्यविशेषविज्ञानस्योपाध्युपशमादुपशमेऽभिव्यक्तोपाधिप्रयु
क्तभेदाभावएवजीवपरयोः॥ सुषुप्तौसंबंधइतिव्यपदिश्यते॥ अक्ष्यादित्यपुरुषयोर्भेदव्यप
देशोप्यक्ष्यादित्यरूपस्थानविशेषापेक्षया प्रकाशादिवत्यथासौरःप्रकाशश्चाकाशोवाङ्गु
लियोगाद्घटस्थश्चोपाद्याद्युपाधिविशेषात्संबंधवद्भिन्नवद्भातितदुपाधिविगमेतदानी
सत्त्वंश्चाभिन्नत्वव्यपदिश्यतेतद्वदित्यर्थः॥ तस्माज्जीवपरयोःसंबंधोभेदश्चोपाधिनिमि
त्तोनस्वाभाविकः॥ ननुमुख्यएवास्तुतत्राह॥ उपपत्तेश्च॥ नमुख्यःसंबंधोजीवपरयोःसुप्तौसंभव
तिस्वमपीतोभवतीतिस्वरूपस्यैवसंबंधव्यपदेशात्स्वरूपस्यचसदातनत्वात्सुषुप्तौगौ
णसंबंधत्वमेवएवंभेदोपिनमुख्यःश्रुतिसहस्रविरोधादित्युपपत्तिवशान्नैमित्तिकएवेत्यर्थः

सू॰त्र॰ २७ एवंसेत्वादीन्हेतून्निराकृत्यब्रह्मणोऽद्वितीयत्वंहेत्वन्तरेणाह ॥ तथान्यप्रतिषेधात् ॥ यथासे- शारी॰वृ॰ ३
त्वादिहेतुभ्योनवस्त्वन्तरप्रमातथाऽहमेवाधस्तादात्मैवाधस्तादित्यादिवाक्यैरन्यस्यवस्तु-
नः ॥ प्रतिषेधादद्वितीयमेवब्रह्मेत्यर्थः ॥ ननुब्रह्मणोऽद्वितीयत्वेनसर्वगतत्वंकथमतआह ॥ अ-
नेनसर्वगतत्वमायामशब्दादिभ्यः ॥ अनेनसेतुत्वादिव्यपदेशासुरत्वस्यवस्त्वन्तरस्यचप्र-
तिषेधेनब्रह्मणःसर्वगतत्वंसिद्धंअप्रतिषेधेप्रसिद्धसेतुवद्ब्रह्मणोऽसर्वगतत्वंप्रसज्येत ॥ सर्व-
गतत्वेमानमाह ॥ आयामेति ॥ आयामशब्दोव्यापकत्ववाचकः ॥ आकाशवच्चसर्वगतश्चनित्यइत्या-
दिशब्दः ॥ आदिपदेननित्यःसर्वगतःस्थाणुरित्यादिस्मृतिरुक्ता ॥ तस्माददितीयस्यब्रह्मणआ-
विद्यकंसर्वमाहायश्रुतिस्मृतिभ्यांसर्वगतत्वंसिद्धं ॥ ननुब्रह्मातिरिक्तस्यवस्तुनोनिषेधेब्रह्मणो
निर्विशेषत्वेनकर्मफलदातृत्वंनस्यादित्याक्षेपेव्यावहारिकफलदातृत्वमविरुद्धमित्याह ॥ २७

फलमतउपपत्तेः ॥ इदंनिर्विशेषंतत्परलक्ष्यंब्रह्मोक्तमिदानींतत्पदवाच्यंविचार्यतइतिपा-
दसंगतिः ॥ पूर्वपक्षेकर्मणएवफलदातृत्वात् ॥ ब्रह्मणोऽकिंचित्करत्वसिद्धिःफलेसिद्धान्तेत्वी-
श्वरस्यैवफलदातृत्वसिद्धिरितिभेदः ॥ किंसर्वस्यजन्तोःकर्मणएवफलंभवति ॥ उतेश्वरादि-
तिसंदेहेअयंपूर्वपक्षंनिराकरिष्यन्सिद्धान्तमाह ॥ फलमिति ॥ अतःपरमात्मनः ॥ फलंसर्व-
स्यलोकस्यभवितुमर्हतिक्षणिकात्कर्मणःफलासंभवेनेश्वरस्यैवफलदातृत्वोपपत्तेरित्यर्थ-
ः ॥ श्रुतत्वाच्च ॥ सवाएषमहानजआत्मान्नादोवसुदानइतिईश्वरफलहेतुत्वस्यश्रुतत्वाच्चेश्वरः
फलदातेत्यर्थः ॥ अन्नमासमंतात्प्राणिभ्योददातीत्यन्नादः ॥ वसुदानोधनदाता ॥ शंकते ॥ ध-
र्मंजैमिनिरतएव ॥ यतःश्रुत्युपपत्तिभ्यामीश्वरंफलदातारंमन्यतेसिद्धान्तीअतएवश्रुत्युपप-
त्तिभ्यांधर्मंफलदातारंजैमिनिराचार्योमन्यते ॥ तथाहिस्वर्गकामोयजेतेतिविधिविषयस्ययाग

सूत्र० ३० स्यस्वर्गसाधनत्वं श्रुतं ॥ तन्निर्वाहाय श्रुतिप्रमाणकैरपूर्वाख्योव्यापारो यागस्योत्तरावस्थारूपः क शारी० वृ० ३
ल्पनीयः तथा यागादिधर्म एव फलदाता ईश्वरस्य सर्वसाधारणस्य विचित्रफलदातृत्वानुपपत्ते
रिति ॥ समाधत्ते ॥ पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ बादरायणस्त्वाचार्यः पूर्वोक्तमीश्वरं फ
लदातारं मन्यते तुरुक्तशंकानिरासकः ॥ कर्मापूर्वं वा स्वस्वरूपस्य विनियोगसाक्षात्करवस्थि
थितं न भवितुमर्हति अचेतनत्वात् ॥ सदाशिवत् इत्यनुमानेन संभावितेयं श्रुतिस्मृती प्रमाण
यति ॥ हेतुव्यपदेशादिति एष एव साधु कर्म कारयति ॥ ऽन्नादो वसुदानस्त्वादिश्रुत्या ॥ लभ
ते च ततः कामान्मयैव विहितान्हि तानित्यादिस्मृत्या चेश्वरस्य धर्माधर्मयोस्तत्फले च हेतुत्वे
न व्यपदिष्टत्वादित्यर्थः ॥ तस्मात्तत्तत्कर्मसापेक्षादीश्वरादेव सर्वेषां फलसिद्धिरिति सिद्धं ॥ इ ३०
ति श्रीमद्ब्रह्मसूत्रवृत्तौ तृतीयाध्यायस्य द्वितीयः पादः ॥२॥ एवं तत्पदलक्ष्यवाच्यात्मकं निर्गुणं स

र्गुणं ब्रह्म ज्ञेयं व्याख्यातमिदानीं तज्ज्ञाने किंप्रकारकमित्यपेक्षायां तद्विचाराय पादांतरमारभ्यते ॥
सर्ववेदांतप्रत्ययं चोदनाद्यविशेषात् ॥ पूर्वपादे वाक्यार्थज्ञाने कारणीभूतं तत्त्वंपदार्थनिरू
पणं कृतं अस्मिन् पादे वाक्यार्थो निर्णीयते ऽत्र तयोः पादयोर्हेतुहेतुमद्भावः संगतिः ॥ स
गुणविद्यायाः सत्त्वशुद्धिद्वारा वाक्यार्थज्ञानोपयोगित्वात् ॥ तद्वाक्यार्थचिंता क्रियते इति गंत
व्यं ॥ तत्र तावत्सगुणब्रह्मप्राणपंचाग्न्यादिविषयेषूपासनेषु भेदाभेदचिंतारभ्यते कि
मप्रतिवेदांतं प्राणोपासने पंचाग्न्युपासने इत्येवंजातीयकमुपासनं भिद्यते नवेति सर्वपक्षे उ
पासकानां भेदादेकवेदांतोक्तोपासनस्य गुणानां वेदांतांतरोक्तोपासने तुपसंहारः सि
द्धांते उपासनैक्यात् गुणोपसंहारे तदुपासनात्सत्त्वशुद्धिद्वारा वाक्यार्थज्ञाने मुक्तिरिति फलिष्य
ति ॥ अस्य देवत्वे यथा यागस्यरूपं तथोपासनस्योपास्यरूपं तथा न यथा न्याम्निज्ञाता जिनपाग

योऽयं रूपभेदाद्भेदः ॥ एवमुपासनानामुपास्यरूपभेदाद्भेदोऽन्यासः ॥ तथा हि क्वचित्पंचाग्निवि-
द्यायां षष्ठोऽग्निरुपास्यः श्रूयते क्वचित्तु शाखायां पंचैवाग्नय इत्येवंरूपेणगणनत्वोपासने रूपभेदाव-
गमादुपासनं भिद्यत इति प्राप्ते ब्रूमः ॥ सर्ववेदांतैः प्रत्ययं प्रतीयमानान्युपासनानि न भिद्यंते ॥ कु-
तः चोदनाद्यविशेषात् चोदनादिपदेन कर्माभेदे हेतुत्वेनोपन्यस्ताः संयोगरूपाख्या गृह्यंते चोद-
नासंयोगरूपसमाख्यानामविशेषादित्यर्थः ॥ यथा सर्वशाखास्वग्निहोत्रं जुहोतीति चोदनाया अ-
विशेषान्नित्याग्निहोत्रमेकं तथा यो ह वै ज्येष्ठं च श्रेष्ठं च वेदेत्यादिचोदनायाश्छंदोगानां
वाजसनेयिनां चाविशिष्टत्वादेकैव प्राणविद्या सर्वेषां शाखिनामिति गम्यते यः प्राणोपासकः
स ज्येष्ठश्च श्रेष्ठश्च स्वानां भवति फलसंयोगस्य सर्वत्राविशिष्टत्वाच्च न विद्याया भेदः ॥ ज्येष्ठता-
दिगुणकप्राणस्योपास्यरूपस्य सर्वत्राविशिष्टत्वाच्च ॥ तथा प्राणविद्येति समाख्यायाः सर्वत्रा-

३१

विशेषाच्च विद्यैक्यमिति ॥ भेदादिति चेन्नैकस्यामपि ॥ ननु वाजसनेयिनः पंचाग्निविद्यायां षष्ठं-
चमिहंमग्निमुपास्यत्वेनामनंति तस्य मृतस्य यजमानस्य ऋत्विग्भिरग्निं प्रापितस्य चमिदो-
ग्निरेवाग्निर्भवतीति छंदोगास्तु पंचाग्नीन्वेदेत्यामनंति ॥ ननु षष्ठमग्निं तथा च रूपभेदाद्भि-
शाखाभिन्नयागयोरिव शाखाद्वये पंचाग्निविद्याया भेदो न्याय्य इत्युक्तमिति चेन्न यतः ॥ एकस्या-
मपि विद्यायामयं रूपभेद उपपद्यते ॥ तथा हि येयं द्युलोकादयः पंचाग्नयो वाजसनेयिशाखाया-
मुक्तास्त एव च्छांदोग्येऽपि प्रत्यभिज्ञायंते तथा च न विद्याभेदो युक्तः ॥ न च षष्ठस्यापि तदभावाभ्यां भेदः ॥ ए-
कस्मिन्नेवातिरात्रे षोडशीग्रहणतदभावयोर्दर्शनात् ॥ यद्वा ॥ नैकगुणप्रत्यभिज्ञानुरोधात्तु छां-
दोग्येऽपि षष्ठाग्नेरुपसंहारः कर्तव्यः न चापि तु पंचत्वसंख्यावगणविरोधः ॥ तस्य स्वबुद्ध्या संपादिता-
ग्निपरत्वादिति भावः ॥ ननु ब्रह्मविद्याप्रतिपादकमुंडकाध्ययने शिरस्यगारपात्रधारणरूपं व्र-

मुं०उ० तंकर्त्तव्यमितिनोपदिश्यतेऽन्तरोपनिषदध्ययनकालेतुशिरोव्रतंनापेक्ष्यते तथाचमुंडकस्यविद्या शा०रा०टी०
३२ पेक्षापादन्तरोपनिषदन्तिपविद्याभेदोयुक्तः॥नह्येकैवविद्याशिरोव्रतरूपधर्ममपेक्षतेनापि ३
क्षतेचेतियुक्तं अतोधर्मभेदाद्विद्याभेदइत्याशंक्याह॥स्वाध्यायस्यतथात्वेनहिसमाचारेधिका
राच्चसववच्चतन्नियमः॥स्वाध्यायस्यैवैषशिरोव्रताख्योधर्मोगंनविद्यायाः॥कुतःहिपतस्त
थात्वेनस्वाध्यायांगत्वेनसमाचारेवेदव्रतोपदेशपरेग्रंथेशिरोव्रतमपिवेदव्रतत्वेनाथर्वणि
काःसमामनंतितथाचयथागोदानरूपंवेदव्रतंवेदाध्ययनांगंएवंशिरोव्रतमपिमुंडकाध्ययनां
गमेवनमुंडकोक्तविद्यांगमित्यर्थः॥अधिकाराच्चनैतदचीर्णव्रतोधीतेइत्यत्रन्त्याहधिकृतमुंड
कग्रंथमनातपरादेतच्छास्त्राच्चकारादधीतइत्यध्ययनशास्त्राच्चशिरोव्रतमध्ययनस्यैवांगमित्यर्थः
अचीर्णव्रतः॥अननुष्ठितशिरोव्रतः॥तस्यशिरोव्रतस्यमुंडकाध्ययनेनियमइत्यत्रहेत्वंतरंसर्व ३२

वज्जेतिपथासवाःमन्त्रहोमाः॥सौर्यादयः॥शतौदनांताः॥शाखांतरोक्तत्वेताम्यःसंबंधादथर्वणो
क्तैकाग्निसंबंधाच्चैकाग्नीनामाथर्वणिकानामेवनियम्यंतेतद्वदेतच्छास्त्रादधीतइतिशास्त्राच्च
मुंडकाध्ययनएवशिरोव्रतस्यनियमइत्यर्थः॥तस्मात्सर्वत्रविद्यैक्यं॥दर्शयतिच॥सर्ववे
दायत्पदमामनंतीत्यादिवाक्यंनिर्गुणस्यब्रह्मणोवेद्यस्यसर्ववेदांतेष्वेकत्वेनतद्विद्यायाःस
र्वत्रैकत्वंदर्शयति॥तथावाजसनेयकेसगुणस्यब्रह्मणोवैश्वानरस्यप्रादेशमात्रत्वेनसं
पादितस्यछांदोग्येसिद्धवदुपादानं॥यस्त्वेवमेवंप्रादेशमात्रंवैश्वानरमुपास्तइतितदपिस
र्वत्रवैश्वानरविद्यायाएकत्वंदर्शयति॥तथाचयथानिर्गुणस्यसगुणस्यवाब्रह्मणएक
त्वेनसर्वत्रप्रमाणत्वात्तद्विद्यायाएकत्वंतथाशास्त्रविशेषरूपोक्तादीनांसर्वत्रप्रपण
त्वादेकत्वमवगम्यतेसर्वत्रोपास्यत्वंतेषांग्रहणमितिनत्वोपास्योपासकादीनामेकत्वाद्रूपास

सूत्र० ३३ नानात्मप्यैकात्म्यमिति। तस्मादभिव्याहारादितरेषामप्युपासनानामभेदसिद्धिरित्यर्थः। उपासनै- शारी०टी० ३
क्यविचारस्य प्रयोजनमाह। उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च। सर्वत्रैवोपासनानामेकत्वेप्ये-
क शाखास्थविद्यायां कतिपयगुणाप्युक्ता यां शाखांतरस्याधिकगुणानां उपसंहारोऽस्ति न वेति संदे-
हे यत्र यावंतो गुणाः श्रुतास्तैरेवाकांक्षापूरणे नोपसंहार इति प्राप्ते ब्रूमः। समाने उपासने गुणोपसं-
हारो युक्तः। कुतः अर्थाभेदात् उपास्यगुणे निर्वर्त्यस्योपासनरूपार्थस्य सर्वशाखास्वभिन्नत्वा-
त्। नहि कर्मैवोपासनं गुणांतरमपेक्षते नापेक्षते नियुक्तं विधिशेषवत् यथाग्निहोत्रस्य सर्वत्रै-
कत्वाच्छेषाणामुपसंहारस्तद्वदित्यर्थः। अत्र सर्वपक्षे सर्वाधिकरणप्रयोजनस्य गुणोपसं-
हारस्य सिद्धिः फलं सिद्धांते तत्सिद्धिरिति बोध्यं तस्माच्चोदनाद्यविशेषेण हेतुना कृतस्योपा- ३३
सनैक्यविचारस्य फलत्वं सिद्धं। इदानीं चोदनाद्यविशेषस्योपासनैक्यसाधकत्वाऽपवादार्थ-

माह। अन्यथात्वं शब्दादिति चेन्नाविशेषात्। बृहदारण्यके श्रूयते उद्गीथब्राह्मणे द्वेतत्स्य
पास्तामसवृत्तयस्तेऽसुराः। पाप्मसात्विकवृत्तयस्ते देवास्तेषां देवासुराणामन्योन्यस्पर्धाता-
मसवृत्त्युद्भवे सात्विकवृत्त्युद्भवः। सात्विकवृत्त्युद्भवेन तामसवृत्त्युद्भव इत्येवंरूपांख्यायपिता
नत्र देवाः। सामभक्तिरूपेणोद्गीथोद्गातृकर्मणाऽसुरजयं करिष्याम इति बुद्ध्या वाचं प्राणं
चक्षुः श्रोत्रं मनश्चोचुः त्वमस्माकमुद्गानं कर्मोद्गीथं कुर्विति ते च वागादयस्तथास्त्वित्युक्तव-
न्तः कर्मणि प्रवृत्तास्तानुद्गातॄनसुराणामभिरुद्गातृभिर्देवा अस्मज्जयं करिष्यंतीति बुध्वा ताडि-
तवंतस्ते च वागादयस्ताडिता इति वागादीन्विहितासुरव्यपाणमुख्यप्राणेनाख्यायति। अथ हे-
मं मुख्यं प्राणं देवा ऊचुस्त्वमस्माकमुद्गानार्थं भवेति स प्राणस्तथास्त्वित्युक्त्वा कर्मणि प्रवृत्तस्त-
मोद्गातारं प्राणं प्राप्य हन्तुकामा असुराः पाषाणं प्राप्य वेगवान्लोष्ट इव विशीर्णा वयपन्ना अस्त

त्रिनिप्राणस्तु तं कृत्स्नोद्गीथकर्तारं प्राणमुपास्यं दर्शयतीति रावमेव छांदोग्येपि प्रपठ्यते तद्धदेवा
उद्गीथमाजह्रुरनेनैनानभिभविष्यामः॥ तत्र तत्र सर्वं वहेवासुरस्पर्धायां देवा उद्गीथोपलक्षित
मौद्गात्रं कर्माहृतवंतोऽनेन कर्मणैतान्सुरानभिभविष्याम इत्युपक्र
म्य सर्वं व देवतागादिर्निंदां कृत्वाऽथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे देवा उ
भिसर्वत्र वागादिशाहास्तदभिमानिदेवताः परावोध्याः॥ तत्र संशयः॥ किमनयोर्विद्ययोर्भेद
उताभेद इति॥ अत्र पूर्वपक्षे गुणोपसंहारः फलं। सिद्धांते विद्ययोर्भेदान्नोपसंहार इति विशेषः। नो
दनाद्यविशेषादित्यत्र समाख्याया अविशेषाद्विद्यैकत्वमित्युक्तं तद्वद्वाप्युद्गीथविद्येति समा
ख्याया अविशेषाद्विद्यैकत्वमेवेति दृष्टांतसंगत्या प्राप्तं तदाक्षिपति सिद्धांती अन्यथात्वं श
ब्दादिति चेत् इति छांदोग्यबृहदारण्यकयोराम्नातं प्राणस्यान्यथात्वं भिन्नाकारत्वं बृहदार

ण्यके उद्गीथकर्तृत्वं छांदोग्ये उद्गीथकर्मात्मकत्वमित्येवंरूपं गम्यते॥ तथा च॥ कर्तृकर्मणोर्भेदे
नोपास्यभेदाच्च विद्यैक्यमिति शंकार्थः॥ पूर्वपक्षी परिहरति नेति कुतः॥ अविशेषात् देवासु
रस्पर्धोपक्रमादीनां बहूनामर्थानामुभयत्राविशेषात् छांदोग्ये तमुद्गीथमुपासांचक्रिर इ
ति॥ प्राणस्योद्गीथकर्मात्मकत्वश्रवणं लक्षणया उद्गीथकर्तृत्वेनैव व्याख्येयमिति विद्यैक्यमिति
प्राप्ते सिद्धांतयति॥ न वा प्रकरणभेदात्परोवरीयस्त्वादिवदिति नैवात्र विद्यैक्यं युक्तं प्रकरणभे
दात् उपक्रमभेदादित्यर्थः॥ तथाहि ओमित्येतदक्षरमुद्गीथमुपासीतेत्योंकाराद्यनेकवसरू
पावयवविशिष्टस्य सामभक्तिविशेषस्योद्गीथस्यावयवभूतमोंकारमुपास्यमुपक्रम्य
तस्यैवोंकारस्य पृथिव्यादिभ्यः सारतमत्वादिगुणानुक्त्वा पुनरुद्गीथावयवमोंकारमनु
वर्त्य देवासुराख्यायिकारूपेण प्राणमुद्गीथमुपासांचक्रिरे देवा इत्याह अत्रत्योद्गीथशब्देना

गीथावयवओंकारएवासौकर्त्तव्यः॥उपक्रमेउद्गीथपदेनतस्यैवोक्तत्वादन्यथोद्गीथपदेनस
कलसामभक्तिग्रहणेउद्गीथकर्तृत्वश्रवणायांचोपक्रमोबाध्येत॥तस्मादन्तेउद्गीथावयवओंकारे
प्राणउपास्यः॥बृहदारण्यकेतुउद्गीथकर्त्ताप्राणउपास्यइत्यनयोर्विद्ययोर्भेदइतिपरोक्तरीय
स्त्वादिवत्तयोपास्तिनसाम्येप्येकत्वेउद्गीथेपरमात्माध्यासेनप्राणाद्युपेहत्यापरत्वपरोपस्ता
दिगुणकमुपासनंसमग्रपक्षेवशापानुगीयइत्यादिवाक्यविहितमह्यपादिन्यगुरूपगतादिगुण
स्यमुनादिगुणविशिष्टोद्गीथोपासनाच्छिद्यतेनद्ददित्यर्थः॥संज्ञातश्चेत्तदुक्तमस्तितुतदपि त्व
द्गीथविद्येतिसंज्ञापारणकत्वाच्छारवावभेपविद्येकत्वमित्युक्तमितिनेत्वत्वेनत्वस्तुक्तंनवावकरणभेदा
दितिसूत्रेसंज्ञाकरणस्यपौरुषेयत्वात्वविद्यैक्यसंवादकत्वमितिभावः॥किंच॥तत्संज्ञैकत्वंपरो
क्षपरस्तोद्युपासनयोर्भिन्नयोरप्यस्तिउद्गीथविद्येतिसंज्ञास्यापिशाहेनान्यापिदृष्टान्तः॥सन्न्या

नेयप्येकस्मिन्काठकग्रन्थेचोदितानांभिन्नानांकर्मणांकारकैकसंज्ञत्वमस्त्यतःपौरुषेयसंज्ञै
क्यंविद्यैक्येऽप्रयोजकमितिभावः॥तस्माच्छांदोग्यवाजसनेयिशाखयोः॥बहुतविद्ययोर्भेदइति
सिद्धं॥नन्वोमित्येतदक्षरमुद्गीथमुपासीतेत्युपक्रमेउद्गीथपदस्योंकारपरत्वनिर्द्धारणेनसिद्धं
तःकृतः॥तदयुक्तंउपक्रमवाक्यस्यान्यथापियोजनासंभवेननिर्द्धारणायोगादित्याक्षेपेसमा
धत्तेव्याप्तेश्चसमंजसं॥ओमित्येतदक्षरमुद्गीथमित्योंकारत्वोद्गीथमित्योंकारतोद्गीथत्वयोःसा
मानाधिकरण्यप्रतिभासोस्तिसकिंनाम्निब्रह्मदृष्टिवदध्यासउतयदृजंतंसाम्नुक्रिरितिवदप
वादः॥किंवाक्षसुरोब्राह्मणाःइतिचतुर्थधर्मविनाभवाहोस्विन्नीलमुत्पलमितिवदुद्गीथों
कारयोर्विशेषणविशेष्यभावावभासइतिसंशयः॥तत्रपूर्वपक्षेनिर्द्धारणेकारणाभावादनिर्द्धा
रितार्थकमिदमुपक्रमवाक्यमप्रमाणमितितन्मूलकस्यसर्वाधिकरणसिद्धांतस्यासिद्धिःफ

सू०वृ०
३६

न्नं सिद्धं तेनोंकारस्य व्यत्त्वं चान्यत्र तु वाचकं च निसामं चाद्यं तेषु व्याप्ते व्यापित्वात् को वा ओंकार उपा शारी०उ०
स्यस्त्वाकांक्षायामुद्गीथावयवत्वेनोंकारो विशिष्यते॥ ओमित्येतदक्षरमुद्गीथमुपासीतेति। तथा ३
चोद्गीथमित्योंकारस्य विशेषणमित्येव समंजसमुत्पलस्य नीलत्वमिव नन्वध्यासादिपक्षस्य
हरणं युक्तमित्युपक्रमवाक्यस्य निर्धारितार्थत्वादनन्यूनकस्य सिद्धांतस्य सिद्धिरिति। बोध्यं सा
न्नेच शाखेयं तु शाखस्यानभिवेशात् तु शाखेनाध्यासादिपक्षाणामसंभवः सूचितः॥ तथा हि उद्गीथे
स्योंकारस्योंकारे चोद्गीथस्याध्यासेनोपास्यत्वे उत्तरत्र विधीयमानादोंकारे प्राणदृष्टिरूपादु
पासनाद्भिन्नमिदमुपासनमिति। वक्तव्यं तथा च पृथक्फलकल्पनाप्रसंगः सिद्धांते तु प्राणा
ध्यायन्योंकारेण विशिष्य समर्प्यत इति नायं दोषः नापि द्वितीयः पक्षः॥ ओंकारोद्गीथयोरन्यतरत्ता ३६
नस्यान्यतरज्ञानबाधकत्वादर्शनात्॥ नापि तृतीयः ओंकारोद्गीथयोर्द्वयोः। पयो यत्नाभावादिति

तस्मान्नैकदेशिदृष्ट्येव परोदृष्टपद इत्यादिवदुद्गीथपदं स्वावयवमोंकारं लक्षयतीति सिद्धं॥
सर्वाभेदादन्यत्रेमे॥ वाजसनेयके छंदोग्ये च प्राणसंवादे मुख्यप्राणस्य श्रैष्ठ्यगुणकस्योपा
स्यत्वमुक्तं वाक्चक्षुः श्रोत्रमनोरेतांसि क्रमेण वसिष्ठत्वप्रतिष्ठात्वसंपत्त्वायतनत्वजनिमत्वा
रूपगुणयुक्तानि संकीर्त्यंते च वागादयः॥ प्राणस्तेन स्थितिकत्वं तेषु निश्चित्य तस्य निष्ठा न वशि
ष्ठत्वादिगुणत्वं प्राणे समर्पितं वेतरस्युक्तं वाचो हि वसिष्ठत्वं वाग्मिनो लोके सुखेन वासदर्शा
नात्॥ चक्षुषः प्रतिष्ठात्वं चक्षुष्मतः सुखेन पादप्रतिष्ठादर्शनाच्छ्रोत्रस्य संपत्त्वं श्रुतात्मनिर्द्धा
रणेन परमसंपत्तिदर्शनात्॥ मनो हि भोग्याकारवृत्तिद्वारा भोग्यानामायतनं पुरुषार्थाकारे
ण परिणममानं रेतो जनिमन्मंतव्यं॥ एवं कौशीतक्यादिशाखास्वपि प्राणसंवादे श्रूयते। तानि
श्रेयः साधनं एताह वै देवता अहं श्रेयसे विवदमाना अस्यादिना प्राणश्रैष्ठ्यमुक्तं॥ वशिष्ठत्वादि

गुणास्तु नोक्ताः ॥ निश्श्रेयसंश्रेष्ठं तस्याधानं निर्द्धारणं तद्विनोपास्तेरयोगात्तदारभ्यत इत्याह ॥ आ-
थेति एता वागाद्यभिमानिन्यो देवता अहंश्रेयसे स्वकीयश्रेष्ठत्वायेत्यर्थः ॥ तत्र किं वशिष्ठत्वादिगु-
णानां क्वचिदुक्तानामन्यत्रोपसंहारोऽस्ति न वेति संदेहे सर्वमोंकारस्य समीपस्थगुणैरेवोपास्यत्वत-
दत्रापि यत्र ये गुणाः श्रुतास्तैरेवोपास्यत्वं प्राणस्येति नोपसंहार इति दृष्टांतेन प्राप्ते ब्रूमः ॥ अन्य-
त्र वशिष्ठत्वादिगुणानामश्रवणस्थलेऽमेव वशिष्ठत्वादयो गुणा उपसंहर्त्तव्याः कुतः सर्वाभेदात्
सर्वासु शाखासु प्राणोपासनस्य प्राणसंवादस्याभिन्नत्वादित्यर्थः ॥ एकस्यामेव विद्यायां वशि-
ष्ठत्वाद्यपेक्षातदभावयोर्विरोधादिति भावः ॥ ननु प्राणस्य सविशेषत्वान्मा भवतु शाखांतरीयत-
दीयगुणोपसंहारो ब्रह्मणस्तु निर्विशेषत्वेन स्वशाखागतधर्मैरेव ज्ञानसंभवान्नान्यशाखाश्रु-
तानामानंदादीनामुपसंहार इति प्रत्युदाहरणेनाक्षिप्य समाधत्ते ॥ आनंदादयः प्रधानस्य निर्गु- ३१

णब्रह्मपरासु श्रुतिषु आनंदस्वरूपत्वविज्ञानघनत्वापरिछिन्नत्वाद्वितीयत्वादयो धर्माः ॥ क्वचित्क-
चिच्छ्रूयंते तत्र संशयः ॥ किं यत्र ये धर्माः श्रुतास्त एव तत्र ज्ञेया उत सर्वे धर्माः सर्वत्रोपसंहर्त्तव्या इति
अत्र पूर्वपक्षे केषांचिद्धर्माणामनुपसंहाराद्यावत्तत्स्वरूपज्ञानासिद्धिः फलं सिद्धांते तु सिद्धिरि-
ति बोध्यं ॥ तत्रानंदादीनां नोपसंहार इति प्राप्ते ब्रूमः ॥ प्रधानस्य ब्रह्मण आनंदस्वरूपत्वादयो ध-
र्माः सर्वत्रोपसंहर्त्तव्याः वेद्यैक्येन विधेयैक्यादिति सूत्रोक्तहेतोरित्यर्थः ॥ ननु तैत्तिरीयके आ-
नंदमयपरमात्मानं प्रस्तुत्य तस्य प्रियमेव शिरः मोदो दक्षिणः पक्षः ॥ प्रमोद उत्तरः पक्षः ॥ आ-
नंद आत्मेति प्रियशिरस्त्वादयो धर्माः श्रूयंते तेषामप्यानंदस्वरूपत्वादिधर्माणामिव सर्वत्रोप-
संहारः स्यात् ब्रह्मधर्मत्वाविशेषादित्यत आह ॥ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे
प्रियशिरस्त्वादिधर्माणां न सर्वत्र प्राप्तिः ॥ हि यतः प्रियमोदप्रमोदानंदाः परस्परापेक्षयोपचिताप

सूत्र॰
३९

चितस्वरूपाद्युपचयापचयवंतो हि धर्मो धर्मिणो भेदे सत्येव स्वाभाविकौ संभवतः ॥ ब्रह्मणस्तु द्विती शारी॰ ३॰
यत्वाद्युपचितापचितप्रियादिधर्मस्वभावत्वस्य स्वभावधर्माणां ब्रह्मज्ञानार्थं नोपसंहारस्तथार्थः ३
चंदनजं सुखं प्रियं पुत्रप्राप्तिजं मोदः स एव प्रकृष्टः ॥ प्रमोदः सुखसामान्यमानंद इति तेषां तारत
म्यं बोध्यं ब्रह्मण्यसिद्धिः ॥ सूत्रकारैरानंदमयस्य ब्रह्मत्वे प्रियादीनां तद्धर्मत्वं चांगीकृत्यफलत्वेयं चिं
तानस्माभिस्त्वन्यत्र फलं बोध्यं तथा हि वेद्यैक्ये विद्यैक्यादानंदादिधर्माणां सर्वत्रोपसंहारे सगुणब्र
ह्मोपासनेष्वभिन्नेष्वपि वेद्यस्य सगुणस्य ब्रह्मण एकत्वेनोपासनैक्यापत्तावन्योन्यगुणोपसं
हारः स्यादिति शंकानिरासः फलं ॥ उपासनानां विधिपारतंत्र्याद्यत्र यावद्गुणविशिष्टमुपासनं
विधीयते ॥ तत्र तावद्गुणविशिष्टमेव कर्तव्यं तत्र तत्फलस्य तेनैव सिद्धेः ॥ वस्तुपरंतत्र निर्गुणविद्या
फलस्याविद्यानिवृत्तेर्यावत्स्वरूपज्ञानमंतरेणासंभवात्सर्वत्रानंदादिगुणानामुपसंहार इति शे ३९

कानिरासप्रकारः ॥ उपास्यब्रह्मधर्माणां सर्वत्र नप्राप्तिरित्युक्तं तदपेक्षया ज्ञेयधर्माणामानंदादीनां
सर्वत्र प्राप्तिरिति विशेषमाह ॥ इतरे त्वर्थसामान्यात् ॥ उपास्यधर्मापेक्षयाऽतरे त्वानंदादयो धर्मा
ज्ञानैकफलकाः सर्वत्रोपसंह्रियंते अर्थस्य प्रतिपाद्यस्य ब्रह्मणः सामान्यादेकत्वादित्यर्थः उ
पसंहारं विना यथावत्स्वरूपविषयकमहावाक्यार्थज्ञानसाध्याविद्यानिवृत्तेरसंभवादिति भा
वः ॥ आध्यानाय प्रयोजनाभावात् ॥ कठवल्लीषूपपद्यते ॥ इंद्रियेभ्यः पराह्यर्था इत्यारभ्य पुरुषा
न्न परं किंचित्सा काष्ठा सा परा गतिरिति तत्र संशयः ॥ किमिमानि वाक्यानि भिन्नान्युत पुरुषपर
मेकमेव वाक्यमिति पूर्वपक्षे इंद्रियादिपरत्वविशिष्टस्यार्थादेरुपास्यस्य प्रतिवाक्यं भेदाद्वि
द्याभेदः ॥ फलं सिद्धांते निर्विशेषात्मप्रदर्शनपरमेकवाक्यमिति विद्यैक्यं फलं अत्र एव सर्वत्र
पक्षयो विद्याभेदाभेदयोः ॥ अर्थवसानादस्याधिकरणस्य पादसंगतिः ॥ सर्वब्रह्मस्वरूपाणामानं

सू.त्र० दादीनामुपसंहार्याणां ब्रह्मज्ञानोपायत्वं निर्ज्ञातमिदानीमब्रह्मस्वरूपस्यानुपसंहार्यस्यार्थादि शारी०
३९ परत्वरूपधर्मस्य ब्रह्मज्ञानोपायत्वमुच्यत इत्येकफलत्वमर्थांतरसंगतिः ॥ तत्रेमानि वाक्यानि । ३
मिनानीति श्रासैद्भूमः ॥ आध्यानाय ध्यानसाध्यसाक्षात्काराय पुरुष एवार्थादिभ्यः सर्वेभ्यः पर
त्वेन प्रतिपाद्यते इत्येकमेकवाक्यं न त्विंद्रियादिपरत्वेनार्थादयः प्रतिपाद्याः प्रयोजनाभावा
न्नहींद्रियपरत्वेनार्थज्ञाने स्वतः किंचित्फलं साधयति ॥ अतः प्रतिपाद्यभेदाभावाद्वाक्यभे
दः ॥ पुरुषज्ञाने फलहेतुरिति तच्चैवोक्तं निचाय्य तं मृत्युमुखात्प्रमुच्यत इति ॥ एवं वाक्यस्या
त्ममात्रपरत्वे फलवत्वं लिंगमुक्त्वा ऽन्यत्वमपि लिंगमाह ॥ आत्मशब्दाच्च ॥ एष सर्वेषु भूतेषु
गूढोत्मा न प्रकाशते ॥ दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति ॥ प्रकृतं पुरुषं प्रत्या
त्मशब्दश्रवणाच्चात्मपरमेवैकवाक्यं तस्यात्मनः श्रुत्या मानांतरावेद्यत्वरूपापूर्वत्वप्रतिपाद ३९

नादिति भावः ॥ आत्मगृहीतिरितरवदुत्तरात् ॥ ऐतरेयके श्रूयते ॥ आत्मा वा इदमेक एवाग्र आसीन्ना
न्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति स इमाल्लोकानसृजतांभो मरीचीर्मरमापोऽदोंभः परेण ।
दिवं द्यौः प्रतिष्ठांतरिक्षं मरीचयः पृथिवी मरो या अधस्तात्ता आप इति लोकानेवाहांभ इति तद्याचष्टे
श्रुतिरदोंभ इति तदंभः ॥ यत्परेण दिवं दिवः परस्ताद्वर्तते तस्य च परस्ताद्वर्तमानस्य द्यौः प्रतिष्ठा ।
आश्रयः सोऽदोंभः शब्दवाच्या दिवमारभ्योपरितनलोकांश्चांडमध्येंऽभोभिव्याप्तत्वादंभ इत्युच्यं
त इत्यर्थः ॥ अंतरिक्षलोकः सवितृकिरणव्याप्तत्वान्मरीचयः स्थानभेदापेक्षया बहुवचनं म्रि
यतेऽस्मिन्भूतानीति पृथिवीलोको मरः यानि पृथिव्या अधस्तात्पातालान्यब्बहुलानि तान्या
प इत्यर्थः ॥ तत्र संशयः ॥ किमात्मपदेन हिरण्यगर्भ उच्यते उत परमात्मेति ॥ पूर्वपक्षे त्वात्मप
दस्य परमात्मपरत्वाभावात्तस्मिन्नर्थे नानंदादिधर्माणामत्रोपसंहार इति फलं सिद्धांतेप

सूत्र० ४० स्यात्मन एवात्रोक्तत्वात्तन्मुख्यमित्यर्थः सत्यानंदादिधर्माणामत्रोपसंहार इति मंतव्यं । तत्र सर्ववा शारी०भा०
४० क्यभेदमिथ्यार्थादीनां पृथक् प्रतिपाद्यत्वं नास्तीत्युक्तं तर्हि प्रजापतेरेतःकार्यं देवा इत्यादि । सर्व ३
वाक्ये हिरण्यगर्भस्य प्रकृतत्वात्स एवात्मशब्देनोच्यत इति युक्तं ॥ अन्यथा वाक्यभेदप्रसंगादि
ति दृष्टांतसंगत्या प्राप्ते ब्रूमः ॥ अस्मिन्सृष्टिवाक्ये आत्मशब्देन परमात्मन एव ग्रहणं नत्वप
स्यापि ॥ कुतः उत्तरात्स ईक्षत लोकान्नु सृजा इति स इमाँल्लोकानसृजतेति । ईक्षणपूर्वकसृष्टुत
रूपोत्तरविशेषणादित्यर्थः ॥ तच्च विगृह्णीतिः नान्यस्य तदितरवत् ॥ यथान्यत्रैषु सृष्टिवाक्येषु
आत्मन आकाशः संभूत इत्यादिषु आत्मशब्देन परमात्मनो विशेषणं परमात्मन्येव मुख्यत्वे
न श्रुतत्वं तत्रैव गतमिति भावः ॥ अन्वयादिति चेत्स्यादवधारणात् सर्ववाक्यादिपर्यालोचनेन प्रा ४०
जापतावेव वाक्यस्यान्वयदर्शनान्न परमात्मग्रहणं युक्तमिति चेत् ॥ अत्रोच्यते स्यादवधारणादि

ति ॥ अत्र परमात्मन एव ग्रहणं युक्तं स्यात् । आत्मा वा इदमेक एवाग्र आसीदिति सृष्टेः प्रागेक
त्वावधारणस्य परमात्मन्येवांजसत्वादित्यर्थः ॥ न चास्मिन्वाक्ये लोकस्रष्टृत्वं श्रूयमाणं हिर
ण्यगर्भमेव गमयति ॥ अन्यथा परमात्मन्येवांजसत्वादित्यर्थः ॥ न चास्मिन्वाक्ये लोकस्य ग्र
हणे महाभूतसृष्टिः श्रूयेतेति वाच्यं ॥ छांदोग्ये तेजआदिसृष्टिश्रवणेऽपि यथा आकाशवायु
सृष्ट्युपसंहारस्तद्वदत्रापि महाभूतसृष्टेरुपसंहारात् । तस्मादस्मिन्वाक्ये आत्मनः परस्यैव
ग्रहणमिति सिद्धं ॥ सूत्रद्वयस्यापरा व्याख्या ॥ आत्मगृहीतिरितरवदुत्तरात् । बृहदारण्यके क
तम आत्मेति योऽयं विज्ञानमयः । प्राणेषु हृद्यंतर्ज्योतिः पुरुषः इत्यात्मशब्देनोपक्रम्य तस्यै
वात्मनो संगत्वादिकमुक्त्वा स वा एष महानज आत्मेति ब्रह्मात्मनामुपसंहरति छांदोग्ये तु सदे
व सोम्येदमग्र आसीदेकमेवाद्वितीयमिति विनैवात्मशब्दं सत्त्वात्तदुपक्रम्यांते स आत्मा तत्त्वमा

सूत्र० ४१

सीति ब्रह्मात्मत्वमुपसंहरति ॥ तत्र संशयः ॥ किमनयोर्वाक्ययोस्तुल्यार्थत्वमुत भिन्नार्थत्वमि शारी०भा० ३
ति ॥ पूर्वपक्षेऽत्र अनयोर्वाक्ययोरुपक्रमवैषम्यादर्थभेदेन विद्ययोर्भेदान्नान्योन्यगुणोपसंहारः ॥ किं
तु ॥ बृहदारण्यके निर्गुणविद्या छांदोग्ये उपक्रांतसत्तासामान्ये ब्रह्मत्वोपासनेति ॥ फलं सिद्धांते
छांदोग्ये सत्पदेनात्मन एव गृहीतिरिति इतरवत् बृहदारण्यके ॥ आत्मपदेनात्मग्रहणवत् उ
त्तरत्र त्वमसीति उपसंहारबलादित्युभयत्र विद्यैक्यादस्त्यन्योन्यगुणोपसंहारः ॥ निरवधि
करणे वाक्यैक्यबलादर्थादिपरत्वं परित्यज्य विद्यैक्यमुक्तं न हि प्रकृते उपक्रमभेदेन वाक्यभे
दाद्विद्यैक्यं न स्यादिति ॥ प्रस्तुतोदाहरणसंगतिरस्याधिकरणस्य बोध्या ॥ अन्वयादिति चेत्स्याद
वधारणात् ॥ ननु पक्षसंहारबलात्सत्पदेनात्मगृहीतिरित्यसंगतं उपसंहारस्योपक्रमानुयायि
दुपक्रमपरतंत्रत्वादित्याक्षेपांशार्थः ॥ परिहरति स्यादवधारणादिति सत्पदेनात्मन एव गृहीति ४१

र्युक्ता स्यात् अग्रे वेन्याद्वितीयत्वावधारणात् सत्तासामान्यस्य च सद्वितीयत्वादवधारणानुपपत्तेरि
त्यर्थः ॥ अयं भावः ॥ आरंभणाधिकरणे ब्रह्मातिरिक्तवस्तुजातस्य मिथ्यात्वसाधनादात्मान्यस्य स
त्त्वदार्यत्वानुपपत्तेः ॥ सत्पदेनात्मन एवोपक्रमः सदुपक्रमस्य ब्रह्मसत्तासामान्यपरत्वसंदेहे
पि तत्त्वमसीति वाक्यशेषाद्ब्रह्मपरत्वनिर्णयः ॥ नन्वज्ञातवादपेऽप्यात्मसद्ब्रह्माभ्यां जीवब्रह्म
णोरुपक्रमाद्वैषम्यं उभयोर्जल्पे केनावैषम्यादिति तस्मादनयोर्वाक्ययोरैकार्थ्यं नमिति सि
द्धे ॥ कार्याख्यानादपूर्वम् ॥ वाजसनेयके प्राणसंवादे प्राणो वागादीन्प्रत्याह किं मेऽन्नं किं वास
इति ते प्रत्यूचुः यदिदं किंचाश्वभ्य आकृमिभ्य आकीटपतंगेभ्यस्तत्तेऽन्नमापो वास इति ॥ तद
नंतरं श्रूयते तस्माद्विद्वांसः ॥ श्रोत्रिया अशिष्यंत आचामंत्यशित्वाचामंत्येतमेव तदनमनग्नं कुर्वं
तो मन्यंते तस्मादेवंविच्छिष्यन्नाचामेदशित्वाचामेदेतमेव तदनमनग्नं कुरुत इति ॥ यस्मात्

सूत्र०
४२

प्राणस्यापो वासस्तस्मादित्यस्मिन्नर्थे तच्छब्दः ॥ विद्वांसः । प्राणविदः श्रोत्रिया यद्धेष्टचेष्टा सन्त्याभो
जनात्पूर्वोत्तरकालयोराचमनं कुर्वंतीति नाचमनसंबंधिनाद्भुमवाससैतमेवानं प्राणमनग्न्या
माच्छादितं कुर्वंतो मन्यंते चिंतयंति सर्वे जनाः ॥ तस्मादिदानीं तनोपि प्राणविदेवं कुर्यादित्यर्थः
छांदोग्ये प्येवमेव श्रूयते किमितस्माद्वा एतदशिष्यंतः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधाति । त
स्मात्प्राणं प्रत्यपां वासस्त्वादित्यर्थः ॥ अन्नमशिष्यंतः प्राणविद आचमनं कुर्वंत एतत्कुर्वं
तीति किमितत्र भोजनात्पूर्वमूर्ध्वं चाद्भिः प्राणं परिदधंति आच्छादयंतीत्यर्थः । तत्राचमनीयास्व
प्सु प्राणवासस्त्वध्यानमाचमनं न प्रतीयते । तत्रोभयविधाने वाक्यभेदप्रसंगादेकमेव विधेयं
तदेकं किमाचमनं विधेयं उत वासस्त्वध्यानमिति संशयः । दर्शपक्षे प्राणविद्यांगत्वेनापूर्वत्वा
चमनस्य विधेयत्वात् । तस्मादाचमनस्यात्र प्राणविद्यायामुपसंहारः । फलं सिद्धांतेनुपसंहार

शारी०अ०
३

४२

इति मंतव्यं तत्र संदिग्धस्य प्रक्रमस्य वाक्यशेषान्निर्णयवदाचामंतीति । वर्तमानापदेशस्य वि
धित्वसंदेहश्चाचामेदिति । वाक्यशेषात् विधित्वनिर्णय इति दृष्टांतसंगत्याप्राप्ते ब्रूमः । वासस्त्व
ध्यानमेवापूर्वं प्राणविद्यांगत्वेन विधेयं यथा प्राणविद्यांगत्वेन स्यादिमर्यादस्यात्तस्य प्राणं
प्रत्यक्षत्वेन ध्यानं विधीयते न तु । न त्वाचमनमत्र विधेयं कुतः । कार्याख्यानात् । द्विजो नित्य
मुपस्पृशेदित्यादिना स्मार्तविधिना सकलानुष्ठानांगत्वेन सिद्धस्य कार्यस्याचमनस्य प्रा
णविद्यायामपि प्राप्तस्याख्यानात् तदीयास्वप्सु वासस्त्वविधानार्थमनुवाद इत्यर्थः । समा
नएवं वाभेदात् । वाजसनेयिशाखायामग्निरहस्ये शांडिल्यविद्याम्नाता । तत्र गुणाः श्रूयंते स
आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमित्यादिना तस्यामेव शाखायां बृहदारण्यके
पुनः श्रूयते शांडिल्ये न दृष्टा विद्या मनोमयोयं पुरुषो भाः सत्यस्तस्मिन्नंतर्हृदये यथा व्रीहि

र्वचनांतरेण प्रत्यस्य पुनर्वचनमनुवादः ॥६॥

सू॰त्र॰ वायवोवासएषसर्वस्येशानःसर्वस्याधिपतिः॥सर्वमिदंप्रशास्तियदिदंकिंचेतिभाःप्रकाशात्मक शा॰र॰
४३ कःसत्यःपरमार्थतः॥तस्मिन्मनोमयपदप्रकृतिभूतमनः॥शब्देनप्रस्तुतेहृदयेन्तःयथाव्रीहि ३
र्वायवोवातावत्परिमाणःपुरुषोस्तिसएषसर्वस्येशानइत्यादिगुणकस्तस्यार्थः॥तत्रसंशयः॥किम
ग्निरहस्यबृहदारण्यकस्थयोरनयोर्विद्ययोर्भेदउतैकत्वमितिपूर्वपक्षेविद्ययोर्भेदाद्गुणानुपसंहा
रःफलंसिद्धान्तेविद्यैक्याद्गुणोपसंहारइतिबोध्यंसर्वंप्राग्वन्मनसानुवादेनवासस्तत्थ्यानंविधेय
मित्युक्तमिहत्वेकवाक्ययोरेकस्यानुवादकत्वमेकस्यविधायकत्वमित्यत्रनियामकाभावादुभयो
रपिस्वनिकटस्थगुणविशिष्टविद्याविधायकत्वमित्यनयोर्विद्ययोर्भेदइतिप्रत्युदाहरणेनप्रा
प्तेब्रूमः॥यथाभिन्नासुशाखासुविद्यैक्यंगुणोपसंहारश्चभवति॥एवंसमानेचैकस्यामपिशा
खायांभवितुंयुक्तंकुतः॥अभेदात्उपास्यस्यमनोमयत्वादिगुणकस्याभेदात्प्रत्य ४३

भिज्ञानादित्यर्थः॥यत्त्वेकस्यानुवादकत्वमेकस्यविधायकत्वमित्यत्रनियामकाभावइति॥तत्रा
ग्निरहस्येबहूनांगुणानांश्रवणेनतत्रैवविद्योत्पत्तिविधिकल्पनात्॥बृहदारण्यकेतुविद्या
याःप्रत्यभिज्ञानार्थंतत्रोक्तमनोमयत्वाद्यल्पगुणानुवादेनसर्वेशानत्वादयोगुणाविधीयंत
इतिनकिंचिद्बाधकंतस्मादुभयत्रशाण्डिल्यविद्यैक्यमितिसिद्धं॥संबंधादेवमन्यत्रापि॥बृहदारण्य
केसत्यंब्रह्महिरण्यगर्भाख्यंसत्यंमहदित्युपक्रम्यतद्यत्तत्सत्यमसौसआदित्योयएषए
तस्मिन्मंडलेपुरुषोयश्चायंदक्षिणेक्षिणितस्यसत्यस्यस्थानभेदेनपुरुषद्वयमितिनन्वेवंसतियत्रसत्य
हिरण्यगर्भाख्यंसोसावादित्यःकिंमंडलेवादित्यःनेत्याहेषदक्षिणेक्षिणितस्यसत्यस्यस्था
नभेदेनादित्यचाक्षुषपुरुषात्मनास्थानमुक्त्वादित्यपुरुषस्यसत्यस्यभूरितिशिरःभुवइतिबाहू
स्वरिति॥प्रतिष्ठापादावितिव्याहृतिदेहंतंसंपाद्यतस्योपनिषदहरितिअहर्नामतमुक्तंतदनंतरंचा

सू०व०
४४

क्षिपुरुषस्य सत्यस्य ब्रह्मविद्याप्रकृतिदेहं तत्संपाद्य तस्योपनिषदहमित्यहं नाम तदुक्तं। उपनिष शारी०ह०
च्छब्देन देवताप्रकाशकं रहस्यनामोच्यते॥ अहःशब्दः प्रकाशवाची अहंशब्दः प्रत्यगात्मवाची ता ३
वहरहंशब्दौ क्रमेणादित्यचाक्षुषपुरुषयोर्नामनी इति स्थितिः॥ तत्र संशयः किमस्यां सत्यवि
द्यायां नाम्नोर्व्यवस्थया ध्यानं कर्तव्यमुत नामद्वयस्य पुरुषद्वये उपसंहार इति। सर्वपक्षे उपसं
हारः फलं सिद्धांते त्वनुपसंहार इति॥ तत्र दृष्टांतसंगत्या पूर्वपक्षयति संबंधादिति। यथा शांडिल्य
विद्यायामेकशाखायां विभागेनाम्नातायामेकशाखायां विभागेनाम्नातायामेकविद्यात्वसंबं
धादन्योन्यगुणोपसंहारः सर्वमुक्त एवमन्यत्रापि सत्यविद्यायां भवितुं युक्तमेकविद्यात्वसंबंधा
दित्यर्थः॥ समाधत्ते॥ न वा विशेषात्॥ नैव नामद्वयस्य पुरुषद्वये उपसंहारः॥ विद्यैक्येप्युपास्यादि
त्यरूपस्य स्थानविशेषादित्यर्थः॥ तथा य एष एतस्मिन्मंडले पुरुषस्तस्याहरिति नामेत्युक्त्वा तस्येति ४४

तच्छब्देनादित्यमंडलावच्छिन्नस्यैव परामर्शात् तस्यैवाहर्नामत्वं युक्तमेवमहंनामत्वं चाक्षुषपुरुषस्यैव
चक्षुरूपस्थानविशेषावच्छिन्नस्यैव तच्छब्देन परामर्शादिति॥ तस्मादनयोर्नाम्नोर्व्यवस्थेति॥ दर्श
यति च॥ किंच॥ विद्यांतरे हिरण्मयस्य श्मश्रुरित्यादिनाऽऽदित्यपुरुषस्य रूपमुक्त्वा तद्रूपमक्षिपुरुषेऽ
तिदिशति॥ तस्यैतस्य तदेव रूपं यदमुष्य रूपमिति॥ अयमतिदेशः इतरत्र सत्यविद्यास्यन्नेस्थान
भेदान्नोपसंहार इति दर्शयति॥ अन्यथा स्थानभेदेपि गुणोपसंहारांगीकारे यमतिदेशो निर
र्थक एव स्यादिति तस्मान्नाम्नोर्व्यवस्थेति सिद्धं संभृतिद्युव्याप्त्यपि चातः॥ परिशिष्टप्रदेशात्म
केऽखिलग्रंथे श्रूयते॥ ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं अनन्यापेक्षं कारणं येषां ता
नि ब्रह्मज्येष्ठानि लौकिके क्षत्रवीर्याणां बलवद्भिर्मध्ये भंगः संभवति ब्रह्मवीर्याणां तु नैव मि
त्याह॥ संभृतानीति॥ सर्वाधिकेन ब्रह्मणा निर्विघ्नसमृद्धानीत्यर्थः॥ तच्च ज्येष्ठं ब्रह्माग्रेदं जादिज

न्मनः॥ प्रागेवसिद्धंस्वर्गमानतानन्त्यात्सर्ववत्नियतत्वमेवसर्वव्यापकमित्यर्थः॥ एवंसंभृतिद्युव्याप्त्या
दयोगुणाः ब्रह्मणः श्रूयंते तत्रसंशयः॥ किंतेषांगुणानांतदायोपनिषदिहितत्वांशांडिल्यादिब्रह्म
विद्यासूपसंहारः उतनेतिगुणविशिष्टोपासनंपृथगेवात्रविधीयतइतितत्रोपसंहारइतिप्राप्तेपूर्वो
क्तन्यायमतिदिशतिसंभृती तिसंभृतिश्चद्युव्याप्तिश्चसंभृतिद्युव्याप्तियथास्थानभेदान्नाम्नो
व्यवस्था एवंसंभृत्यादयोपिशांडिल्यादिविद्यासुनोपसंह्रियंते अतएवस्थानभेदादेवेत्य
र्थः॥ शांडिल्यादिविद्यासुहृदयायतनत्वब्रह्मणः श्रुतंनैवमत्रतस्मात्संभृत्यादिगुणविशि
ष्टमुपासनांतरमितिसिद्धं॥ अस्यातिदेशान्नपृथक्संगत्याद्यपेक्षा॥ पुरुषविद्यायामिवचेत
रेषामनाम्नानात्॥ अस्तितांडिनांपैंगिनांरहस्यब्राह्मणेपुरुषविद्यातत्रपुरुषोयज्ञस्तेनकल्पि
तस्तदीयमायुस्त्रेधाविभज्यसवनत्रयंकल्पितंतस्ययानिचतुर्विंशतिवर्षाणितत्प्रातःसवनंत

तःपराणिचतुश्चत्वारिंशद्वर्षाणिमाध्यंदिनंसवनंततः परमष्टचत्वारिंशद्वर्षाणितृतीयसवनं
पुरुषविद्याविदः षोडशोत्तरशतवर्षजीवित्वादितिपासादिकंदीक्षातेनकल्पितंतैत्तिरीयकेपित
स्यैवंविदुषोयज्ञस्यात्मायजमानः॥ श्रद्धापत्नीशरीरमिध्ममित्यादिनापुरुषः॥ यज्ञः श्रूयतेतत्रसं
शयः॥ किमनयोर्विद्ययोरन्योन्यगुणोपसंहारोस्तिनवेति॥ तत्रसर्वंयदुक्तं॥ संभृत्यादिगुणाः
शांडिल्यादिविद्यासुनोपसंह्रियंतइत्युक्तंहिनतच्छाखांतरगायत्र्यभिज्ञानाभावादिहतुमर
णस्यावभृतत्वेनकल्पितस्यगुणस्योभयत्रसत्वेनप्रत्यभिज्ञानात्गुणोपसंहारोयुक्तइतिप्रत्यु
दाहरणसंगत्याप्राप्तेब्रूमः॥ नान्योन्यगुणोपसंहारः उपास्यरूपभेदात्तदाहानार्थः॥ पुरुष
विद्यायामितितांड्यादिशाखास्थपुरुषविद्यायांयथागुणाम्नानंनतथेतरेषांतैत्तिरीयकाणांपुरुष
विद्यायांगुणाम्नानाभावादित्यर्थः॥ अन्यत्रपुरुषःयज्ञस्तेनोपास्यः तैत्तिरीयकेतुविपर्ययः पुरुषस्य

सू०व० ४६

च सिद्धो योयज्ञस्तस्य पुरुषात्मादिषु यजमानतादिकल्पनयोपास्यतादेवं बहुतरत्वोपास्यभेदोह शारी०टी०
श्यते तद्भेदाच्च विद्याभेदात्नान्योन्यं गुणोपसंहार इति॥ यत्त्वग्रेवमृतत्वगुणस्योभयत्रसमतान्तुल्य ३
भिज्ञानमिति तन्न॥ बहुगुणभेदेन कस्यचत्यभिज्ञानोपकत्वाभावादिति। किंच। तैत्तरीयके स्प
ते सर्वमात्मविद्यासु परिशिष्यतद्धेषतेन पुरुषयज्ञस्यपरिशिष्यते तस्यैवं विदुषइति तत्संनिधौ श्रव
णात्॥ इत्यन्नतापुरुषविफलकः पुरुषयज्ञः स तंत्र॥ इत्यनयोर्भेदरावन्याप्यइति। वेधाद्यर्थभेदा
त्॥ आरस्याथर्वणिकानामुपनिषदारंभे मंत्रपठनं सर्वं प्रविध्य हृदयं प्रविध्य धमनीः॥ प्रवृज्य
शिरोभिः॥ प्रवृज्य त्रिधा विभक्त इत्यादि तांडिनां देवसवितः॥ प्रसुव इत्यादि॥ शाट्यायनिकानां
श्वेताश्वो हरितनीलोसीत्यादि॥ तैत्तरीयकानां शंनो मित्र इत्यादि वाजसनेयिनां देव उपनिषदारंभे
प्रवर्ग्यब्राह्मणं पठ्यते देवाह। वैसत्त्रं निषेदुरित्यादि। कौशीतकिनामग्निष्टोमब्राह्मणं ब्रह्मवा ४६

अग्निष्टोमो ब्रह्मैव तन्न दहनं ब्रह्मणो वते ब्रह्मोपयंति ते अमृतत्वमाप्नुवंति। यएतदहरुपयंतीत्यादि।
अयमर्थः॥ अभिचारकर्म देवतामभिचारकर्त्ता प्रार्थयते। हे देव। तेमद्विपोः सर्वमंगं प्रविध्य
विदारय हृदयं च विदारय धमनीः शिराः॥ प्रवृज्य भिंधि तस्य शिरश्चाभितो भिंधि एवं मद्विपुस्त्रि
धा विभक्तो विश्लिष्टो भवत्वित्यर्थः॥ हरित इंद्रनीलसदृशवर्णोसि तादृशः संबोध्यते मित्रः सूर्य
ः शं सुखं करोत्वित्यादि ति विद्याप्याशास्ते अग्निष्टोमो ब्रह्म सय स्मिन्नह निक्रियते॥ तदहरपि
ब्रह्म ततो यएतदहरुपयंति॥ अहर्निर्वर्त्यकर्मानुतिष्ठंतीति ते ब्रह्मणैव साधनेन ब्रह्म परमुपयं
तीति ब्रह्मकर्मणामृतत्वं मुक्तिमाप्नुवंतीत्यर्थः॥ तत्रसंशयः॥ किमिते मे सर्वं प्रविध्येत्यादयो मं
त्राः॥ प्रवर्ग्यादीनि च कर्माणि तत्तदुपनिषदुक्तविद्यासु उपसंह्रियेरन्न वेति तत्र पूर्वं पयाउक्त
पयज्ञस्यात्मविद्यासंनिधानात्तच्छेषत्वेन यथा मंत्राणां कर्मणां च तत्तद्विद्यासंनिधानात्तच्छेषत्वेनोपसं

श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात् ३

सूत्र० ४७ हारोस्तीति हृष्टं तेन ब्रूते ब्रूमः ॥ नैषामुपसंहारो विद्यासु कृतः । वेधाद्यर्थभेदात् सर्वं प्रविध्येत्यादि शारी०टी० ३
मंत्रप्रकाशितानां वेधादीनामर्थानामभिचारकर्मादिसमवेतानां भेदाद्विद्यास्वसमवेतत्वादि
त्यर्थः ॥ तथा चाभिचारकर्मादिसमवेतार्थप्रकाशनसामर्थ्यलक्षणाल्लिंगं सन्निधिं दुर्बलं तिरस्कृ
त्य मंत्राणामभिचारादिकर्मांगत्वं संपादयतीति न विद्याशेषत्वं प्रवर्ग्यादिकर्मांगानां सन्निधेर्बली।
यस्माच्छ्रुत्यादिना ज्योतिष्टोमादौ विनियुक्तानां न विद्याशेषत्वमिति भावः ॥ हानौ तूपायनशब्दशे
षत्वात्कुशाछन्दःस्तुत्युपगानवत्तदुक्तं ॥ तांडिनां रहस्ये श्रूयते अश्व इव रोमाणि विधूय पापं
चंद्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामीति तथैवाथर्वणं
श्रुतिः ॥ तथा विद्वान्पुण्यपापे विधूय निरंजनः सन् यथा वा चंद्रो राहोर्मुखात्प्रमुच्य भास्वरो भव
त्येवमकृतं प्रवाहरूपेणानादिसिद्धं शरीरं धूत्वा त्यक्त्वा निःसंगः सन् यथा वा चंद्रो राहोर्मुखात् ४७

प्रमुच्य भास्वरो भवत्येवमकृतं प्रवाहरूपेणानादिसिद्धं शरीरं धूत्वा त्यक्त्वा निःसंगः सन् कृता
त्मा कृतकृत्यो ब्रह्मात्मकं लोकमभिसंभवाम्याभिमुख्येन प्राप्नोमीत्यर्थः ॥ तथा शा
ट्यायनिनः पठंति तस्य पुत्रा दायमुपयंति सुहृदः साधुकृत्यां द्विषंतः पापकृत्यामिति ता
स्यमंत्रस्य विदुष इत्यर्थः ॥ तथैव कौशीतकिनः पठंति तत्सुकृतदुष्कृते विधुनुते तस्य प्रियाज्ञा
तयः सुकृतमुपयंत्यप्रिया दुष्कृतमिति तत्र तेन विद्यावलेन विद्वान्सुकृतदुष्कृते विधुनुते त्यज
ति त्यक्तयोस्तयोर्विनियोगमाह ॥ तस्येति ॥ तस्मादुपासको न द्वेष्य इति श्रुतितात्पर्यं ॥ तत्र शाका
द्याय निःश्रुतानुपादानमात्रं पुण्यपापयोः श्रुतं न च विदुषस्त्यागं विना न संभवतीति ॥ पुण्यपा
पत्यागस्याक्षिप्यते यत्तु तांड्याथर्वणयोर्वाक्ययोः पुण्यपापत्यागमात्रं श्रुतं तत्र किं त्यक्तयोरु
पादानमन्यत्र श्रुतमत्रोपसंह्रियते न वेति संदिह्यते सर्वपक्षे विद्यायाः स्तुतिप्रकर्षसिद्धिः फ

सूत्र० ४८ ंसिद्धेतेनतदुपादानस्यार्थोपसंहाराद्विद्यास्तुतिप्रकर्षसिद्धिः॥उपासककृतविद्यासत्त्वपर्यंहिस्थि शारी०भा० ३
तानुपासकः॥पुण्यपापेत्यजति॥तेचान्यैरुपादीयेतेइत्युच्यतेसानस्तुतिः॥सतापुरोन॥तयान्वो
पास्यगुणोपसंहारस्यसंगेनस्तुत्यर्थेगुणोपसंहारोविचार्यतेइतिनास्तिगिरोपास्यसंगतिः॥तत्र
यथासर्वविद्यासन्निधौश्रुतस्यापिमंत्रादेर्विद्यामसामर्थ्यादनुपसंहारउक्तः॥एवंकचित्को
शीतकिरहस्येहानस्यसन्निधौश्रुतस्याप्युपादानस्योपादानमंतरेणापितद्धर्मीहानसंभवेनहान
स्योपादानोपपादनसामर्थ्याभावान्नोपसंहारइतिदृष्टान्तेनप्राप्तेब्रूमः॥तुःकेवल्यपाचीत
यानकेवलहानौश्रुतायांसत्यांनचोपादानमुपसंहर्तव्यंकुतःउपायनशब्दशेषत्वादश्वरो
मविधूननदृष्टान्तेनोक्तस्यपुण्यपापहानस्यनाशनाभावेनविधूतयोःपुण्यपापयोरन्यत्राव ४८
स्थानरूपोपायनसापेक्षत्वादुपायनंक्वचिदपिहानसन्निधौश्रुतमुपमार्गकेवलहानश्रवणेप्यापा

तिपुण्यपापहानेनापेक्षितस्योपादानात्मकस्योपायनस्यतच्छब्दशेषत्वादित्यर्थः॥तानान्वर्थयो
ःपुण्यपापयोर्नाशान्तरयोरश्लेषश्रुतिफलत्वादपेक्ष्यते॥यतोहानेविश्लेषोन्यत्वाभावः॥नेतु॥
न्यकर्मणाभिरूपादानमितिफलतोदृष्टव्यं॥अस्यसूत्रंयोःपुण्यपापयोरन्यत्रसंचारात्मकोपा॥
दानस्यमुख्यस्यायोगात्सूत्रेशब्दपदेनहानावुपायनोपसंहारस्यस्तुत्यर्थत्वंसूचितमितिबो
ध्यं॥शाखांतरस्थोविशेषःशाखांतरेप्युपेक्षितव्यउपसंहरणीयइत्यत्रदृष्टान्तमाह॥कुशाछं
दइत्यादिना॥तत्रकुशादृष्टान्तोयथाकुशानामस्यत्याःस्थेत्यादौभाल्लविनांस्तुतौहेकुशाः
समिद्रूपाःस्पंदनस्यपत्याःस्थमांयजमानंरक्षतेति॥यजमानत्वार्थेनेवनस्पतियोगितेनसामा
न्यसमभिव्याहारेणौदुंबराइतिशाखांतरीयोविशेषश्चाश्रितःऔदुंबराःकुशाइतिच्छादंदोदेः
शेतोपयाच्छंदोभिःस्तुवीनेत्यत्रदेवासुरच्छंदसामविशेषेणपौर्वापर्यप्रसंगेदेवच्छंदसामित्वं

णीति पैङ्गिश्रुत्या निर्णयः ॥ श्रुतिदृष्टान्तो यथा षोडशिनः ॥ सा च विशेषस्य स्त्रहणेऽङ्गमन्तं स्तोत्रं
कराकर्त्तव्यमित्याकांक्षायां षष्ठे दोगानां काला विशेषप्राप्तौ समया विशिति सूर्ये षोडशिनः स्तो
त्रमुपाकरोतीति नैत्त्रिरीयकवाक्यात्कालविशेषधीर्भवति रात्रेत्यन्तायां स्वात्यानां श्रुतेर्वाक्या
त्तु विशेषधीरित्युपगानदृष्टान्तो यथाऽऽकृतिजउपगायन्तीति सामान्यवाक्यश्रवणान्तरं यं नाध्व
र्युरुपगायतीति विशेषमपेक्ष्याध्वर्युवर्जिता ऋत्विज उपगायन्तीत्येतदर्थपरत्वमिति निश्चीयत
इति ॥ तथा च यथा कुशादिषु श्रुत्यन्तरगतविशेषानपेक्षतया हानावुपायनान्तपरत्वमर्थः ॥ कु
शादिसामान्यश्रवणानन्तरमेव शाखान्तरीयविशेषसापेक्षमित्यङ्गीकर्त्तव्यं निरपेक्षत्वे ऽष्टदोषदुष्टवि
कल्पः स्यादिदं च सामान्यवाक्यस्य विशेषसापेक्षत्वं जैमिनेरपि संमतमित्याह ॥ तदुक्तमिति ॥ पूर्व
मीमांसायां जैमिनिना तदुक्तमित्यर्थः ॥ तथा हि ॥ अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्प

स्वीकृतग्रामारण्यपरित्यागः ॥ अस्वीकृतग्रामारण्योपगमः ॥ अनन्तरोपगतग्रामारण्यासुग
मः ॥ अस्वोपगतग्रामारण्यानन्तरोपगमः ॥ ३ ॥

स्य विधीनामेकदेशः स्यादिति जैमिनिसूत्रं ॥ अस्यार्थः ॥ ओ श्रावयेति चतुरक्षरमस्तु श्रौषडिति ॥
चतुरक्षरं यजेति द्व्यक्षरं ये यजामहे इति ॥ पंचाक्षरं द्व्यक्षरो वषट्कार एष वै सप्तदशः
प्रजापतिर्यज्ञमन्वायत्त इत्यनारभ्याधीतवाक्यं श्रुतं नानूयाजेषु ये यजामहे करोतीति विशेष
वाक्यं तस्य वाक्यशेषः स्यात्तया च नञः पर्युदासार्थतया अनूयाजव्यतिरिक्तेषु यज्ञेषु स
प्तदशाक्षरगणः प्रयोक्तव्य इत्येको विधिर्भवति ॥ यदि नञो निषेधकत्वेन सामान्यवाक्यं विशे
षानपेक्षं तदा सामान्यवाक्येन विहितस्य गणस्य निषेधादनूयाजेषु तस्य विकल्पः स्यात्स चान्या
य्यो विधीनामित्येकदेशः स्यादिति प्रजापतिरिति श्रुतिसहितनञिगात्मा सप्तदशा इति ॥ अथ
वा उदाहृतश्रुतिष्वेव किं दुरुणपापयोर्विधूननं हानमभिप्रेतं उत तयोः फलत्यागमिति विशा
ये फलत्यागनमेवेति न पुरुषान्तरे तयोः फलहेतुत्वमिति प्राप्ते ब्रूमः ॥ हानावेपायं विधूननं ॥

द्भोवर्त्तितुमर्हति ॥ उपायनशब्दशेषत्वादुपायनशब्दसंनिधौ विधूननशब्दस्य श्रुतत्वादित्यर्थः
उपादानात्मकोपायनस्य हानं विनासंभवेन वा तद्विधूननशब्दो न कंपनरूपार्थधातुजउते।
न चलनवाचकत्वेनापि हानमेव लक्ष्यमिति भावः ॥ ननूपायनशब्दस्य संनिधौ श्रूयमाणविधू
ननशब्दस्य हानिलक्षकत्वेपि केवलविधूननशब्दस्य न हानलक्षकत्वमिति शंकां कुशाछंद
इत्यादिना निराकरोति ॥ यथा कुशादिस्य लेशाभेदांतरीयविशेषस्य वरां निर्णायकं तथेहापि
क्वचिद्विधूननसंनिधौ श्रूयमाणमुपायनं सर्वत्र विधूननस्य निर्णायकमित्यर्थः ॥ तदुक्तमिति
पूर्ववत् व्याख्येयं ॥ सांपराये तर्त्तव्याभावात्तथा ह्यन्ये ॥ एवं विद्यायाः कर्महानिहेतुत्वं सिद्धं कृ
त्वा केवलहानस्य वरोऽप्युपायनस्योपसंहारं उक्त्वेदानीं विद्यायाः कर्महानिहेतुत्वं नास्तीत्याशे
पाद्भंगतिः ॥ पर्यंकस्य ब्रह्मोपासकस्य देहत्यागानंतरं देवमार्गेण ब्रह्मलोकं प्रति पर्यंकस्य ब्र

ह्मप्राप्त्यर्थं गच्छतो मार्गमध्ये विरजानदीतरणानंतरं कर्महानिहेतुत्वमिति विद्यायाः हानिहेतु
त्वासिद्धिः ॥ फलं सिद्धांते विद्यासामर्थ्याज्जीवत एव कर्महानिरिति तत्सिद्धिरिति भेदः ॥ तत्र तत्सू
कृतस्य नत्येन नदिविमर्व नाम्ना तस्याः पर्यंकत्वेन हेतुत्ववादिना नदीतरणस्यैवाव्यवहितस्य
कर्महानिहेतुत्वमिति गम्यते ॥ तथा च नदीतरणानंतरमेव कर्महानिरिति प्राप्ते ब्रूमः ॥ सांपरा
ये परलोकसाधनाभूतविद्याकाल एव कर्महानिर्युक्ता कुतः तर्त्तव्याभावाद्वनदीतरणानंतरं
पुण्यपापकर्मणा तर्त्तव्यस्य निर्वर्त्यस्य फलस्याभावात् इत्यर्थः ॥ अयमाशयः किं नदीत
रणानंतरं कर्मणा निर्वर्त्यफलसत्तावांवत्पर्यंतमक्षीणत्वं कर्मणाऽउच्यते ॥ उत नदीतरणं विना
कर्मक्षयहेतोरभावाद्वा आद्ये स्मृत्ता काको हेतुर्बोध्यः ॥ द्वितीये तु असिद्धः कर्मक्षयहेतोर्विद्यायाः
सत्वात्कर्मक्षयं विना नदीतरणानुपपत्तेश्च ॥ न च सर्वनाम्ना नदीतरणस्य हेतुत्वप्रतीतिर्युक्ता स

सूत्र॰ ५१ र्वेनाप्यः प्राधान्येन प्रकृतविद्याप्रशंसार्थत्वादिति ॥ तस्मात्पूर्वजातान्येव कर्माणि योगिनो नदीतरणानंत शारी॰भा॰ ३
रं पद्यत इति मंतव्यम् ॥ तथा ह्येके शाखिनस्तांड्यादयो जीवद्दशायामेव कर्मक्षयमश्वरो
माणीत्यादावधीयते ॥ अतस्त्वजीवत एव विद्यासामर्थ्यात्कर्मक्षय इति ॥ ननु कर्मक्षयस्य वि
द्याफलत्वे ब्रह्मज्ञाने विदेहत्यागोत्तरकालीनत्वं स्यादत आह ॥ छंदत उभयाविरोधात् ॥ छंद
तः स्वेच्छया विद्यानुष्ठानं जीवत एवेति ॥ तदेतदुक्तः कर्मक्षयो जीवत एवेत्युक्तः ॥ सति हेतौ कार्यवि
लंबादयोगात् ॥ एवं सति विद्याकर्मक्षययोर्निमित्तनैमित्तिकभावे तांड्यादिश्रुत्योरुभयोरवि
रोधो भवतीत्यर्थः ॥ ब्रह्मज्ञाने देहत्यागं विनानुपपत्तेः ॥ प्रकृते चानुपपत्त्यभावात् जीवत एव
कर्मक्षय इति भावः ॥ तस्माद्विद्याफलत्वं कर्मक्षयस्येति सिद्धं ॥ एवं प्रसंगागतं विद्योदयानं
तरमेव कर्महानमिति निरूप्य याहानस निःशेषकर्मक्षयरूपमाणमुपायने सर्वत्रोपसंह्रियते ॥ त ५१

प्रयोजनत्वं ॥ सगुणे निर्गुणे च ॥

याहानस निःशेषकर्मक्षयमाणो देवयानः पंथाः सर्वत्रोपसंहर्तव्य इति दृष्टांतेनाक्षिप्य समाधत्ते ॥
गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥ कर्महानस्य निःशेषकत्वे देवयानः पंथाः श्रुतः क्वचित्सगुणे नि
र्गुणे विद्यास्फले तत्र किं देवयानोपसंहारोऽस्ति न वेति संदेहे अस्तीति प्राप्ते ब्रूमः ॥ गतेर्देवयानस्यार्थ
वत्त्वमुभयथा विभागेन भवितुमर्हति क्वचित्सगुणविद्यायां देवमार्गोऽस्तीति क्वचित्त्रिर्गुणविद्यायां ने
ति ॥ अन्यथा सर्वत्र देवमार्गोपसंहारांगीकारे विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यमुपैत
गमित्र ब्रह्मलक्षणं नित्यसिद्धमुपैतीति श्रुतिविरोधः स्यादित्यर्थः ॥ किमिदानीं श्रुतिविरोधादनुप
पत्तेरप्याहर्तव्यमित्यत आह ॥ उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥ क्वचिद्विद्यायां गतिरस्ति
क्वचिन्नास्तीति गतेरुभयथाभाव उपपन्नः ॥ कुतः तल्लक्षणार्थोपलब्धेः सा गतिकारणा पर्यंकारोहणाय
स्य सगुणविद्याफलस्य पर्यंकस्य ब्रह्मणा निरूपस्योपसंहारः लोकांतर्वर्तित्वार्थस्य तस्य श्रुतिषूपलब्ध
तस्माद्गतेर्लक्षणभूतः कारणभूतो योऽर्थः ॥ प्रयोजनं पर्यंकारोहणादि पर्यंकविद्यादौ सगुण उ
पलभ्यते न तु निर्गुणे तेन निरर्थकं ॥ ६ ॥

स॰त्र॰ ध्येरित्यर्थः ॥ निर्गुणविद्यायां मार्गसाध्यफलाभावान्न तस्योपसंहारः ॥ लोकवत् यथा लोके ग्रामसे शारी॰अ॰
५२ तुवाभिनां गंगायात्मार्थं पंथा अपेक्षितः ॥ न गंगास्थानां तद्वदित्यर्थः ॥ तस्मान्न निर्गुणविद्यायां मा ३
र्गोपसंहार इति सिद्धं ॥ अनियमः सर्वेषामविरोधः शब्दानुमानाभ्यां ॥ सगुणविद्यासु कासुचित् पंचा
ग्निविद्यादिषु मार्गः श्रूयते क्वचित्तु वैश्वानरविद्यादिषु न श्रूयते ॥ तत्र क्वचित्छ्रुतमार्गस्यान्या-
नोपसंहारोस्ति न वेति संदेहे यद्विद्याप्रकरणे मार्गः श्रुतः सत्रैवेति प्रकरणबलान्नियम एव
नोपसंहार इति ॥ पूर्वाधिकरणदृष्टांतेन प्राप्ते उच्यते सर्वेषां सगुणोपासनानां मार्गस्याऽनि-
यमः ॥ क्वचित्छ्रुतस्य सर्वत्रोपसंहार इति यावत् ॥ ननु प्रकरणबलान्नियमो युक्तः ॥ अन्यथा
प्रकरणविरोध इति चेत् उच्यते ॥ प्रकरणेनाविरोधः अनियमस्य कुतः शब्दानुमानाभ्यां श्रुति
स्मृतिभ्यामित्यर्थः ॥ ते य एवमेतद्विदुर्ये चामी अरण्ये श्रद्धा॰ सत्यमुपासते तेर्चिरभिसंभवंती ५२

न्यायाश्रुतिः ॥ ये ते अधिकृता एके द्युलोकादिपंचकमेवाग्नित्वेन ये विदुस्तेर्चिरभिसंभवंतीति संब-
धः ॥ तद्वत् अप्यमी अरण्ये सत्यं ब्रह्म श्रद्धानतः सर्वमुपासते तेप्यर्चिरभिसंभवंतीत्यर्थः ॥ तथा च
पंचाग्निविद्यामिव विद्यांतरशीलानां वाक्येनैव प्रकरणाद्बलीयसा देवमार्गावगतेः प्रकरणंबा-
ध्यमिति भावः ॥ शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते ॥ एकया यात्यनावृत्तिमन्यया वर्तते पु-
नरित्यादिस्मृतिरप्युपासकस्याविशेषेण मार्गं दर्शयति ॥ जगतः विद्यायां कर्मणि वाधिकृत-
स्य जंतस्येत्यर्थः ॥ यावदधिकारमवस्थितिराधिकारिकाणां ॥ एवं निर्गुणविद्यायां न मार्गः सगु-
णविद्यायां तु सर्वत्र मार्ग इति व्यवस्थापाकृताः इदानीं निर्गुणविद्याया मोक्षहेतुतानुपपत्तेरैश्वर्या-
दिफलकत्वं वक्तव्यं न ह्यासुष्मिकं फलं मार्गमंतरेण न संभवतीति कृतव्यवस्थायामाक्षेपासं-
गतिः ॥ अपांतरतमो वसिष्ठसनत्कुमारादीनां निर्गुणब्रह्मविदां पुनः पुनरुत्पत्तिः स्मर्यते अपां-

सू॰ तरतमो कलिद्वापरयोः॥ संधौ विष्णुनियोगात्कृष्णद्वैपायनः संबभूवेत्यादिना तत्र संशयः॥ विदु शारी॰ वृ॰
५३ षो वर्त्तमानदेहपातानंतरं देहांतरप्राप्तिरस्ति न वेति॥ अत्र पूर्वपक्षे वसिष्ठादिनि ब्रह्मविद्यार ३
वेतरविद्वत्स्व ब्रह्मविद्याया अपि मोक्षहेतुत्वाभावेनैश्वर्यादिफलप्राप्त्यर्थं देहांतरप्राप्तिरस्त्येवे
ति निर्गुणविद्यायामपि मार्गोपसंहार इति फले सिद्धांतेतु अपांतरतमःप्रभृतीनामाधिकारि
काणां वेदप्रवर्त्तनादिषु लोकव्यवस्थाहेतुष्वधिकारेषु परमात्मना नियुक्तानां यावदधिकारमव
स्थितिर्यावत्प्रारब्धं कर्मावस्थितिस्तस्य प्रारब्धकर्मणः प्रतिबंधकस्यानेकशरीरभोग्यफल
हेतोस्तस्य फलस्य भोगेन नाशे प्रतिबंधकांतराभावात्॥ अनादौ संसारे संचितकर्मणां च ज्ञा
ननाश्यत्वेनाप्रतिबंधकत्वादप्रतिबद्धः साक्षात्कारो वर्त्तमानदेहपातानंतरं कैवल्यं संपादय
ति भिन्नदेहांतरप्राप्तिरप्रतिबद्धसाक्षात्कारवतः॥ तथैव श्रुतेः॥ तस्य तावदेव चिरं यावन्न विमो ५३

क्ष्येऽथ संपत्स्ये इत्यप्रतिबद्धसाक्षात्कारवतो वर्त्तमानदेहपातावधिं कैवल्यस्य श्रावयति॥ तथा च
न विदुषो मार्गापेक्षेति न मार्गस्य निर्गुणविद्यायामुपसंहार इति सिद्धं॥ अक्षरधियां त्ववरोधः सा
मान्यतद्भावाभ्यामौपसदवत्तदुक्तं॥ बृहदारण्यके श्रूयते याज्ञवल्क्यस्य गार्गीं स्त्रियं प्रत्युत्तरं ए
तद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदंत्यस्थूलमनण्वह्रस्वमदीर्घमित्यादि॥ एवमाथर्वणेप्यक्ष
रमधिगम्यत इत्यक्षरब्रह्मोपक्रम्य श्रावयति॥ यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुरित्या
दि॥ एवं तत्र तत्र निर्गुणब्रह्मप्रमितये निषेधाः श्रूयंते तत्र संशयः॥ क्वचिन्निषेधश्रुतानां श्रुत
निषेधानां श्रुत्यंतरादुपसंहारोऽस्ति न वेति॥ तत्र यथा सर्वमाधिकारिकाणां वसिष्ठादीनां प्रार
ब्धकर्मण एव देहांतरसंबंधसिद्धेर्न संचितकर्मणो देहांतरसंबंधहेतुत्वमित्युक्तं तथेहापि तत्र
वाक्योक्तैरेव निषेधैरुपलक्षणतया सर्वद्वैतनिषेधसिद्धेर्न शाखांतरीयनिषेधानां तद्ब्रह्मप्रमिति

सूत्र॰
५४

हेतुत्वमित्युपसंहारः ॥ निहृत्यंतेन त्याज्ये ज्ञमः ॥ यज्ञरेधर्मिणि देते निषेधविधियोज्ञरविधयस्तासां स शारी॰ प्र॰
र्वत्र निषेधप्रकरणेष्ववरोधउपसंहारो न्याय्यः कुतः सामान्यतज्ञावाभ्यां देवतप्रपंचनिरासेन ब्रह्मप्रति ३
पादनस्य सर्वत्र समानता तस्य ब्रह्मणः प्रतिपाद्यस्य सर्वत्र भावादेकत्वेन तत्त्वमित्यायमानत्वाच्च
तच्छेषाणां निषेधशास्त्रप्रत्ययानां सर्वत्रोपसंहार इत्यर्थः ॥ चोपसदवत् ॥ तथाहि यजुर्वेदे ॥ जमद
ग्निः पुष्टिकामश्चतुरात्रेण यजेतेत्युत्पन्नेजामदग्न्यहीनेपुरोडाशिन्य उपसदो भवंतीति पुरोडा
शयुक्तास्तूपसत्स्विष्टिरूपदिष्टा सुपुरोडाशप्रधानकर्मत्वाद्गुणात्तु रेवेहोत्पन्नानामग्नेर्होत्रं
वेरध्वरमित्यादीनां सूक्तानां प्रयोगेत्राध्वर्युकर्तृके पुरोडाशप्रदानेतेषां मंत्राणां विनियोगा
द्विनियोगविधेस्वसामर्थ्यरूपसंपादकस्य स्वरूपमात्रबोधकोत्पत्तिविध्यपेक्षयासुरव्यतान्मुख्या ५४
नुरोधेनाध्वर्युणैव प्रयोगो न गौणोत्पत्तिविध्यनुरोधेनोद्गात्रा प्रयोगः इति यथाध्वर्युकर्तृकपुरो

डाशविशेषाणां मंत्राणां यत्रक्वचिच्छ्रुतानामप्यध्वर्युणा संबंधः ॥ एवमत्रापि ॥ शेषाणां नि
षेधानां यत्रक्वचिच्छ्रुतानामप्यक्षरेण सर्वत्र संबंध इत्यर्थः ॥ अस्मिन्नेवार्थे उदाहरणांतरं विवक्षु
याजैमिनिसूत्रमुदाहरति ॥ तदुक्तमिति ॥ गुणमुख्यस्य व्यतिक्रमे तदर्थत्वान्मुख्येन वेद संयोग
इति जैमिनिसूत्रं ॥ यएवं विद्वानग्निमाधत्त इति ॥ यजुर्वेदविहिताधानं गतेन ॥ यएवं विद्वान्नास्म
यंतीं गायति ॥ यएवं विद्वान्यज्ञायज्ञीयं गायति यएवं विद्वान्वामदेव्यं गायतीति ॥ यजुर्वेदएव
सामानि विहितानि विषयः ॥ वारवंतपदयुक्तं साम वारवंतीयं रावमग्ने पितृस्वैः ॥ साम्नोपांशु
यजुषेति साम यजुषोः स्वरभेदोस्ति तत्र संशयः ॥ किमेतानि सामानि सामवेदोत्पन्नत्वात्तदी
येनोच्चैः स्वरेणाधानेप्रयोक्तव्यानि उत येन यजुर्वेदेन विनियुक्तं तेनतदीयेनोपांशुस्वरेणेति
तत्रोत्पत्तिविधिबलादुच्चैः स्वरेण प्रयोगे प्राप्ते सिद्धांतः ॥ गुणमुख्येति ॥ गुणमुख्ययोरुत्पत्तिवि

नियोगविध्योर्व्यतिक्रमे स्वरविषये विरोधे मुख्येन विनियोगविधिना वारवंतीयादेर्वेदस्य संयोगो
ग्राह्यः साम्नां विनियोजकवेदस्य स संयोग इति यावत्॥ कुतस्तदर्थतावदुत्पत्तिविधेर्विनियोगार्थ
तादित्यर्थः॥ एतत्समानन्यायतेनोपसदमंत्राः सर्वसुदाहृता इति गंतव्यं॥ इयदामननात्॥ द्वा
सुपर्णा सयुजेत्यादिमंत्रस्याथर्वणादौ श्रूयते॥ काठके पिक्ततं पिबंतौ सुकृतस्य लोके गुहां
प्रविष्टौ परमे परार्ध इत्यादि श्रूयते॥ तत्र संशयः॥ किमनयोर्मंत्रयोर्विद्याभेदउत विद्यैकत्वमि
ति पूर्वपक्षे विद्याभेदाद्रस्योन्यगुणानुपसंहारः फलं सिद्धांते विद्यैक्यादुपसंहार इति॥ तत्र
पूर्वं वेद्यस्याज्ञस्याभिन्नतेन॥ विद्यैक्यादन्नरश्रियां उपसंहार उक्तस्तर्हि पक्षते द्वासुपर्णे
ति॥ मंत्रे एकस्येव भोक्तृतं क्रतं पिबंतावित्यत्रोभयोरपि भोक्तृत्वं श्रूयत इत्युभयत्र वेद्यभेदाद्वि
द्याभेद इति न्युदाहरणेन प्राप्ते ब्रूमः॥ मंत्रद्वये विद्यैक्यमेव कुतः॥ इयदवच्छिन्नस्य दित्वा

वच्छिन्नस्य वेद्यस्योभयत्राप्यभिन्नत्वेनाम्नानादित्यर्थः॥ अत्र हि मंत्रद्वये भोक्तृजीवात्वादेन परा
मात्माभेदः प्रतिपाद्यः॥ पिबंताविति त्रियोगस्तु भोक्तृजीवस्याहत्यर्थो द भोक्तरीश्वरे छत्रिणो गच्छंती
ति वदुपपद्यतइत्युक्तं गुहाधिकरणेनयात्र प्रतिपाद्यैक्यान्निर्गुणविद्यैक्यमित्यविरोधः॥ अंत
रात्वनन्यामेव स्वात्मनः॥ बृहदारण्यके उषस्तो याज्ञवल्क्यं पप्रच्छ यत्साक्षादपरोक्षाद्ब्रह्म य आ
त्मा सर्वांतरस्तं मे व्याचक्ष्वेति स तेनोपरोक्षं ब्रह्मैव तत्प्रत्यगात्मेत्याह॥ यस्यात्मेति॥ एतत्प्रश्नो
त्तरे यः प्राणेन प्राणितीति स त आत्मा सर्वांतर इत्यादिना कार्यकारणरहितस्यात्मा प्रतिपादि
तस्तमेव तदनंतरब्राह्मणे स एव कहोड प्रश्ने यो ऽशनायापिपासे शोकं मोहं जरां मृत्युमत्येति॥
त्यशनायाद्यतीतत्वात्मा प्रतिपादितस्तत्र संशयः॥ किमनयोर्ब्राह्मणयोर्विद्याभेद उत विद्यै
क्यमिति फलं पूर्ववत्॥ पूर्वं पिबंतावित्यस्य परस्य आज्ञाणिकतेन वेद्याभेदाद्विद्यैक्यमुक्तं

सू०वृ०
५६

तुवेद्यैक्येपिनविद्यैक्यंसमभिव्याहृतौयजतीत्यादौयजत्यभ्यासवत्प्रकृतेचात्माभ्यासाद्विद्यायाभेदसिद्धि
रिति॥ मुख्यःसर्वपक्षः॥ एकत्वकार्यादिरहितात्मनउपास्यत्वाद्दन्यत्वाज्ञानायाद्यतीतात्मनउपा
स्यत्वाद्भयत्रवेद्यभेदाद्विद्याभेदइतिगौणःसर्वपक्षः॥ तत्रगौणंपक्षंदूषयति॥ अंतरेतिपू
र्वसूत्रस्थस्यामननादितिपदस्यानुषंगः॥ ब्राह्मणद्वयेपिस्वात्मनःसर्वांतरत्वामननाद्वेद्य
स्यात्मनएकत्वमेवंउभयोरेकस्मिन्देहेसर्वांतरत्वायोगात्भूतग्रामवद्यथाभूतसमूहात्म
कस्यस्वदेहस्यापिपंचपाजन्मांतरं॥ जलापेक्षयातेजइत्यादिक्रमेणापेक्षिकंभूतानामांत
रत्वंनमुख्यंसर्वांतरत्वंतद्द्ब्राह्मणद्वयेवेद्यभेदांगीकारेवेद्यात्मरूपस्यापिस्यादित्यर्थः॥ यद्वा
भूतग्रामवदितिश्रुत्यंतरदृष्टांतार्थंयथाएकोदेवःसर्वभूतेषुगूढइत्यादिश्रुत्यंतरेसर्वेषुभू
तग्रामेषुसर्वांतरएकएवात्माम्नायते॥ तद्वदनयोर्ब्राह्मणयोरित्यर्थः॥ तथाचवेद्यैक्याद्विद्यैक्यं
स्वांतरनमते॥३॥

शारी०वृ०
३

५६

सिद्धंमुख्यंपक्षमत्रदूषयति॥ अन्यथाभेदानुपपत्तिरितिचेन्नोपदेशांतरवत्॥ अन्यथावि
द्याभेदानंगीकारेआम्नानभेदस्याभ्यासस्यानुपपत्तिःप्रयोजनाभावादितिचेन्नउपदेशांतर
वदभ्यासस्योपपत्तेरित्यर्थः॥ तथाहिछांदोग्येतत्त्वमसीत्युपदेशोनवकृत्वोभ्यस्यमानेपिन
विद्याभिद्यते॥ उपक्रमोपसंहारयोरविशेषात्॥ तद्ब्राह्मणद्वयेपिप्रश्नरूपेणोपक्रमस्य
तोन्यदार्त्तमित्युपसंहारस्यचाविशेषात्॥ द्वितीयप्रश्नेयदेवसाक्षादपरोक्षाद्ब्रह्मेत्येवका
रेणविद्याभेदनिरासाच्चनविद्याभेदः॥ अभ्यासस्यादरार्थत्वेनाशनायाद्यतीतत्वादिविशे
षप्रतिपादनार्थत्वेनचोपपत्तेरिति॥ व्यतिहारोविशिंषंतिहीतरवत्॥ ऐतरेपिनआदित्यपुरु
षमधिकृत्यसमामनंतितद्योहंसोसौयोसौसोहमिति॥ तथैवजाबालाअपित्वंवाअहमस्मिभ
गवोदेवतेअहंवैत्वमसीतितत्रसंशयः॥ किमात्मनईश्वरयोरेकत्वविषयमेकरूपमेवचिं

सूत्र०
५८

तनं क्रियते ॥ उत जीवेश्वरयोरन्योन्यानुवादेनान्योन्यात्मकत्वरूपव्यतिहारेणोभयविषयं चिंत- शारी०ह० ३
नमिति ॥ अत्र द्वितीयपक्षेऽमतेरेकरूपत्वात् ॥ आद्यं वं सिद्धांते मतेरुभयरूपत्वांगीकारेण व्यतिहा-
रस्यार्थवत्त्वमिति भेदः ॥ तत्रात्मा सस्यादरार्थत्ववत् ॥ व्यतिहारोपदेशस्याप्यादरार्थत्वात् ॥ तदा-
नुरोधेन न चिंतनस्योभयरूपत्वं किंत्वेकरूपत्वमेवेति दृष्टांतेनाद्ये ब्रूमः ॥ व्यतिहारेणवात्मोपा-
स्यत्वेनोपदिश्यते तेनात्मन ईश्वरेणैकत्वमात्रं इतरवत् यथेतरे सर्वात्मत्वादयो गुणा उपास्यत्वे-
नोपदिश्यंते तद्वत्सुनिश्चितार्थे हेतुः ॥ विशिंषंति हीति समाम्नातारो वकारः जीवपरमात्मानौ व्य-
तिहारेण विशिंषंति तद्योहमित्यादिना तच्च व्यतिहारेण विशेषणं व्यतिहारस्योपास्यत्वे सार्थ-
कं स्यात् अन्यथा जीवस्येश्वरेणैकत्वमात्रस्योपास्यत्वे तत्प्रतिपादकस्यैतस्यांशद्वयस्यैवार्थवत्त्वं
नत्वीश्वरस्य जीवेनैकत्वप्रतिपादकांशस्येति ॥ तस्मादुभयांशसार्थक्यायोभयरूपं चिंतनं ५८

विधेयमिति सिद्धं ॥ सर्वसूत्रेऽपदेशांतरवदिति दृष्टांतत्वेन तत्त्वमसीत्येकवाक्यकथनप्रसंगेनैक-
त्ववाक्यकथनप्रसंगस्य तद्योहमित्यादेर्विचारात् प्रासंगिकी पादसंगतिर्बोध्या ॥ यद्वा ॥ त्वा-
स्यामहंग्रहोपास्तौ व्यतिहारस्यानुपास्यत्वात्सर्वत्राहंग्रहोपास्तौ तस्य व्यतिहारस्योपसंहा-
र इति सर्वपक्षे फलं सिद्धांते तस्योपास्यत्वात्सर्वत्रोपसंहार इति साक्षादेव पादसंगतिः ॥ सैव ।
हि सत्यादयः ॥ वाजसनेयके हृदयास्यं हिरण्यगर्भं प्रस्तुत्य स यो हैतन्महद्यक्षं प्रथमजं वेद
सत्यं ब्रह्मेति जयतीमांल्लोकानिति सत्यविद्यां विधाय तदंगत्वेन तदेतत्त्र्यक्षरं सत्यमिति स
इत्येकमक्षरं तीत्येकमक्षरं यमित्येकमक्षरं प्रथमोत्तमे अक्षरे सत्यं मध्यतोऽनृतं तदेतदनृ-
तमुभयतः सत्येन परिगृहीतं ॥ सत्यभूयमेव भवतीति सत्यनामाक्षराणामुपासनमुक्त्वानं-
तरं स्थावयति तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मंडले पुरुषो यश्चायं दक्षिणेऽक्ष-

स्व॰
५८

न्नुरूपस्त्यादि॥ प्रथमर्थः हिशाह्युपास्यत्वसिद्ध्यर्थः॥ एतदिति हिरण्यगर्भाख्यं ब्रह्मोपास्यं परामृ बृ॰आ॰
शति॥ महत् व्यापकं॥ यक्षं पूज्यं॥ प्रथमजं भौतिकापेक्षयेति शेषः॥ वेदनाप्रकारमाह॥ सत्यं ३
ब्रह्मेति॥ सच्चत्यच्चेति सत्यं पंचभूतात्मकं हिरण्यगर्भाख्यं ब्रह्म यो वेद उपास्ते स इमान् लोकान्
जयतीत्यर्थः॥ तीत्येकमक्षरमित्यत्र तकारोपरितनईकारश्चोच्चारणार्थः॥ निरक्तस्ततकारो
बोध्यः॥ अत्र हि प्रथमोत्तमे अक्षरे सत्यं मृत्युसाम्याभावात् मध्यतो मध्यस्थमक्षरमनृतं मृ
त्युः॥ मृत्यनृतयोस्तकारस्साम्यात् तदेतदनृतं मृत्युरूपमुभयतः॥ सत्येन परिगृहीतमंतर्भा
वितमतोऽकिंचित्करं तस्मात्सत्यमनृतं यं सत्यबाहुल्यमेव भवतीत्यर्थः॥ तत्र त्र्यक्षरद्वयात्मकत्वे सा
त्यात्मकत्वेन ब्रह्मणः सिद्ध इत्यर्थः॥ यत्तत्सत्यमित्यादिकं संबंधादेवमन्यत्रापीत्यधिकरणे
व्याख्यातं॥ तत्र संशयः॥ किं तद्यः सत्यं स असौ सम्बादित्य इत्यादिना श्रुता विद्या सर्वसत्यवि ५८

द्यातो भिद्यते न वेति सर्वपक्षे विद्याभेदाद्गुणानुपसंहारः॥ सिद्धांते तदुपसंहार इति बोध्यं तत्र सर्वं
जीवब्रह्मणोर्व्यतिहारेण किं भेदाद्विद्यायाः द्विरूपत्वमुक्तं तद्वदिहापि सत्यविद्यायां लोकजया
स्य फलत्वादनंतरविद्यायां च हंति पाप्मानमित्यादिना पापनिवृत्तेः॥ फलतात् फलोक्तिभेदा
द्विद्याभेद इति हस्तंतो नमानेब्रूमः॥ इयमनंतरविद्या सैव सत्यविद्यैव न ततो भिद्यते॥ कुतः त
द्यत्सत्यमिति प्रकृत्यास्यैवोपास्यस्य हिरण्यगर्भस्याकर्षणादिति हिशब्दश्चितो हेतुर्बोध्यः
न हि विद्याभेदे विद्याभेदो युक्तः॥ न च फलभेदाद्विद्याभेदः सत्यविद्याप्रकरणे पठितस्य फल
स्य सर्वस्यापि सत्यविद्याफलत्वादिति तस्माद्विद्यैक्यात्सर्वोपसंहार्यस्याः॥ सर्वे सत्यादयो
गुणाः उपसंहर्तव्या इति सिद्धं॥ कामादीतरत्र तत्र चायतनादिभ्यः॥ दहरविद्यायां दहराका
शमात्मानं प्रकृत्य छंदोगा आमनंति एष आत्मापहतपाप्मा विजरो विमृत्युर्विशो

स्त्र॰ ५१०

कोविजिघत्सोऽपिपासुः सत्यकामः सत्यसंकल्प इत्यादि ॥ तथा वाजसनेयिनोऽपि ॥ स वा एष महाना

ज आत्मा योऽयं विज्ञानमयः प्राणेषु य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते सर्वस्य वशी सर्वस्येशा

न इत्यादि ॥ तत्र संशयः किमन्योन्यं गुणोपसंहारोऽस्ति न वेति ॥ तत्र यद्वेद्याभेदेन विद्यैक्याद्गुणो

पसंहार इत्युक्तं न हि पूर्वक्ते छांदोग्ये दहराकाशस्यैवोपास्यता वाजसनेयिके त्वाकाशनिष्ठ

स्यात्मनो ज्ञेयताऽतो वेद्यभेदेन सगुणनिर्गुणविद्ययोर्भेदान्नोपसंहार इति प्रत्युदाहरणेन प्राप्ते

ब्रूमः ॥ कामादीति सत्यकामत्वादिगुणजातमितरत्र वाजसनेयके उपसंहर्त्तव्यं ॥ यच्च सर्ववशि

त्वादिकं तदपि तत्र छांदोग्ये उपसंहर्त्तव्यं कुतः ॥ आयतनादिभ्यः हृद् यस्यायतनस्य ब्रह्मण

श्चोपास्यस्य ब्रह्मणः ॥ सेतुत्वव्यपदेशस्य चोभयत्राविशेषादित्यर्थः ॥ अयं भावः ॥ दहराधिक

रणे दहराकाशस्य ब्रह्मत्वसमर्थनान्न वेद्यभेदः ॥ ननु तथापि सगुणनिर्गुणविद्ययोरनयोर्भे

॥

शारी॰३॰ ३

५१०

दोऽस्त्विति चेत् सत्यमस्ति भेदः कथं तर्हि गुणोपसंहार इति विद्याभेदेऽपि संवेन्नह्यचोपासनार्थं

गुणोपसंहारं ब्रूमः ॥ किंतु ॥ विद्यास्तुत्यर्थं स्तुत्यर्थगुणोपसंहारश्च विद्याभेदेऽपि संभवति स्तुतेरु

भयत्राविशेषादिति ॥ आदरादलोपः छांदोग्ये वैश्वानरविद्यायां प्राणाग्निहोत्रं श्रूयते ॥ तद्यद्भ

क्तं प्रथममागच्छेत्तद्धोमीयं स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहेत्यादिना ॥

भक्तमन्नं जाबालश्रुतौ पूर्वोऽतिथिभ्योऽश्नीयादिति वैश्वानरोपासकस्यातिथिभ्यः पूर्वं भोज

नं क्रियायातिथिभोजनप्राथम्यनिंदया पूर्वभोजनं स्तौति ॥ यथा ह वै स्वयमहुत्वाग्निहोत्रं परस्य

स्य जुहुयादेवं तदिति ॥ यथा स्वाग्निहोत्राकरणेन पराग्निहोत्रकरणमयुक्तमेवं तदतिथि

भ्यः पूर्वं भोजनदानमित्यर्थः ॥ तत्र संशयः ॥ किं भोजनलोपे प्राणाग्निहोत्रस्य लोप उतालोप इ

ति ॥ अलोपसिद्धिः ॥ पूर्वपक्षे फलं सिद्धांते तु लोपसिद्धिरिति उपास्ति विचारप्रसंगेन तदंगस्य वि

शा॰वृ॰ भोजनाश्रितप्राणाग्निहोत्रविचारादस्तिपादसंगतिः ॥ उपास्तिलोपेपिस्तुत्यर्थतेनगुणोपसं- शारी॰वृ॰
६० हारवद्भोजनलोपेपिपूर्ववद्भोजनस्तुत्युपपत्त्यर्थं प्राणाग्निहोत्रालोपइत्यवांतरसंगतिः ॥ तत्र ३
पूर्वपक्षसूत्रं आदरादलोपः इति ॥ भोजनलोपेप्यग्निहोत्रस्यालोपः पूर्वभोजनस्यप्राथम्यरू-
पधर्मलोपमसहमानयाजाबालश्रुत्याप्राणाग्निहोत्रस्यालोपः पूर्वभोजनस्यप्राथम्यरूपध-
र्मलोपमसहमानयाजाबालश्रुत्याप्राणाग्निहोत्रे आदरकरणात् नहिधर्मलोपमसहमाना
श्रुतिः ॥ प्राणाग्निहोत्रस्यधर्मिणोलोपंसहते तस्माद्भोजनलोपेप्यन्येनद्रव्येणप्राणा-
ग्निहोत्रंकर्तव्यमित्येवंप्राप्ते सिद्धांतयति ॥ उपस्थितेतस्तद्वचनात् ॥ भोजनेउपस्थितेऽतः ॥ त-
स्मादेवभोजनद्रव्यात् प्राणाग्निहोत्रंकर्तव्यं अनुपस्थितेभोजने प्राणाग्निहोत्रंनकर्तव्यमेवकुतः
तद्वचनात् । तद्धोमीतिवचनात् । सन्निहितसाकांक्षान्नद्यद्भक्तंप्रथममागच्छेदित्यनेनसन्निहितस- ६०

चमसेनाऽपःप्रणयेत् गोदोहनेनपशुकामस्य

भोजनार्थमाज्यद्रव्यस्यहोमसाधनत्वप्रतीतेरित्यर्थः ॥ तथाचभक्तागमनस्यभोजनप्रयुक्तस्या-
भोजनलोपेलोपाद्द्रव्यलोपेऽग्निहोत्रस्यलोपएव आदरवचनंतुभोजनप्रसक्तिदशायांद्रष्टव्यं ।
तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबंधः फलं ॥ संतिकर्मांगेषूद्गीथादिष्ववधारणाद्युपासना-
नितानिकिंपर्णतावत्कर्मांगानिनित्यवदनुष्ठेयानि उत गोदोहनवत्स्वतंत्रफलसाधनान्यनित्या-
नीतिसंशयः ॥ पूर्वोत्तरकोटिसिद्धिरेवपूर्वोत्तरपक्षयोः फलं उपासनाविचारात्मकत्वादस्यपा-
दसंगतिः ॥ अनित्यभोजनांगाश्रितप्राणाग्निहोत्रस्यानित्यत्ववन्नित्यकर्मांगाश्रितोपासनानां
नित्यत्वमित्यवांतरसंगतिः ॥ तत्रयस्यपर्णमयीजुहूर्भवतीति ॥ कं विक्रतुमनारभ्याधीतस्यप-
र्णमयीत्वस्याव्यभिचरितक्रतुसंबंधिजुहूद्वाराक्रत्वंगत्ववदनारभ्याति तेषांकर्मांगाश्रितानां
निर्धारणानामुपासनानामनियमः ॥ रम्याधीतानामुद्गीथाद्युपासनानामप्युद्गीथादिद्वाराक-

त्वंगतमिति प्राप्ते ब्रूमः॥ नन्विज्ञारणानियमः इति नित्यवदनुष्ठानाभावः कुतः तद्दृष्टेः॥ तस्यापि नि
यमस्य श्रुतौ दर्शनादित्यर्थः॥ तथा हि तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेत्युपासकस्या
पि कर्मांगाक्षरत्वं वदंती श्रुतिरुपासनस्यानियतत्वं दर्शयति॥ उपासनस्य पृथक्फलश्रवणादपि
पशुमान्निफलप्राप्तेर्गोदोहनवन्न कर्मांगत्वमित्याह॥ पृथग्घीति हि यतः पृथगऽप्रतिबंधः॥ कर्म
णो वीर्यवत्तरत्वात्मकसमृद्धिरूपः फलमुपलभ्यते॥ अतोपि न कर्मांगत्वमुपासनस्येत्यर्थः॥ त
था ह्युपासनस्य पृथक्फलं तेषु श्रुतिः॥ तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद नाना तु विद्या
चाविद्या च यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति॥ तेनोंकारेणोभावा
पि कर्म कुरुतः॥ यश्चैतदोंकारस्यैवमक्षरं एवं रसतमत्वादिरूपगुणकं वेद यश्च न वेद तावुभावि
ति संबंधः॥ एवमननभिप्रेतपक्षमुक्त्वाभिप्रेतमाह श्रुतिः॥ नाना विति॥ तुः शब्दः पक्षनिरासा

र्थः॥ ओंकारमात्रज्ञानापेक्षया रसतमत्वादिगुणकोंकारज्ञानं नाना भिन्नं पृथक्फलकं दृष्टो हि म
णिविक्रये शबरवणिजोः सामान्यविशेषज्ञानाभ्यां फलभेदस्तस्माद्यदेव कर्म विद्ययोपेतया
दिविषयया श्रद्धयाऽऽस्तिक्यबुद्ध्योपनिषदा तदेव ताभ्यामनेन युक्तं करोति तदेव कर्म वीर्य
वत्तरं भवतीत्यर्थः॥ अनेन विद्याहीनं कर्म वीर्यवन्नाचं विद्यासहितं तु वीर्यवत्तरमिति गम्यते॥
न हीदं विद्यायाः कर्मांगत्वे संभवति॥ अंगहीनस्य कर्मणो वीर्यवत्त्वात्तस्य फलजनकत्व
क्षणस्यानुपपत्तेः॥ तस्मात्पृथक्तयाऽर्थक्रियात्मकत्वेन क्रतुसंबंधं विनास्वातंत्र्येण फलसा
धनताभावे न विषमता विद्यायाः क्रियात्मकत्वेन स्वातंत्र्येण फलसाधनत्वसंभवान्नोदोहनव
स्वातंत्र्यमेवेति सिद्धं॥ यदा न वदेव न दुक्तं॥ बृहदारण्यके छांदोग्ये च संवर्गविद्यायां प्राणादिभ्यः
प्राणः श्रेष्ठः॥ अन्यादित्यादिदेवताभ्यः श्रेष्ठो वायुरिति च व्यवस्थितं तत्र संशयः किमस्यां विद्यायां

सू॰वृ॰ ६२ वायुप्राणयोः॥ प्रयोगैकत्वं तत्प्रयोगभेद इति फलपादसंगतौ सर्ववत्पूर्वं फलभेदात्कर्माङ्गानां त शारी॰ वृ॰ ३
दाश्रितोपासनानां च नित्यत्वानित्यत्वलक्षणः प्रयोगभेद उक्तस्तर्हि प्रकृते वायुप्राणलक्षणफ
लैक्यात् वायुप्राणयोः स्वरूपत एकत्वेन वेद्याभेदेन विद्यैक्याच्च प्रयोगैक्यमिति प्रत्युदाहरणेन
प्राप्ते ब्रूमः॥ यथैकस्मिन्नपि होत्रे दधितंडुलादिभिर्गुणैः॥ प्रयोगभेद एवमेकस्यामपि विद्याप
वायुप्राणयोः॥ स्वरूपाभेदेप्याधिदैविकत्वाध्यात्मिकत्वस्वरूपावस्थाभेदेन गुणभेदात्प्रयोग
भेद इति प्रदानवदेवेदं द्रष्टव्यं॥ तथाहीदं श्रूयते पुरोडाशमेकादशकपालमिंद्राय राजा
येंद्रायस्वराज इति पुरोडाशत्रयवत्यामिष्टौ श्रुतायां किं त्रयाणां पुरोडाशानां सह प्रदानमुत
प्रदानभेद इति विषये देवतैक्यात्सहप्रदाने प्राप्ते राजाधिराजस्वराजगुणभेदेन तद्विशिष्टदेव
ताभेदात्पुरोडाशानां प्रदानस्य प्रक्षेपस्य भेद इति॥ यथा तद्वत्स्वरूपैक्येपि वेद्यभेदात्प्रयोगभेदस्त ६२

र्थः॥ तदुक्तं॥ देवताकांडे॥ नानावादेवतापृथग्ज्ञानादिति पाशाढ्ढो देवतैक्यनिरासार्थः॥ नानादेव
तात्वे हेतुमाह॥ पृथगिति॥ उत्पत्तिवाक्यगतराजाधिराजस्वराजगुणानां पृथग्ज्ञानात्तद्विशि
ष्टदेवतानां नानात्वं युक्तमित्यर्थः॥ लिंगभूयस्त्वात्तद्धि बलीयस्तदपि॥ वाजसनेयिनोग्निरहस्ये
नैव वाऽइदमुच्यते॥ सर्वंसदासीनाप्पसदित्युपक्रम्य मनसः॥ प्रादुर्भावमुक्त्वा तन्मनन्यात्मा
नोग्गानपश्यदिति मनो विकल्पपंक्तिषट्त्रिंशतं सहस्राण्यपश्यदात्मनोग्नीनर्कान्मनोमा
यान्मनश्चित इत्यादि॥ तथैव वाक्चितः प्राणश्चितश्चक्षुश्चितः श्रोत्रचितः॥ कर्मचितोग्निश्चित इ
त्यग्नानग्नीनामनंति॥ अयमर्थः॥ पुरुषस्यायुषेनन्तप्रशांतवर्षाणामहोरात्राणि षट्त्रिंशत्
सहस्राणि तैरवच्छिन्ना मनोवृत्तयोपि षट्त्रिंशत्सहस्राणि भवंति॥ एकस्मिन्नहोरात्रेऽत्यंतस
र्वमनोवृत्तिष्वहोरात्रगतैकत्वारोपान्नारावनावत्संख्याकामनोवृत्तयः इष्टिकालेनाग्नितेन च सं

सू॰वृ॰ ६३ पाद्यते षट्त्रिंशत्सहस्राणीत्यादिना मनराश्वत्वद्विरूपानस्पीनर्कानर्च्यानंतरावमनोविक्रा शारी॰वृ॰ ३
रान्मनश्चितः ॥ मनसा चीयंते संपाद्यंत इति मनश्चितः ॥ तानपश्यदित्यर्थः ॥ एवमेव वागाद्य
योपि सत्वद्वारा श्रितेनापश्यन्निति ॥ चक्षुरिंद्रियवृत्त्येकैकमग्निचयनं संपाद्यं ॥ प्राणोघ्राणं
कर्मपदमनुक्तकर्मेंद्रियपरं ॥ एते ग्रयः कर्मप्रकरणोपचिताः ॥ तत्र संशयः ॥ किमेते मनश्चि
दादयो ग्रयः कर्मांगभूता उत स्वतंत्रा इति ॥ पादसंगतिफले पूर्ववत्पूर्वमेकप्रयोगाऽयोगा
द्युप्राणयोः प्रयोगभेद उक्तं ॥ तर्हि मनश्चिदादीनां प्रकरणात्कर्मांगत्वे नैकप्रयोगसं
भवात्प्रयोगैक्यमिति प्रत्युदाहरणेन प्राप्तेर्भ्रमः ॥ सिद्धांतस्तु पक्षमते लिंगेति ॥ मनश्चिदादयो
ग्रयः स्वतंत्रा एव कुतः ॥ लिंगभूयस्त्वात्तस्मात्तेभ्य ज्ञापकलिंगानां भूयस्त्वादित्यर्थः ॥ तथा ६३
हि यत्किंचेमानि भूतानि मनसा संकल्पयंति ॥ तेषामेव साकृतिरिति तानहैतानेवंविदे सर्वदा

सर्वाणि भूतानि चिन्वंत्यपि स्वपतस्त्वादीनि लिंगानि संति ॥ अयमर्थः ॥ सर्वाणिपि भूतानि
जंतवो यत्किमपि मनसा संकल्पयंति ॥ तेषामेवाग्नीनां साकृतिः संपादनं सर्वजंतुमनश्च
दिष्टाग्नीनामस्ति तेन ध्येयत्वादित्येकं लिंगं न हि यत्किंचित्करणं कर्मांगं संभवतीति एवंवि
दे स्वपतेजाग्रतेपि सर्वदा सर्वाणि भूतानि तानेतानग्नीन्चिन्वंतीति लिंगांतरं ॥ न हि कर्मांगं
सर्वदानुष्ठीयमानं दृष्टं ॥ कालविशेषएव न दिक्षानादि ॥ तदिदं लिंगं प्रकरणाद्बलीयः तद
पि बलीयस्त्वमप्युक्तं ॥ पूर्वकांडे श्रुति लिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पार
दौर्बल्यमर्थविप्रकर्षादिति ॥ एतनस्तु न्यायो विस्तरेण वाचस्पतिमिश्रैरेतत्पादादौ वेदाधिक
रणे वर्णितः इतीह विस्तरभयान्नोच्यत इति ॥ सिद्धांतस्तु पक्षस्य पूर्वपक्षपतित्वं विकल्प्य प्रक
रणात्स्वाक्रियामानसवत्संकल्पात्मकामनश्चिदादयो ग्नयोनस्वतंत्राः किंतिष्टिकामिर

ग्निं चितनुत इति प्रकृतस्य सर्वस्य क्रियामयस्याग्नेरयं विकल्पः ॥ संकल्पात्मको ग्निः प्रकरणात्स्मात्
न लिंगाद्ग्नीनां स्वातंत्र्यं प्रकृते उक्तलिंगस्यार्थवादिकार्थदर्शनलक्षणस्य च पर्वादस्यतेन विहि
तमानसिकाग्निस्तुतिपरत्वेन विध्येकवाक्यतया स्वार्थपरत्वाभावात् सिद्धे हि स्वार्थे न दर्शनं लि
गं स्वग्नीनां स्वातंत्र्यं गमयेत्तद्व्यस्ति स्वार्थसिद्धिस्तस्मात्क्रियानुप्रवेशिन एवैते मानसिकाग्नय
इति तेन सो त्रक्रियापदं व्याख्यातं मानसवत् ॥ तथा हि द्वादशाहे स्मृपते च्छनया तापात्रेण समु
द्रस्य पात्र प्राजापत्यं मनो ग्रहं गृह्णामीति नातां समुद्रमनया रसया पात्र्या पृथिव्या पात्रेण प्रजा
पतिर्देवताकं मनो ग्रहं ध्यानमयग्रहमा पाद्यं गृह्णामीत्यर्थः ॥ तत्र किमिदं मानसं द्वादशा
हाद्बहिरंतरं उत तन्मध्यपातिनो दशमस्याह्नो गमिति संदेहे वा गेवैका द्वादशाहो मनो मानसमि
ति भेदव्यपदेशाद्बहिरंतरपरत्वेन विध्येकवाक्यतया स्वार्थपरत्वाभावात् सिद्धे हि स्वार्थेन दर्शनं

लिंगमग्नीनां स्वातंत्र्यमिति प्राप्ते मानसस्याहरंतत्वे मानाभावात् भेदव्यपदेशस्यांगांगिभावेनाप्युपप
त्तेरहरंतत्वे द्वादशाहसंज्ञायो गौणत्वप्रसंगात्मुख्ये संभवति ॥ गौणत्वायोगात् द्वादशाहम
ध्यपातिनो दशमस्याह्नो गं मानसमिति ॥ यथा तथैमे मानसिकाग्नयः प्रकृतकर्मशेषा इत्य
र्थः ॥ अतिदेशाच्च ॥ मानसिकाग्नीनां मध्ये एकैकोग्निस्तावान् यावानसौ पूर्व इति ॥ पूर्वेणे
ष्टिकाचितेनाग्निना मानसिकाग्नीनां साहश्येपदेशाच्च तच्छेषत्वमेकक्रियानुप्रवेश इति शि
क्रमाहश्याभावादित्यर्थः ॥ सिद्धांतयति ॥ विद्यैव तु निर्धारणात् ॥ तुरुक्तपक्षनिरासार्थः ॥ वि
द्यात्मका एते मनश्चिदादयः स्वतंत्रा एव न कर्मानुप्रवेशिनः कुतः ॥ ते हैते विद्याचित एवेत्य
वधारणादित्यर्थः ॥ एवकारकस्तु न्याकर्मप्रकरणं बाध्यमिति भावः ॥ लिंगादपि तद्बाध्यमि
त्याह दर्शनाच्च ॥ मानसिकाग्नीनां स्वातंत्र्यज्ञापकलिंगस्य दर्शनाच्च प्रकरणं बाध्यमिति भाव

सू०वृ०
६५

लिंगं सर्वं दर्शितं तन्निदं लिंगं न साधकमित्युक्तमित्यत आह ॥ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥
श्रुतिरेवकारः ॥ आदिपदेन लिंगवाक्ययोर्ग्रहणं लिंगमुक्तमेव विद्यापाहैवैतरावे विदस्थि
तामवंतीत्ये तेषां मानसिकाग्नीनां पुरुषसंबंधमात्रत्वाणं वाक्यं स्वातंत्र्ये बोधकं तयोश्चे
तेषां श्रुतिलिंगवाक्यानां बलीयस्त्वदुर्बलेन कर्मप्रकरणेनाग्नीनां न स्वातंत्र्यबाध इत्यर्थः
नच लिंगस्यार्थवादस्थत्वेनासाधकत्वं लिंगप्रदर्शनार्थमुदाहृतवाक्यानां विधित्वस्य प्रसा
मीप्याभावात् सर्वार्थशोधकत्वाच्च विधायकत्वेनार्थवादत्वाभावादिति भावः ॥ इतोपि मन।
श्चिदाद्यग्नीनां स्वातंत्र्यमित्याह ॥ अनुबंधादिभ्यः प्रज्ञांतरपृथक्त्ववद्दृष्टश्च तदुक्तं ॥ तेमन
सैवाधीयंत मनस्वातंत्र्यमित्याचार्यं तमनसैव महाव्रतरहयं तमनसास्तुवन्मनसा शंसन्
यत्किंच ॥ यज्ञे कर्म क्रियते यत्किंच यज्ञीयं कर्म मनसैव तन्मनोमयेषु मनश्चित्सु मनोम

शारी०वृ०
३

६५

यमक्रियत इति दिनामनन्वारंभणेऽपि पुरुषार्थाङ्गानामनुबंधात्संपादनीदग्नीनां स्वातंत्र्यं कर्मां
गत्वेऽङ्गानां प्रत्यक्षसिद्धत्वेन संपादनं वैयर्थ्यात् ॥ आदिशब्देनातिदेशो गृह्यते अतिदेशो
हि क्रियामयस्याग्नेर्माहात्म्यमेकैकस्य मानसिकाग्नेर्दर्शयत्स्वातंत्र्यमेषां दर्शयति ॥ यत्त्व
यमतिदेशः ॥ सर्वं प्रज्ञानुकूल इति तन्नत्वग्नित्वसाहचर्येपनास्मातिदेशस्यासिद्धांतेषूपपत्तेः
स्तेन बहुवचनसिद्ध्यर्थं सर्वोक्तश्रुतिलिंगादिकं बोध्यं उक्तस्तु तत्पर्यं स्तुतेः प्रयोमनसैवाधी
यंते ग्न्याधानकर्मणा संपादिताः ॥ अधीयंत इति चिंताः ॥ राष्ट्र पितुर्गृहाः ॥ पात्राण्यग्रहं तं गृही
ता अस्तुवन् स्तोत्रं कृतवंतउद्गातारः ॥ अशंसन् शंसनं कृतवंतो होतारः ॥ किं बहुना यत्किंच ॥ क
र्माराद्दुपकारकं यत्किंच ॥ यज्ञियं यज्ञनिष्पत्त्यर्थं सन्निपत्योपकारकं च क्रियते तद्विदुषां मनसै
वाक्रियत कृतमिति ॥ अनुबंधादिभ्यो हेतुभ्यः स्वातंत्र्यं मनश्चिदादीनां प्रज्ञांतरपृथक्त्ववत्

सूत्र॰ याप्रज्ञांतरपृथक्त्ववच्छाण्डिल्यादिविद्यानांस्वातंत्र्यंतद्वत् ॥ नन्वग्नीनांस्वातंत्र्येकर्मप्रकरणादुत्कर्षः शारी॰सू॰
६६ क्राप्यःऽदृष्टःकल्पितःस्यात्तत्राह ॥ दृष्टश्चेति ॥ राजास्वाराज्यकामोराजसूयेनयजेतेतिरा ३
जसूयंप्रकृत्याग्नेयोष्टाकपालोहिरण्यंदक्षिणेत्यादिनाश्रुतायाअवेष्टेर्ब्राह्मणादिकर्तृका
याराजमात्रकर्तृकराजसूयप्रकरणात्पुरुषदुत्कर्षोऽदृष्टस्तद्वन्नाप्यग्नीनांकर्मप्रकरणा
दुत्कर्षइत्यर्थः ॥ इदंसर्वंप्रथमतंत्रेउक्तमित्याह ॥ तदुक्तमिति ॥ यदुक्तं ॥ मानसवदग्नीनांक्रि
याशेषत्वमितितदुपपत्ति ॥ नसामान्यादप्युपलब्धेर्मृत्युवन्नहिलोकापत्तिः ॥ मनश्चिदादी
नांमानसेनमानसिकत्वसामान्यादपिक्रियाशेषत्वंनकल्प्यंउक्तश्रुत्यादिभ्यः ॥ स्वातं
त्र्योपलब्धेर्मृत्युवत्यथासएवमृत्युर्यएषएतस्मिन्मंडलेपुरुषइतिश्रुत्यग्निर्वैमृत्युरिति
वादित्यपुरुषस्याग्नेश्चमृत्युशब्दत्वसाम्येपिपरस्परवैषम्यंयथावायुर्लोकोग्निस्तस्या ६६

दित्यःसमिदित्यादौसमिदादिसाम्यान्नहिद्युलोकस्याग्नित्वापत्तिः ॥ किंतु ॥ परस्परवैषम्यंतद्व
न्मानसमानसिकाग्न्योर्मानसिकत्वसाम्येपिपरस्परवैषम्यमित्यर्थः ॥ परेणचशब्दस्यताद्विध्यं
भूयस्त्वात्त्वनुबंधः ॥ मानसिकाग्निब्राह्मणात्परस्मिन्ब्राह्मणेऽयंवावलोकएषोग्निश्चि
तइतिशब्दस्यताद्विध्यंचितेग्नौश्रयितव्यइष्टिरूपस्यतंत्रविधित्वमेवकल्प्यतेनकर्मांगविद्या
विधित्वंतथापरेतन्मंडलंतपतीतिसर्वस्मिन्नपिब्राह्मणेविद्याप्राधान्यंदृश्यतइतिचक्रा
र्थः ॥ तथाचतत्समभिव्याहारादस्मिन्नपिब्राह्मणेविद्यायाःप्राधान्यमितिभावः ॥ ननुस्मि
न्ब्राह्मणेमानसिकाग्निविद्यायाःप्रधानत्वेकिमर्थंकर्मोपक्रमस्तत्राह ॥ भूयस्त्वादिति
कर्मांगानांमानसिकाग्निविद्यायांसंपाद्यानांबहुत्वाद्विद्यायास्तदुपक्रमेणानुबंधःप्र
तिपादनमित्यर्थः ॥ तस्मादियंमानसिकाग्निविद्यास्वतंत्रपुरुषार्थहेतुरितिसिद्धं ॥ ननुवि॥

सूत्र० ६७ द्यायाः पुरुषार्थहेतुत्वमयुक्तं देहातिरिक्तस्य पुरुषस्याभावादित्याक्षिपति॥ एक आत्मनः शरी शारी०सू० ३
रेभावात्॥ प्रसंगादस्य पादस्य संगतिर्बोध्या॥ अत्र किमात्मा देह एव उत तदतिरिक्त इति संश
यः॥ सर्वपक्षे देहातिरिक्तो ऽत्माभावात् स्वर्गादिशास्त्रं वैयर्थ्यं सिद्धांते तत्सार्थकमिति भिभा
वः॥ तत्र एके देहात्मवादिनो लौकायतिका देहातिरिक्तस्यात्मनो ऽसत्त्वं मन्यमाना देह एवात्मे
ति वदंति कुतः शरीरे सति चैतन्यसुखादीनां भावात्॥ तदभावे चाभावादित्यन्वयव्यतिरेका
भ्यां तेषां देहधर्मत्वेनातिरिक्तात्मसिद्ध्यभावादिति प्राप्ते सिद्धांतयति॥ व्यतिरेकस्तद्भावाभा
वित्वान्न तूपलब्धिवत्॥ न त्वात्मनो देहादव्यतिरेकः किंतु॥ व्यतिरेक एव न्याय्यः कुतः चैतन्या
दीनामात्मधर्माणां तस्य शरीरस्य मरणावस्थायां भावेऽप्यभावित्वाद्देहधर्मतासंभवात् यथा दे
हभावे भावाद्देहधर्मत्वं तथा देहभावेऽप्यभावाद्देहधर्मत्वमेव कुतो न स्यादित्यर्थः॥ किंच नि ६७

श्चितान्वयव्यतिरेकाभ्यां देहधर्मत्वं वक्तव्यं न चात्र देहाभावे ऽभाव इति व्यतिरेकनिश्चयः सं
भवति॥ एतद्देहाभावेऽपि देहांतरावच्छेदेन तद्धर्मसत्त्वसंभवादिति॥ उपलब्धिवत्॥ तथाहि
स्तितावत् घटाद्युपलब्धिः सा न देहधर्म इत्युक्तं॥ किंच॥ देहधर्मत्वे तस्याः प्रकाशकत्वा
नुपपत्तिः॥ देहरूपादिवदिति॥ यया देहादिविषयया उपलब्ध्या सत्त्वमंगीक्रियते तया न
स्या देहादिव्यतिरेकोऽप्यंगीकार्यः सैव चोपलब्धिर्नस्यात्मेति॥ तस्माद्देहातिरिक्तस्यात्मनोऽस्ति
त्वमिति सिद्धं॥ अंगावबद्धास्तु न शाखासु हि प्रतिवेदं॥ संति कर्मांगाश्रितान्युपासनान्युक्तानि यावप
वींकारेणोद्दिरूक थे पृथिव्यादिदृष्टिः लोकेषु पंचविधं सामोपासीतेति लोकशब्दः पृथिव्य
ग्न्यंतरिक्षादित्यद्युलोकपरः पृथिव्यादिविषयकदृष्ट्या पंचविधं सामोपासीतेत्यर्थः॥ पृथि
वी हिंकारः अग्निः प्रस्तावः॥ अंतरिक्षमुद्गीथः॥ आदित्यः प्रतिहारः द्यौर्निधनमिति हिंकारादि

पंचविद्यासामिश्रणीयत्वादिहशिष्टिरितिविभागः॥ तत्रसंशयः। किमेताउपासनायत्रशाखायांविहिता
स्तच्छाखागतोद्गीथाद्यालंबनाउतसर्वशाखागतोद्गीथाद्यालंबनाइतिपूर्वोत्तरपक्षयोः। पूर्वो
त्तरकोटिसिद्धिः फलंउपासनाविचारात्मकताचास्यपादस्यसंगतिः॥ तत्रयथाशारीरात्म
नोभेदादात्मधर्माणांशारीरेनसंभवस्तद्वदेकशाखागतोद्गीथाद्युपेक्षयाशाखांतरगतो
द्गीथादेः॥ स्वरूपभेदेनभेदादेकशाखागतोद्गीथादिधर्माणामुपासनानांशाखांतरगतोद्गी
थादौनसंभवइतिदृष्टांतेनप्राप्तेब्रूमः॥ अंगावबद्धास्त्वितितुः सर्वपक्षनिरासार्थः॥ एता
अंगाश्रिताउपासनाःप्रतिवेदंस्वशाखासुविद्यमानोद्गीथाद्यालंबनाएवनभवंति॥ किंतु
शाखांतरीयोद्गीथाद्यालंबनाअपिकुतः॥ उद्गीथमुपासीतेत्यादावुद्गीथादिश्रुतेरविशे
षादितिहिशब्दसूचितोहेतुर्बोध्यः॥ इममर्थंदृष्टांतमुखेनापिसाधयति। मंत्रादिवद्वाऽविरो

धः॥ एकशाखाविहितोपासनानांशाखांतरोद्गीथादिषुप्राप्तेरविरोधः॥ मंत्रादिवत् तथाहियथा
तंडुलपेषणार्थमश्मादानमंत्रः॥ कुटरुरसीत्येकत्राम्नातःशाखांतरेपिप्राप्तोनियथावाप्रयाजा
एकत्राम्नाताःशाखांतरेपिप्राप्नुवंतितद्वदत्राप्यविरोधःवाशब्दोदृष्टांतदर्शनरूपहेत्वंतर
सूचनार्थः॥ तस्मादेकत्रविहितानामप्युपासनानांशाखांतरीयोद्गीथादिषुप्राप्तिरितिसिद्धं
भूम्नःक्रतुवज्ज्यायस्त्वंतथाहिदर्शयति॥ वैश्वानराख्यायिकायांप्राचीनशालादिषड्रूपाणां
राज्ञासहप्रश्नप्रतिवचनाभ्यांद्युलोकसूर्यवाय्वादिषुव्यस्तेषुवैश्वानरोपास्तिः। श्रुतातथास
मस्तेष्वपि वैश्वानराधिकरणलिखिताख्यायिकाचाप्यनुसंधेया॥ तत्रसंशयः। किमिहोभय
थाप्युपास्तिर्विवक्षितोतसमस्तोपास्तिरेवेति॥ अत्रपूर्वपक्षेवाक्यभेदः। सिद्धांतेतदेकवाक्यमिति
बोध्यं॥ तत्रोद्गीथादिश्रुत्यासन्निधिप्राप्तव्यवस्थांबाधित्वोद्गीथाद्युपासीनांसर्वशाखास्वप्य

रत्न॰
६५

तस्यावयवस्यापि व्यस्तोपास्तीनां विधिस्तुत्या समस्तोपास्तिसन्निधिपाठस्तुत्यर्थं तं वा पित्वा विधेय
त्वेन व्यस्तोपास्तीनां विधिस्तुत्या समस्तोपामपि क्रतुवत् यथा दर्शपूर्णमासादेः क्रतोः सांगस्य
प्रधानस्यैकप्रयोगो विकृत्यन्तेन व्यस्तानामपि प्रयाजादीनां तद्वत् ॥ ननु भूम्नः क्रतुवज्ज्यायस्त्वं कु
तस्त्यं तत्राह ॥ तथा हीति ॥ प्राचीनशालादिभिरुक्तानि व्यस्तोपासनानि निंदितानि केकेयेन ।
राज्ञा ऽव्यस्तोपासनस्योक्तत्वादेकवाक्यतास्य श्रुतेरवगम्यते ॥ तथा च एकवाक्यतामापन्ना श्रु
तिर्भूम्न एव ज्यायस्त्वं दर्शयतीत्यर्थः ॥ ननु तर्हि राज्ञः प्राचीनशालादीन् प्रति हे औपमन्यव कं ।
त्वमात्मानं वैश्वानरमुपास्स इति प्रश्ने हे राजन् ॥ सुतेजा द्युलोको वैश्वानरो यं त्वं वैश्वानरमुपा
स्स इति ॥ प्रश्ने हे राजन् सुतेजा द्युलोको वैश्वानरो यं त्वं वैश्वानरमुपास्स इत्यादौ व्यस्तोपास्तिषु वि
धिस्तुतीनां का गतिरिति चेत् ॥ प्राचीनशालादिभिरवगतव्यस्तोपास्त्यनुवादेन समस्तोपा

शारी॰ [illegible]
३
६५

सनस्य विधेयत्वादनुवादत्वमेव स्तुतीनां गतिरिति ॥ तस्याः समस्तोपासनमेव ज्यायस्त्वमिदं ना
नाशब्दादिभेदात् ॥ एकसगुणब्रह्मोपास्यकाः शांडिल्यदहरादिविद्याः संति एवमेकमुख्य
प्राणविद्या अपि संति तत्र संशयः ॥ किमेकोपास्यकविद्यानां भेदोऽस्ति न वेति ॥ पादसंगतिफले
पूर्ववत् ॥ तत्र व्यस्तोपास्तिषु विधिस्तुतीनां सत्त्वेऽपि समस्तोपास्तेर्ज्यायस्त्ववदेकोपास्यको
पास्तिषु प्रत्येकं विधीनां सत्त्वेऽपि समस्तोपास्तेर्ज्यायस्त्वमिति नास्ति विद्यानां भेद इति हृदयं ।
तेन प्राप्ते ब्रूमः ॥ एकोपास्यकविद्यानां नैकत्वं कुतः ॥ शब्दादिभेदात् ॥ वेद उपासीत स क्रतुं संकल्पं कु
र्वीतेत्यादिशब्दभेदात् ॥ आदिशब्देनोपास्यगुणभेदादिरित्यर्थः ॥ यथा यागदानहोमानां कर्मणां
यजेत दद्यात् जुहुयादिति शब्दभेदाद्भेदस्तद्वदिति द्रष्टव्यं ॥ विकल्पो विशिष्टफलत्वात् ॥ याः सगुण
ब्रह्मादिविद्या उपास्यसाक्षात्कारेण न फलहेतवस्तासां किं स्वेच्छया विकल्पः समुच्चयो वा मनु

सूत्र० ष्ठानं उत विकल्प एवेति संशयः ॥ पूर्वपक्षे स्थितेच्छया विद्यासु नहन्नेर्याकानि देकैकव विद्या याव शारी०३०
७० ज्जीवमनुष्ठेयेति विकल्पोपि नास्ति किंत्वहंग्रहा विद्याः समुच्चयेनानुष्ठेयास्तथापि नास्तीत्यनि ३
यमः ॥ फलं सिद्धांते विकल्प एवेति नियम इति भेदः ॥ सर्वाधिकरणेन विद्यानानात्वसिद्धेऽप्ययं
विचारः ॥ प्रवर्त्तते नोन्नेत्यास्तीति हेतुहेतुमद्भावः ॥ संगतिस्त्वानुष्ठाननियमे हेत्वभावाद्यथे
च्छमनुष्ठानमिति प्राप्ते ब्रूमः ॥ विकल्प एवासां विद्यानां स्युक्तः कुतः ॥ अविशिष्टफलत्वात् ।
अविशिष्टं ह्यासां विद्यानामुपास्यसाक्षात्कारस्वं फलं तत्त्वेकया विद्ययोपास्यसाक्षात्कृते ।
विद्यांतरमफलं विरूद्धोपास्यसाक्षात्कारस्य युगपदयोगाच्च विद्यांतरं व्यर्थं तेन मेवेति कौंतेय
सदा तद्भावभावित इति भगवद्गीतास्मृष्टमेकविद्यायामेवानुष्ठेयत्वं दर्शयति ॥ तस्मादुपास्यसा
क्षात्कारद्वारा फलहेतुत्वात् विद्यैकैवानुष्ठेयेति सिद्धं ॥ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्व ७०

हेत्वभावात् ॥ पाश्चप्रतीकोपास्तयो नाम ब्रह्मेत्युपासीत तस्य यथाकामचारो भवतीत्याद्याः ॥
काम्या उपास्यसाक्षात्कारानपेक्षा एवादृष्टद्वारा फलहेतवस्तासु पूर्वसंदेहे उपास्तित्वाविशेषा ।
त्पूर्ववद्विकल्पनियम इति प्राप्ते ब्रवीति काम्यास्तु इति काम्यास्त्वदृष्टद्वारा फलहेतवो विद्या यथा
कामं समुच्चीयेरन् वा न वा समुच्चीयेरन् पूर्वहेतोरविशिष्टफलत्वस्य विकल्पनियमप्रयोजक
स्याभावादित्यर्थः ॥ तथा च प्रतीकोपास्तयो विकल्पेनैवानुष्ठेयाः । उपास्तित्वात्पूर्वोक्तविद्यावदि
त्यनुमाने उपास्यसाक्षात्कारहेतुत्वमुपाधिरिति भावः ॥ अंगेषु यथाश्रयभावः ॥ कर्मांगेषूद्गीथा
दिषु याः आश्रिता विद्यास्तासां किं समुच्चये नैवांगवदनुष्ठानं उत यथाकाममिति भावसंशयः ॥ पूर्व
पक्षे समुच्चयेनानुष्ठानात्फलबाहुल्यं ॥ सिद्धांते यथाकाममनुष्ठानात्प्रयोगसौकर्यमिति बोध्यं त
त्र प्रतीकोपास्तीनां स्वतंत्रत्वाद्यथाकाममनुष्ठानं युक्तं अंगाश्रितोपास्तीनामंगतंत्रत्वाद्यथाश्र

यथावयवाश्रयाणामंगानामनुष्ठानस्याभावस्तदर्थानुष्ठानस्याभाव इति तत्तुदाहरणेन स्पष्टप
ज्ञः ॥ शिष्टेश्च ॥ शिष्टिः शासनं विधानमित्यर्थः ॥ यथा प्रतिवेदं विधानं तथा तदाश्रितोपास्ती
नां विधानाविशेषाच्चांगवत्समुच्चयनियम इत्यर्थः ॥ एतस्मिन्नेव ममेवेत्याह ॥ समाहारात् ॥ ऋग्वेदो
क्तप्रणवस्य सामवेदोक्तोद्गीथस्य चैकत्वोपासने उद्गात्राकृते फलमाह श्रुतिः ॥ होतृषदनाद्धै
वापि दुरुद्गीथमनुसमाहरतीति होतृषदनं शास्त्रेन होतृशंसनस्थानं तानि नाहोतृकृतं शंस
नाख्यं कर्मलक्ष्यते उद्गाता प्रणवोद्गीथयोरैक्यज्ञानमाहात्म्यात्स्वेनकृतं दुरुद्गीथमपि स्वरा
दिभ्रमाद्दुष्टमप्युद्गानं होतृत्वात्सम्यक्कृतं शास्त्रमहात्म्यादनुसमाहरत्येव प्रतिसमाधत्ते
वरवत्तु होतृकर्मसंबद्धोंकारस्य ऋग्वेदोक्तस्य सवेदोक्तोद्गीथस्य चैकत्वेन चिंतितत्वादित्यर्थः ॥
तथा च वेदत्रयोक्तप्रणवोद्गीथयोरैक्यज्ञानस्येदं फलं ब्रुवद्वाक्यं सर्ववेदोक्तानामप्यंगाश्रि

तोपासकानां नांसमुच्चयं सूचयति ॥ सर्वोपासनेषु वेदांतरोक्तोपासनस्य वेदांतरोक्तोद्गीथादिना
संबंधस्य समानत्वादिति सद्वेनकृतात्पर्यं ॥ गुणसाधारण्यश्रुतेश्च ॥ उद्गीथोपासनाश्रयगुणभूत
स्योपास्यस्योंकारस्य तेनेयं त्रयी विद्या वर्तते तेनोंकारेण वेदत्रयोक्तं कर्म प्रवर्तत इति सर्वकर्म
णि साधारण्यस्य श्रवणात्तदाश्रितोपासनानामपि साधारण्यं समुच्चित्यानुष्ठानमित्यर्थः ॥ य
द्वा ॥ कर्मगुणानामुद्गीथादीनां सर्वेषां समुच्चित्यानुष्ठानात्मकसाधारण्याभावे हि तदाश्रितो
पासनानां समुच्चयो न भवेत् ॥ नैतदस्ति प्रयोगवचनेन सर्वांगग्राहिणा तेषां साधारण्यश्रुतेः ॥
तथा च तदाश्रितानामुपासनानामपि समुच्चय इत्यर्थः ॥ एवं प्राप्ते सिद्धांतयति ॥ न वा तत्सहभावा
श्रुतेः ॥ यथांगानामाश्रयस्तथैर्थः ॥ पक्षव्यावर्तनार्थः ॥ नागाश्रितोपासनानामंगवत्समुच्चयनियम
॥ तत्सहभावाश्रुतेः ॥ यथांगानां सहभावः ॥ श्रूयते ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपाकुर्या

सूत्र० ७२ दित्यादिना ॥ तथा तेषामुपासनानां सहभावः स्यादुतेत्यर्थः ॥ नन्वंगतंत्रत्वादुपासनानां समु॥ शारी०वृ०
च्चयनियमः ॥ अंगतंत्रस्यापि गोदोहनस्यानुष्ठानानियमात् ॥ यदुक्तं ॥ शिष्टेश्चेति सूत्रे अंगव ३
द्धानां विशेषान्समुच्चयपरतेति ॥ तन्नेत्याह नहीदमनुमानं ज्ञापयति उपासनानि समुच्चित्यानुष्ठेया
नि विहितत्वादंगवदिति ॥ तत्र चक्रतर्थत्वमुपाधिः ॥ परं च सूत्रद्वयोक्तं लिंगद्वयमप्रयोजकं ता॥
नदृष्टपरणीयं ॥ दर्शनाच्च ॥ दर्शयति च श्रुतिरंगाश्रितोपासनानामसमुच्चयं ॥ एवं विद्वैवं ब्रह्माय
जं यजमाने ॥ सर्वाश्चर्त्विजो धिरक्षतीति कवेदादिविहितां गलोपे व्याहृतिहोमन्यायश्चित्ताभि
ज्ञत्वं ब्रह्मण एवं वित्त्वं सर्वोपासनानां समुच्चये हि विज्ञानवता ब्रह्मणा परिपाल्यत्वमितरेषामृ
त्विजां तस्या सर्वेषां सर्वविज्ञात्वं स्याद्विनपरिपाल्यत्वकीर्त्तनं तस्मान्न सर्वोपासनासमुच्चयपर ७२
तिसिद्धं ॥ इतिश्रीब्रह्मसूत्रवृत्तौ शारीरकसूत्रसमाप्तं तृतीयाध्यायस्य तृतीयपादः ॥ ३ ॥ शुरु

पार्थोतः शब्दादिति बादरायणः ॥ पूर्वस्मिन्पादे परापरब्रह्मविद्यायां नागुणोपसंहारोक्त्या॥
परिमाणं वपुमवधारितं इह तासां कर्मानपेक्षाणामेव पुरुषार्थसाधनत्वं निरूप्यते ॥ तत्र क॥
र्मानपेक्षाणामासां विद्यानां कार्यंगानि स्वाकांक्षायां यज्ञादीनि बहिरंगाणि शमादीन्यंतरं॥
गानि च निरूप्यते इत्येकविद्याविषयकत्वमनयोः पादयोः संगतिः ॥ तत्र परब्रह्मविद्यामाश्रित्य
विचार्यते ॥ किमौपनिषदात्मविद्या कर्मकर्तृद्वारा कत्वर्थं उत स्वतंत्रैव पुरुषार्थसा॥
धनमिति ॥ अत्र स्वर्गोत्तरपक्षयोः स्वर्गोत्तरकोटिसिद्धिः फलं सर्वपादांत्याधिकरणे कर्मांगवि॥
द्योक्तिप्रसंगाद्ब्रह्मज्ञानस्य कर्मांगत्वमाशंक्य सिद्धांतमुपक्रमते पुरुषार्थ इति ॥ अतोस्मादौ
पनिषदात्मज्ञानात्स्वतंत्रात्पुरुषार्थो मोक्षः सिध्यतीति बादरायणः ॥ आचार्यो मन्यते कुतः
तरति शोकमात्मवित् ब्रह्मवेद ब्रह्मैव भवतीत्यादेः ॥ केवलविद्याया मोक्षहेतुत्वबोधकशब्दा॥

सूत्र० ७३ दिभ्यः ॥ इदमुपलक्षणं सगुणविद्यानामपि स्वातंत्र्येण फलहेतवः तु तंतत्फलश्रुतेरिति बोध्यं ३
एवं च सिद्धांतमुपक्रम्य सर्वं पश्यति ॥ शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः ॥ कर्तृत्वे-
नात्मनः कर्मशेषत्वात् ॥ तज्ज्ञानमपि पर्णतावत्कर्मशेषात्मद्वारा क्रत्वंगं तत्फलत्वं गंन्थ-
चापेन्नयोगः ॥ तज्ज्ञानं कर्मांगं फलश्रुत्यन्वेसति कर्मांगाश्रयत्वात्पर्णतावदिति ॥ ननु विशेष-
णासिद्धो हेतुः तरति शोकमात्मविदित्यादिफलश्रुतेः ॥ सत्वादित्यत आह ॥ पुरुषेति ॥ यथा
न्येषु द्रव्यसंस्कारकर्मसु पर्णमयीत्वव्यपजमानस्यांजनादिसंस्कारप्रयाजादिरूपेषु अपा-
पश्लोकश्रवणादिफलश्रुतीरर्थवादस्तथा चापि पुरुषार्थश्रुतिरर्थवाद इति जैमिनिराचार्यो
मन्यते ॥ तया च न हेतोर्विशेषणासिद्धिरिति भावः ॥ आचारदर्शनात् ॥ जनको ह वैदेहो बहु-
दक्षिणेन यज्ञेनेजे इत्यादौ ब्रह्मविद्यावतां जनकादीनां विद्यया सह कर्माचारदर्शनात् ॥ लिं- ७३

गाद्विद्यायाः स्वातंत्र्याभावेन कर्मांगत्वमित्यर्थः ॥ विदेहानामधिपतिर्जनको नाम राजा बहुदक्षि-
णासंज्ञेनाश्वमेधेन वा बहुदक्षिणायुक्तेनेजे त्यागं कृतवानित्यर्थः ॥ तच्छ्रुतेः ॥ किंच ॥ यदेव कर्म-
विद्यया करोति तदेव वीर्यवत्तरं भवतीति तृतीयाश्रुत्या विद्यायास्तस्याः कर्मशेषत्वस्यावगमा-
त्स्वातंत्र्येण मुक्तिफलत्वमित्यर्थः ॥ समन्वारंभणात् ॥ तं विद्याकर्मणी समन्वारभेते इति ॥ इति फ-
लारंभे विद्याचिन्तकर्मणोः साहित्यदर्शनादपि न मुक्तिफलत्वं विद्यायाः ॥ किंतु ॥ कर्मांगत्वमेवेत्य-
र्थः ॥ तं परलोकं व्रजंतं विद्याकर्मणी समनुगच्छत इति श्रुत्यर्थः ॥ तद्वतो विधानात् ॥ आचार्यकुला-
द्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुंबे शुचौ देशे स्वाध्यायमधीया-
न इति श्रुत्या सकलवेदार्थज्ञानवतः कर्मविधानादपि लिंगात्कर्मांगत्वं वेदार्थब्रह्मविद्याया।
इत्यर्थः ॥ यद्यपि वेदमधीत्येत्यध्ययनमात्रं श्रुतं नार्थबोधस्तथापि फलवदर्थावबोधपर्यंत

सूत्रं० ७४ मध्ययनमितिबोध्यं ॥ आचार्यस्य कुले गृहे उपनयनं कृत्वा तदनंतरं गुरोः शुश्रूषणादूर्ध्वंक ३
र्मविधाय अतिशेषेण शिष्टेन कालेन यथाविधानं पवित्राणि तदाश्रुतत्वादिविधानम
ननिक्रम्य वेदमधीत्यानंतरमभिसमावृत्य ब्रह्मव्रतविसर्गं कृत्वा कुटुंबे गार्हस्थ्ये स्थितः शुचौ
देशे स्वाध्यायाध्ययनं कुर्वन् कर्मांतराणि च विहितानि यथाशक्ति कुर्वाणो ब्रह्मलोकमभिसं
पद्यत इत्यर्थः ॥ नियमाच्च ॥ कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ॥ एवं त्वयि नान्यथेतो
ऽस्ति न कर्म लिप्यते नरे इत्यादि ॥ काण्वाश्चैवं कर्माचारं नियमाच्च विद्यायाः कर्मशेषत्वमेवेत्य
र्थः ॥ इह ते देहे ज्ञातं समाः शतं संवत्सरान् जीवितुमिच्छेदिति यत् कर्माणि कुर्वन्नेवेति निय
मविधिः ॥ एवं त्वयि नरे वर्त्तमाने सत्यशुभं कर्म न लिप्यते त्वं न लिप्यसे इत्यर्थः ॥ इतः प्रकारा
दन्यथा प्रकारांतरं नास्ति यतः ॥ कर्मलेपो न स्यादित्यर्थः ॥ तस्माद् ब्रह्मविद्या कर्मांगमेवेति भावः ७४

समाधत्ते ॥ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ तुः सर्वपक्षनिरासार्थः ॥ यदुक्तं तत्त्वज्ञा
नं कर्मांगं फलश्रुतिरप्येषामिति कर्माश्रयत्वादिति तद्धेतोर्विशेष्यासिद्धेः ॥ कुतो विशेष्यासिद्धिः ॥ अ
धिकोपदेशात् कर्मकर्तुः संसारिणः कर्मांगादधिकस्याकर्त्तुरसंसारिण ईश्वरस्यात्मनो वेदांतेषू
पदेशात् ॥ तथा च ॥ तत्त्वज्ञानं विना तत्राश्रयमेवेति न च निर्विशेषासिद्धिः ॥ एवं च तत्त्वज्ञानफलश्रुते
रपि नार्थवादत्वं तस्यात्तु रूपयोगतः ॥ ज्ञाह्यादिति यन्मतं बादरायणस्य तदेवमेव तथैवेत्यर्थः ॥
अधिकोपदेशासिद्धिमाशंक्याह ॥ तद्दर्शनादिति ॥ तस्याधिकस्यात्मनोऽपः सर्वतः सर्वविदित्या
दिश्रुतिमहस्त्वेषु दर्शनादित्यर्थः ॥ यदुक्तमाचारदर्शनादिति तत्राह ॥ तुल्यं तु दर्शनं ॥ विद्यायाः
कर्मशेषत्वाभावेऽप्याचारदर्शनं तुल्यमेव तथा हि जनकस्यैव तत्सर्वं विद्वांसोऽध्यायिहोतं न जुहु
मो च क्रिरस्यादिकाश्च निवृत्तिपः कर्माचाराभावं दर्शयंति तु ज्ञात्वा कर्मांगत्वलिंगदर्शनस्य

सूत्र॰ त्वावलंपेस्तृचितं ॥ नहि ब्रह्मविद्यावतां जनकादीनां कर्माचारदर्शनं विद्यायाः कर्मशेषत्वेलिं ३
७५ गं तेषामहमभिमानाभावेन चोदनाप्रवृत्त्यसंभवात् तत्कृतकर्मणश्चोदनालक्षणत्वाभावे
नाऽकर्मतया तदाचारदर्शनस्य विद्यायाः कर्मशेषत्वबोधनेऽदुर्बलत्वादिति तत्सूत्रे इति य
दुक्तं तन्नाह ॥ असार्वत्रिकी ॥ यदेव विद्यया करोतीति श्रुतिरसार्वत्रिकी सर्वविद्याविषया न भ
वति ॥ प्रकृतोद्गीथविद्यामात्रपरत्वात् ॥ तथा च न श्रुतिबलात् ब्रह्मविद्यायाः कर्मांगत्वमित्य
र्थः ॥ यदप्युक्तं समन्वारंभणादिति तत्राह ॥ विभागः शतवत् ॥ तं विद्याकर्मणी समन्वारभेते ॥
इत्यत्र विभागो बोध्यः विद्यान्यं पुरुषमन्वारभते कर्मान्यमिति ज्ञातव्यत् ॥ यथा शतमाभ्यां दी
यतामित्युक्ते विभज्य दीयते पंचाशदेकस्मै पंचाशदन्यस्मै तद्वदित्यर्थः ॥ वस्तुतोऽस्य समन्वा ७५
रंभवाक्यस्य मुमुक्षुविषयत्वाभावात् विद्याशब्देन विहितोद्गीथादिविद्यात्रतिपिवाचनम्

त्वादर्शनादिरूपा गृह्यते नात्मज्ञानविद्यायाः ॥ फलारंभे कर्मसाहित्येऽपि न क्षतिरिति मंतव्यं
यत्तु नरूक्तं तद्वतो विधानादिति तत्राह ॥ अध्ययनमात्रवतः ॥ आचार्यकुलाद्वेदमधीत्येति
वाक्ये वेदाध्ययनमात्रवतः ॥ कर्म विधीयते नात्मज्ञानवत इत्यर्थः ॥ मात्रपदेनोपनिषदात्म
ज्ञानमेव व्यावर्त्यते ॥ न कर्मकांडार्थावबोधः ॥ कर्मज्ञानं विनानुष्ठानासंभवादिति ॥ यच्चो
क्तं नियमाच्चेति तत्राह ॥ नाविशेषात् ॥ कुर्वन्नेवेह कर्माणीति नियमवाक्यं न ज्ञानिविषयं वि
द्वानिति विशेषाभावादित्यर्थः ॥ अस्य नियमवाक्यस्य ज्ञानिविषयत्वेऽप्यविरोधः ॥ ज्ञानस्तु
त्यर्थत्वादित्याह ॥ स्तुतयेऽनुमतिर्वा ॥ इयं विदुषः कर्मानुमतिः कर्मानुज्ञा ब्रह्मविद्यास्तुतये ज्ञा
नव्यास्तुभिच्छेवं यावज्जीवं कर्म कुर्वन्नपि तद्विदुषि न कर्मलेपाय भवति ॥ विद्यासामर्थ्या
दिति ॥ अस्मिन् पक्षे नान्यथेतोऽस्तीत्यस्यायमर्थः ॥ एवं कर्म कुर्वत्यपि तया नो ब्रह्मभावाद्विद्या ॥

ब्र०
७६

तस्मादन्यथासंसारप्रवृत्तिर्नास्तीयतोनकर्मलिप्यत इति ॥ अपिच ब्रह्मविद्यायाः प्रत्यक्षं ३
फलंदर्शयंती श्रुतिः ॥ कालांतरभाविफलकर्मांगत्वं वारयतीत्याह ॥ कामकारेण चैके ॥ एके
विद्वांसः प्रत्यक्षीकृतविद्याफलाः परोक्षकर्मफलसाधनं प्रजादिकं कामकारेण स्वेच्छयात्य
क्तवंत इति श्रूयते ॥ एतद्ध स्म वै तत्पूर्वे विद्वांसो मनसः प्रजांनकामयंते ॥ किंतु ॥ प्रजयाकरि
ष्यामो येषां नोयमात्मायंलोक इति विद्यायाः कर्मांगत्वाभावेपि विदुषः स्वेच्छया कर्मसाधन
प्रजादित्यागो लिंगमनेन सूत्रेण सूच्यत इति वा बोध्यं विद्यायाः कर्मांगत्वे हि कर्मसाधनत्या
गोनस्यादिति सूत्रार्थस्तु ॥ येषां नोस्माकमयमपरोक्षस्वात्मा स्वयंलोकः प्रत्यक्षं फलं तेव
यं किं प्रजया करिष्याम इति निश्चित्याग्निहोत्रादिकर्म न कृतवंत इति ॥ उपमर्दं च ॥ किंच ॥ कर्मा
नुष्ठानहेतोः क्रियाकारकफलविभागस्य समस्तस्याऽविद्याकृतस्य विद्यायाः सामर्थ्यादुपमर्दं ७६

॥

स्वभावमामनंति ॥ यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिना तयाच ब्रह्मविद्याया
ःकर्मविरोधित्वान्नकर्मांगत्वमिति भावः ॥ विद्यायाः कर्मानंगत्वे हेत्वंतरमाह ॥ ऊर्ध्वरेतस्सु
च शब्दे हि ॥ ऊर्ध्वरेतस्सु यतिषु ब्रह्मविद्यावगता न हि तस्याः कर्मांगत्वं संभवति यती
नामग्निहोत्रादिकर्माभावात् ॥ तथा चायं प्रयोगः ॥ विद्याकर्मणी नांगांगिभूते मिथो व्यभि
चारित्वात् ॥ क्रतुगमनेनैष्टिकव्रतवदिति ॥ ननु यत्याश्रमसद्भावे किंमानमित्यत आह ॥ शब्दे
हीति वेदे ह्यूर्ध्वरेतसामाश्रमाः श्रूयंते ॥ त्रयो धर्मस्कंधाः ॥ यज्ञोध्ययनं दानमिति प्रथमस्तप ए
व द्वितीयः ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यंतमात्मानमाचार्यकुलेवसादयन् सर्वएते
पुण्यलोका भवंति ॥ ब्रह्मसंस्थोऽमृतत्वमेतीति ब्रह्मचर्यादेव प्रव्रजेदित्यादौ सूत्रार्थस्तु स्कंधश
ब्दाश्रमपरः यज्ञादिधर्मप्रधानो गार्हस्थ्याश्रमः तपः प्रधानो वानप्रस्थाश्रमो द्वितीयः ॥

सू॰ ७७ तृतीयः स्कंधः एतेषामाश्रमिणामनित्यफलभाक्त्वमुक्त्वा ब्रह्मसंस्थस्य संन्यासिनो नित्यफला- २
त्वमाह ॥ ब्रह्मसंस्थ इति ॥ ब्रह्मण्यनन्यगतरूपेण सम्यङ्निष्ठा यस्य स ब्रह्मसंस्थः परिव्राडित्यर्थः ॥
तस्माद्ब्रह्मविद्या न कर्मांगं ॥ किंतु ॥ स्वतंत्रा मुक्तिफलेति सिद्धं ॥ त्रयो धर्मस्कंधा इत्यादिश्रुति-
रात्मसमसंज्ञावेप्रमाणमित्युक्तं ॥ तदाक्षिपति ॥ परामर्शं जैमिनिरचोदना चापवदति हि ॥ तत्त्व-
ज्ञानस्यांतरंगसाधनं पारिव्राज्यमत्र निरूप्यत इति स्फुटं साधनाध्यायपादसंगतो ब्रह्मसंस्था-
यः ॥ किं पारिव्राज्यमनुष्ठेयं न वेति सर्वपक्षे पारिव्राज्यस्याभावाद्विद्यायाः कर्माव्यभिचारेण क-
र्मांगत्वमिति फलं ॥ सिद्धांते तु स्वतंत्रा विद्यास्वातंत्र्यमिति बोध्यं तत्र पारिव्राज्यं प्रमाणाभावात्
नानुष्ठेयमित्याह ॥ परामर्शमिति त्रय इति श्रुतौ चतुर्णामाश्रमाणां परामर्शमनुवादमात्रं जै- ७७
मिनिराचार्यो मन्यते ॥ न विधीयते इयं श्रुतिरचोदना लिङादिशून्या अस्याः श्रुतेर्ब्रह्मसंस्थ-
विधायकशब्दाभावः इत्यर्थः ॥

तास्तुतिपरत्वेनेति विकारार्थः ॥ त्रया चान्यपराद्वाक्यादनुवादमात्रेणाश्रमसिद्धिरिति भाव-
ः तपःशब्देनैव वानप्रस्थयत्याश्रमयोरनुवाद इति द्रष्टव्यं ॥ निंद्यमानत्वाच्च पारिव्राज्यं नानुष्ठे-
यमित्याह ॥ अपवदति हीति ॥ वीरहा वा एष देवानां योऽग्निमुद्वासयत इत्याद्या श्रुतिरग्न्युद्वासन-
प्रधानं पारिव्राज्यमपवदतीत्यर्थः ॥ यत्याश्रमातिरिक्ताश्रमान्तरमग्निहोत्रादिविधानसा-
मर्थ्यात्प्रामाणिकमेव त्रय इत्यादिश्रुत्या वर्ण्यते यत्याश्रमस्तु न श्रुतिसिद्धः ॥ किंच ॥ स्मृ-
तिसिद्ध एव नेष्यते स्मृतिश्च यावज्जीवमग्निहोत्रं जुहुयादित्यादिप्रत्यक्षश्रुतिविरोधाद-
प्रमाणमिति सर्वपक्षाभिमानः ॥ यद्यपि ब्रह्मचर्यादेव प्रव्रजेदिति प्रत्यक्षा श्रुतिरस्ति त-
थापि पंगुनिर्नास्तीतिकृताचितेयं मंतव्यं ॥ समाधत्ते ॥ अनुष्ठेयं बादरायणः साम्यश्रुतेः पा-
रिव्राज्यमनुष्ठेयं भगवान्बादरायणो मन्यते ॥ कुतः त्रय इत्यादिश्रुतौ आश्रमाणिकगार्हस्थ्येन ॥

वचनांतरेण प्राप्तस्य पुनर्वचनमनुवादः ५

सूत्र॰ ७८ साम्यश्रवणादित्यर्थः ॥ अयं भावः ॥ तपः शब्देन वानप्रस्थाश्रमस्यैवानुवादः संन्यासिनां तपः सन्न्या- ३
नात् ब्रह्मसंस्थत्वस्य त्वनेनैव प्राप्त्याश्रमानुवादः ॥ आश्रमत्रयस्यानुवादेन ब्रह्मसंस्थतास्तुतिपरत्वमे-
कवाक्यस्य तथा चान्यपरादपि वाक्यात्प्रतीयमानान्याश्रमाः सिध्यंति देवताधिकरणन्यायात् ॥ न
च वीरहत्यादिश्रुतिविरोधः तस्याः श्रुतेरज्ञानादस्युद्वासनोद्यताहिताग्निविषयत्वादिति ॥ एवम
कवाक्यस्यानुवादत्वमंगीकृत्यानुवादस्य प्रमाणांतरसापेक्षत्वादाश्रमाणां प्रामाणिकत्वमु-
क्तमिदानीमस्मिन्नेव वाक्ये आश्रमाणां विधिकल्पनमन्यथास्यानुवादकत्वे आश्रमविधा-
यकवाक्यांतरकल्पनायां गौरवप्रसंगात् सिद्धे वाक्ये विधिमात्रकल्पनायां लघुत्वादित्याह
विधिर्वा धारणवत् ॥ अस्मिन्वाक्ये आश्रमाणां विधिरेव नानुवादः ॥ न चानेकाश्रमविधाने
वाक्यभेदः स्यादिति वाच्यं अपूर्वत्वेनाश्रमाणां विधेरावश्यकत्वेन वाक्यभेदस्येष्टत्वात् ॥ एक ७८

मानांतरप्राप्तत्वेना॥२॥

वाक्यता तावदपि त्यागेनापूर्वार्थविधौ दृष्टांतमाह ॥ धारणवदिति ॥ महापितृयज्ञे स्रुग्विधृति-
मुद्दिश्याहवनीयं प्रति यदानीयते तत्र श्रूयते अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धा-
रयतीति ॥ तत्र सत्युपर्यधस्तात्समिद्धारणविध्येकवाक्यत्वसंभवे उपरिहीत्यादेरनुवादतया प्रती-
तावपि स्वविधेयविरूपस्य समिद्धारणस्यापूर्वत्वादेकवाक्यताभंगेन विधिर्यथा कल्प्यते तथेहा-
पीत्यर्थः ॥ वस्तुतस्तु ब्रह्मसंस्थत्वमेव पारिव्राज्यलक्षणमत्र वाक्ये विधीयते आश्रमत्रयानुवादे-
नानित्यफलत्वेनाश्रमत्रयनिंदया ब्रह्मसंस्थत्वस्यैव नित्यफलत्वेन स्तूयमानत्वात् स्तुत्यत्वेन।
विधेयमिति न्यायात् ननु ब्रह्मसंस्थत्वस्य यौगिकार्थस्य गृहस्थादेरपि संभवात्कथं ब्रह्मसंस्थ-
त्वं परिव्राजक एवेति वाच्यं गृहस्थादीनां स्वस्वकर्मासक्ततया ब्रह्मसंस्थतायोगात् परिशिष्यमाण-
परिव्राजकस्यैव ब्रह्मसंस्थ इति तथा च नास्ति अन्यत्र वाक्यभेद इति ॥ तस्मात्पारिव्राज्यस्य प्रामाणिकत्वा-

त् सति चाश्रमांतरे ब्रह्मसंस्थत्वं न कर्मिणामित्यभिप्रायः ॥२०॥

सूत्र० ३१८ त्वेषां च कर्मांगाभावात् सिद्धं ब्रह्मविद्यायाः स्वातंत्र्यं ॥ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ उद्गी ३
थादिविद्यासु श्रूयते स एष उद्गीथो रसानां रसतमः परम इत्यादि तत्र संशयः ॥ किमिदं कर्मां
गोद्गीथस्तुतिमात्रं उतोद्गीथोपासनानां यागगुणविधायकमिति पूर्वपक्षे उद्गीथमुपासीतेत्या
देः सर्वस्यापि स्तुतिमात्रत्वात् कर्मांगाश्रितोपासनानुष्ठानासिद्धिः सिद्धांते कर्मांगाश्रितोपास
नानां विधेयत्वादनुष्ठानसिद्धिरिति ॥ एवं चांगपरतंत्राणामपि विद्यानामनुष्ठानसमर्थनेन पु
रुषार्थहेतुत्वोक्त्यावंगानाश्रितब्रह्मविद्यायाः ॥ पुरुषार्थहेतुत्वं किमु वक्तव्यमिति सिद्धेः ॥ पादसं
गतिः ॥ तत्रानुष्ठेयाश्रमसाम्यस्तुते ॥ पारिव्राज्यस्यानुष्ठेयत्ववदियमेव जुहूरादित्य इत्यादिक
र्मांगस्तुत्या रसतमत्वादिवाक्यस्य साम्यात् स्तुतिमात्रत्वमिति पूर्वपक्षप्राप्तिस्तुतिमात्र ३१८
मिति रसतमत्वादिवाक्यं सर्वमपि कर्मांगविधिस्तुतिमात्रं कर्मांगोद्गीथाद्युपादानादिति चेन्न

कुतः ॥ अपूर्वत्वात् कर्मांगोद्गीथाद्युपासनानां रसतमत्वादिगुणानां चापूर्वत्वान्मानांतराप्राप्त
त्वाद्यागादिवद्विधेयत्वमेवेत्यर्थः ॥ प्रकृत एव विधिसंभवे प्रकरणांतरगतोद्गीथादिविधिस्तुतिल
क्षणाकल्पनमन्याय्यतरमिति भावः ॥ भावशब्दाच्च ॥ उद्गीथमुपासीत सामोपासीतेत्यादिविधि
शब्दाच्च विधेयत्वमेवेत्यर्थः ॥ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ वेदांतेषु तत्र तत्र अथ ह या
ज्ञवल्क्यस्य द्वे भार्ये बभूवतुर्मैत्रेयी च कात्यायनी चेत्याद्या आख्यायिकाः श्रूयंते तत्र संशयः ॥
किमेताः पारिप्लवार्था उत सन्निहितविद्यास्तुत्यर्था इति पूर्वपक्षे कथानामासां पारिप्लवप्रयो
गशेषत्वान्नैकवाक्यतापन्नशास्त्रबोध्यविद्यायाः ॥ प्राधान्याभावेन पुरुषार्थहेतुत्वासिद्धिः सि
द्धांते तेन तत्सिद्धिरिति मंतव्यं ॥ एवं फलपर्यवसानादेवास्य पादसंगतिर्बोध्या ॥ तत्र रसतमत्वादे
रुद्गीथादिस्तुत्यर्थत्वापेक्षया पारिप्लवशेषत्वं ज्याविषयसमर्पकत्वस्य ज्यायस्त्ववत्कथाना

ब्रसू० मपिविद्यास्तुत्यर्थत्वापेक्षयापारिप्लवशेषत्वंन्यायइति दृष्टांतेनपूर्वपक्षयति पारिप्लवार्थाइतिचे
८० दितिचेत्अश्वमेधेपुत्रादिपरिवृतायराज्ञेयत्नानाविधकथाकथनंतत्पारिप्लवशब्देनोच्यतेतस्या ३
एवौपनिषत्कथायाअपितात्पर्यं।।समाख्यानेनेतिकुतः।।विशेषितत्वात्पारिप्लवमाचक्षीतेत्युपक्र
म्यमनुर्वैवस्वतोराजेत्यादि।।वाक्यशेषेकासांचित्कथानांपारिप्लवशेषत्वेनविशेषितत्वादित्य
र्थः।।तस्मादौपनिषत्कथानांनपारिप्लवशेषत्वंननुतर्हिकिमर्थाइमाःकथाइत्याशंक्यसंनि
धिवत्त्वाद्विद्यार्थाइत्याह।।तथाचैकवाक्यतोपबंधात्।।तथाचोक्तयुक्त्यापारिप्लवार्थत्वाभावेसति
सन्निधिवत्त्वाद्विद्याशेषत्वंकथानांयुक्तंएकवाक्यतोपबंधात्तत्सन्निहितनतन्नद्विद्यैकवाक्यत्वादर्श
नादित्यर्थः।।कथानांविद्यास्तुतिलक्षकत्वेनविद्याज्ञानसौकर्यार्थत्वेनचविद्यैकवाक्यत्वंबोध्यंत
स्मात्सन्निहितविद्याशेषमेवकथानामितिसिद्धं।।एवंपुरुषार्थाधिकरणेब्रह्मविद्यायाःस्वातं ८०

अनुवादःक्रीयते

त्र्यंचनिपात्यतत्सवक्ष्यापांविचारेपरिसमाप्यपुरुषार्थाधिकरणस्यफलमाह।।अतएवचा
ग्नींधनाद्यनपेक्षा।।किंब्रह्मविद्यास्वफलेविद्याशेषत्वेनापेक्षान्यायात्यज्ञादिश्रुत्याविवि
दिषायांविनियुक्तयज्ञादीनांविषयसौंदर्यलभ्यायांतस्यामननयादिच्छाविषयज्ञानसाध्य
मोक्षेनयस्यसंभवादपेक्षतइतिशानेब्रूमः।।आद्याधिकरणेब्रह्मविद्यायाःकर्मशेषत्वनि
रासेनयत्पुरुषार्थहेतुत्वमुक्तंतदतःशब्देनपरामृश्यते।।अतएवब्रह्मविद्यायाःस्वातंत्र्येण
पुरुषार्थहेतुत्वादेवअग्नींधनशब्देनतस्याश्रमविहिताग्निकर्माणिलक्ष्यंतेविद्याफलेमोक्षे
कर्मापेक्षानास्ति शुक्तिज्ञानस्येवरजतभ्रमनिवृत्तावित्यर्थः।।अयंभावः।।यज्ञादिश्रुत्याविविदि
षायामेवकर्मणांविनियोगावगमात्।।नमोक्षेकर्मापेक्षानचविषयसौंदर्यलभ्यायांतस्याम
नन्वयः।।कर्मणामितिवाच्यं।।ब्रह्मज्ञानेचोत्पन्नेप्रतिबंधककल्मषनिवृत्तिजननद्वारेणयामन

स्त्र० यसंभवादिति ॥ अस्याद्याधिकरणफलपरत्वान्न स्यङ्कपारसंगत्याद्यपेक्षा ॥ सर्वापेक्षा च ३
८१ यज्ञादिश्रुतेरश्ववत् ॥ ब्रह्मविद्या किं स्वोत्पत्तौ कर्माण्यपेक्षते न वेति संदेहः ॥ सर्वापेक्षे ज्ञानापेक्षा ।
ज्ञाद्यनुष्ठानाभावः ॥ फलं सिद्धांते तदनुष्ठानावश्यंभावः ॥ अत्र यज्ञादीनां शमादीनां च ज्ञानसाध
नानां निरूपणादस्ति पादसंगतिः ॥ तत्र यथा ब्रह्मविद्यायाः प्रमाता ह्युक्तिज्ञानस्येव स्वफले क
र्मानपेक्षा तथा स्वोत्पत्तावपि न कर्मापेक्षा प्रमातादेवेति दृष्टांतेन प्राप्ते ब्रूमः ॥ विद्यायाः स्वोत्प
त्तौ सर्वेषामाश्रमकर्मणामपेक्षास्ति कुतः ॥ यज्ञादिश्रुतेः ॥ तमेतं वेदानुवचनेन ब्राह्मणा विवि
दिषंति यज्ञेन दानेन तपसानाशकेनेत्येवंरूपायाः कर्मणां सर्वेषां ज्ञानसाधनत्वबोधिका
याः श्रुतेः ॥ यद्यप्यत्र विविदिषंतीति वर्तमानापदेशः प्रतिभाति न विधिस्तथापि यज्ञादीनां
ज्ञानसंयोगस्यापूर्वत्वाद्विधिः कल्प्यः ब्रह्मानुभवकामो यज्ञादि कुर्यात् न चानुभवस्य प्रमा ८१

णाधीनत्वान्न यज्ञाद्यपेक्षेति वाच्यं मलिनांतःकरणस्य सत्यपि प्रमाणेऽनुभवानुत्पत्तेरनुभावो
त्पत्तिप्रतिबंधकांतःकरणमालिन्यनिवृत्त्यादिपरंपरया ज्ञानस्य यज्ञादिजन्यत्वेन तदपेक्षाया
आवश्यकत्वादिति न तु परंपरया ज्ञानोत्पत्तौ कर्मापेक्षावन्मोक्षेऽप्यपेक्षास्तु तत्राहाश्ववदिति
यथाश्वस्य योग्यताबलाद्रथचर्यायां विनियुज्यते ॥ न लांगलाकर्षणे तद्वत्कर्मणां मोक्षे योग्य
ताभावान्नापेक्षेत्यर्थः ॥ ज्ञानोत्पत्तौ बहिरंगमुक्त्वांतरंगमाह ॥ शमदमाद्युपेतः स्यात्तथापि तु त
द्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात् ॥ यदि कश्चिद्यज्ञादीनां ज्ञानसाधनत्वे विध्यभावादब्र
ह्मविद्यार्थिना नानुष्ठेयत्वं मन्येत तथापि शमदमाद्युपेतस्तु ब्रह्मविद्यार्थी स्यादेव कुतस्तद्विधेः त
स्मादेवंविच्छांतो दांत उपरतस्तितिक्षुः समाहितो भूत्वात्मन्येवात्मानं पश्यतीति ॥ तदंगतया
विद्याहेतुत्वेन तेषां शमादीनां विधानाद्विहितानां च तेषामवश्यानुष्ठेयत्वादित्यर्थः ॥ यज्ञादीनां

सूत्र० ज्ञानसाधनत्वे विधिर्नास्तीति परमतं निरस्य पेत्यैवमुक्तं भगवता स्वनकृता नयापितिति ॥ वस्तुतो। ३
८२ विधिरस्तीत्युक्तमेवेति बोध्यं यस्मादेवमात्मानं विदित्वा पापेन कर्मणा न लिप्यते ॥ तस्मादेवं।
विद्वमाद्युपेतोऽनुत्वा विचारयेदिति श्रुत्यर्थः ॥ अत एवैवं विदिति विद्यासंनिधानाद्दमादीनामं
तरंगत्वं विविदिषासंनिधानाद्यज्ञादीनां बहिरंगत्वं बोध्यं ॥ सर्वान्नानुमतिश्च प्राणात्मयेतद्दर्श
नात् ॥ छहस्यरणपके श्रूयते प्राणसंवादे न ह वा अस्यानन्नं जग्धं भवतीति ॥ अस्य प्राणोपासकस्य
यजंतुमान्नस्य जग्धं भक्ष्यं तत्सर्वमन्नमेव विद्यांगं विधीयते ॥ अतस्तुत्यर्थं कथ्यत इति सर्वपक्षे प्राण
विदो भक्ष्याभक्ष्यविभागासिद्धिः ॥ सिद्धांते तत्सिद्धिरिति ॥ अत्र ब्रह्मविद्यासाधनस्य प्राणवि।
द्यायाः स्वतंत्रत्वरूपार्थहेतोः स्तुत्यर्थं सर्वान्नानुज्ञानमिति निरूपणात्प्रसंगतिः ॥ तत्र विद्या। ८२
संनिधानाद्दमादिवद्विद्यांगमेव सर्वान्नानुमतिरिति प्राप्ते ब्रूमः ॥ न सर्वान्नानुज्ञानं विद्यांगं वि

धीयते विध्यभावात्स्वादिमर्यादस्यान्नस्य प्राणोपासकेनात्तुमशक्यत्वाच्च नह्यशक्ये विधिः सं
भवति ॥ तस्मात् प्राणविद्यायां प्राणस्यान्नमिदं सर्वं इति यच्चिंतनं विहितं तत्प्रशंसार्थो यमर्थवा
दः ॥ इदमभिप्रेत्याह सूत्रकारः ॥ सर्वान्नानुमतिश्च प्राणात्यय इति सावधारणमिदं सूत्रं प्राणात्य
य एव हि परस्यामापदि सर्वमन्नं सुराव्यंजं विषांसं च तिवाऽदनीयतेनानुमतं न त्वस्य च तितद्दर्श
नात् ॥ अभक्ष्यभक्षणस्यापत्कालत्वस्तुतो दर्शनादित्यर्थः ॥ तथाहि मटचीहतेषु कुरुष्वित्यस्मि
न्ब्राह्मणे चाक्रायणः किलकृषिः ॥ कुरुदेशे दुर्भिक्षे जाते उषस्तिरितो देशांतरमागतः कदाचि।
द्धस्तिपालकदेशसंनिविष्टस्तेन हस्तिपालकेनार्द्धभक्षितान्कुल्मितान्माषान्भक्षितवा।
नतेनोदपानं गृहाणेत्युक्ते स उच्छिष्टं न पीतं स्यादिति प्रतिषिध्य किं मे नेमानखादन्नजीविष्यमिति ॥
हस्तिपालकेनोक्ते नेत्यवहे तुमाह चाक्रायणः ॥ कुल्माषभक्षणं यद्यहं न कुर्यां तर्हि मे जीव

सूत्र० नमेवनस्मात्दुष्पानं तु नराकादिषु स्वेच्छातो भविष्यतीति प्राणवमिभ्योच्छिष्टान्माषान् खादितवानि ३
८३ ष्टान्नायायै ददौ तया च भर्तुः ॥ स्नानावन्तया निहितानुत्तरदिनेपि भक्षितवानिति श्रुतं राणं स्व
परोच्छिष्टपर्युषितान्नभक्षणं दर्शयन्त्याः श्रुतेरयं भावः ॥ परस्यामापदि प्राणनिर्वाहार्थम
भक्ष्यमपि भक्षणीयं स्वस्यावस्थायां विदुषापि तन्न कर्त्तव्यमिति मरचीशाङ्केन पापाणेन हष्ट
योरक्तवर्णः शुनपक्षिविशेषा वाप्याहृतास्तस्मात् सर्वान्नानुज्ञानमर्थवादमात्रं ॥ अबाधाच्च
भक्ष्याभक्ष्यविभागशास्त्रस्याबाधाच्चार्थवादमात्रमित्यर्थः ॥ अन्यथा सामान्यशास्त्रं विशे
षपरतया नियम्यमानं बाधितं स्यादिति भावः ॥ अपि च स्मर्यते ॥ अपि च परस्यामापदि विदु
षोऽविदुषश्च सर्वान्नभक्षणं स्मर्यते ॥ जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः ॥ लिप्यते न स
पापेन पद्मपत्रमिवाम्भसि ॥ तथा मद्यं नित्यं ब्राह्मणो वर्जयेदिति ॥ तस्मात्स्वस्थेन विदु ८३

षापि नाभक्ष्यं भक्षयितव्यं ॥ स्मृतिमूलभूतां श्रुतिमप्याह ॥ शब्दश्चातोऽकामकारे स्वेच्छाकृता
प्रवृत्तिनिवृत्त्या भक्ष्यभक्षणस्य प्रतिषेधकस्तस्मात् ब्राह्मणः सुरां न पिबेदित्येवंरूपः शब्द
श्चातोऽकामकारे स्वेच्छाकृतप्रवृत्तिनिरासे वर्त्तत इत्यर्थः ॥ तस्मात्प्राणविदः ॥ सर्वान्नानुज्ञा
तेऽर्थवादमात्रमिति सिद्धं ॥ श्रुतो तस्मादिति सुरापब्राह्मणस्यास्ये सुरासेकस्य मरणा
न्तप्रायश्चित्तसमतामित्यर्थः ॥ विहितत्वाच्चाश्रमकर्मापि ॥ सर्वापेक्षेत्यत्र स्वस्वाश्रमनित्य
कर्मणां तत्तज्ज्ञानसाधनत्वमुक्तं तानि नित्यकर्माणि मुमुक्षुणा कर्त्तव्यानि न वेति संदेहः
तत्र तमेतं वेदानुवचनेनेत्यादिना विद्यासाधनत्वनिर्णयात्र कर्त्तव्यानीति प्राप्तं ॥ पूर्वा स
र्वान्नावमतेः शास्त्रान्तरविरोधान्तस्तु ति तत्वत्यावज्जीवमित्यादि कर्मनित्यत्वशास्त्रविरो
धात् यज्ञादीनां ज्ञानसाधनत्वश्रुतिः ॥ स्तुतिमात्रं अन्यथानित्यत्वेनावश्यानुष्ठेयत्वं ज्ञानार्थ

सू॰त्र॰ तेनकाम्यत्वयावज्जीवानुष्ठेयत्वाभावश्चेत्येकस्मिन्कर्मणिविरुद्धधर्मद्वयंस्यादितिचेन्नेब्रूमः ३
८४ श्चमुमुक्षुणाप्याश्रमकर्मानुष्ठेयमेवयावज्जीवमग्निहोत्रमित्यादिनाविहितत्वादित्यर्थः॥ नन्वे
वंसतिविद्यासाधनत्वंकर्मणांनयुक्तंविरुद्धधर्मद्वयापत्तेरितिहियुक्तमित्यतआह॥ सहकारि
त्वेनच॥ विद्यासहकारित्वेनापिसत्त्वशुद्ध्यादिद्वाराविद्यासाधनत्वेनापिनित्यकर्माण्यनुष्ठे
यानियज्ञादिश्रुत्याविद्यार्थत्वेनविहितत्वादेवेत्यर्थः॥ यथैकस्यखादिरत्वस्यखादिरोयूपोभ
वतिखादिरंवीर्यकामस्येतिशास्त्राद्द्वयार्थत्वेननित्यत्वपुरुषार्थत्वेनानित्यत्वंचाविरु
द्धंतद्वदिहापिशास्त्रद्वयबलात्कर्मणांनित्यत्वंचाविरुद्धंसिद्धेहिवस्तुनिविरुद्धधर्मद्वययोगो
बाधकः॥ नतुसाध्येकर्मणिउभयथाप्यनुष्ठानसंभवात्॥ नचकाम्यत्वेयावज्जीवमितिनित्यत्व ८४
श्रुतिविरोधः॥ काम्यानुष्ठानेनैवनित्यसिद्धेरितितात्पर्यं। अत्रपूर्वपक्षेयज्ञादिश्रुतिःस्तुतिपरा

त्वेफलंसिद्धांतेविधायकत्वमितिबोध्यं॥ ननुज्ञानकाण्डस्थयज्ञादिश्रुत्याकर्मकाण्डस्थयज्ञाद्यनु
वादेनज्ञानसाधनत्वविधानेनयुक्तं॥ किंत्वपूर्वयज्ञादीनामेवप्रकरणभेदेनकर्मभेदस्याव
श्यकत्वादित्यतआह॥ सर्वथापितएवोभयलिंगात्॥ सर्वथापिनित्यत्वेनज्ञानार्थत्वेनचानु
ष्ठेयायज्ञादयोधर्मास्तएवनकर्मभेदोस्तिकुतः॥ उभयलिंगात्श्रुतिलिंगात्स्मृतिलिंगा
च्चेत्यर्थः॥ तथाहिश्रुतिलिंगंयज्ञेनविविदिषंतीतियज्ञादिशब्देनप्रसिद्धयज्ञाद्यनुवादेनवि
द्यासाधनत्वंविधीयते॥ ननुमासमग्निहोत्रंजुहुतीत्यत्रैवप्रसिद्धाग्निहोत्रात्कर्मांतरंतत्रहि
जुहुतीतिविधायकत्वात्स्यात्प्रकृतिभूतस्यजुहोतेरर्थोऽग्निहोत्रमितियुक्तस्तस्यप्रसिद्धा
ग्निहोत्राद्भेदः॥ जुहोतेःसाध्यहोमव्यक्तिवचनत्वेनसिद्धाग्निहोत्रपरामर्शायुपपत्तेः॥ अत्रए
तरेकार्थकाग्निहोत्रशब्दस्यनित्याग्निहोत्रानुवादकत्वंव्यक्तिवचनत्वादेवप्रकृतेतुनयज्ञादि

जुहोतिरेकार्थकः॥१॥ प्रकृतार्थत्वात्॥१॥

सू॰वृ॰ र्विद्याधायकास्त्यातन्नकृत्स्नर्थः ॥ विविदिषा पारावतत्वं तात्तस्मादारव्यातन्नकृत्यर्थाद्भिन्नार्थकैर्य ३
८५ ज्ञादिशब्दैः ॥ प्रसिद्धयज्ञाद्यनुवादेन विद्यासंयोगमात्रमपूर्वं विधीयत इति न कर्मभेदः ॥ अनभिम
तं चन्दर्शयति ॥ रागास्मृतिलिंगमपि उद्गुनाश्रितः कर्मफलं कार्यं कर्म करोति य इति ॥ प्रसिद्धमे
व कर्म ज्ञानार्थं दर्शयति ॥ तस्मान्न कर्मभेदः ॥ रागादिभिः क्लेशैः रेणहात्मानमनद्रपति यं ब्रह्मच
र्येणानुविंदन्त इत्याद्याः श्रुतिर्ब्रह्मचर्यादेराश्रमकर्मणो मनःशुद्धिद्वारा ज्ञानसाधनत्वेनाभ्या
त्मानमभिवं लिंगं दर्शयतीत्यर्थः ॥ तस्मात्सर्वेषामाश्रमनित्यकर्मणां ज्ञानार्थत्वमिति सिद्धं
अंतरा चापि तु तद्दृष्टेः ॥ अस्त्यंतराले वर्त्तमानो विधुरः तस्य किं ब्रह्मविद्यायामधिकारोऽस्ति न वे
ति संदेहे यज्ञादिस्तुत्या आश्रमकर्मणामेव ज्ञानसाधनत्वविधानादाश्रमिणामधिकारेपि
विधुरकृतकर्मणां ज्ञानहेतुत्वाभावान्नास्त्यधिकारस्यानाश्रम इति प्राप्तुदाहरणेनप्रापेद्ब्रूमः ८५

अंतराचापि अनाश्रममंतरा वर्त्तमानस्याप्यस्त्यधिकारः ॥ तस्य ब्रह्मविद्याधिकारस्यानाश्रमि
णो रैक्वादेः श्रुतौ स्मृतौ च दर्शनादित्यर्थः ॥ सर्वपक्षे अनाश्रमिणां जपादीनां विद्याहेतुत्वासि
द्धिः फलं सिद्धं तेन न क्षिपिदिरितिबोध्यं ॥ ननु रैक्वादीनां जन्मांतरकृतादपि कर्मणो विद्यासंभवात्त
तेषां विद्यादर्शनमाधुनिकानाश्रमिणो विद्याधिकारे लिंगं विद्याहेतुभूतकर्माभावादित्यत
आह ॥ विशेषानुग्रहश्च ॥ अनाश्रमिणोपि जपोपासनादेवताराधनादिभिः कर्मविशेषैर्ज्ञान
हेतुभिरस्ति विद्यायामनुग्रह इत्यर्थः ॥ तथा हि जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः इति स्म
तिर्ब्राह्मणमात्रसंबंधि तं जपस्य दर्शयति ॥ विधुरस्यापि विद्यायामधिकारं दर्शयति ॥ तस्माद
स्त्यनाश्रमिणोधिकारः ॥ ननु यदि विधुरस्यापि ब्राह्मणत्वसमात्रसंबंधिजपादिनैव विद्यामि
द्धिस्तदाश्रमित्वं व्यर्थमित्यत आह ॥ अतस्त्वितरज्ज्यायो लिंगाच्च ॥ अतस्त्वनाश्रमित्वादितरा

सू॰वृ॰ ८६ राश्रमित्वं बहुज्ञानसाधनसमानाधिकरणं व्याप्यः आश्रममेव विद्याहेतुः श्रुतिस्मृतिसिद्धत्वात्। नैनै ३
तिब्रह्मवित्पुण्यकृत्तैजसश्चेति॥ श्रुतौ पुण्यकृत्त्वविशेषणरूपश्रुतिलिंगाच्चेत्यर्थः। तेनज्ञानेनाति
ब्रह्मशब्देनब्रह्मवित्पुण्यकृत्साम्यमोक्षकर्मकृत्तेजस्विपरमात्मन्यात्मत्वेनवर्त्तत इति तैजसः। न
नुपुण्यकृत्त्वविशेषणादाश्रमित्वं ब्रह्मप्राप्तिहेतु तयाव्याप्यं गम्यते॥ नन्वाश्रमिणामपिक
र्मविद्याहेतुश्चेत्तु नमाश्रमात्सर्वाश्रमं प्राप्तस्य कर्म विद्याहेतुरिति किमु वाच्यमिति चेत् श्रुतिका
न्यायसंगत्याश्चाक्षेपे समाधत्ते॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाभावेभ्यः॥ कि
मुत्तमाश्रमात्पूर्वाश्रमं प्राप्तस्य कर्म विद्याहेतुर्वा न वेति संदेहः॥ पूर्वपक्षेप्याश्रमप्रच्युतस्या
श्रमिणः कर्मणो विद्याहेतुताभावेप्याश्रमव्यापकत्वं नस्यादिति फलं सिद्धांते प्रच्युतेरप्रामा
णिकत्वादाश्रमव्यापकत्वमिति मंतव्यं। तत्राश्रमात्प्रच्युतस्यापि कर्मत्ता नहेतुरिति प्राप्ते ८६

ब्रूमः। तद्भूतानस्य प्राप्तोत्तमाश्रमस्य तद्भावः॥ उत्तमाश्रमात्प्रच्युतिर्न कथमपि संभवतीति जै
मिनेरप्याचार्यस्य संमतं॥ अपिशब्देन स्वस्य बादरायणस्य संमतत्वमेवेति दर्शितं कुतः॥ अ
रण्यमियादित्यादिनियमात्॥ अरण्यशब्देनैकांतिकोपलक्षितउत्तमाश्रमउच्यते॥ तमि
याज्ञेदित्ययं शास्त्रमार्गः॥ तस्मात्तूत्तमाश्रमात्प्रत्यवरोहेदित्युपनिषद्वत्यमित्यर्थः॥ अ
तद्रूपशब्देन प्रत्यवरोहबोधकश्रुत्यभाव उच्यते॥ अभावशब्देन शिष्टाचाराभावस्ततोप्याश्र
मप्रत्यवरोहो नयुक्त इत्यर्थः॥ तस्मात्प्रच्युतेरप्रामाणिकत्वात्प्रच्युतस्य कर्म विद्याहेतुरिति
सिद्धं॥ एवं प्रत्यवरोहेऽशास्त्रीयत्वमुक्तं॥ यदि प्रमादात्प्रत्यवरोहो नैष्ठिकब्रह्मचारिणाकृ
तस्तस्य किं प्रायश्चित्तमस्ति न वेति संदेहेनास्तीति पूर्वपक्षमाह॥ नचाधिकारिकमपि पतना
नुमानात्तदयोगात्॥ पूर्वं प्रच्युतस्य कर्म न विद्याहेतुरित्युक्तमिदानीं प्रच्युतस्यापि कृतप्राय

स्त्र० श्चित्तस्य कर्मविद्याहेतुरिति सर्वसिद्धस्योत्सर्गस्यापवादः संगतिः ॥ सर्वपक्षे प्रच्युतस्योर्ध्व ३
८७ रेतसः प्रायश्चित्तमेवेति फलं सिद्धान्ते तु तत्प्रायश्चित्तस्य तस्य फलसिद्धिरिति मंतव्यं ब्रह्मचार्य
वकीर्णी नैर्ऋतं गर्दभमालभेतेति प्रायश्चित्तं श्रुतं तदधिकारलक्षणे स्ववकीर्णपरत्वस्य तद
दाधानस्याप्राप्तकालत्वादित्यत्र निर्णीतं च स्ववकीर्णशब्देन योनौ निषिक्तं रेत उच्यते तस्मा
त्तीत्यवकीर्णी तस्य यः पशुः स लौकिकाग्नौ होतव्यः यथोपनयकाले लौकिकाग्नौ होमस्त
दाधानस्य पत्नीपरिग्रहोत्तरकालत्वात्पूर्वमप्राप्तकालत्वादिति ॥ तदिदमधिकारलक्षणे
सिद्धं प्रायश्चित्तं माधिकारिकं तदपि नैष्ठिकस्यावकीर्णिनो नैवास्ति कुतः ॥ आरूढो नैष्ठिकं ध
र्मं यस्तु प्रच्यवते पुनः प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महेति पतनानुमानान्निवर्त्यपा ८७
नित्यश्रुत्यनुमापकस्मरणात्तस्य प्रायश्चित्तस्यायोगादित्यर्थः ॥ समाधत्ते ॥ उपकुर्वमपि नैके

भावमज्ञानवत्तदुक्तं ॥ नेदं महापातकं येनोक्तप्रायश्चित्ताभावः स्यात् ॥ अपि त्वेके ह्याचार्या उप
दसर्वकमेवेदं पातकं मन्यंते यद्गुरुदारादिभ्योन्यत्र गमनं तस्मादेतस्योपपातकत्वादुपकुर्वाणस्ये
व नैष्ठिकस्याप्युक्तप्रायश्चित्तमावमिच्छंति उभयोर्ब्रह्मचारित्वे सत्यवकीर्णित्वाविशेषात् ॥ अज्ञान
वत् ॥ यथा ब्रह्मचारिणो मधुमांसाशिनो व्रतलोपः पुनः संस्कारश्च तद्वत्प्रायश्चित्ताभावस्य शा
स्त्रप्रसिद्ध्यभावात् ॥ प्रायश्चित्तस्य च तन्मता प्रायश्चित्तं पुनर्युक्तमस्तु परं तु अस्मिन्नर्थे यववरा
हाधिकरणसंमतिमाह ॥ तदुक्तमिति ॥ यवमयश्चरुर्वाराही उपानहावुपमुंचत इत्यत्र यववरा
हशब्दाभ्यां किं प्रियंगुरुकृष्णशकुन्योर्ग्रहणं उत दीर्घशूकसूकरयोरिति संदेहे उभयत्र प्रयोग
साम्याद्विकल्प इति ॥ प्राप्ते प्रियंगुरुकृष्णशकुन्योः शास्त्रप्रसिद्ध्यभावाद्दीर्घशूकसूकरयोश्च व
राहं गावोऽनुधावंतीत्यादिशास्त्रप्रसिद्धिसत्त्वात्तयोरेव ग्रहणमिति प्रमाणलक्षणे सिद्धांत

सूत्र० तेन येहापीत्यर्थः ॥ तस्मात्प्रायश्चित्तं न यच्छामीति निःस्मृतिः । कृतप्रायश्चित्तेनाप्यवकीर्णिना स ३
७८ ह व्यवहाराभावे यत्न गौरवं सद्भिः कर्तव्यमित्येतत्परेत्यदोषः ॥ वहिस्तु तु यथापि स्मृतेराचाराच्च
कृतप्रायश्चित्तेन सह शिष्टाचाररूपं कर्म किं विद्यासाधनं न वेति संदेहे प्रायुक्तप्रायश्चित्तेनै
व तस्य स्मृत्ता विद्यासाधनमिति पूर्वसिद्धहेतुमुपजीव्य पूर्वपक्षे सिद्धान्तः ॥ ऊर्ध्वरेतसां साम
मात्त्वच्युतिर्महापातकमुपपातकं वास्तु उभयथापि तेः कृतप्रायश्चित्तात्वपि शिष्टैर्बहिष्का
र्तव्याः ॥ प्रायश्चित्तं न यच्छामि च्चारूढपतितं विप्रं ब्रह्मानां प्रायणो चरेदित्यादिनिंदास्मृतेः ॥ शि
ष्टाचाराच्च न ह्यवकीर्णिना सह शिष्टा नामध्ययनाद्याचारोऽस्ति तस्मात्प्रायश्चित्तेन परलोक
सिद्धे नापि तेन सह कृतस्याध्ययनादिकं न विद्यासाधनमिति फलितं ॥ स्वामिनः फलश्रुतेरित्यात्रेयः ७८
किमंगाश्रितोपासनानि यजमानकर्तृकाणि स्विदास्विदृत्विक्कर्तृकाणीति संदेहे यः कृतप्रायश्चि

त्तः ॥ स संव्यवहार्य इत्युत्सर्गस्य निंदास्मृत्याबाधवदिहाप्यंगावबद्धेष्वंगाश्रितोपास्तिकर्तृकत
मित्युत्सर्गस्य वर्षति इहास्मै य उपास्तेऽस्त्यादिफलश्रुत्यापोयत्फलभोक्ता स एव तस्मिन्वकर्म
णि कर्त्रेति न्यायोपबृंहितयाबाधेन फलभाजो यजमानस्यैव कर्तृत्वमिति दृष्टांतेन पूर्वपक्षमा
ह ॥ स्वामिन इति ॥ स्वामिनो यजमानस्यैवांगाश्रितोपास्तिषु कर्तृत्वमित्यात्रेय आचार्यो मन्यते
कर्मांगेन पंचविधं साम्निर्वृष्टपासकस्य वर्षतिर्हास्मै इत्यादि फलश्रवणादित्यर्थः ॥ तस्मात्फ
लभाजो यजमानस्यैव कर्तृत्वमिति पादे समाधत्ते ॥ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीय
ते ॥ अंगोपासनमार्त्विज्यं ऋत्विक्कर्तृकमेवेत्यौडुलोमिराचार्यो मन्यते ॥ तस्मै हि सांगाय कर्मणे
ऋत्विक् परिक्रीयते यजमानेन तथा च यजमानगामिफलकमप्यंगोपासनं यजमानेन स्वर्गादि
फलकं कर्मार्थं परिक्रीतऋत्विक्कर्तृकमेव कर्मांगाध्यापनाश्रितगोदोहनवदिति न फलश्रुति

विशेषः ॥ किंच ॥ तं ह प्रत्यवसुमनीयारण्यं प्राणहस्त्या विदितावक नामाकपिः सविरागासुजातावभ्र
वेति श्रुतिवाक्यशेषात् उपासनस्य र्त्विक्कर्तृकत्वमेवेति ॥ अथ तस्य तेन फलानामुपासनानाम्
त्विक्कर्तृकत्वेपि यजमानगामि फलकत्वोक्तेरविरोध संगतिः ॥ सर्वपक्षे कर्तृत्वभोक्तृत्वयोरेका
धिकरणपसिद्धांते ऋत्विजः कर्तृत्वं स्वाम्यधीनमिति ॥ परंपरयैकाधिकरणमिति मंतव्यं ॥ सह
कार्यंतरविधिपक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ बृहदारण्यके श्रूयते ॥ तस्माद्ब्राह्मणः पांडित्यं
निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पांडित्यं च निर्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्म
ण स्थात्मा नेविदितइति यस्मात्सर्वे ब्राह्मणस्यात्मा नेति दितावुक्ता द्येषणाभ्यो ब्युत्थाय भिक्षाच
र्यं चरंति तस्मादधुनातनो ब्राह्मणः पंडाध्ययनजन्यज्ञानात् ब्रह्मधी स्तद्वान् पंडितस्तस्य भावः पां
डित्यं श्रवणं तन्निर्विद्य निःशेषेण लब्ध्वा बाल्येन ज्ञानबलभावेन मननेन युक्तांतःकरणत्वेन वास्था ३

८५

तुमिच्छेत् तद्व्यंलब्ध्वा अथ श्रवणमननानंतरं मुनिर्मननशीलो निदिध्यासनपरः स्यात् अमौनं
श्रवणमनने मौनं च निदिध्यासनं लब्ध्वा कृतयत्नस्य ब्रह्मसाक्षात्कारहेतुत्वात् ॥ तत्रपानंतरं ब्रह्मा
वगच्छतीति ब्राह्मणः ॥ निदिध्यासनपरः स्यात् अमौनं श्रवणमनने मौनं तत्साक्षात्कृतब्रह्म भ
वतीत्यर्थः ॥ तत्र संशयः ॥ किमत्र निदिध्यासनाख्यं मौनं विधीयते न वेति सर्वपक्षे मौनस्यानुष्ठेयता
तासिद्धिः ॥ सिद्धांते तानंतस्यंतरंगस्य तस्यानुष्ठेयत्वसिद्धिरिति बोध्यं ॥ तद्ध तं ह बको दाल्भ्यो
विदांचकार स ह नैमिषीयानामुद्गाता बभूवेति वाक्यशेषादुद्गीथोपासकस्य बकनाम्नः ऋत्वि
क्कबोधकात् अंगोपासनस्य र्त्विक्कर्मत्ववदिहाप्यथ ब्राह्मण इति वाक्यशेषाद्विधिविधुरादत्र मु
निरित्यत्र न मौनविधिरिति दृष्टांतेन प्राप्ते ब्रूमः ॥ सहकार्यंतरविधिरिति ॥ फलभूतसाक्षात्कारे श्र
वणाद्यपेक्षया सहकार्यंतरस्य मौनस्य निदिध्यासनाख्यस्य विधिरित्यर्थः ॥ ननु गार्हस्थ्यमात्रा

नित्यत्वात्स्नातः ५ उपनिषद्वाक्ये ४ लौकिकभेदस्दर्शनं ॥

सूत्र० ९० र्यकृत्स्नंमौनंवानप्रस्थमित्यत्रमौनशब्दस्यपारिव्राज्यप्रयोगात्कथमत्रमौनंनिदिध्यासनंस्यादतआ ३
ह॥तृतीयमिति॥श्रवणमननद्वयापेक्षयातृतीयंनिदिध्यासनमेवात्रमौनंविधेयमित्यर्थः॥ते
तराश्रमसमभिव्याहारबलान्निदिध्यासनप्रधानंपारिव्राज्यंमौनशब्देनलक्ष्यतइतिभावः॥क
स्यायंमौनविधिस्तत्राह॥तद्वतइति॥परोक्षज्ञानवतःसर्ववाक्येपक्षेतस्यसन्न्यासिनइत्यर्थः॥ना
नुसत्यपिवस्तुसाक्षात्कारेनिदिध्यासनस्यप्राप्तत्वान्नविधेयत्वमतआह॥पक्षेणेति॥यस्मिन्प
क्षेभेददर्शनप्राप्तिस्तस्मिन्पक्षेऽप्राप्तत्वाद्विधिरर्थवानित्यर्थः॥ननुब्रह्मपरेवाक्येकथंमौन
विधिरित्याशंक्यदृष्टांतमाह॥विध्यादिवदिति॥यथादर्शपूर्णमासप्रधानपरेवाक्येऽन्वाधा
नादेरंगजातस्यविधिस्तद्वदित्यर्थः॥प्रधानमारभ्यांगपर्यंतोविधिस्तदादिर्विध्यादिः॥प्रधानमि
तिपावत्॥इतरावत्प्रयाजादिर्विध्यंतस्तुच्यतेब्राह्मणस्यफलत्वाद्विधिकल्पनाविफलेतिभा ९०

वः॥ननुश्रवणादिप्रधानोपपद्यतेसंन्यासः॥कथंतर्हिछांदोग्येगृहिणोपसंहारः॥अभिसमा
वृत्यकुटुंबइत्यत्रतेनहितदतिरिक्तःसंन्यासोनास्तीतिद्योत्यतइत्याह॥कृत्स्नभावात्तुगृहिणोप
संहारः॥गृहिणःकर्मबाहुल्यात्तेनोपसंहारोनतुसंन्यासाभावादित्यर्थः॥कृत्स्नाश्रमकर्मणां॥
संन्यासादीनामप्यसंभवंगृहिणिभावादित्यक्षरार्थः॥एवंसंन्यासगार्हस्थ्याश्रमद्वयोक्त्यामंद
बुद्धेरितराश्रमाभावशंकास्यात्तन्निरासार्थमाह॥मौनवदितरेषामप्युपदेशात्॥मौनशब्दे
नसंन्यासगार्हस्थ्ययोर्ग्रहस्तद्वदितरयोरपिब्रह्मचर्यवानप्रस्थयोस्तपएवद्वितीयोब्रह्मचा
र्याचार्यकुलवासीतृतीयइत्यादावुपदेशादनुष्ठेयत्वमित्यर्थः॥बहुवचनेनत्ववांतरभेदापेक्षा॥
पागायत्रोब्राह्मप्राजापत्योबृहन्नितिब्रह्मचारिभेदाः॥फेनपौदुंबरोवैखानसोबालखिल्य
श्चेतिवानप्रस्थभेदाइति॥अनाविष्कुर्वन्नन्वयात्॥सर्वोपाहृतवाक्येमौनंविधेयमित्युक्त्वातत्र

सूवृ० २८१ त्वं बाल्यं किमित्यपेक्षायां तत्स्वरूपमत्र निरूप्यत इति संगतिः ॥ तत्र किं बाल्यशब्देन बाल्यस्य- ३
कर्मतिरस्त्वमत्वादिकमुच्यते उत गर्वप्रकृतेंद्रियताद्यभावरूपभावशुद्धिरिति संशयः ॥ सर्वप
क्षेष्वर्थस्य ज्ञानोगतेर्नानुष्ठानं फलं सिद्धांते ऽनंतरस्येपि बोध्यं तत्र प्रसिद्धिबलान्निरस्त्वमत्वादि
कं बाल्यमिति प्राप्ते ब्रूमः ॥ उक्तभावशुद्धिरेवात्र बाल्यं विद्यांगत्वात्सर्वस्य बाल्यकर्मणो विद्यावि
रोधित्वादिति तद्दिक्मोहः ॥ अनाविष्कुर्वन्निति व्यासादिभिरात्मानं परार्थमविज्ञापयन् गर्वादि
रहितः स्यादित्युपदिष्टेरिति बाल्येन तिष्ठासेदित्यस्यार्थः ॥ कुतः अन्वयात् अस्य वाक्यस्य विद्यां-
गान्वयस्यैवमेव संभवादित्यर्थः ॥ एवं यज्ञादिकमारभ्य बाल्यांतं विद्याहेतुमुक्त्वा तत्फलं-
विद्यायाः कालमाह ॥ ऐहिकमप्यप्रस्तुतप्रतिबंधे तद्दर्शनात् ॥ किमिहैव जन्मनि विद्योत्प
त्तिरुत कदाचिदमुत्रापीति संशयः ॥ सर्वपक्षेष्वश्रवणादेर्विद्याहेतुता नियमः ॥ विद्याया ऐहिक २८१

विद्यायाः अविरुद्धं विद्याविरुद्धं विफलं यस्य तत्तथा ॥

तेन कश्चिद्दर्शनादिति सिद्धांतेनानंतरं प्रतिबद्ध श्रवणादेस्तन्नियम इति मंतव्यं ॥ तत्रेहैव जन्मनि-
विद्याजन्मास्त्विति कामनया श्रवणादिषु प्रवृत्तेरैहिकमेव विद्याजन्मेति प्राप्ते ब्रूमः ॥ विद्याऽ-
विरुद्ध फलकं देशकालविशेषापेक्षं फलोन्मुखं कर्म प्रस्तुतं तेन प्रतिबंधाभावे सत्यैहिकं वि
द्याजन्म सति श्रवणादिपौष्कल्ये भवत्येव विद्याफलप्रसवत्वसति तु प्रतिबंधे अमुत्रापीति-
अनियम एव न त्विहैवेति नियमः ॥ कुतः तद्दर्शनात् निबंधप्रतिबंधाभ्यामनियमस्य श्रुतौ द
र्शनात् ॥ तथा हि श्रुतिर्जन्मांतरानुष्ठितश्रवणादेः फलं जन्मांतरे दर्शयति गर्भस्थ एव वामदे
देवः ॥ प्रतिबुबुधे ब्रह्मभावमिति सत्यपि तु प्रतिबंधे विद्यादुर्लभेत्यप्याह श्रुतिः ॥ श्रवणायापि
बहुभिर्यो न लभ्यः ॥ शृण्वंतोपि बहवो यन्न विद्युः ॥ आश्चर्यो ऽस्य वक्ता कुशलो ऽस्य लब्धाऽऽश्च-
र्यो ज्ञाता कुशलानुशिष्ट इति ॥ आत्मश्रवणमपि बहूनां दुर्लभं कुतस्त्विमाग्याद्युश्रवणानां

स्त्र॰ पितत्फलं ज्ञानेतुर्लभं तत्र हेतुराश्चर्य इति ॥ यथा परस्यात्मनो वक्ताश्चाश्चर्येऽभिहितवदेव संभवति ३
१८२ सम्यगाचार्यलाभे पि तस्याच्छुतास्यात्मनो लक्ष्मसाक्षात्कर्ताश्चर्यः ॥ निष्कुसाक्षात्कारः कु
शलेनाचार्येणानुशिष्टो पि ज्ञाशास्त्रेणास्यात्मनः परोक्षत्वेन ज्ञाताप्याश्चर्यरोत्यर्थः ॥ तस्मा
दनियमो विद्याजन्मन इति सिद्धं ॥ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः
यथा विद्यायाः श्रवणादिसाधनोत्कर्षापकर्षाभ्यामैहिकामुष्मिकत्वरूपोपचयापचयवत्
नियम एवं तत्फले मुक्तावुपचयापचयवत्नियमो स्ति न वेति संदेहः सर्वे पक्षे स्वर्गादिवत्क
र्मसाध्यत्वं मोक्षस्येत्याशङ्क्याधिकरणासिद्धिः फलं सिद्धं तेन तस्य निर्विशेषस्य ज्ञानैका
जन्यत्वमिति तत्सिद्धिरिति गंतव्यं ॥ तत्र सर्वोक्तविद्या दृष्टांतेन फलत्वेन हेतुना मोक्षस्यसा
तिशयत्वनियमे प्राप्ते ब्रूमः ॥ एवं विद्यावन्मुक्तिरूपफलस्यानियमः ॥ निर्विशेषत्वमेव कुतः १८२

तदवस्थावधृतेः मुक्तावस्थाया निर्विशेषब्रह्मरूपत्वेन ब्रह्मवेद ब्रह्मैव भवतीत्यादिश्रुतिवसार
णादित्यर्थः ॥ तथा च फलत्वहेतुकानुमानस्यागमबाधः ॥ नहि साक्षात्काररूपविद्याया
मुपचयापचयवत्त्वमस्ति न हि सर्वान्तरभाविवस्तुसाक्षात्कारयोः स्थिरतानिरतमतिशयता
निकस्थिरस्वरूपैति ॥ तस्मान्निर्विशेषस्य ब्रह्मसाक्षात्कारस्यैकरूपत्वात्तद्व्यापो मोक्षो नि
रतिशयानंदात्मक एकरूप एवेति सिद्धं ॥ अभ्यासो ध्यायसमाप्तिद्योतनार्थः ॥ ॥ इ
ति श्रीब्रह्मसूत्रवृत्तौ चतुर्थाध्यायस्य चतुर्थः पादः ॥ ४ ॥ कल्याणमस्तु ॥ श्रीरस्तु ॥
शुभं भवतु ॥ ४ ॥

॥ ॥इतितृतीयाध्यायसमाप्तः॥३॥ ॥

सूत्र० १ ॥ श्रीगणेशाय नमः ॥ पूर्वाध्यायांत्याधिकरणे मोक्षे विशेषनियमाभाव उक्तः संप्रति मोक्षहे- च० शा० टी० ४
तुज्ञानसाधनेषु श्रवणादिष्वावृत्त्यनुष्ठाननियममाह ॥ आवृत्तिरसकृदुपदेशात् ॥ पूर्वस्मिन्न
ध्याये परापरविद्यासु साधनविषयो विचारः कृतः ॥ अत्र तत्फलविचारः क्रियते ॥ अनयोरध्याय
योर्हेतुमद्भावः ॥ संगतिः ॥ अत्र प्रथमपादे श्रवणाद्यावृत्त्या निर्गुणमुपासनया सगुणं वा ब्रह्म सा
क्षात्कुर्वतः प्रारब्धकर्मातिरिक्तपुण्यपापनिवृत्तिरूपा जीवतो मुक्तिः प्रतिपाद्यते ॥ द्वितीयपादे
म्रियमाणस्योत्क्रांतिः तृतीयपादे सगुणविदो मृतस्योत्तरो मार्गः प्रसंगान्निरूप्यते ॥ चतुर्थपा
दे पूर्वार्धेन निर्गुणब्रह्मविदो विदेहकैवल्यं ॥ उत्तरार्धेन सगुणब्रह्मविदो ब्रह्मलोकप्राप्तिश्च निरू
प्यते इति तद्विचारात्मकाधिकरणानां तत्त्याग संगतिर्बोध्या तदुक्तं ॥ चतुर्थे जीवतो मुक्तिरुत्क्रां १
तिर्गतिरुत्तरा ॥ ब्रह्मप्राप्तिर्ब्रह्मलोकाविति पादार्थसंग्रह इति ॥ पूर्वाध्याये साक्षात्कारफलकेषु साधा

नविचारः कृतः इदानीं फलार्थापत्त्यालभ्यस्यावृत्त्यादेर्विचारस्तृतीयशेषत्वाद्यासोपाधिकरणपर्यं
तं क्रियते ॥ तत्र साक्षात्कारसाधनत्वेन श्रुतश्रवणादिषु संशयः ॥ किं सकृदेव श्रवणादि कर्तव्यमुत श्र
वणाद्यावृत्तिरिति पूर्वपक्षे श्रवणादीनामदृष्टार्थत्वं फलं सिद्धांते यावत्फलमावृत्तिमापत्तादवघाता
दिवद्दृष्टार्थत्वमिति बोध्यं तत्रैकवारमेव श्रवणादिकं प्रयाजादिवत्कर्तव्यमिति प्राप्ते ब्रूमः श्रव
णाद्यावृत्तिरेव कर्तव्या कुतः श्रोतव्यो मंतव्यो निदिध्यासितव्य इत्यसकृदुपदेशात् ॥ नन्वत्र श्रव-
णाद्यावृत्तिर्न श्रूयते इति चेत्तत्रोच्यते ॥ साक्षात्कारस्यैवाविद्यानिवर्तनक्षमत्वेनाहिविभ्रमादौ दृ-
ष्टत्वात्तद्रूपवस्तुसाक्षात्कारस्य चावृत्तिविशिष्टश्रवणादिसाध्यत्वस्य षड्जादिस्वरे दृष्टत्वाद्दृष्टद्वि
तीयात्तस्य श्रवणादावपि संसारानर्थमूलाविद्यानिवर्तनक्षमसाक्षात्कारायावृत्तिः कर्तव्यादृष्टसंभ
वत्सदृष्टकल्पनानुपपत्तेरिति तात्पर्यं ॥ एवमुपास्यसाक्षात्कारफलकेषूपासनेष्वावृत्तिर्बोध्या

सूत्र० २ दृष्टार्थत्वात् वेदनमुपासीतेत्यावृत्तिश्रवणाच्च ॥ प्रत्ययप्रवाहस्यैवोपासनत्वात् ॥ वेदेत्यस्याप्युपास व० ४
नार्थकत्वात् तथा हि संवर्गविद्यायां विदिनोपक्रम्योपास्तिनोपसंहारो दृश्यते दृश्यते ॥ यस्तद्वेद य
त्स वेद स मयैतदुक्त इत्युपक्रम्यानु म एतां भगवो देवतां शाधि यां देवतामुपास्स इत्युपसंहारात्
यत्सरैक्वो वेद प्रमाणं तत्त्वं स सर्वं कर्मफलं प्राप्नोतीत्येवं रैक्वादन्योपि यस्तदैक्वविद्यं वेद सोपि त
थैव फलं प्राप्नोतीति स एवंभूतो रैक्वो मयैतदुक्त इत्यस्युक्त इति हंसप्रतिहंसांतरवचनं हे भगवो रै
क्व यां देवतां त्वमुपास्से त्वां मे तां मे नु शाधि शिक्षयेत्यापयेति ज्ञानश्रुतिवचनं तस्मात् साक्षात्
कारसाधनेष्वावृत्तिसिद्धिः ॥ लिंगाच्च ॥ तथा हि उक्थोपासनं प्रकृत्यादित्य उद्गीथ इत्युपासनमे
कपुत्रतादोषेणापोद्य रश्मींस्त्वं पर्यावर्तयादिति ॥ रश्मिबहुत्वोपासनं बहुपुत्रतायै विदधत्
कं प्रत्ययावृत्तिं सूचयति ॥ तस्मात् साक्षात्कारसाधनेष्वावृत्तिसिद्धिः ॥ देहतत्त्वं रश्मीनादित्यं २

च प्रत्येकं पर्यावर्तयात् तत्कारमंतर्भाव्य पर्यावर्तयतादिति मध्यमपुरुषैकवचनं उपास्वेत्यर्थः
आत्मेति तूपगच्छंति ग्राहयंति च ॥ पूर्वस्मिन् श्रवणमनननिदिध्यासनामावृत्तिरुक्ता तामुपजीव्य संदि
ह्यते ॥ किं निदिध्यासनावृत्तिकाले प्रत्यक्तेनैश्वरध्यानं कर्तव्यमुत भिन्नत्वेनेति पूर्वपक्षे श्रुतानां
त्मवेदपराणां गौणार्थत्वं सिद्धांते मुख्यार्थत्वं सिद्धान्यप्यभेदश्रुतीनां प्रत्यक्षादिविरोधपरिहारा
त्मकमिदमधिकरणमविरोधाध्यायसंगतं तथापि महावाक्यार्थविरोधपरिहारस्य समन्वया
ध्यायांतरंगत्वादेतस्यावृत्तिसंगतिः तत्राभेदस्य प्रत्यक्षेण संवादित्वात् किंचिज्ज्ञत्वादिविरुद्धधर्मत्वलिं
गकानुमानेन च बाधात् भिन्नत्वेन ध्यानमिति प्राप्ते ब्रूमः ॥ आत्मेत्येवेश्वरो ध्येयः तथा हि ॥ जाबाला आत्म
त्वेनेश्वरमुपगच्छंति त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसीति तथा ग्राहयंति नेश्वरमात्मत्वे
न तत्त्वमस्यादिवाक्यानि न च तेषां नामब्रह्मेत्यादिवद्गौणार्थत्वं मतिमुख्यार्थत्वसंभवे गौणत्वायो

सूत्र० गात्॥ नचप्रत्यक्षादिविरोधादसंभवः तेषांमिथ्याभेदगोचरत्वेनपारमार्थिकाभेदविरोधित्वाभा च० ४
३ वादितिभावः॥ नप्रतीकेनहिसः॥ मनोब्रह्मेत्युपासीतनामब्रह्मेत्यादिषुप्रतीकोपासनेषुसंशयः
किंप्रतीकेमनआदावात्मबुद्धिःकर्त्तव्यानवेतिपूर्वपक्षेः प्रतीकोपास्तीनामहंग्रहोपास्तिभ्योवि
शेषासिद्धिः सिद्धांतेतुविशेषस्तिरिद्धितिबोध्यं॥ एतदारभ्याधिकरणत्रयस्यप्रासंगिकीपाद
संगतिः तत्रब्रह्मणःस्वाभिन्नत्वाद्यथात्मत्वेनबुद्धिरेवंप्रतीकस्यब्रह्मविकारत्वेनजीवाभिन्न
ब्रह्माभिन्नत्वादुपासकजीवात्मत्वबुद्धिःकार्येतिदृष्टांतेनप्राप्तेब्रूमः नप्रतीकेस्वात्मबुद्धिःकार्या
नहिसउपासकःस्वात्मत्वेनप्रतीकमनुभवति॥ स्वत्वायंविकल्पः किमनुभवबलात्प्रती
कस्यात्मत्वेनबुद्धिःकार्येतिमुतत्वात्वःस्वाहोस्विन्स्वाभिन्नब्रह्माभिन्नत्वाद्वानाद्यइत्युक्तंनहिसइति
नद्वितीयःस्वस्यब्रह्मणात्वंनतृतीयःप्रतीकस्यस्वरूपेणब्रह्माभिन्नत्वायोगात्इत्युक्तंसत्वबाधेचो ३

पासनाविध्यभावप्रसंगादितिभावः ब्रह्मदृष्टिरुत्कर्षात्॥ पूर्वोक्तप्रतीकोपासनेषुब्रह्मणिमन
आदिदृष्टिःकर्तव्याउतमनआदौब्रह्मदृष्टिरितिसंशयः पूर्वपक्षेतिकृष्टेउत्कृष्टबुद्धिःकर्त्तव्ये
तिन्यायानपेक्षासिद्धांतेतदपेक्षेतिमंतव्यं॥ एकविषयत्वमवांतरसंगतिः तत्रब्रह्मण्येवमनआदिद
ष्टिःब्रह्मणःशास्त्रान्येनोपास्यत्वोपपत्तेयेकर्तृत्वेतिप्राप्तेब्रूमः मनआदावेवब्रह्मदृष्टिःकार्याब्रह्म
णउत्कर्षात्उत्कृष्टदृष्टेर्निकृष्टेकृतायांनिकृष्टस्योत्कृष्टताभवतितथाऽमात्येराजबुद्धिःफला
यनतुराज्ञिअमात्यबुद्धिः नचैवंब्रह्मणःशास्त्रान्याभावःइष्टत्वादितिभावः॥ आदित्यादिमतयश्चा
ङ्गउपपत्तेः॥ यएवासौतपतितमुद्गीथमुपासीतेत्यादिष्वंगाश्रितोपासनानिसंतितत्रसंश
यः॥ किमादित्यादिषूद्गीथादिदृष्टिःकर्त्तव्योतोद्गीथादिष्वादित्यादिदृष्टिरिति॥ तत्रोद्गी
थादीनांकर्मरूपाणांफलहेतुत्वेनोत्कृष्टत्वादादित्यादीनांसिद्धरूपाणांतदभावेननिकृष्ट

फलाभावेन१

सू॰ ४ त्वात्पूर्वन्यायेनादित्यादिषूद्गीथादिदृष्टिरितिदृष्टांतेन प्राप्ते ब्रूमः उद्गीथादौ कर्माङ्गेष्वादित्या च॰ ४
दिमतय एव कर्तव्याः कुतः उपपत्तेः ॥ यथा प्रोक्षणादिना व्रीह्यादिसंस्कृतेषु प्रकृतकर्मापूर्व
मुत्पद्यते तथा कर्माङ्गेषूद्गीथादिष्वादित्यादिदृष्टिभिः संस्कृतेषु प्रकृतस्य कर्मणः फलाधि
क्यलक्षणस्समृद्धिर्भवतीत्यन्यथा नभवेदादित्यादिनामनंगत्वात्तथान्यकर्मसमृद्धिरूपफ
लोपपत्तेरंगेष्वनंगमतिरित्यर्थः ॥ आदित्यादावुद्गीथादिमतिपक्षे फलाप्रसिद्धेः नोद्गीथादीना
मुत्कर्ष इति भावः ॥ आसीनः संभवात् ॥ किं कर्माङ्गाश्रितासूपासनासु तिष्ठन्नासीनः शयानो
वा कुर्यादित्यनियम उतासीन एवेति नियम इति संशयः ॥ पूर्वोत्तरपक्षयोः पूर्वोत्तरकोटिसि
द्धिरेव फलं निदिध्यासनादौ विद्यासाधने आसननियमोक्तेः पादसंगतिः ॥ तत्र पूर्वोक्तकर्मा
गोपासने विद्यानियम इति प्राप्ते ब्रूमः आसीन एव कर्माङ्गोपासनानि कुर्वीत कुतः ॥ समा ४

नप्रत्ययप्रवाहात्मकोपासनमनस्यासीन एवोपासके संभवान्नहि तिष्ठतः शुंभच्छपासनं संभवा
ति शरीरस्थैर्यगोयत्नापेक्षायां चित्तविक्षेपात् नापि शयानस्य निद्राप्रसंगात् तत्त्वंगोपासनानां त्वंग
पारतंत्र्यात्कर्तृत्वानियम इति ॥ ध्यानाच्च ॥ उपासनस्य ध्यायत्यर्थध्यानरूपत्वाद्ध्यायते आसी
नेष्ववकादिषूकविषयदृष्टप्रयोगादासीन एवोपासीतेत्यर्थः ॥ अचलत्वं चापेक्ष्य ॥ किंच ॥ ध्याय
तीव पृथिवीत्यत्र श्रुतौ पृथिव्याश्चलत्वमपेक्ष्य ध्यानोपचारो दृष्टः तस्मादपि लिंगादासीन एवोपा
सीत ॥ स्मरंति च ॥ शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मन इत्यादिना बाह्यासनविधानस्मर
णाच्चासीन एवोपासीत ॥ यत्रायोगशास्त्रे पद्मकादीनां शरीरासनानां स्मरणादासीन एवो
पासीतेत्यर्थः ॥ यत्रैकाग्रता तत्राविशेषात् ॥ दिग्देशकालेषु संशयः ॥ किं कर्माङ्गाश्रितोपासनेषु
दिगादिनियमोऽस्ति न वेति तेषामासननियमवदस्ति नियम इति प्राप्ते ब्रूमः ॥ प्राच्यादिदि

ड्ःयमः प्रदीपादिकालनियमः । नदीतीरादिदेशनियमो वा नास्ति । कुतः यत्र दिशि देशे काले वा चि
त्तस्यैकाग्रताप्रत्ययप्रवाहोऽस्त्वयं तत्रोपासीत दिग्गादिविशेषाश्रवणादित्यर्थः ॥ यच्चोपासनदे
ष्टाया एकाग्रतायाः सर्वत्राविशेषादित्यर्थः । समेशुचौ वा शर्करावह्निवालुकाविवर्जिते शब्दजला
श्रयादिभिः मनोनुकूले न तु चक्षुःपीडने गुहानिवाताश्रयणे प्रयोजयेदिति श्रुतिरपि चित्तस्यै
काग्र्यसंपादके देशे उपासीतेति दर्शयति शर्करासूक्ष्मपाषाणाः जलाश्रयवर्जनं शीतनिवृ
त्त्यर्थं चक्षुःपीडनं मशकादिकं तस्मादुपासने दिग्गादिनियमो नास्तीति सिद्धं ॥ आप्रायणात्त
त्रापि हि दृष्टं ॥ उपास्यसाक्षात्काररूपफलहेतुषूपासनेषु चाहंग्रहनामकेषु संशयः ।
किं कदाचिदुपासनं कृत्वोपरमेत उत यावज्जीवमुपासीतेति पूर्वपक्षः । कदाचित्कृतप्रत्य
यावृत्तेरदृष्टद्वारा मृतिकाले ध्येयबुद्धिहेतुत्वं सिद्धं तेधारावाहिकोपासनस्य साक्षाद्देवतै
ध्येयबुद्धि

हेतुत्वमिति विभागः ॥ तत्र देशादिनियमाश्रवणात्तदभाववद्यावज्जीवमुपासनाऽश्रवणात्तदभाव
इति प्राप्ते ब्रूमः ॥ आप्रायणात् देहपातपर्यंतमुपासीत हि यतस्तत्रापि मरणकालेपि स यावत्क्र
तुरस्माल्लोकात्प्रैतीति श्रुत्या ध्येयप्रत्ययानुवर्तनं दृष्टं न च तद्दृष्टसाध्यं दृष्टे संभवत्यदृष्टक
ल्पनानुपपत्तेः श्रुतौ सर्वनामार्थमुपासकः क्रतुरुपासनं सदा तद्भावभावित इति श्रुतिश्च यावा
ज्जीवमुपासनं दर्शयति । तस्मादहंग्रहोपास्तयो यावज्जीवमनुष्ठेया इति सिद्धं ॥ एवं ज्ञानसाध
नानुष्ठाने यत्नाधिक्यार्थं फलाध्यायेपि साधनानुष्ठानक्रमं विचार्य फलाध्यायस्यां फलचिंतामु
पक्रमते ॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ तथा चास्य फलविचारप्र
ति बंधसाधनजिज्ञासाभावरूपा वृत्तसंगतिर्लब्धा किं ब्रह्मविद्यायामुत्पन्नायां विदुषो भावि
ष्यत्पापाऽसंबंधपूर्वपापविनाशौ भवतो न वेति संदेहः ॥ पूर्वपक्षे सत्यामपि विद्यायां पाप

सू०वृ०
६

फलभोगानंतरं विद्यातो मुक्तिः सिद्धांते विद्योत्पत्त्यनंतरमेव मुक्तिरिति बोध्यं तत्र फलभोगं वि
ना नास्ति विद्यया पापनाश इति प्राप्ते ब्रूमः । तदधिगमे ब्रह्मसाक्षात्कारे सति उत्तरपूर्वाघयो
रश्लेषविनाशौ भवत एव कुतः तयोर्विदुषि श्रुत्या व्यपदेशात् यथा पुष्करपलाश आपो न श्लि
ष्यंते एवमेवंविदि पापं कर्म न श्लिष्यत इति श्रुतिर्विद्यात उत्तरस्य पापस्याश्लेषं दर्शयति । तद्य
थेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंत इति श्रुतिर्विद्यातः पूर्वस्य पाप
स्य विनाशं व्यपदिशति एवं निर्गुणविदोपि पापलयं व्यपदिशति क्षीयंते चास्य कर्माणि तस्मि
न्दृष्टे परावरे इत्यादिका श्रुतिस्तस्मात् ब्रह्मविद्यावतः पूर्वोत्तरपापासंबंध इति सिद्धं । इत
रस्याप्येवमसंश्लेषः पाते तु । पूर्वं ब्रह्मविद्यातः पापनाशासंबंधावुक्तौ तत्पुण्यस्यापि ना
शासंबंधौ भवेतां न वेति संदेहे । पुण्यपत्तज्ज्ञानयोः शास्त्रीयत्वेनाग्निहोत्रदर्शयोरिवविरोधाभावात् वृ० ४

६

भवत इत्याधिकाशंकायां सूत्रं न्यायमतिदिशति । इतरस्यापि पापादितरस्य पुण्यस्याप्येवमेवमघवद
श्लेषो विनाशश्च ज्ञानिनो भवतः उभे उ हैवैष एते तरतीत्यादिश्रुतिषु पापासंबंधवत्पुण्यासंबंधस्या
पि व्यपदेशात् सुकृतादुश्लेषोप्यर्थः । एष ब्रह्मसाक्षात्कारवान् सूत्रे तु शब्दोऽवधारणार्थः । एवं ब्रह्म
साक्षात्कारवतः पुरुषस्येतरस्य पुण्यपापयोरसंबंधे तीरभावाद्देहपाते मुक्तिरवश्यं भवत्येवेत्या
धिकरणांशस्य फलमुक्तं । अग्निहोत्रदर्शयोरविरुद्धफलवत्त्वमुपाधिः । अस्यातिदेशत्वान्न पृथ
क्संगत्याद्यपेक्षा । अनारब्धकार्ये एव तु पूर्वे तदवधेः । पूर्वं ज्ञानात्कर्मक्षय उक्तस्तस्य प्रारब्धक
र्मेतिरिक्तविषयत्वेनाभाववादात्संगतिः । ज्ञानजन्यकर्मक्षयः किमविशेषेण कर्ममात्रस्य
भवत्युत प्रारब्धकर्मव्यतिरिक्तस्येति संशयः । पूर्वपक्षे जीवन्मुक्त्यसिद्धिः । फलं सिद्धांते तत्सि
द्धिरिति बोध्यं । तत्र क्षीयंते चास्य कर्माण्यविशेषेण श्रवणात्कर्ममात्रस्य क्षय इति प्राप्ते

सूत्र० ८ त्यत्रनाश उक्तः कथं तस्या विनियोगा इति चेत् । अत्र वक्तव्यं सुहृदः साधुकृत्यामुपयंतीत्यस्य सूत्र० ४
कोर्थः । न तावत्तामेव प्राप्नुवंतीत्यर्थः । उपायादिवत्तस्याः प्राप्त्ययोगात्रापि तत्फलं प्राप्नुवंतीत्यर्थः
शास्त्रफलं प्रयोक्तरीतिस्यापविरोधात् । नैनं चैवं स्यात रेष्टिन्यायः । अश्व वशारगात्सुहृदो नुदेव्या
तान्तत्तस्मात्क्रियन्ते वाक् नरिसुहृदि क्रियत्रियासाधुकृत्यास्तनुस्त्यां साधुकृत्यांजनयतिस्ता
यंचज्ञानाद्वयतीत्यविरोधः समानस्यापकृत्यायासुहृदः । अर्थवादत्वान्नातीवाभिनिवेश्यं
यदेव विद्ययेतिहि । पूर्वसूत्रमुक्तगुणज्ञानार्थवित्यादिकमनुष्ठेयमित्युक्तं तत्किमंगाश्रितोपा
तत्सहितमेवज्ञानार्थमनुष्ठेयमिति नियमउतोपास्तिसहितं केवलं वानुष्ठेयमित्यनिय
मइति संशयः । एकविषयत्वसंगतिः । पादसंगतिस्तु प्रासंगिकी बोध्या । पूर्वपक्षे केवलस्यानि
त्यादेर्ज्ञानहेतुत्वासिद्धिः । सिद्धांते तत्सिद्धिरिति बोध्यं । तत्र नियमे प्राप्ते ब्रूमः । नियमो न युक्तः श्रुतिः ८

तथा हि यदेव विद्यया करोति तदेव वीर्यवत्तरं भवतीति श्रुतिर्विद्यासहितस्य कर्मणो वीर्यवत्तरत्वं
ब्रुवंती विद्याहीनस्य कर्मणो वीर्यवत्त्वं फलहेतुत्वरूपं दर्शयति । तत्र केवलकर्मणो ज्ञानरूपफ
लहेतुत्वाभावे न युक्तं स्यात्तस्मात्केवलमपि कर्म ज्ञानहेतुरित्यनियम इति सिद्धः । एवमनियमे
नाग्निहोत्रादिकर्मणो ज्ञानार्थत्वात् न ज्ञानेन क्षय इत्युक्तः । इदानीमनारब्धकर्मणो निवृत्तिप्रका
रमाह । भोगेन त्वितरे क्षपयित्वा संपद्यते । किं ब्रह्मसाक्षात्कारवान् देहपातानंतरमपि संसा
रति न वेति संदेहः । पूर्वपक्षे साक्षात्कारस्य मुक्तिहेतुत्वासिद्धिः सिद्धांते तत्सिद्धिरिति विवेकः । ना
न देहपातात्पूर्वं यथा साक्षात्कारेपि संसार एवमुत्तरेपि देहपातानंतरमपीति । अत्रानारब्धाधि
करणे दृष्टांतेन प्राप्ते ब्रूमः । संचितकर्मणां ज्ञानान्नाश उक्तः । इतरे त्वारब्धकार्ये पुण्यपापे भो
गेन क्षपयित्वा विद्वान् ब्रह्म संपद्यते । अथ संपत्स्ये ब्रह्मैव सन्ब्रह्माप्येति इत्यादि

सूत्र० १०

श्रुतिभ्यः देहपातात्पूर्वं प्रारब्धकर्मणां सत्वात् कुलालचक्रभ्रमिन्यायेन मिथ्याज्ञानरूप च० ४
निमित्तनाशेप्यविद्यालेशानुवृत्तिर्युक्ता तद्भोगानंतरं कस्यचिदपि कर्मणोऽनवमरणात्
रागसंसारहेमोरभावान्नसंसारः॥ तस्माद्भोगेन प्रारब्धकर्मनाशानंतरं विद्यानन्तस्वरूपानंदात्म
नासंसारजन्तूनां स्वास्थ्यंमोक्षाख्यं जन्म तदिति सिद्धं। इति श्रीब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां
चतुर्थाध्यायस्य प्रथमः पादः॥१॥ पूर्वपादांत्याधिकरणेऽभ्युक्तं त्यनपेक्षा निर्गुणब्रह्मविदः
इदानीं सगुणविद्याफलभूतब्रह्मलोकस्योत्क्रांतिं विनाप्राप्तेर्योगात्तत्फलं निरूपयिष्य
न्नेव तद्धेतुभूतामुत्क्रांतिमेगुणब्रह्मविद्याव्यतिरिक्तसर्वजनसमानां निरूपयितुं पादमारभ
ते वाङ्मनसि दर्शनाच्छब्दाच्च॥ अस्त्युत्क्रांतिक्रमबोधिका श्रुतिः। अस्य सोम्य पुरुषस्य प्रयतो वा १५
ङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामिति प्रयतः म्रियमाणस्यो।

त्यर्थः॥ तत्र वाङ्मनसि संपद्यत इत्यत्र संशयः किं वृत्तिमात्रा वा वागेव मनसि उपात्मकसंपत्तिः।
श्चेत्युतत्वाच्छब्दवृत्तेरेवेति पूर्वपक्षे स्वोपादाने स्वस्य लय इति न्यायासिद्धेः सिद्धांते तत्सिद्धिरिति बो
ध्यं तत्र श्रुतिवलाद्वागेव मनसि लय इति प्राप्ते ब्रूमः॥ वाक् किं वागिति भाव श्रुतस्त्वावाक्शब्देन वा
ग्वृत्तिरुच्यते मनोवृत्तौ सत्यामेव मनसि वाग्वृत्तिः संप्रलीयते क्रमः दर्शनान्मनोवृत्तौ सत्या
मेव लोके वाग्वृत्तिलयस्य दर्शनात् तर्हि वाङ्मनसीति श्रुतेः का गतिरित्यत आह॥ शब्दाच्चेति
स्वोपादाने त्यबाधितस्य यानुसारेण वाक्शब्दो वृत्तिवृत्तिमतोरभेदोपचारेण भाक्तश्रुत्या
त्या वाक्पर्यायेति य इत्यर्थः॥ न त्वनुपादाने वृत्तिलयो वा कथमिति चेन्न अग्निवृत्तिलयस्यानुपा
दानाप्सु दर्शनादिति॥ उक्तहेतोर्वाचानएव सर्वेषामिंद्रियांतराणां चक्षुरादीनां मनसि वृत्तिल
यो नास्तीति भ्रमं वारयति॥ अत एव च सर्वाण्यनु॥ यत एव मनसो वागुपादानत्वाभा

सूत्र० वान्मनसि वाचोवृत्तिलयमात्रं नतु तत्व सर्वाणि चक्षुरादीन्यपि स्वानुपादाने मनसि स्ववृत्तिके च०
१० स्ववृत्तिलयमात्रेणानुवर्तंते प्रलीयंते न तु स्वरूपेणेत्यर्थः ॥ तस्मादुपशांततेजाः पुनर्भवमिंद्रि ४
यैर्मनसि संपद्यमानैरिति श्रुतिः ॥ सर्वेषामिंद्रियाणां मनसि वृत्तिलयबोधिका द्रष्टव्या ॥ तस्मा
दुत्क्रमणात् पूर्वं उपशांतदेहोष्मः ॥ पुनर्जन्ममनसि स्थितैरिंद्रियैः प्राप्नोतीतात्पर्यः ॥ एवं वाचो मन
सीतिवाक्यं विचार्य मनः प्राण इत्युत्तरवाक्ये किं सर्वेंद्रियवृत्तिलयाधारस्य मनसः प्राणे स्वरू
लयो वृत्तिलयो वेति संशये चान्नमयं हि सोम्य मन आपोमयः प्राण इति श्रुतौ प्राणमनसो
रबन्नविकारत्वश्रवणादबन्नयोश्चोपादानोपादेयभावात्स्वरूपलय इति प्राप्ते सिद्धांतयति
तन्मनः प्राण उत्तरात् ॥ स्वोपादान इत्यादिन्यायाभावात्तत्र वत्तिंद्रियाणां मनसि वृत्तिलयः
इहत्वन्यापसत्त्वात्स्वरूपलय इति प्रत्युदाहरणसंगतिः ॥ अतिदेशात्वात्संगत्यनपेक्षा ॥ १०

वा ॥ तत्सर्वेंद्रियवृत्तिलयाधिकरणं मनोपि प्राणे स्ववृत्तिलयेनैव लीयते । न स्वरूपेणेति मनः प्रा
ण इत्युत्तरवाक्याद्वगंतव्यं सुषुप्तिमृत्यवस्थयोः सवृत्तिके प्राणे सत्येव मनोवृत्तिलयदर्शना
दिति हेत्वनुषंगः ॥ नह्यबन्नयोरुपादानोपादेयत्वमात्रेण तद्विकारणैरप्युपादानोपादेयभावो यु
क्तः हिमघटयोस्तद्दर्शनादिति भावः ॥ एवं मनः प्राण इति वाक्यं विचार्य प्राणस्तेजसीत्युत्तरवा
क्ये किं प्राणस्य वृत्तिलयस्तेजस्युत जीव इति संदेहे श्रुतिबलात्तेजस्येवेति प्राप्ते सिद्धांतयति ॥
सोध्यक्षे तदुपगमादिभ्यः ॥ आक्रमादर्थक्रमाच्चाधिकरणक्रमो बोध्यः ॥ स प्राणोध्यक्षे का
र्यकरणसंघातस्वामिनि तत्साक्षिणि वा जीवेति वृत्तवृत्तिः सन्वर्तते ॥ कुतः तज्जीवं प्रति
उपगमानुगमनावस्थानेभ्यः ॥ यथा राजानं पावेछावंतं संतं भृत्या स्वाभिमुखेनागच्छं
ति ॥ एवमेवेममात्मानमंतकाले सर्वे प्राणाऽभिसमायांतीति श्रुतिरिंद्रियाणां

सू०बं० ११ मुख्यप्राणसहितानां जीवं प्रत्याभिमुख्येनागमनं दर्शयति तमुत्क्रामंतं प्राणोनूत्क्रामतीति श्रु वं० ४
तिर्गच्छंतं जीवं प्रत्यनुगमनं प्राणस्य दर्शयति ॥ सविज्ञानो भवतीति श्रुतिः ॥ करणव्युत्पत्त्या
विज्ञानशब्दवाच्येंद्रियजातस्य प्राणसाहित्यस्य प्राप्तव्यकर्मफलज्ञानवति जीवे वस्थानं
दर्शयति ॥ तस्माज्जीवएव मुख्यप्राणस्य वृत्तिलयः ॥ ननु कथं तर्हि प्राणस्तेजसीति श्रुतिरि
त्यत आह ॥ भूतेषु तच्छ्रुतेः ॥ तच्छ्रुतेः प्राणस्तेजसीति श्रुतेः सूक्ष्मात्मना विद्यमानेषु तेजः
सहितेषु उत्तरदेहारंभकेषु पंचभूतेषूपाधिषूपहितत्वेन विद्यमाने जीवे प्राणस्य वृत्तिलय
इत्यवगंतव्यं ॥ अध्यगमादिश्रुत्यंतरानुसारात् तथा चोपहितजीवप्राप्तौ प्राणस्योपाधि
तेजआदिभूतप्राप्तेरर्थसिद्धत्वात् प्राणस्तेजसीति श्रुत्युपपत्तिरित्यर्थः ॥ ननु प्राणस्तेज
सीत्येकस्यैव तेजसः श्रवणात् कथं तेजःसहितेषु भूतेष्वित्युक्तमित्यत आह ॥ नैकस्मि ११

न्दर्शयतो हि ॥ एकस्मिन्नेव तेजसि जीव उत्क्रांतिसमये नावतिष्ठते उत्तरदेहस्य पांचभौतिकत्वेन
पंचभूतेषु स्थितेरावश्यकत्वा दर्शयतो हि यमर्थं रंहस्याधिकरणे व्याख्याते प्रश्ननिरूपणे या
श्राक्षतिस्मृती इममर्थं दर्शयतः ॥ पृथिवीमयआपोमयोवायुमयआकाशमयस्तेजोमय
इत्याद्याश्रुतिः ॥ अण्व्योमात्रा विनाशिन्यो दशार्धानां तु याः स्मृताः ताभिः सार्धमिदं सर्वं संभ
वत्यनुपूर्वशः इतिस्मृतिः ॥ अण्वः सूक्ष्माः मीयंत इति मात्राः शाक्रमोत्क्रदविनाशिन्यो दशा
र्धानां पंचानां भूतानामित्यर्थः ॥ ननु जीवस्योत्क्रांतिकाले भूताश्रयत्वं तौ ह यदूचतुः कर्म है
व तदूचतुरि ॥ ति कर्माश्रयत्वबोधकश्रुतिविरुद्धमिति चेन्न कर्मणो बंधनिमित्तत्वेना
श्रयत्वे भूतानां देहोपादानत्वेनाश्रयत्वमित्यविरोधात् ॥ तौ याज्ञवल्क्यार्तभागौ यत्कीवा
धारभूतं ॥ समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥ पूर्वोक्तामुत्क्रांतिमुपजीव्य संदिह्य

सूत्र० १२ तेकिमुत्क्रांतिरविदुषएवोतविदुषोदहरादिसगुणब्रह्मोपासकस्यापीतितत्रतयोर्द्ध्वमायन्नमृत अ० ४
त्वमेतीतिदहरोपासकस्यमोक्षश्रवणाद्विदुषएवोत्क्रांतिरितिप्राप्तेब्रूमः॥स्मृतिःसरणमुत्
क्रांतिर्देवयानमार्गस्तदुपक्रमात्पूर्वंभाविनीयोत्क्रांतिःसगुणब्रह्मविदविदुषोःसमानैवचास्य
सोम्यपुरुषस्यप्रयतोवाङ्मनसिसंपद्यतइत्यादिसामान्यश्रवणात्ः ननुकथंतर्हिसगुणवि
द्यायाममृतत्वश्रवणमितितत्राह॥अमृतत्वंचेतिअपदाहइतिव्याख्यातोविदेहरूपंचानुपोष्ये
तिरागादीन्क्लेशानदग्ध्वैवेदमापेक्षिकममृतत्वंब्रह्मलोकप्राप्तिलक्षणंनमुख्योमोक्षः।अतए
वतयोर्द्ध्वमायन्नितिमूर्धन्यनाडीद्वारोत्क्रांतिपूर्वकत्वममृतत्वस्यदर्शितंतस्मात्विद्वदविदुषोः
समानैवोत्क्रांतिरितिसिद्धं॥ननूत्क्रांतिसत्वमानेत्यपुक्तममृतस्यत्वरूपराचाप्येतंब्रह्मसंपत्तेरि
त्याशंक्येदमारभ्यते।तदापीतेःसंसारव्यपदेशात्॥तेजःपरस्यांदेवतायामित्यत्रतेजः।स १२

जीवंसेंद्रियजातंप्राणमनोभूतांतरसहितंपरस्मात्मनिसंपद्यतइतिसूक्ष्मशरीरस्यलयःश्रूयते
सलयःकिमात्यंतिकएवोतानात्यंतिकइतिसंशयःपूर्वपक्षेमृतमात्रस्यमुक्तिःसिद्धांतेतदभाव
इतिबोध्यंतत्रब्रह्मणउपादानत्वादात्यंतिकएवलयइतिप्राप्तेब्रूमः॥तदुक्तविशेषणंसूक्ष्मं
तेजः॥आपातेरामोक्षादवतिष्ठतेयोनिमन्येप्रपद्यंतेशरीरत्वायदेहिनः॥स्थाणुमन्येनुसंयंति
यथाकर्मयथाश्रुतमितिसंसारव्यपदेशान्नविधितत्वज्ञानशास्त्रयोर्मृतमात्रस्यमुक्तावा
नर्थक्यंचप्रसज्येततस्मात्सुषुप्तावैवानात्यंतिकोलयः॥ननूत्क्रमणंतेजोपद्यास्तितर्हि
देहान्निर्गच्छत्पार्श्वस्थैरुपलभ्येतनप्रतिहन्येतनेषादिवन्मूर्त्तांतिरेगोत्यतत्राह॥सूक्ष्मंप्र
माणतश्चतथोपलब्धेः॥चकारःस्वरूपसौक्ष्म्यसमुच्चयार्थः॥उक्तंतेजःपरिमाणतःस्वरू
पतश्चसूक्ष्मंचसरेणुवच्चक्षुर्वच्चतस्यनाडीद्वारानिष्क्रमणश्रुत्यातथासूक्ष्मत्वेनोपलब्धेः

अत्रसूक्ष्मत्वेनैवस्य स्वच्छत्वमुपलभ्यते ।। तथा चानुद्भूतरूपवत्त्वेन सूक्ष्मत्वाद्बहिर्नोपलभ्यते
स्वच्छत्वान्मूर्तान्तरेण न प्रतिहन्यते स्वच्छत्वाच्च नाड्यादौ संचारोपपत्तिरिति ।। नोपमर्देनातः ।। अत
एवस्य स्वच्छत्वलक्षणात्सौक्ष्म्यादस्मत्कृतरूपादस्य सूक्ष्मशरीरस्य स्थूलदेहस्य दाहच्छेदादि
निमित्तेनोपमर्देनोपमर्द इत्यर्थः ।। सूक्ष्मदेहसद्भावे चान्यलिंगकमनुमानमाह ।। अस्यैव चो
पपत्तेरेष ऊष्मा ।। स्थूलदेहात् पृथगुपलभ्यमान ऊष्मास्यैव सूक्ष्मदेहस्य धर्मः । सत्येव सू
क्ष्मदेहे । तदुपलब्धेस्तदभावे मृतदेहे तदनुपलब्धेरित्यन्वयव्यतिरेकाभ्यां तद्धर्मस्यैवोप
पत्तेरित्यर्थः ।। आसृत्युपक्रमाधिकरणे मुख्योऽमृतत्वउत्क्रान्त्यभावो दर्शितः ।। स नपुंक्रम
न्याह्निपति ।। प्रतिषेधादिति चेन्न शारीरात् ।। अव्यवहिताधिकरणेनास्य संगतिः ।। किं
निर्गुणब्रह्मविद उत्क्रान्तिरस्ति न वेति संदेहे अस्तीति प्राप्तं न तस्याकामयमानो योऽकामो नि

कामस्याप्तकाम आत्मकामो न तस्य प्राणा उत्क्रामन्तीति परब्रह्मविदः शरीरात्प्राणोत्क्रान्तिप्र
तिषेधान्नास्त्युत्क्रान्तिरिति चेन्न शारीराज्जीवादयं प्राणोत्क्रान्तिप्रतिषेधो न शारीरात्तस्मात्प्राणा
उत्क्रामन्तीति माध्यंदिनशाखायां जीवादेव प्राणोत्क्रान्तिप्रतिषेधस्य कृतत्वात्तस्मात्प्राणादिस
हितस्य जीवस्य परब्रह्मविदोप्युत्क्रान्तिरस्तीति पूर्वपक्षः । श्रुत्यर्थस्तूक्तिप्रक्रमायोऽयमाशयः ।।
बाह्यविषयकामनाशून्यत्वमकामत्वं मानसिकविषयकामनाशून्यत्वं निष्कामत्वमाप्तस्वरू
पानंदत्वमाप्तत्वं आप्तकामत्वं न त्वहेतुरात्मकाम इति सिद्धान्तयति ।। स्पष्टो ह्येकेषाम् ।। एकेषां काण्
वानां शाखायां प्राणानां परब्रह्मविदेहात्तस्य शेषउत्क्रान्तिप्रतिषेधो हि यतेऽनुपलभ्यतेऽतो देहत
स्योत्क्रान्तिरस्तीत्यर्थः । तथा हि यत्रायं पुरुषो म्रियत उदस्मात्प्राणाः क्रामन्त्याहो नेत्यार्तभा
गप्रश्ने द्वितीयमनुत्क्रान्तिपक्षमाश्रित्य याज्ञवल्क्यो नोत्क्रामन्तीत्युक्त्वा न हि प्राणोत्क्रान्त्यभा

सूत्र० वेमृतो न भवेदित्याशंक्याञ्चैनैव समवनीयंते इति प्राणविजयं प्रतिज्ञा पतत्सिद्धये उत्सेधूयत्या च० ४
१४ ध्मायत्याध्मातो मृतः ॥ शेत इत्युत्क्रांत्यवधेर्देहस्योच्छूयमानादिकमाह ॥ एतत्सामान्यान्नोध्यं
दिनञ्जा स्वापामपितस्मादित्यनेन देहस्यैव ग्रहणं बोध्यं ॥ उत्पन्नात्मसाक्षात्कारस्य पत्र यदा
स्वपंस्यूत्क्रः प्रत्यक्षः पुरुषो दिह्यो भिपते सर्व निष्टाभ्यन्त्यो भिन्नो तत्ज्ञोभूमीशोतेः ॥ तदास्मा
देहात्प्राणा उत्क्रामंत्याहो प्रत्नांतरेन नैव नाशं यांतीति प्रश्नार्थः ॥ नत्र प्राणशब्देन सूक्ष्मदे
होक्तिः स देहइव भूपतिउच्छ्रमीभवति न चयं रोगः क्रम्यनेत्यत आह ॥ ध्यायतीति वाहीन वायुना
पूरितो विविक्षानुशाष्टानां भैरावत्करोतिपतच्छाध्मातः शवइवानुमृतो विलीनसूक्ष्मशरीरः
सन्नभूमो शेत इत्यर्थः ॥ तस्माज्जीवात्प्राणोत्क्रांते रप्राप्तत्वेन निषेधायोगा द्विद्वदेहाद्देवप्राणोत्क्रांति
प्रतिषेधइतिन विदुषो मार्गोत्क्रांती सिः स्मर्यते च ॥ महाभारते मार्गोत्क्रांत्योरभावः सर्वभूता १५

त्मभूतस्य सम्यग्भूतानि पश्यतः ॥ देवा अपि मार्गे मुह्यंति अपदस्य पदैषिण इति पदवाक्यः न्याया
वाचीत्याद्यतिरिक्तपदं स्मून्यब्रह्मविदः पदैषिणो देवा अपि मार्गे मुह्यंति मार्गं न जानंतीति तस्मा
दित्यर्थः ॥ तस्माद्विदुषः स्वरूपे ब्रह्मण्येव प्राणानां लयान्नोत्क्रांतिरिति सिद्धं ॥ ननु ब्रह्मणि प्राण
लयस्त्वयुक्तं पृथिव्यादिषु लयप्रकृतेरित्याशंक्येदमाह ॥ तानि परे तथा ह्याह ॥ किं विदुषः प्रा
णशब्दाभिधेयसूक्ष्मदेहलयः पृथिव्यादिष्वुत परब्रह्मणीति संदेहे गताः कलाः पंचदश
प्रतिष्ठा इति विदुषोपि पृथिव्यादिषु लयावगमात्तत्रैव लय इति पूर्वपक्षः ॥ यद्वा
पिमनः सहितानि दशेंद्रियाणि पंचभूतसूक्ष्मसहितानि पंच प्राणसहितानि वा षोडश क
लाः संति तथा पिप्राणमनसोरेक पृथिवीविकारत्वैनैक्याविवक्षया कलाः पंचदशोक्ता
प्रतिष्ठा शब्देन तत्तत्कार्यापादानानि पृथिव्यादीन्युच्यंते तानि कलागतास्तत्र जीनाः

सू०भा० १५ तियावत्॥ तच्च सिद्धांतमनंतरोक्तविशेषणानींद्रियाणि षोडशकलात्मकसूक्ष्मदेहत्वपरि च० ४
परेब्रह्मणि गीजायंते तथा ह्याह श्रुतिः। एवमेवास्य परिद्रष्टुरिमाः षोडशकलाः पुरुषायणाः
पुरुषं प्राप्यास्तं गच्छंतीति प्रश्नश्रुतिः समुद्रं प्राप्यास्तं गच्छंति एवमेवास्य जीवस्य परिस
र्तिनवच्छिन्नत्वस्वरूपब्रह्मद्रष्टुरिमाः स्वानुभवगम्याः कलाः पुरुषाश्रयास्तं प्राप्य लयं यांति
त्यर्थः॥ स्वोपादाने स्वस्य लय इति व्याप्तिमूलकव्यावहारिकप्रमाणानुमानापेक्षया पूर्वमुक्तौ
तौ पृथिव्यादिषु लिंगशरीरलय उक्तः॥ तत्त्ववेदकश्रुत्यपेक्षया ब्रह्मविवर्त्तस्य सर्वस्य ब्र
ह्मणि लयो द्वितीयश्रुतावुक्त इत्यविरोधः॥ स्वोपादानेषु प्रलीनाः कलाः स्वोपादानैः स
ह ब्रह्मणि विलीयंतेति श्रुतिद्वयतात्पर्यः॥ अविभागो वचनात्॥ सोयं विद्वत्कलावि १५
लयः॥ किमविदुष इवानात्यंतिकः उतात्यंतिक इति संदेहः॥ एकविषयत्वं संगतिः

पूर्वपक्षे मोक्षासिद्धिः सिद्धांते तत्सिद्धिरिति बोध्यं॥ यत्र फलं नोच्यते तत्र पूर्वोत्तरपक्षसिद्धिः फला
मिति मंतव्यं॥ तत्रानात्यंतिको लय इति प्राप्ते ब्रूमः॥ विदुषः कलानां ब्रह्मणा सहात्यंतमविभाग
एव न सावशेषो लयः॥ कुतः कलानां लयोक्त्यनंतरं भिद्येते चासां नामरूपे इति कलानां शक्त्या
त्मकनामरूपयोः पुरुषे लयमुक्त्वा स एषोऽकलोऽमृतो भवतीति वचनादित्यर्थः॥ परविद्यां चिं
तां प्रासंगिकीं समाप्य प्रकृतां परविद्याचिंतामनुसरति॥ तदोकोग्रज्वलनं तत्प्रकाशित
द्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया॥ आसृ
त्युपक्रमाधिकरणे सगुणब्रह्मविदामविदुषां च समानोत्क्रांतिरित्युक्तं तत्र विद्वदुत्क्रांतौ विशे
षो नोच्यते तस्य लीनहृत्कवागादिसमूहस्योत्क्रमिष्यतो जीवस्योकः आयतनं हृदयं तस्य
यदग्रं नाडीद्वारमुखं तस्य ज्वलनं प्राप्तव्यकर्मफलज्ञानरूपं प्रद्योतावश्यमादौ भवति तेन प्र

सू० १६ द्योतेनप्रकाशितद्वारोविद्वानःविद्वांश्चभवतितयाहिश्रुतिः।तस्यहैतस्यहृदयस्याग्रंप्रद्योतते ब्र० ४
तेतेनप्रकाद्योतेनैषआत्मानिष्क्रामतिचक्षुष्टोवामूर्ध्नोवान्येभ्योवाशरीरदेशेभ्यइतितत्रसं
शयः।किमविदुषइवविदुषोप्यनियतेनकेनकेनचिद्द्वारेणोत्क्रान्तिरुतमूर्धन्यनाडीद्वारेणा
नियतेनेत्यवेतितत्रविरुद्धकल्पानांवचनादविभागवच्चक्षुष्टोवेत्यनियमवचनादनियतेने
तिप्राप्तेब्रूमः।दहरादिसगुणब्रह्मोपासकस्यमूर्धन्यनाड्यैवनिष्क्रमणंविद्यासामर्थ्यात्तच्छेष
याद्वारनियमाभावेविद्यातत्कृष्टफलप्राप्तिर्नस्यादित्यर्थः।ननुद्वारेनियमेप्युत्कृष्टफ
लप्राप्तिर्नविघ्नतीतितत्राह।तच्छेषगत्यनुस्मृतियोगाच्चेतितस्याःसगुणविद्यायाः।शेष
भूतागतिःमूर्धन्यनाडीप्रभृतिर्मार्गस्तस्यानुस्मृतिर्ध्यानंतद्विद्याङ्गत्वेनैवध्यातेनमा १६
र्गेणनिष्क्रमणंयुक्तंअन्यथाद्वारानियमेपिफलप्राप्तौमार्गध्यानविधिर्वैयर्थ्यंस्यात्।

तस्माच्छ्रुतिविशिष्टेनब्रह्मणासयासितेनानुगृहीतस्तद्भावमापन्नोविद्वान्मूर्धन्ययैवशतनाडीभ्यो
ऽधिकयानिष्क्रामतिस्वविद्योक्तितराभिमाभिस्तयानुश्रुतिः हार्दब्रह्मविद्यायांशतंचैकाच
हृदयस्यनाड्यस्तासांमूर्धानमभिनिःसृतैका।तयोर्ध्वमायन्नमृतत्वमेतिविष्वङ्ङन्याउत्क्रमणे
भवंतीति।विश्वङ्नानागतयः।तस्माद्धृदयपुरतयाभास्वरयामूर्धनिर्गतयासूर्यरश्मिनिरि
कीकृतयाब्रह्मनाड्याविद्वान्निष्क्रामतीतिसिद्धं।रश्म्यनुसारी।हार्दहरब्रह्मविद्योपासमेवब्रह्म
नाडीरश्मिसंबंधमुक्त्वाथयत्रैतस्माच्छरीरादुत्क्रामत्यथैतैरेवरश्मिभिरूर्ध्वमाक्रमतइ
तिपूर्वोक्तिरीत्याब्रह्मनाड्यानिष्क्रामतोरश्म्यनुसारित्वमुक्तं।किंतत्रश्म्यनुसारित्वमहर्मृत
स्यैवभवतुतरात्रावपीतिपूर्वपक्षेरात्रौमृतस्यसूर्योदयापेक्षासिद्धांतेतदनपेक्ष्यैव
ब्रह्मलोकप्राप्तिरितिफलं।तत्राहनिरात्रौवामृतोरश्म्यनुसारीतिसिद्धांतयतीतिज्ञातमा

क्षिप्य समाधत्ते॥ निशि नेति चेन्न संबंधस्य यावद्देहभावित्वाद्दर्शयति च॥ अहनि सूर्यरश्मि
नाडीसंबंधस्य सत्वात्तत्रैव मृतो रश्म्यनुसारी निशि तु न भवति रश्म्यसत्वादिति चेन्न नाडीरश्मिसं
बंधस्य यावद्देहभावित्वात् यावद्देहभावित्वं च श्रुतिर्दर्शयति अमुष्मादादित्यात्प्रतायंते ता॥
आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायंते तेऽमुष्मिन्नादित्ये सृप्ता इति प्रतायंते विसृता भव
ति रश्मयः सृप्ताः संबद्धाः॥ नन्वत्र संबंधः क्रतो न तस्य यावद्देहभावित्वं इत्याशंक्य प्रमाणां॥
तरसूचकसूत्रे चकारः प्रयुक्तः॥ रात्रावप्यौष्म्यस्य देहे दर्शनान्नाडीरश्मिसंबंधोनुमेय इति॥
तस्मादहनि रात्रौ वा मृतो विद्वान् अविलंबेनैव रश्म्यनुसारीति सिद्धं॥ अत एवायनेपि दक्षि
णे॥ किं दक्षिणायने मृतो विद्वान् विद्याफलं प्राप्नोति न वेति संदेहे उत्तरायणप्राशस्त्यप्रसिद्धे
र्भीष्मस्य तत्प्रतीक्षादर्शनाच्च न प्राप्नोतीति प्राप्तेऽभिदधाति पूर्वन्यायमतश्चेति॥ अ

तएव कालांतरप्रतीक्षानुपपत्तेर्विद्यायानित्यवत्फलसंबंधश्रवणात् दक्षिणेप्ययने मृतो विद्वा
न्फलमाप्नोत्येवेत्यर्थः॥ अविदुषामुत्तरायणं प्रशस्तमित्यभिवदनरूपसदाचारप्रवृत्त्यर्थं॥
पितृप्रसादलब्धस्वच्छामरणज्ञापनार्थं वा भीष्मस्य विदुष उत्तरायणप्रतीक्षेति भावः॥
न तु भगवद्गीतासु यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः॥ प्रयाता यांति तं कालं वक्ष्या
मि भरतर्षभेति कालमेव प्रतिज्ञायाऽहरादिकालविशेषस्यानावृत्तये नियतत्वोपदेशात्
कथं रात्रौ दक्षिणायने वा मृतो विद्वान् अनावृत्तिमाप्नुयादित्यत आह॥ योगिनः प्रति च स्म
र्यते स्मार्ते चैते॥ योगिनः स्मार्तविद्योपासकान्प्रत्ययमहरादिकालविशेषः स्मर्यते
स्मार्ते च प्रत्यासत्तेः न श्रौतदहराद्युपासकान्प्रति॥ न च योगो दहराद्युपासनमेवास्तु तत्राह स्मा
र्ते चैते इति॥ ब्रह्मार्पणबुद्ध्याकृतनित्याग्निहोत्रादिकर्मयोगः अनाश्रितः कर्मफलमित्यादि

सूत्र० स्मृतेःस्मरणपूर्वकाकर्तृत्वानुभवःसांख्यंइंद्रियाणांनिग्रहार्थेषुवर्तनंइतिस्मरंतिस्मृतेः ब्र०
१८ तयाचतेयोगसांख्येस्मार्त्तेनतुवनश्रौतविद्यादिरूपेतयाश्रुतिस्मृत्योरर्थभेदान्नश्रौतोपा ४
स्तिषुकालनियमः॥ यद्यपिश्रुत्युक्तदेवयानपितृयानयोरेवात्रस्मृतावपिप्रत्यभिज्ञानात्
स्मृतौकालशब्देनतदभिमानिदेवताग्रहणंश्रुतिसमानार्थत्वायक्रियतेतदाहरादिका
लाभिमानिदेवतानांसर्वदासत्त्वाद्विदुषोमृतौकालनियमापेक्षेत्यनवद्यं॥ तस्माद्यदा
कदाचिन्मृतोविद्वान्विद्याफलंप्राप्नोतीतिसिद्धं॥ इतिचतुर्थाध्यायेद्वितीयःपादः॥२॥
एवंसगुणविद्याफलप्राप्तयेदेवयानमार्गंवक्तुंतद्गोचरांतिचिंताकृता॥ संप्रत्यंगिनंदे
वयानमार्गंवक्तुंमयंपादआरभ्यते॥ अर्चिरादिनातत्प्रथितेः॥ अस्तिब्रह्मलोकप्रा १८
प्तिहेतौमार्गेश्रुतीनांविप्रतिपत्तिः॥ नाडीसंबद्धरश्मिरूपोमार्गः॥ क्वचिदुच्यतेक्वचि

च्चिदुतेऽर्चिषमभिसंभवंत्यर्चिषोहरित्यादावग्न्यादिरूपः अन्यत्रतुसूर्यद्वारेणतेविरजाःप्रयां
तीतिश्रुतविरजाः॥ नोपर्यायःमार्गतत्त्वाफलविरोधेविधुराइत्यर्थः॥ ततश्रुतिविप्रतिपत्त्यास
शयः॥ किंपरस्परंभिन्नाएवैतेमार्गाः उतानेकविशेषणयुक्तएकएवेतिपूर्वपक्षेयेनकेनचि
न्मार्गेणागमनमितिविकल्पःसिद्धांतेमार्गैक्यादिविकल्पाभावइतिबोध्यंतत्रप्रकरणभेदाव
मार्गभेदस्तथाचविदुषांमृतिकालानियमवन्मार्गेनियमइतिप्राप्तेब्रूमः॥ सर्वोहिब्रह्मलो
कप्रेप्सुरर्चिरादिनैवैकेनमार्गेणागंतुमर्हतिकुतःतत्प्रथितेः॥ तस्याचिरादिमार्गस्यपंचा
ग्निविद्याप्रकरणेयेचामीअरण्येश्रद्धासत्यमुपासतेतेर्चिषमभिसंभवंतीतिपंचाग्न्युपा
सकस्येवेतरस्यापिसगुणोपासकस्यश्रुतत्वादित्यर्थः॥ नचप्रकरणभेदान्मार्गभेदः।
सर्वत्रार्चिराद्येकदेशप्रत्यभिज्ञानात्कृतव्यब्रह्मलोकाभेदाच्चसर्वत्रसर्वविशेषणोपसंहारे

सू०वृ० १९ णनेकविशेषणयुक्तमार्गैक्यावगमात्तस्माद्ब्रह्मलोकप्राप्तिहेतुर्मार्गः सर्वेषामेक एवेति सि च० ४
द्धं ॥ वायुमब्दादविशेषविशेषाभ्यां ॥ सर्वेषां मार्गविशेषणानां घटनप्रकारः कथ्यते ॥ स एतं
देवयानं पन्थानमासाद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स इन्द्रलोकं स प्रजाप
तिलोकं स ब्रह्मलोकमिति कौषीतकिनो देवयानं मार्गमामनंति स विद्वांस्तत्र लोकं प्राप्त
त्तल्लोकस्वामिनाग्न्यादिनानापतत्स्य यः ॥ छांदोगास्त्वेवमधीयते ॥ तेऽर्चिषमभिसंभवंत्यर्चि
षोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेति मासांस्तान्मासेभ्यः संवत्सरं
संवत्सरादादित्यमिति ॥ अत्र आदित्यो यान्षट् मासानेति तानिति योजना अत्र श्रुतिद्वये
प्यर्चिरादौ पठितः ॥ अनंतरं त्व कौषीतकिश्रुतौ वायुः श्रुतः सोऽर्चिरादिमार्गे कस्मादनंतरं य
थितव्य इति संदेहे सर्वत्रार्चिराद्येकदेशप्रत्यभिज्ञानान्मार्गैक्यावगम्यनंतरं वायुप्रत्यभिज्ञाना १९

त्तत्रैव तस्य निवेश इति प्राप्ते ब्रूमः ॥ अब्दात्संवत्सरादनंतरं आदित्यात्पूर्वं वायुमभिसंविशंति गंतारः
कुतः ॥ अविशेषविशेषाभ्यां कौषीतकिश्रुतौ वायोः कुत्रचिदानंतर्यं पूर्वत्वं वा विशेषेण नाप
ठितं तत्वानुकपदाभावात् बृहदारण्यके चादित्यात्पूर्वत्वविशेषो दृश्यते यदा वै पुरुषोऽस्माल्लोकात्प्रै
ति स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्व आक्रमते स आदित्यमा
गच्छतीति ॥ पुरुषोऽस्माल्लोकाद्देहः प्रैति त्यजतीति शेषः ॥ तस्मै प्राप्ताय यथाध्यातैव स वायुस्तत्र विज
हीते छिद्रं करोति यथा रथचक्रस्य छिद्रं तेन वायुदत्तेन छिद्रेण द्वारेणोर्ध्व आक्रमते सध्याता ऊर्ध्वं
त्तमाहः ॥ आदित्यमिति ॥ तथा च तेनेति श्रुत्यादित्यगमनहेतुद्वारदस्य वायोः पूर्वत्वस्या
दित्यादवगमादस्यानंतर्यपाठस्य बाधः ॥ अत्रैवं क्रमो निष्पन्नः ॥ नाडीरश्मिप्रवेशानंतरं अर्चिरा
दिसंवत्सरांतं गच्छति विद्वान् छांदोग्यश्रुत्यनुसारात् बृहदारण्यके मासानंतरं संवत्सरस्ये

सूत्र० वायुप्रवेशस्तस्य मासाव्यवहितत्वेनायोग्यत्वात्संवत्सरानंतरं देवलोकस्य देवलोकाद्वायो सू०
२० र्वायोरादित्यस्यादित्याच्चंद्रमसः चंद्रात्तडिल्लोकस्य प्रवेशस्तथा च सूत्रे वायुपदं देवलोकोपल ४
क्षकं स्यात्तदनंतरं देवलोकसहितं वायुमार्गच्छतीति विद्वानिति सूत्रार्थः॥ एवमग्न्यनंतरमुक्तवायोः
स्थानमुक्त्वा तन्नैव कौशीतकेश्रुतौ वाय्वनंतरश्रुतवरुणादीनामर्चिरादिमार्गे स्थानमाह॥ तडि
तोधि वरुणः संबंधात्॥ किं कौशीतकिवाक्ये श्रुतो वरुणोर्चिरादिमार्गे संबध्यते न वेति संदे
हे स्थानबोधकमानाभावान्न संबध्यत इति प्राप्ते ब्रूमः॥ तडितोधि विद्युल्लोकादुपरिष्टाद्वरुणः
संबध्यते कुतः संबंधात् तडित उपरि हि सजलो मेघा ह्वयंते जलाधिपतिश्च वरुण इति तडि
द्वरुणयोः संबंधादित्यर्थः॥ वरुणानंतरमिंद्रादेः प्रवेशः कौषीतकिनोपात्तक्रमेवाधका
भावादिति एवमर्चिरादीनां क्रमं निरूप्य तेषामेव स्वरूपं निरूपयति॥ आतिवाहिकास्तल्लिंगात् २०

किमेतेर्चिरादयो मार्गचिह्नभूता उत गंतॄणां विदुषां भोगभूमय उताहोस्विदातिवाहिका इति सं
शयः॥ तत्रार्चिरादीनां लक्षणत्वादिवन्मार्गचिह्नत्वं अग्निलोकं वायुलोकमित्यादिलोकश
श्रवणात्तद्भोगभूमित्वं वेति प्राप्ते ब्रूमः॥ एतेर्चिरादयस्त्वातिवाहिकाः कार्यब्रह्मगंतॄणां विदुषां
गमयितारः कुतः॥ तल्लिंगात् अमानवः॥ स एनान्ब्रह्म गमयतीत्यमानवपुरुषस्य विद्युल्लो
कं प्राप्तानुपासकान्गमयितृत्वश्रवणादित्यर्थः॥ ननु तस्य गमयितृत्वं श्रुतं तत्स्यैव वर्ततामि
ति वाच्यं तस्य वाक्यस्यार्चिरादिमानवपुरुषसमभिव्याहारस्य प्रमानवत्वनिवृत्तिपरत्वेन सिद्ध
वद्गमयितृत्वानुवादकत्वात् अतः सिद्धवद्गमयितृत्वदर्शनाल्लिंगात्पूर्वेषामप्यर्चिरादीनां पुरु
षाणां नेतृत्वमिति न च लोकशब्दमात्रेण भोगभूमित्वमिति युक्तं जिनेनिगणां विदुषां भोगायो
गात् तस्मादग्निस्वामिकं लोकं प्राप्य तेनाग्निनातिवाहकेनाहर्देवं प्राप्नोतीति तेन च देवतांतर

अमानवस्य श्रुतं० पूर्वेषामानवत्वं श्रुतं१

सूत्र० २१ मिति योज्यं॥ ननु लिंगमात्रं न पूर्वेषां नेतृगमकं न्यायाभावादित्यत आह॥ उभयव्या च० ४
मोहात्तत्सिद्धेः॥ यद्यर्चिरादयोचेतनाः स्युस्तदा विदुषामपि निर्देहानां लीनेंद्रियाणां ज्ञा
नाभावे नोभयोर्विदर्चिरादयो व्यामोहादकर्तृत्वात्कार्यब्रह्मप्राप्तिर्न स्यात्॥ लोके हि सु
र्हितो पतद्धानो यद्वद्बहिःस्थितं नांतरैर्नीयते॥ नाचेतनैः स्वतीयत्वहानस्येत नस्येत नांत
रैर्नीयत इति न्यायसहिताल्लिंगात्पूर्वेषामर्चिरादीनां देवतानां तत्सिद्धेर्नेतृत्वसिद्धेर्नन्या
यहीनं लिंगं न अर्चिरादीनां देवत्वे रात्रौ दक्षिणायने वा मृतस्य विदुषो ब्रह्मलोकगति
र्दुष्करा भवतिः॥ देवानां सत्वादिति॥ ननु नार्चिरीनीयं नेतृत्वं विद्युल्लोकादमानवपुरुष
स्यैव नेतृत्वश्रवणाद्वरुणादीनां नेतृत्वापीगादित्यतआह॥ वैद्युतेनैव ततस्तच्छ्रुतेः
अमानवः पुरुषो विद्युल्लोकमागतो वैद्युतस्तेनैव ततो विद्युदातेरुईनीयमानाविद्वां २१

सः कार्यब्रह्म प्राप्नुवंति अमानवस्य ब्रह्मलोकानुगमयति विद्युल्लोकस्यानित्यमानवस्यैवगम
यितृत्वश्रवणात् अमानवस्यैव गमयितृत्वश्रवणात् अमानवोपसर्जनत्वेन वरुणादीनां नेतृ
त्वं न प्राधान्येन अर्चिरादि विद्युदंतानां तु प्राधान्येनैव नेतृत्वं तस्मादर्चिरादयो नेतार इति सिद्ध
म्॥ एवं गंतव्यप्राप्तिहेतुमार्गं निरूप्य फलभूतं गंतव्यं निरूपयति॥ कार्यं तु बादरिरस्य गत्युपपत्तेः
स एतान्ब्रह्म गमयति इत्यत्र संशयः॥ किं परं निर्गुणं ब्रह्म गमयत्यमानवः पुरुष उत कार्यं स
गुणं ब्रह्मेति पूर्वपक्षे अर्चिरादिगत्या ब्रह्मलोकप्राप्त्यनंतरं विदुषो लिंगशरीरलयेन परब्रह्मप्रा
प्तिः सिद्धांते कार्यब्रह्मप्राप्त्यर्थमेव गतिर्न परब्रह्मप्राप्त्यर्थमिति मंतव्यं॥ उत्तरत्र पूर्वपक्षोप
न्यासार्थे सिद्धांतमाह कार्यमिति कार्यमिमेव ब्रह्म गमयतीति बादरिराचार्यो मन्यते कुतः
अस्य कार्यब्रह्मणः परिच्छिन्नस्य गत्युपपत्तेर्गंतव्यत्वोपपत्तेः प्रत्यगूपस्यापरिच्छिन्नस्य पर

सू० स्मात् तदनुपपत्तेरित्यर्थः॥ विशेषितत्वाच्च॥ ब्रह्मलोकान् गमयतीति श्रुत्यंतरे ब्रह्मवचनेन गं च०
२२ तव्यब्रह्मणो विशेषितत्वात् सावयवस्य अवयवभेदेन भिन्नस्य ब्रह्मण एव गंतव्यत्वं न निर्वि ४
शेषब्रह्मणः लोकशब्दश्च भोगभूमिरेव प्राप्यत्वं न परस्येति चकारार्थः॥ ननु नपुंसकब्रह्मश
ब्दस्य परस्मिन्नेव मुख्यत्वात् कथं कार्यब्रह्मणि ब्रह्म गमयतीति व्यपदेशस्तत्राह॥ सामीप्या
त्तु तद्व्यपदेशः॥ तुशब्दो ध्वनिरासार्थः॥ परमेव हि ब्रह्म सत्यकामत्वादिगुणयुक्तं कार्यब्र
ह्मेत्युच्यते तथा च कार्यब्रह्मणः कारणपरब्रह्मसामीप्यात् कारणेऽमुख्यस्य ब्रह्मपदस्य
कार्ये व्यपदेशः लक्षणया प्रयोगः इत्यर्थः॥ मुख्यासंभवादिति भावः॥ ननु कार्यब्रह्मप्रा
प्तौ तेषां न पुनरावृत्तिरिति श्रुतिविरोधस्तत्राह॥ कार्यात्यये तदध्यक्षेण सहातः परमभि
धानात्॥ कार्यब्रह्मलोकस्यात्यये नाशे सति तदध्यक्षेण तल्लोकस्वामिना हिरण्यगर्भेण २२

सह अतः कार्यब्रह्मणः परं ब्रह्म प्राप्नुवंति उत्पन्नात्मसाक्षात्कारा विद्वांसः॥ इत्युक्तश्रुत्याभि
धानादेवं गंतव्यं इत्यर्थः॥ स्मृतेश्च॥ ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे॥ परस्यांते कृतात्मानः
प्रविशंति परं पदमिति स्मृतिश्च ब्रह्मलोकं प्राप्तानां क्रममुक्तिं दर्शयतीत्यतोपि नानावृत्तिश्रुति
विरोधः॥ प्रतिसंचरो महाप्रलयः॥ तस्मिन् प्राप्ते परस्य हिरण्यगर्भस्यांते अधिकारसमा
प्तिः॥ तदा कृतात्मानः शुद्धधियो ब्रह्मलोकवासिनः॥ परं पदं प्राप्नुवंतीति योजना॥
तस्मात् कार्यब्रह्मप्राप्त्यर्थमेवार्चिरादिगतिः॥ न प्रत्यगूपपरब्रह्मप्राप्त्यर्थं घटाकाशस्ये
व महाकाशप्राप्त्यर्थं गतेरफलत्वादिति सिद्धं॥ एवं स्थितां तमुक्त्वा पूर्वपक्षमाह॥ परं जै
मिति सिद्धं॥ परं जैमिनिर्मुख्यत्वात्॥ नपुंसकब्रह्मशब्दस्य परस्मिन्नेव मुख्यत्वात् परमे
व ब्रह्म गमयत्यमानव इति जैमिनिराचार्यो मन्यते॥ दर्शनाच्च॥ तेषां न पुनरावृत्तिः॥

तेनामरूपेप अभिप्रायः प्रकरणस्वाद

सू० तयोर्ध्वमायन्नमृतत्वमेतीति च ॥ मुक्तेर्गतिपूर्वकत्वदर्शनाच्च परमेव गंतव्यमित्यर्थः ॥ च०
२३ ननु प्रजापतेः सभां वेश्म प्रपद्य इति मरणकालेऽउपासकस्य कार्यब्रह्मप्राप्तिसंकल्पं श्रव ४
णान्न परं गंतव्यमित्याशंक्याह ॥ न च कार्ये प्रतिपत्त्यभिसंधिः ॥ अयं प्रतिपत्त्यभिसंधिः
प्राप्तिसंकल्पः कार्ये ब्रह्मणि न कार्यब्रह्मविषयी न भवतीति यावत् किंतु परब्रह्मप्राप्तिवि
षयक एव तेऽपदंतरा तद्ब्रह्मेति परस्यैव प्रकृतत्वात् ॥ ननु प्रकरणबलाद्वेश्मब्रह्मप्राप्ति
संकल्पस्य परविषयकत्वेऽपि तस्याः प्राप्तेर्गतिपूर्वकत्वं कथमिति चेत् ॥ उच्यते तदप
राजिता पूर्ब्रह्मणः प्रभुविमितं हिरण्मयं वेश्मेति दहरविद्यायां हिरण्यगर्भवेश्मप्राप्ते
र्गतिपूर्वकत्वावगमादस्यामपि परब्रह्मवेश्मप्राप्तेर्गतिपूर्वकत्वमनुमीयते वेश्म २३
प्रतिपत्तित्वसामान्यात् ॥ यश ॥ प्रजापतेः ॥ सभां वेश्म प्रपद्य इत्यत्रैव परदेर्गत्यर्थः

स्वामीव्याख्यातत्वादेशः कार्यात्यये तदध्यक्षेणेति सूत्राभ्यां

बादरायणेऽमार्गसाध्यता मार्गसाध्यगतिपूर्वकत्वं परवेश्मप्राप्तेरिति पूर्वपक्षः ॥ अत्यर्थस्तु त
तत्र लोके न केनाम विदुषापराजितेत्यपराजिता पूरस्ति ब्रह्मणो हिरण्यगर्भस्य तेनैव प्रभु
णा निर्मितं हिरण्मयं वेश्म नास्ति तत्र तत्प्रतिपद्येते ॥ ब्रह्मचर्यसंपन्नो विद्वानिति ॥ अत्र पूर्वपक्षे
मुख्यत्वाद्दर्शनाच्चेति हेतुद्वयं पूर्वमेव दूषितः यत्तु प्रकरणाद्वेश्मप्राप्तिसंकल्पः परविषय इ
ति तत्र प्रजापतेः सभां वेश्म प्रपद्ये इति वाक्यश्रुतिभ्यां दुर्बलेन प्रकरणविच्छेदे वेश्मप्राप्तिसं
कल्पस्य कार्यब्रह्मसभादिविषयत्वावगमात् स्तुत्यर्थत्वेन वास्य परप्रकरणे कीर्तनं सगु
णविद्या हि गतिमपेक्ष्य प्रजापतिसभादिप्राप्तिफलहेतुरियं तु परविद्या गतिनिरपेक्षै
व निरतिशायफलहेतुरतो महतीति स्तुतिः तस्मात्कार्यब्रह्मप्राप्त्यर्थैव गतिरिति सिद्धं
एवमर्चिरादिगत्या गंतव्यं निरूप्य गंतॄन्निरूपयति ॥ अप्रतीकालंबनान्नयतीति बादरा

श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्

सू॰वृ॰ यणोभयथाऽदोषात्तत्क्रतुश्च ॥ किममानवः पुरुषः सर्वानुपासकान् ब्रह्मलोकं प्राप वृ॰
२४ यति ॥ उत प्रतीकोपासकभिन्नानिति संशये ॥ तत्र नियामकाभावात्सर्वानिति प्राप्ते ४
ब्रूमः ॥ प्रतीकोपासकभिन्नान्सर्वानुपासकान्नयत्यमानवः पुरुष इति बादरायण आचार्यो
मन्यते ॥ ननु तर्हि नियमः सर्वेषामित्यत्र सर्वोपासनेषु मार्गोपसंहारोक्तिविरोधस्तत्रा
ह ॥ उभयथाऽदोषादिति क्वचित्तदुपासकान्नयति क्वचिन्नेत्युभयथाभावाभ्युपगमे
दोषाभावादित्यर्थः ॥ अनियमन्यायस्य प्रतीकभिन्नविषयत्वादिति भावः ॥ नियामक
माह ॥ तत्क्रतुश्चेति क्रतुरुपासनं कार्यब्रह्मविषयक्रतुर्यस्योपासकस्यास्ति स तत्क्रतु
स्तया च यो यदुपासकः स तत्प्राप्नोतीति श्रुतिस्मृतिसिद्धत्वात्तदुपासकानामेव कार्य २४
ब्रह्मप्राप्तिरित्यर्थः ॥ प्रतीकोपासने तु नाम ब्रह्मेत्यादिषु ब्रह्मणः प्रतीकं प्रति विशेष

प्रतीकोपासकानां १

णत्वेन प्रतीकस्यैव प्राधान्यान्नैतदुपासकानां ब्रह्मोपासकत्वं येनास्युपासकानां तत्र ब्रह्मोपा
सकत्वे श्रुतिबलात् ब्रह्मप्राप्तिरिति ॥ विशेषं च दर्शयति ॥ किंच यावन्नाम्नो गतं तत्रास्य यथा
कामचारो भवतीति नाम प्रतीकोपासने फलादुत्तरवागाद्युपासनानामुत्कृष्टफलविशेषं द
र्शयति श्रुतिर्वाग्वाव नाम्नो भूयसीत्यादिश्रुतौ यः फलविशेषः प्रतीकानामुत्कर्षापकर्षवत्ता
नुपपत्त्येव युज्यते न तु सर्वत्रैकस्य ब्रह्मण उपास्यत्वे तस्माद्ब्रह्मोपासकानामेव ब्रह्मप्राप्तिर्न
प्रतीकोपासकानामिति सिद्धं ॥ इति श्री ब्रह्मसूत्रवृत्तौ चतुर्थाध्यायस्य तृतीयः पादः ॥ ३ ॥
एवं सगुणब्रह्मविदां प्राप्यमुक्त्वा निर्गुणब्रह्मविदां प्राप्यमाह ॥ संपद्याविर्भावः स्वेनशब्दात् ॥
त ॥ एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इ
ति श्रूयते ॥ तत्र संशयः ॥ यथा सुकृतिनः स्वीये न रूपांतरेण फलेनाभिनिष्पत्तिस्तथा निर्गु

ब्र०
२५

णाविर्भावोभिनिष्पत्तिरुतात्ममात्रेणाभिनिष्पत्तिरिति पूर्वपक्षे स्वर्गमोक्षयोरविशेषः। सिद्धान्ते
विशेष इति फलं॥ अत्र फलनिरूपणाद्ध्यायपादसंगत्योः स्फुटत्वं तत्र स्वर्गवन्मोक्षस्या
भिनिष्पत्तिः फलत्वाविशेषादिति प्राप्ते ब्रूमः॥ संपद्य स्वप्रकाशमात्मानं साक्षादनुभूयते नै
वात्ममात्रेणाविर्भावः। अत्रावस्थान्तरागमो भवति मुक्तः कुतः स्वेन रूपेणाभिनिष्पद्यत इति
स्वशब्दादित्यर्थः॥ फलत्वहेतुकानुमानं मोक्षनित्यत्वश्रुतिबाधितमिति॥ ननु स्वरूपात्म
कमोक्षस्य सदासत्त्वात्कः पुनः पूर्वावस्थातो विशेष इत्यत आह॥ मुक्तः प्रतिज्ञानात्॥
यः स्वरूपेणाभिनिष्पद्यते स सर्वानर्थविनिर्मुक्तः स्वप्रकाशनिरतिशयानंदात्मनावति
ष्ठते पूर्वं चावस्थात्रयकलुषितः संसारीवेति विशेषः॥ ननु स्वरूपाभिनिष्पन्नो मुक्त इति
कुतोवगम्यते॥ तत्राह प्रतिज्ञानादिति यत्रात्मापहतपाप्मेत्युपक्रम्य एतं त्वेव ते भू

च०
४

२५

योनुव्याख्यास्यामीति सकलदोषमुक्तस्यैवात्मनो व्याख्येयत्वेन प्रतिज्ञानादित्यर्थः। ननु कार्य
ज्योतिरूपसंपन्नस्य कथं मुक्तत्वमित्यत आह॥ आत्मा प्रकरणात्॥ अत्र ज्योतिरात्मैव न
भौतिकं तेजः यत्रात्मापहतपाप्मेत्यात्मप्रकरणादित्यर्थः॥ अविभागेन दृष्टत्वात्॥ परं ज्योति
रुपसंपद्य मुक्तो विद्वानित्युक्तं तं मुक्तमुपजीव्य संदिह्यते किं मुक्तो ब्रह्मभिन्नत्वेनावतिष्ठते
उत ब्रह्मात्मनैवेति॥ तत्र भिन्नत्वेनेति भ्रांतिं वारयति॥ अविभागेनेति निरतिशयानंदब्रह्म
त्मनैवावतिष्ठते मुक्तः कुतः दृष्टत्वात्॥ ब्रह्मैव सन् ब्रह्माप्येति॥ तत्त्वमसीत्यादिश्रुतिषु
अभेदस्य दृष्टत्वादित्यर्थः॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः॥ पूर्वसिद्धं ब्रह्माभिन्नं मुक्तमुप
जीव्य संदिह्यते स मुक्तो ब्राह्मो ब्रह्मकः॥ किं सत्येन सर्वज्ञत्वादिरूपेणावतिष्ठते उ
त शशविषाणवदसन्नैव सर्वज्ञत्वादिरिति सच्चिन्मात्रेणावतिष्ठते आहोस्विदुभयतोनिः

प्रपंचोपि व्यावहारिकसर्वज्ञत्वादिमानिति ॥ तत्राद्यं पूर्वपक्षमाह ॥ ब्राह्मेणेति ब्रह्मसंब-
धिना सत्येन सर्वज्ञत्वादिना सहावतिष्ठते ब्रह्मात्मको मुक्त इति जैमिनिराचार्यो मन्यते ॥ कुतः
उपन्यासविधिव्यपदेशेभ्यः ॥ उपन्यासउद्देशः स च सोन्वेष्टव्य इत्यादिविधानार्थमागतो ।
य आत्मापहतपाप्मेत्यादिरूपः विधिरज्ञातज्ञापनं ॥ स च तस्य सर्वेषु लोकेषु कामचा-
रो भवतीत्यादिरूपः ॥ उद्देशविधिविलक्षणो व्यपदेशः स च सर्ववित् सर्वेश्वर इत्यादि-
रूपः ॥ अयं हि नोद्देशः ॥ विध्यभावान्नापि विधिः ॥ सिद्धवन्निर्देशात् तत्र एभ्यो हेतुभ्यः प्र-
पंचरावात्मेति ॥ अथ द्वितीयं पूर्वपक्षमाह ॥ चितितन्मात्रेण तदात्मकत्वादित्यौडुलो-
मिः ॥ जीवात्मनस्तदात्मकत्वात् चिदेकरसत्वात् चितिमात्रेण चैतन्यमात्रात्मनावस्थि-
ति मुक्ते ब्रह्मात्मनि सर्वज्ञ इत्यादिशब्दा निरर्थकाः रावप्रयुज्यंत इत्यौडुलोमिराचार्यो मन्य-

ते ॥ सर्वज्ञत्वादीनां धर्माणां समसंभवात् धर्मिस्वरूपादन्यत्वभिन्नत्वेऽन्यत्वंतामिन्नत्वेवा तेषां गवाम्या-
वद्धर्मिवद्धर्मत्वानुपपत्तेरिति प्राप्ते सिद्धांतयति ॥ एवमप्युपन्यासात्पूर्वभावादविरोधं बाद-
रायणः ॥ एवं पारमार्थिकचैतन्यमात्रस्वरूपास्तु परमेपि पूर्वोपन्यासादिभ्यः ॥ पूर्वस्य ब्राह्म-
स्वरूपस्य सर्वज्ञत्वादेर्व्यवहारिकस्य भावात् ब्रह्मणेमुक्तात्मनः सप्रपंचत्वनिष्प्रपंचत्वयोर-
विरोधं बादरायण आचार्यो मन्यते ॥ अविद्यकधर्माणां सर्वज्ञत्वादीनामुपपत्तेर्नतेषांतु वस्तु-
त्वं तत एव सर्वात्मनाऽविद्यानिवृत्तौ विदेहकैवल्यं निष्प्रपंचमेव एतदभिप्रेत्योक्तं भगवता भा-
ष्यकारेण व्यवहारापेक्षयेति न दोषोपि षष्टानांमीशोपिव्यवस्तुदिर्मतामूलाभावादितिभावः
एवं परविद्याफलमभिधायापरविद्याफलं प्रपंचयितुमुपक्रमते संकल्पादेव तु तच्छ्रुतेः ॥
दहरविद्यायां श्रूयते स यदि पितृकामो भवति संकल्पादेवास्य पितरः ॥ समुत्तिष्ठंतीत्या

सूत्र॰ दितत्रसंशयः॥किंब्रह्मलोकस्यस्यविदुषोभोगहेतवःपित्रादयःसंकल्पादेवसिध्यंतिउत सू॰
२ पतांतरसहकृतात्संकल्पादिति॥तत्रलोकेभोगसाधनस्यप्रयत्नसाध्यत्वदर्शनान्नापिय ४
त्नसापेक्षेच्छातएवब्रह्मभूतस्यविदुषोविभूतिसिद्धिर्नकेवलेच्छातइतिप्राप्तेब्रूमः॥संकल्पा
देवास्यविदुषःपित्रादिविभूतिरितिप्राप्तिः॥कुतःसाधनांतरनिरासकेवकारश्रुतेः॥अन्यथान
कोऽलौकिकानुमानस्यबाधइति॥किंचयदिसंकल्पःसाधनांतरसापेक्षस्तर्हिःतदभावेविदु
षोऽवंध्यसंकल्पत्वासंभवोसत्यसंकल्पत्वंनस्यात्तत्संकल्पानुगुणसाधनांतरमिष्टमेवेति॥
अतएवचानन्याधिपतिः॥अतएवसत्यसंकल्पत्वादेवविद्वानऽनन्याधिपतिर्भवति
यदिविदुषःकश्चनाधिपतिःस्यात्तर्हितदधीनभोगस्यसंकल्पमात्रादसिद्धेः॥सत्यसंक
ल्पत्वंनस्यात्तस्मादीश्वरात्मकस्यविदुषः॥संकल्पादेवसर्वैश्वर्यप्राप्तिरितिसिद्धं॥अभावं २७

बादरिराहह्येवं॥संकल्पादेवेत्युक्तत्वाद्विदुषस्तावन्मनोस्तीत्यवगतंशारीरेंद्रियाणिसं
तिउतनसंति॥अत्राहोस्वित्संतिनसंतिसंदेहेयथासंकल्पादेवेत्येवकारेणउक्तत्वात्सा
धनांतराभावस्तथाबादरिराचार्यःशारीरेंद्रियाणामभावंमन्यते॥अहह्येवमाम्नायःम
नसैतान्कामान्पश्यन्रमतेयएतेब्रह्मलोकइतियदिविदुषःशरीरादिकंस्यात्तदाम
नसेतिविशेषणमन्ययोगव्यवच्छेदकमवधारणपरंचश्रुतेतिशकःपूर्वपक्षः॥पूर्वप
चा क्षांतरमाह॥भावंजैमिनिर्विकल्पामननात्॥शारीरेंद्रियाणांमनसैवभावंसत्त्वंजैमिनि
राचार्योमन्यतेएकधाभवतित्रिधाभवतीत्यादिनाविदुषोऽनेकधाभावविकल्पामननात्॥
नहिशरीरभेदंविनाकदाचिदेकधाभावःकदाचित्त्रिधाभावइत्याद्यनेकधाभावविकल्पः
संभवतीतिभावः॥सिद्धांतरमाह॥द्वादशाहवदुभयविधंबादरायणोऽतः॥अतएवमनसं

सूत्र० १८

तिविशेषणाद्विकल्प्यामननाच्चेति लिंगं गृह्यपाद्यदाशरीरादिसंकल्पस्तदा सशरीरेंद्रिया सू०
त्वं॥ यदा तु तत्संकल्प्याभावेस्तदाशरीरेंद्रियराहित्यमित्युभयविधं विदुषां भोग्यं बादराय ७
णाश्चाचार्यो मन्यते॥ द्वादशाहवत्॥ यथा द्वादशाहमृद्धिकामा उपेयुरित्युपायिचोदनाग
म्यत्वात्द्वादशाहस्य सत्रत्वं द्वादशाहेन प्रजाकामं याजयेदित्यहर्गणत्वे सति यजतिचो
दनागम्यत्वाद्हीनत्वं चैः उभयविधत्वं तद्वदित्यर्थः॥ ननु विदुषः शरीराद्यभावे कथं भो
गस्तत्राह॥ तन्वभावे संध्यवदुपपत्तेः॥ तनोः सेंद्रियशरीरस्याभावकाले संध्यवत्स्वप
स्थाने मानसिकविषयभोगो जायद्भोगविलक्षणस्तद्भोगः॥ कुतः मनसैतान्कामान्
पश्यन्रमत इति श्रुतेर्भोगमिसाध्यं नांतरं वा रयं त्याएवमेयोपपन्नेरित्यर्थः॥ ननु देहा
द्यभावेपि भोगसत्ते सशरीरतांगीकारो व्यर्थस्तत्राह॥ भावे जाग्रद्वत्॥ देहादिभावका २८

ले जाग्रद्भोगः स्वप्नभोगविलक्षणो भवतीत्यर्थः॥ ननु विकल्प्यामननलिंगेन विदुषोनेकश
शरीराणि संतीत्युक्तं तच्चायं निरात्मकेषु तेषु भोगायोगादित्याशंक्येदमाह॥ प्रदीपवदावे
शस्तथाहि दर्शयति॥ किं विदुषा सृज्यमानानि शरीराणि करुपंत्रवन्निरात्मकान्युत सात्मका
दिहेहवत्सात्मकानीति संदेहः॥ पूर्वपक्षे विदुष एकस्मिन्नेव देहे भोगः॥ सिद्धांते सर्वेषु पा
तिबोध्यं तत्रानाद्यंतःकरणपरिच्छिन्नस्यभोक्तुर्विदुषः शरीरांतरेषु प्रवेशायोगात्निरात्म
कानीति प्राप्ते ब्रूमः॥ विदुषा सृज्यमानेषु सेंद्रियमनस्सु बहुषु देहेषु विदुषश्चावेशोभिव्यक्तिः
विद्यासामर्थ्याद्युपपद्यते पुरातनांतःकरणपरिच्छेदस्याविद्यासंयोगसामर्थ्यात्तु व्यापकः
भूतस्य प्रतिबंधकत्वात्प्रदीपवत् यथा प्रदीप एकोऽनेकवर्तिषु प्रविशति तद्वत्ः विद्यानेः
नेकागंतुकांतःकरणद्वारा देहेषु प्रविशति॥ तथाहि॥ दर्शयति॥ स्वाप्त्वं एकधाभवति

सूवृ० त्रिधा भवति पंचधा सप्तधा नवधेत्यादि। यद्यपि विदुषः सर्वेषु देहेष्वेकत्वं दीपानां तु भिन्नत च० ४
२९ मिति वैषम्यमस्ति तथाप्युत्पादकदीपगतैकत्वं सादृश्यादुत्पन्नदीपेषूपचर्यत इति साम्यं
बोध्यं॥ तस्मात्सर्वाणि शरीराणि सात्मकान्येव। ननु विदुषो न शरीरं वेत्तं युक्तं तत्केन कं
पश्येदिति श्रुतेः ननु तद्वितीयमस्ति ततोन्यद्विभक्तं यत्पश्येदिति न विशेषविज्ञानाभावश्र
वणादित्यत आह॥ स्वाप्ययसंपत्योरन्यतरापेक्षमाविष्कृतं हि। सुषुप्तिपरममुक्त्यो।
रन्यतरापेक्षयेदं विशेषविज्ञानाभाववचनं हि यतः प्रकरणे द्वेवमाविष्कृतं सुषुप्तिप्र
करणेन तु तद्वितीयमस्ति ततोन्यदित्यादि। श्रुतं परममुक्त्यपेक्षया च तत्केतेत्यादि
तस्मात्त्वेवं सगुणविदः शरीराङ्गीकारे बाधकमित्यर्थः॥ तत्र न सुषुप्तौ द्वितीयं विभ।
क्तं न तत्सत्त्वं इत्यर्थः॥ योगिनां भौतिकेष्वेव स्वातंत्र्यं न भूतेष्वित्याह॥ जगद्व्यापारवर्जंप्र। २९

करणादसन्निहितत्वाच्च॥ पूर्वं संकल्पमात्रेण देहादिसर्गैश्वर्यमुक्तं विदुषस्तस्य जग
दुत्पत्त्यादावपवादो न क्रियते॥ किं विदुषोप्यैश्वर्यमीश्वरस्येव निरंकुशं उत सातिशयमिति
पूर्वपक्षे ईश्वरनानात्वं सिद्धांते तदेकत्वमिति बोध्यं तत्र विदुषोप्यन्याधिपतित्वादिरंकुशमै।
श्वर्यमिति प्राप्ते ब्रूमः॥ जगदुत्पत्त्यादिव्यापारवर्जं सातिशयमेवाणिमाद्यैश्वर्यं विदुषः।
जगद्व्यापारस्तु परमेश्वरस्यैव सृष्टिवाक्येषु सर्वज तस्यैव प्रकरणात् विदुषश्चात्र नामसन्निहि
तत्वात् नित्यसिद्धं हि परमेश्वरस्य निरंकुशमैश्वर्यं न कार्ये महाभूतसृष्टौ योगिनामशक्या।
त्वमप्याह॥ कथं वा विदुषः ईश्वरप्रसादापन्नमार्गं तु कर्मैश्वर्यं निरंकुशमिति वक्तुं शक्यं।
तस्मात्सातिशयमैश्वर्यं विदुषः॥ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमंडलस्थोक्तेः न त्वा
नोति स्वाराज्यमिति प्रत्यक्षात्सत्यापि ऐश्वर्योपदेशान्निरंकुशं विदुष ऐश्वर्यमिति चेन्न स्वा
प्नोति स्वाराज्यमिमादेर्योगिनां जगद्व्यापारे स्वातंत्र्यमिति चेन्न कुतः १

सू॰ञ॰ ३० धिकारिकमंडलस्थोक्तेः॥ अधिकारेतत्तद्व्यापारेनियोजयन्त्यादित्यादीनित्याधिकारिकः चं॰
सूर्यादिमंडलस्थः परमात्मातस्योक्तिरवाक्येआप्नोतिमनसस्पतिमित्यत्रप्राप्यतेनोक्तेर्वि ध
दुषःसातिशयमैश्वर्यमितिगम्यतेः॥ यदिपूर्ववाक्याद्वनिरतिशयमैश्वर्यमुक्तंतदेहमा॥
श्वरप्राप्तिवचनंव्यतियस्माद्दतःसातिशयमैश्वर्यंविदुषःननुपाधिव्यतिरिक्तस्यब्रह्मणो
ऽस्तत्वेकुतोऽयंविभागइत्यतआह॥ विकारावर्तिचतथाहिस्थितिमाह॥ सगुणेब्रह्मणिविका
रावर्तिनिनिर्गुणेस्वरूपमस्तितयोहिब्रह्मणिसगुणत्वयोः॥ स्थितिमाहश्रुतिः॥ एतावा
नस्यमहिमेतिसगुणत्वमुक्त्वातोज्यायांश्चपुरुषइतिनिर्गुणत्वमाहएतावानस्त्वशा
षेत्यादिरस्यपरस्यमहिमाविभूतिरित्यर्थः॥ अयंभावः॥ यथासगुणेस्थितंनिर्गुणस्व
रूपमुपासकोनप्राप्नोतितदुपासकत्वाभावात्तथातद्गतंजगत्सृष्टत्वादिकमप्यैश्वर्यं ३०

नप्राप्नोतितदुपास्त्यभावात्तदुपास्त्यभावश्चाश्रुतत्वाभावादिति॥ अत्रदृष्टांतार्थंनिर्गुणस्वरू
पमुक्तंतत्रप्रमाणांतरमाह॥ दर्शयतश्चैवंप्रत्यक्षानुमाने॥ एवंब्रह्मणोनिर्गुणत्वंश्रुतिस्मृ
तीदर्शयतः॥ नतत्रसूर्योभातिनचंद्रतारकमित्याद्याश्रुतिः॥ नतद्भासयतेसूर्यइत्याद्या
स्मृतिरिति॥ ननुपरमेश्वरस्यजगत्कर्तृत्वमुक्तंतत्समानशीलाश्चयोगिनइत्यतआह॥
भोगमात्रसाम्यलिंगाच्च॥ उपासकस्योपास्यदेवतोपासनभोगमात्रेणसाम्यंश्रुतंनज
गद्व्यापारेणतमाह॥ आपोयोवैखलुमीयंतेलोकोसावितितस्माल्लिंगाद्विदुषःसातिश
यमैश्वर्यंगम्यतइत्यर्थः॥ तंब्रह्मलोकस्यमुपासकंहिरण्यगर्भश्चाहआपोवैखल्वमृता
मय्योमयायामीयंतेभुज्यंतेतथाप्यसावमृतोदकलक्षणोलोकोभोग्यइत्यर्थः॥ ननुयदामैश्व
र्यमैश्वर्येणातिशयेनसहितंविदुषःऐश्वर्यंसातिशयंतर्हिलौकिकैश्वर्यवदनित्यंस्यात्तथा

सू०वृ० चविदुषोप्यावृत्तिः॥ प्रसज्येतेत्याशंक्याह यासिंधुर्भगवान् बादरायणः समाधत्ते॥ अना च०
३१ वृत्तिः शब्दादनावृत्तिः शब्दात्॥ येर्चिरादिमार्गेण ब्रह्मलोकं प्राप्तास्तेषामनावृत्तिरेव तेषां ४
न पुनरावृत्तिरित्यादिकमनुक्तमभिधायकशब्दादित्यर्थः॥ निर्गुणब्रह्मविदामावृत्तिशंकै
व नास्ति॥ यतः सगुणविद्यामपि निर्गुणाश्रयणे नैवानावृत्तिः नान्यथा॥ तस्माद्ब्रह्मवि
दां निरस्तानर्थव्रातस्वप्रमनिरतिशयानंदब्रह्मात्मनावस्थितिरिति सिद्धं॥ सूत्रावृत्तिः
शास्त्रसमाप्तिद्योतनार्था॥ यः सर्वस्फूर्तिदं दिविदिवंदिततत्तनुर्मायात्मनि ज्ञांतगेः सुतो
स्मिन्नमवपत्तने परिमितेकज्योतिरे॥ यः सर्वापरिपंथिसांगनयजप्रज्ञाप्रबाहां तज
प्रज्ञाजन्मसुखाकृतिः कृतिमिमां रामः समर्हणावतु नः॥१॥ अस्मिन्नपद्येनाध्यायचतुष्ट
यार्थः सूचितः॥ विदुषां कंठभूषेयं कृतावृत्तिर्मया प्रभो॥ व्यासवाक्यगिरसंदब्धा प्री ३१

तयेतेस्तु सर्वदा॥ इति श्रीपरमहंसपरिव्राजकाचार्यश्रीमन्मुकुंदगोविंदश्रीचरण
शिक्षितश्रीरामकिंकरधर्मकर्त्री ब्रह्मसूत्रवृत्तौ ब्रह्मामृतवर्षिण्यां चतुर्थस्याध्याय
स्य चतुर्थः पादः॥४॥ समाप्तोयं ग्रंथः॥ श्रीमच्छंकरभगवत्पादचरणारविंदमकरं
दमकरंदमधुव्रतसमवृत्तीभूतश्रीमद्ब्रह्मविद्यापूदातश्रीमनोविंदवाणीशिक्षितश्री
मज्जीवस्वरूपरामानंदसरस्वतीचरणारविंदे मधुकरीभूतो हं॥ परमात्मनेनम
कल्याणमस्तु॥ शुभंभवतु॥ श्रीरस्तु॥

सूत्र०
३२

चं०
४

461

॥ ॥ इतिसूत्रभाष्यसमाप्तः ॥ ॥
पत्र० ३१८

३२